भावार्थ—जो परद्रव्य में आत्मा का विकल्प करता है वह तो अज्ञानी है। और अपने आत्मा को ही अपना मानता है वह ज्ञानी है। ऐसा अग्नि ईंधन के दृष्टांत से दृढ़ किया है।

त्यजतु जगदिदानीं मोहमाजन्मलीढं रसयतु रसिकानां रोचनं ज्ञानमुद्यत्।
इहकथमपि नात्मानात्मना साकमेकः किल कलयति काले क्वापि तादात्म्यवृत्तिं ॥ २२ ॥

अथाप्रतिबुद्धबोधनाय व्यवसायः—

अण्णाणमोहिदमदी मज्झमिणं भणदि पुग्गलं दव्वं।
बद्धमबद्धं च तहा जीवो बहुभावसंजुत्तो ॥ २३ ॥
सव्वण्हुणाणदिट्ठो जीवो उवओगलक्खणो णिच्चं।
कह सो पुग्गलदव्वी-भूदो जं भणसि मज्झमिणं ॥ २४ ॥
जदि सो पुग्गलदव्वी-भूदो जीवत्तमागदं इदरं।
तो सत्तो वुत्तुं जे मज्झमिणं पुग्गलं दव्वं ॥ २५ ॥

अज्ञानमोहितमतिर्ममेदं भणति पुद्गलं द्रव्यं।
बद्धमबद्धं च तथा जीवो बहुभावसंयुक्तः ॥ २३ ॥
सर्वज्ञज्ञानदृष्टो जीव उपयोगलक्षणो नित्यं।
कथं स पुद्गलद्रव्यीभूतो यद्भणसि ममेदं ॥ २४ ॥
यदि स पुद्गलद्रव्यीभूतो जीवत्वमागतमितरत्।
तच्छक्तो वक्तुं यन्ममेदं पुद्गलं द्रव्यं ॥ २५ ॥

अथाप्रतिबुद्धसंबोधनार्थं व्यवसायः क्रियते;—**अण्णाणेत्यादि** व्याख्यानं क्रियते। **अण्णाणमोहिदमदी** अज्ञानमोहित-मतिः **मज्झमिणं भणदि पुग्गलं दव्वं** ममेदं भणति पुद्गलं द्रव्यं। कथंभूतं। **बद्धमबद्धं च** बद्धं संबद्धं देहरूपं।

आगे इसी अर्थ का कलश रूप काव्य कहते है—**त्यजतु** इत्यादि। **अर्थ**—हे लोक के जीवो, अनादि संसार से लेकर अब तक अनुभव किए मोह को अब तो छोड़ो और रसिक जनों को रुचने वाला उदय हुआ जो ज्ञान उसे आस्वादन करो; क्योंकि इस लोक में आत्मा है वह परद्रव्य के साथ किसी समय में प्रगट रीति से एकत्व को किसी प्रकार प्राप्त नही होता। इसलिए आत्मा एक है, वह अन्य द्रव्य के साथ एकरूप नहीं होता।

भावार्थ—आत्मा परद्रव्य से किसी प्रकार किसी काल में एकता के भाव को नहीं प्राप्त होता। इसलिए आचार्य ने ऐसी प्रेरणा की है कि अनादि से लगा हुआ जो परद्रव्य से मोह है उस एक-पनेरूप मोह को अब छोड़ो और ज्ञान का आस्वादन करो। मोह वृथा है झूठा है, दुःख का कारण है। ऐसा भेद विज्ञान बतलाया है। २०।२१।२२।

आगे अप्रतिबुद्ध के समझाने के लिये उद्यम करते हैं;—[**अज्ञानमोहितमतिः**] अज्ञान से जिसकी मति मोहित है ऐसा [**जीवः**] जीव इस तरह [**भणति**] कहता है कि [**इदं**] यह [**बद्धं च**

युगपदनेकविधस्य बंधनोपाधेः सन्निधानेन प्रधावितानामस्वभावभावानां संयोगवशाद्वि-चित्रोपाश्रयोपरक्तः स्फटिकोपल इवात्यंततिरोहितस्वभावभावतया अस्तमितसमस्तविवेकज्योति-र्महता स्वयमज्ञानेन विमोहितहृदयो भेदमकृत्वा तानेवास्वभावभावान् स्वीकुर्वाणः पुद्गलद्रव्यं ममे-दमित्यनुभवति किलाप्रतिबुद्धो जीवः। अथायमेव प्रतिबोध्यते रे दुरात्मन्, [1]आत्मपंसन्, जहीहि जहीहि परमाविवेकघस्मरसतृणाभ्यवहारित्वं। दूरनिरस्तसमस्तसंदेहविपर्यासानध्यवसायेन विश्वैक-ज्योतिषा सर्वज्ञज्ञानेन स्फुटीकृतं किल नित्योपयोगलक्षणं जीवद्रव्यं। तत्कथं पुद्गलद्रव्यीभूतं येन पुद्गलद्रव्यं ममेदमित्यनुभवसि। यतो यदि कथंचनापि जीवद्रव्यं पुद्गलद्रव्यीभूतं स्यात्।

अबद्धं च असंबद्धं देहाद्भिन्नं पुत्रकलत्रादि **तहा** तथा **जीवे** जीवद्रव्ये **बहुभावसंजुत्तो** मिथ्यात्वरागादिबहुभाव-संयुक्तः। अज्ञानी जीवो देहपुत्रकलत्रादिकं परद्रव्यं ममेदं भणतीत्यर्थः। इति प्रथमगाथा गता। अथास्य बहिरात्मनः संबो-धनं क्रियते—रे दुरात्मन् **सव्वण्हु** इत्यादि **सव्वण्हुणाणदिट्ठो** सर्वज्ञज्ञानदृष्टः **जीवो** जीवपदार्थः। कथंभूतो दृष्टः। **उवओगलक्खणो** केवलज्ञानदर्शनोपयोगलक्षणः **णिच्चं** नित्यं सर्वकालं **कह** कथं **सो** स जीवः **पुग्गलदव्वी-भूदो** पुद्गलद्रव्यं जातः न कथमपि **जं** येन कारणेन **भणसि** भणसि त्वं **मज्झमिणं** ममेदं पुद्गलद्रव्यं। इति

अबद्धं] शरीरादि बद्धद्रव्य, धनधान्यादि अबद्ध परद्रव्य [**मम**] मेरा है। वह जीव [**बहुभावसंयुक्तः**] मोह राग द्वेषादि बहुत भावों से सहित है। आचार्य कहते हैं जो [**जीवः**] जीव [**सर्वज्ञज्ञानदृष्टः**] सर्वज्ञ के ज्ञान में देखा गया [**नित्यं**] नित्य [**उपयोगलक्षणः**] उपयोग लक्षण वाला है [**सः**] वह [**पुद्गलद्रव्यीभूतः**] पुद्गलद्रव्यरूप [**कथं**] कैसे हो सकता है ? [**यत्**] जो [**भणसि**] तू कहता है कि [**इदं मम**] यह पुद्गल द्रव्य मेरा है। [**यदि**] यदि [**सः**] जीवद्रव्य [**पुद्गलद्रव्यीभूतः**] पुद्गलद्रव्यरूप हो जाय तो [**इतरत्**] पुद्गलद्रव्य भी [**जीवत्वं**] जीवपने को [**आगतं**] प्राप्त हो जायगा। यदि ऐसा हो जाय [**तत्**] तो [**वक्तुं शक्तः**] तुम कह सकते हो [**यत्**] कि [**इदं पुद्गलद्रव्यं**] यह पुद्गलद्रव्य [**मम**] मेरा है (किन्तु ऐसा नहीं है)।

टीका—अज्ञानी जीव पुद्गलद्रव्य को "यह मेरा है" ऐसा अनुभव करता है। वह अज्ञानी अत्यंत आच्छादित हुए अपने स्वभाव से जिसकी समस्त भेदज्ञान रूप ज्योति अस्त हो गई है, महाअज्ञान से जिसका हृदय अपने आप ही विमोहित है, भेदज्ञान के विना अपना और पर का भेद नहीं करके जो अपने स्वभाव नहीं हैं ऐसे विभावों को अपने करता है। क्योंकि परभावों के सम्बन्ध से अपना स्वभाव अत्यंत छिप गया है वे परभाव एक समय में अनेक प्रकार के बन्धन की उपाधि की अतिनिकटता से प्राप्त हुए हैं। जैसे स्फटिकपाषाण में अनेक तरह के वर्ण की निकटता से अनेकरूपता दीखती है स्फटिक का निज श्वेत निर्मल भाव नहीं दीखता। उसी तरह कर्म की उपाधि से आत्मा का शुद्ध स्वभाव आच्छादित हो रहा है, वह नहीं दीखता। इसी कारण वह पुद्गलद्रव्य को अपना मानता है। ऐसे

१ आत्म-विनाशक।

पुद्गल द्रव्यश्च जीवद्रव्यीभूतं स्यात् तदैव लवणस्योदकमिव ममेदं पुद्गलद्रव्यमित्यनुभूतिः किल घटेत तत्तु न कथंचनापि स्यात्। तथाहि—यथा क्षारत्वलक्षणं लवणमुदकीभवत् द्रवत्वलक्षणमुदकं च लवणीभवत् क्षारत्वद्रवत्वसहवृत्त्यविरोधादनुभूयते, न तथा नित्योपयोगलक्षणं जीवद्रव्यं पुद्गलद्रव्यीभवत् नित्यानुपयोगलक्षणं पुद्गलद्रव्यं च जीवद्रव्यीभवद् उपयोगानुपयोगयोः प्रकाशतमसोरिव सहवृत्तिविरोधादनुभूयते। तत्सर्वथा प्रसीद विबुध्यस्व, स्वद्रव्यं ममेदमित्यनुभव ॥ २३।२४।२५ ॥

द्वितीया गाथा गता। **जदि** इत्यादि—**जदि** यदि चेत् **सो** स जीवः **पुग्गलदव्वीभूदो** पुद्गलद्रव्यं जातः **जीवो** जीवः। **जीवत्तं** जीवत्वं **आगदं** आगत प्राप्तं **इदरं** इतरत् शरीरपुद्गलद्रव्यं **तो सक्का वुत्तं** ततः शक्य वक्तु **जे** अहो अथवा यस्मात्कारणात् **मज्झमिणं पुग्गलं दव्वं** ममेदं पुद्गलद्रव्यमिति। नचैवं यथा वर्षासु लवणमुदकीभवति ग्रीष्मकाले जलं लवणीभवति। तथा यदि चैतन्यं विहाय जीवद्रव्य पुद्गलद्रव्यस्वरूपेण परिणमति पुद्गलद्रव्य च मूर्तत्वमचेतनत्वं विहाय चिद्रूपं चामूर्तत्व च भवति तदा भवदीयवचनं सत्यं भवति। रे दुरात्मन् न च तथा, प्रत्यक्षविरोधात्। ततो जीवद्रव्यं देहाद्भिन्नममूर्तं शुद्धबुद्धैकस्वभावं सिद्धमिति। एवं देहात्मनोर्भेदज्ञानं ज्ञात्वा मोहोदयोत्पन्नसमस्त-

---

अज्ञानी को समझाते है कि रे दुरात्मन्, आत्मा का घातक, तू परम अविवेक से जैसे तृणसहित सुन्दर आहार को हस्ती आदि पशु खाता है उसी तरह के खाने का स्वभाव छोड़-छोड़। जो सर्वज्ञ के ज्ञान से प्रकट किया नित्य उपयोग स्वभावरूप जीवद्रव्य वह कैसे पुद्गलरूप हो गया जिससे कि तू "यह पुद्गल मेरा है" ऐसा अनुभव करता है। कैसा है सर्वज्ञ का ज्ञान जिसने समस्त संदेह विपर्यय अनध्यवसाय दूर कर दिये हैं समस्त वस्तु के प्रकाशने को एक अद्वितीय ज्योति है। ऐसे ज्ञान से दिखलाया गया है। और कदाचित् किसी प्रकार जैसे लवण तो जलरूप तथा जल लवण रूप हो जाता है उसी प्रकार जीवद्रव्य तो पुद्गल हो जाय तथा पुद्गलद्रव्य जीवरूप हो जाय तो तेरी "पुद्गलद्रव्य मेरा है" ऐसी अनुभूति बन जाय ऐसा तो किसी तरह भी द्रव्य स्वभाव बदल नहीं सकता। यही दृष्टांत से अच्छी तरह बतलाते है जैसे क्षार स्वभाव वाला लवण तो जल रूप हुआ दीखता है और द्रवत्वलक्षण वाला जल लवण रूप हुआ देखा जाता है क्योंकि लवण का क्षारपना तथा जल का द्रवपना इन दोनों के साथ रहने में अविरोध है इसमें कोई बाधा नहीं है। उसी तरह नित्य उपयोग लक्षण वाला जीवद्रव्य तो पुद्गलद्रव्य हुआ देखने मे नहीं आता और नित्य अनुपयोग (जड) लक्षण वाला पुद्गलद्रव्य जीवद्रव्य रूप हुआ नहीं दीखता क्योंकि प्रकाश तथा अन्धकार इन दोनों की तरह उपयोग तथा अनुपयोग के एक साथ रहने का विरोध है, जड चेतन ये दोनों किसी समय भी एक नहीं हो सकते। इसलिए तू सब तरह से प्रसन्न हो अर्थात् अपना चित्त उज्ज्वल कर सावधान हो, अपने ही द्रव्य को अपने अनुभव रूप कर, ऐसा श्री गुरुओं का उपदेश है।

भावार्थ—यह अज्ञानी जीव पुद्गलद्रव्य को अपना मानता है उसको उपदेश कर सावधान किया है कि सर्वज्ञ ने ऐसा देखा है कि जड और चेतनद्रव्य ये दोनों सर्वथा पृथक् पृथक् हैं कदाचित् किसी प्रकार से भी एक रूप नहीं होते। इस कारण हे अज्ञानी, तू परद्रव्य को एक रूप से मानना छोड़ दे, ऐसा वृथा मानने से कुछ लाभ नहीं है।

अयि कथमपि मृत्वा तत्त्वकौतूहली सन् अनुभव भव मूर्तेः पार्श्ववर्ती मुहूर्तं ।
पृथगथ विलसंतं स्वं समालोक्य येन त्यजसि झगिति मूर्त्या साकमेकत्वमोहं ॥ २३ ॥

विकल्पजालं त्यक्त्वा निर्विकारचैतन्यचमत्कारमात्रे निजपरमात्मतत्त्वे भावना कर्तव्येति तात्पर्यं । इत्यप्रतिबुद्धसंबोधनार्थं पंचमस्थले गाथात्रयं गतं ॥ २३ । २४ । २५ ॥ अथ पूर्वपक्षपरिहाररूपेण गाथाष्टकं कथ्यते, तत्रैकगाथायां पूर्वपक्षः गाथाचतुष्टये निश्चयव्यवहारसमर्थनरूपेण परिहारः । गाथात्रये निश्चयस्तुतिरूपेण परिहार इति षष्ठस्थले समुदायपातनिका । तद्यथा प्रथमतस्तावत् यदि जीवशरीरयोरेकत्वं न भवति तदा तीर्थकराचार्यस्तुतिर्वृथा भवतीत्यप्रतिबुद्धशिष्यः पूर्वपक्षं करोति;— **जदि जीवो ण सरीरं** हे भगवन् यदि जीवः शरीरं न भवति **तित्थयरायरियसंथुदी चेव** तर्हि "द्वौ कुंदेंदुतुषारहारधवलावित्यादि" तीर्थंकरस्तुति "देसकुलजाइसुद्धा" इत्याचार्यस्तुतिश्च **सव्वावि हवदि मिच्छा** सर्वापि भवति मिथ्या **तेण दु आदा हवदि देहो** तेन त्वात्मा भवति देहः । इति ममैकांतिकी प्रतिपत्तिः । एवं पूर्वपक्षगाथा गता ॥ २६ ॥ हे शिष्य यदुक्तं त्वया तन्न घटते यतो निश्चयव्यवहारनयपरस्परसाध्यसाधकभावं न जानासि त्वमिति.—**ववहारणयो भासदि** व्यवहारनयो भाषते ब्रूते । किं ब्रूते । **जीवो देहो य हवदि खलु इक्को** जीवो देहश्च भवति खल्वेक. **ण दु णिच्छयस्स जीवो देहो य कदावि एकट्ठो** न तु निश्चयस्याभिप्रायेण जीवो देहश्च कदाचित्काले एकार्थ. एको भवति । यथा कनककलधौतयो समावर्त्तितावस्थायां व्यवहारेणैकत्वेपि निश्चयेन भिन्नत्वं तथा जीवदेहयोरिति भावार्थ. । तत कारणात् व्यवहारनयेन देहस्तवनेनात्मस्तवनं युक्तं भवतीति नास्ति दोषः ॥ २७ ॥ तथाहि:—**इणमण्णं जीवादो देहं पुग्गलमयं थुणित्तु मुणी** इदमन्यद्भिन्नं जीवात्सकाशाद्देहं पुद्गलमय स्तुत्वा मुनिः । **मण्णदि हु संथुदो वंदिदो मए केवली भयवं** पश्चाद्व्यवहारेण मन्यते संस्तुतो वंदितो मया केवली भगवानिति । यथा सुवर्णरजतयोरेकत्वे सति शुक्लं सुवर्णमिति व्यवहारो न निश्चयः तथा शुक्लरक्तोत्पलवर्ण. केवलिपुरुष इत्यादिदेहस्तवनेन व्यवहारेणात्मस्तवनं भवति न निश्चयनयेनेति तात्पर्यार्थ. ॥ २८ ॥ अथ निश्चयनयेन शरीरस्तवने केवलिस्तवनं न भवतीति दृढयतिः—**तं णिच्छये ण जुज्जदि** तत्पूर्वोक्तदेहस्तवने सति केवलिस्तवनं निश्चयेन न युज्यते । कथमिति चेत् । **ण सरीरगुणा हि होंति केवलिणो** यतः कारणाच्छरीरगुणा

अब इसी अर्थ का कलशरूप काव्य कहते हैं—**अयि** इत्यादि । **अर्थ**—हे भाई, तू किसी तरह भी महान् कष्ट से अथवा मरणावस्था को प्राप्त हुआ भी तत्त्वों का कौतूहली हुआ इस शरीरादि मूर्तद्रव्य का एक मुहूर्त (४८ मिनट) अपने को पड़ौसी मानकर आत्मा का अनुभव कर, जिससे कि अपने आत्मा को विलास रूप सर्व परद्रव्यों से पृथक् देखकर इस शरीरादि मूर्तिक पुद्गलद्रव्य के साथ एकत्व के मोह को शीघ्र ही छोड़ सके ।

भावार्थ—यदि यह आत्मा दो घड़ी पुद्गलद्रव्य से भिन्न अपने शुद्धस्वरूप का अनुभव करें उसमें लीन होवे और परीषह (कष्ट) आने पर भी विचलित न हो तो घातिकर्म का नाश कर केवलज्ञान उत्पन्न करके मोक्ष को प्राप्त हो जाय । आत्मानुभव का ऐसा माहात्म्य है, तब मिथ्यात्व का नाश कर सम्यग्दर्शन की प्राप्ति होना तो सुगम है । इसलिए श्री गुरुओं ने यही प्रधानता से उपदेश दिया है ॥ २३।२४।२५ ॥

अथाहाप्रतिबुद्धः—

जदि जीवो ण सरीरं तित्थयरायरियसंथुदी चेव ।
सव्वावि हवदि मिच्छा तेण दु आदा हवदि देहो ॥ २६ ॥

यदि जीवो न शरीरं तीर्थकराचार्यसंस्तुतिश्चैव ।
सर्वापि भवति मिथ्या तेन तु आत्मा भवति देहः ॥ २६ ॥

यदि य एवात्मा तदेव शरीरं पुद्गलद्रव्यं न भवेत्तदा—

कांत्यैव स्नपयंति ये दशदिशो धाम्ना निरुन्धंति ये
धामोद्दाममहस्विनां जनमनो मुष्णंति रूपेण ये ।
दिव्येन ध्वनिना सुखं श्रवणयोः साक्षात्क्षरंतोऽमृतं
वंद्यास्तेऽष्टसहस्रलक्षणधरास्तीर्थेश्वराः सूरयः ॥ २४ ॥

इत्यादिका तीर्थकराचार्य्यस्तुतिः समस्तापि मिथ्या स्यात् । ततो य एवात्मा तदेव शरीरं पुद्गलद्रव्यम् । इति ममैकान्तिकी प्रतिपत्तिः ॥ २६ ॥

शुक्लकृष्णादयः केवलिनो न भवति । तर्हि कथ केवलिनः स्तवनं भवति ? **केवलिगुणे थुणदि जो सो तच्चं केवलिं थुणदि** केवलिगुणान् अनन्तज्ञानादीन् स्तौति यः स तत्वं वास्तवं स्फुटं वा केवलिन स्तौति । यथा शुक्लवर्णरजत-

---

आगे अप्रतिबुद्ध (अज्ञानी) जीव का स्वरूप निर्दिष्ट करते हुए कहते है—अप्रतिबुद्ध कहता है कि **[यदि]** जो **[जीवः]** जीव है वह **[शरीरं न]** शरीर नहीं है तो **[तीर्थकराचार्यसंस्तुतिः]** तीर्थकर—आचार्यों की स्तुति करना है वह **[सर्वापि]** सब ही **[मिथ्या भवति]** मिथ्या हो जाय **[तेन तु]** इसलिए हम समझते हैं कि **[आत्मा]** आत्मा **[देहः चैव]** यह देह ही **[भवति]** है ।

टीका—जो आत्मा है वह पुद्गलद्रव्य स्वरूप यह शरीर ही है । ऐसा न हो तो तीर्थंकर आचार्यों की जो स्तुति की गई है वह सब मिथ्या हो जायगी । वह स्तुति इस तरह है । **कांत्यैव** इत्यादि । **अर्थ**—'वे तीर्थंकर सूरि (मोक्षमार्गोपदेशक) वंदने योग्य हैं जो अपने शरीर की कांति से दशों दिशाओं को स्नान कराते हैं—निर्मल करते हैं और अपने तेज से उत्कृष्ट तेज वाले सूर्यादिक के तेज को भी छिपा देते हैं । वे अपने रूप से लोकों का मन हर लेते हैं और दिव्य ध्वनि (वाणी) से भव्यों के कानों में साक्षात् सुख अमृत बरसाते है तथा एक हजार आठ लक्षणों को धारण करते हैं । इत्यादिक तीर्थकरों की स्तुति है वह सभी मिथ्या ठहरेगी । इसलिये हमारे तो यही एकांत से निश्चय है कि आत्मा है वह शरीर ही है पुद्गल द्रव्य ही है । ऐसा अप्रतिबुद्ध ने कहा । उसको आचार्य उत्तर देते हैं कि इस तरह नहीं है, तूने नयविभाग नहीं समझा है ॥ २६ ॥

नैवंनय विभागानभिज्ञोऽसि—

ववहारणयो भासदि जीवो देहो य हवदि खलु इक्को ।
ण दु णिच्छयस्स जीवो देहो य कदावि एकट्ठो ॥ २७ ॥

व्यवहारनयो भाषते जीवो देहश्च भवति खल्वेकः ।
न तु निश्चयस्य जीवो देहश्च कदाप्येकार्थः ॥ २७ ॥

इह खलु परस्परावगाढावस्थायामात्मशरीरयोः समावर्तितावस्थायां कनककलधौतयो-रेकस्कंधव्यवहारवद्व्यवहारमात्रेणैवैकत्वं न पुनर्निश्चयतः । निश्चयतो ह्यात्मशरीरयोरुपयोगानुपयोगस्वभावयोः कनककलधौतयोः पीतपांडुरत्वादिस्वभावयोरिवात्यंतव्यतिरिक्तत्वेनैकार्थत्वानुपपत्तेः नानात्वमेवेत्येवं हि किल नयविभागः । ततो व्यवहारनयेनैव शरीरस्तवनेनात्मस्तवनमुपपन्नं ॥ २७ ॥

शब्देन सुवर्णं न भण्यते तथा शुक्लादिकेवलिशरीरस्तवनेन चिदानंदैकस्वभावं केवलिपुरुषस्तवनं निश्चयनयेन न भवतीत्यभिप्राय ॥ २६ ॥ अथ शरीरप्रभुत्वेपि सत्यात्मनः शरीरस्तवनेनात्मस्तवनं न भवति निश्चयनयेन । तत्र दृण्टातमाह यथा प्राकारोपवनखातिकादिनगरवर्णने कृतेपि नैव राज्ञो वर्णना कृताभवति तथा शुक्लादिदेहगुणे स्तूयमानेप्यनंतज्ञानादिकेवलिगुणाः स्तुता न भवंतीत्यर्थः । इति निश्चयव्यवहाररूपेण गाथाचतुष्टयं गतं ॥ ३० ॥

वह नयविभाग ऐसा है उसको गाथा द्वारा बतलाते हैं;— **[व्यवहारनयः]** व्यवहारनय तो **[भाषते]** ऐसा कहता है कि **[जीवः च देहः]** जीव और देह **[एकः खलु]** एक ही **[भवति]** है **[च]** और **[निश्चयनयस्य]** निश्चयनय का कहना है कि **[जीवः देहः तु]** जीव और देह ये दोनों तो **[कदापि]** कभी **[एकार्थः]** एक पदार्थ **[न]** नहीं हो सकते ।

टीका—जैसे इस लोक में सुवर्ण और चांदी को गला कर एक करने से एक पिंड का व्यवहार होता है, उसी तरह आत्मा के और शरीर के परस्पर एक जगह रहने की अवस्था होने से एकत्व का व्यवहार होता है । इस तरह व्यवहारमात्र से ही आत्मा और शरीर का एकत्व है परंतु निश्चय से एकत्व नहीं है; क्योंकि पीले और सफेद स्वभाव वाले सोना चांदी हैं, उनको जब निश्चय से विचारा जाय तब अत्यंत भिन्नता होने से एक पदार्थ की असिद्धि है, इसलिये अनेकरूपता ही है । उसी तरह आत्मा और शरीर उपयोग तथा अनुपयोग स्वभाव वाले हैं । उन दोनों के अत्यंत भिन्नता होने से एक पदार्थ की प्राप्ति नहीं है इसलिये अनेकता ही है । ऐसा यह प्रकट नयविभाग है । इस कारण व्यवहारनय से शरीर की स्तुति करने से ही आत्मा की स्तुति हो सकती है ।

भावार्थ—व्यवहारनय तो आत्मा और शरीर को एक कहता है और निश्चयनय भिन्न कहता है, इसलिये व्यवहारनय से शरीर के स्तवन करने से आत्मा का स्तवन माना जाता है ॥ २७ ॥

तथाहि;—

इणमण्णं जीवादो देहं पुग्गलमयं थुणित्तु मुणी ।
मण्णदि हु संथुदो वंदिदो मए केवली भयवं ॥ २८ ॥

इममन्यं जीवाद्देहं पुद्गलमयं स्तुत्वा मुनिः ।
मन्यते खलु संस्तुतो वंदितो मया केवली भगवान् ॥ २८ ॥

यथा कलधौतगुणस्य पांडुरत्वस्य व्यपदेशेन परमार्थतोऽतत्स्वभावस्यापि कार्त्तस्वरस्य व्यवहारमात्रेणैव पांडुरं कार्त्तस्वरमित्यस्ति व्यपदेशः । तथा शरीरगुणस्य शुक्ललोहितत्वादेः स्तवनेन परमार्थतोऽतत्स्वभावस्यापि तीर्थंकरकेवलिपुरुषस्य व्यवहारमात्रेणैव शुक्ललोहितस्तीर्थंकरकेवलिपुरुष इत्यस्ति स्तवनं । निश्चयनयेन तु शरीरस्तवेनेनात्मस्तवनमनुपपन्नमेव ॥ २८ ॥

अथानंतरं यदि देहगुणस्तवनेन निश्चयस्तुतिर्न भवति तर्हि कीदृशी भवतीति पृष्टे सति द्रव्येंद्रियभावेंद्रियपंचेंद्रियविषयान् स्वसंवेदनलक्षणभेदविज्ञानेन जित्वा योसौ शुद्धमात्मानं संचेतयते स जिन इति जितेंद्रिय इति सा चैव निश्चयस्तुतिः परिहारं ददाति । **जो इन्दिये जिणत्ता णाणसहावाधिअं मुणदि आदं** यः कर्त्ता द्रव्येंद्रियभावेंद्रियपंचेंद्रियविषयान् जित्वा शुद्धज्ञानचेतनागुणेनाधिकं परिपूर्णं शुद्धात्मानं मनुते जानात्यनुभवति संचेतयति

यही बात आगे की गाथा में व्यक्त करते हैं;—**[जीवात् अन्यं]** जीव से भिन्न **[इमं पुद्गलमयं देहं]** इस पुद्गलमयी देह की **[स्तुत्वा]** स्तुति करके **[मुनिः]** साधु **[मन्यते खलु]** असल में ऐसा मानता है कि **[मया]** मैंने **[केवलीभगवान्]** केवली भगवान् की **[स्तुतः]** स्तुति की और **[वंदितः]** वंदना की ।

टीका—जैसे चांदी के गुण श्वेतता के नाम से सुवर्ण को भी श्वेत कहते हैं सो व्यवहार मात्र से कहते है । परमार्थ से विचारा जाय तब सुवर्ण का स्वभाव सफेद नहीं है, पीला है; उसी तरह से शुक्ल रक्तपना आदिक शरीर के गुण हैं, उसके स्तवन से तीर्थंकर केवली पुरुषों को 'शुक्ल हैं, रक्त हैं' ऐसा स्तवन में कहते हैं सो यह स्तवन व्यवहारमात्र है। परमार्थ से विचारा जाय तब शुक्लरक्तपना तीर्थंकर केवली पुरुष का स्वभाव नहीं है । इस कारण निश्चयनय से शरीर का स्तवन करने से आत्मा का स्तवन नहीं बन सकता ।

प्रश्न—व्यवहारनय को असत्यार्थ कहा है और शरीर जड़ है सो व्यवहार के आश्रय जड़ की स्तुति का क्या फल है । **उत्तर**—व्यवहारनय सर्वथा असत्यार्थ नहीं है निश्चय को प्रधान कर असत्यार्थ कहा है, छद्मस्थ (अल्पज्ञानी) को अपना परका आत्मा साक्षात् दीखता नहीं है शरीर ही दीखता है, उसकी शांतरूप मुद्रा को देख अपने भी शांतभाव हो जाते हैं । ऐसा उपकार जान शरीर के आश्रय से भी स्तुति करता है, शांतमुद्रा देख अन्तरंग में वीतरागभाव का निश्चय होता है यह भी उपकार है ।।२८।।

तथाहि :—

तं णिच्छये ण जुज्जदि ण सरीरगुणा हि होंति केवलिणो ।
केवलिगुणो थुणदि जो सो तच्चं केवलिं थुणदि ॥ २६ ॥

तन्निश्चये न युज्यते न शरीरगुणा हि भवंति केवलिनः ।
केवलिगुणान् स्तौति यः स तत्त्वं केवलिनं स्तौति ॥ २६ ॥

यथा कार्त्तस्वरस्य कलधौतगुणस्य पांडुरत्वस्याभावान्न निश्चयतस्तद्व्यपदेशेन व्यपदेशः कार्तस्वरगुणस्य व्यपदेशेनैव कार्तस्वरस्य व्यपदेशात्, तथा तीर्थंकरकेवलिपुरुषस्य शरीरगुणस्य शुक्ललोहितत्वादेरभावान्न निश्चयतस्तत्स्तवनेन स्तवनं, तीर्थंकरकेवलिपुरुषगुणस्य स्तवनेनैव तीर्थंकरकेवलिपुरुषस्य स्तवनात् ॥ २६ ॥

कथं शरीरस्तवनेन तदधिष्ठातृत्वादात्मनो निश्चयेन स्तवनं न युज्यत इति चेत्:—

णयरम्मि वण्णिदे जह ण वि रण्णो वण्णणा कदा होदि ।
देहगुणे थुव्वंते ण केवलिगुणा थुदा होंति ॥ ३० ॥

नगरे वर्णिते यथा नापि राज्ञो वर्णना कृता भवति ।
देहगुणे स्तूयमाने न केवलिगुणाः स्तुता भवंति ॥ ३० ॥

तं खलु जिदिंदियं ते भणंति जे णिच्छिदा साहू तं पुरुषं खलु स्फुटं जितेंद्रियं भणंति ते साधवः । के ते । ये निश्चिताः निश्चयज्ञा इति । किंच ज्ञेयाः स्पर्शादिपंचेंद्रियविषयाः ज्ञायकानि स्पर्शनादिद्रव्येंद्रियाभावेंद्रियाणि

ऊपर की बात को गाथा से कहते हैं :—[तत्] वह स्तवन [निश्चये] निश्चय में [न युज्यते] ठीक नहीं है [हि] क्योंकि [शरीरगुणाः] शरीर के गुण [केवलिनः] केवली के [न भवंति] नहीं हैं । [यः] जो [केवलिगुणान्] केवली के गुणों की [स्तौति] स्तुति करता है [स] वही [तत्त्वं] परमार्थ से [केवलिनं] केवली की [स्तौति] स्तुति करता है ।

टीका—जैसे सुवर्ण में चांदी के सफेद गुण का अभाव है इसलिए निश्चय से सफेदपने के नाम से सोने का नाम नहीं बनता, सुवर्ण के गुण जो पीतपना आदि हैं उनके ही नाम से सुवर्ण का नाम होता है । उसी तरह तीर्थंकर केवली पुरुष में शरीर के शुक्ल रक्तता आदि गुणों का अभाव है, इसलिये निश्चय से शरीर के गुणों के स्तवन करने से तीर्थंकर केवली पुरुष का स्तवन नहीं होता । तीर्थंकर केवली पुरुष के गुणों के स्तवन करने से ही केवली का स्तवन होता है । २६ ।

आगे शिष्य का प्रश्न है कि आत्मा तो शरीर का अधिष्ठाता है इसलिये शरीर की स्तुति करने से आत्मा का स्तवन निश्चय से क्यों ठीक नहीं है ? ऐसे प्रश्न का उत्तर रूप गाथा दृष्टांत सहित कहते हैं :—[यथा] जैसे [नगरे] नगर का [वर्णिते] वर्णन करने पर [राज्ञः वर्णना] राजा

तथाहि—

प्राकारकवलितांवरमुपवनराजीनिगीर्णभूमितलं ।
पिबतीव हि नगरमिदं परिखावलयेन पातालं ॥ २५ ॥

इति नगरे वर्णितेपि राज्ञः तदधिष्ठातृत्वेपि प्राकारोपवनपरिखादिमत्त्वाभावाद्वर्णनं न स्यात् ।

तथैव—

नित्यमविकारसुस्थितसर्वांगमपूर्वसहजलावण्यं ।
अक्षोभमिव समुद्रं जिनेंद्ररूपं परं जयति ॥ २६॥

इति शरीरे स्तूयमानेपि तीर्थंकरकेवलिपुरुषस्य तदधिष्ठातृत्वेपि सुस्थितसर्वांगत्वलावण्या-दिगुणाभावात्स्तवनं न स्यात् ॥ ३० ॥

तेषा योगो जीवेन सह संकर. संयोग सबन्ध. स एव दोषः तं दोषं परमसमाधिबलेन योगी जयति सा चैव प्रथमा निश्चयस्तुतिरिति भावार्थ ॥ ३१ ॥

का वर्णन [**नापि कृता**] किया नही [**भवति**] होता उसी तरह [**देहगुणे स्तूयमाने**] देह के गुणों का स्तवन होने से [**केवलिगुणाः**] केवली के गुण [**स्तुता न**] स्तवनरूप किये नहीं [**भवंति**] होते ।

इसी अर्थ का टीका में काव्य कहा गया है । **प्राकार** इत्यादि । **अर्थ**—यह नगर ऐसा है कि जिसने कोट (परकोटा) से आकाश को ग्रस लिया है अर्थात् इसका कोट बहुत ऊंचा है । बगीचों की पंक्तियों से जिसने भूमितल को निगल लिया है अर्थात् चारों ओर बागों से पृथ्वी ढक गई है । कोट के चारों तरफ खाई के घेरे से मानों पाताल को पी रहा है अर्थात् खाई बहुत गहरी है । ऐसे नगर का वर्णन करते हैं यद्यपि इसका अधिष्ठाता राजा है तो भी कोट बाग खाई आदि वाला राजा नहीं है इसलिये इससे राजा का वर्णन नही हो सकता । उसी तरह तीर्थंकर का स्तवन शरीर की स्तुति करने से नहीं हो सकता है । उसका श्लोक भी कहते हैं ।

नित्य इत्यादि । **अर्थ**—जिनेंद्र का रूप (मूर्ति) सब से उत्कृष्ट जयवंत हो, वह सदैव विकाररहित है, अच्छी तरह सुखरूप सर्वांग जिसमें स्थित है, अपूर्व है, स्वाभाविक अर्थात् जन्म से ही लेकर जिसमें लावण्य उत्पन्न है यानी सबको प्रिय लगता है, समुद्र की तरह क्षोभरहित है, चलाचल नहीं है । इस प्रकार शरीर की स्तुति कही । यद्यपि तीर्थंकर केवली पुरुष के शरीर का अधिष्ठातापना है तो भी सुस्थित सर्वांगपना लावण्यपना आत्मा का गुण नहीं है । इसलिये तीर्थंकर केवली पुरुष के इन गुणों का अभाव होने से उनकी स्तुति नहीं हो सकती ॥ ३० ॥

अब जिस तरह तीर्थंकर केवली की निश्चय स्तुति हो सकती है उसी रीति से कहते हैं उसमें

अथ निश्चयस्तुतिमाह, तत्र ज्ञेयज्ञायकसंकरदोषपरिहारेण तावत्;—

जो इन्दिये जिणित्ता णाणसहावाधियं मुणदि आदं ।
तं खलु जिदिंदियं ते भणंति जे णिच्छिदा साहू ॥ ३१ ॥

यः इंद्रियाणि जित्वा ज्ञानस्वभावाधिकं जानात्यात्मानं ।
तं खलु जितेंद्रियं ते भणंति ये निश्चिताः साधवः ॥ ३१ ॥

यः खलु निरवधिबंधपर्यायवशेन प्रत्यस्तमितसमस्तस्वपरविभागानि निर्मलभेदाभ्यास-कौशलोपलब्धांतःस्फुटातिसूक्ष्मचित्स्वभावावष्टंभबलेन शरीरपरिणामापन्नानि द्रव्येंद्रियाणि प्रति-विशिष्टस्वस्वविषयव्यवसायितया खंडशः आकर्षन्ति प्रतीयमानाखंडैकचिच्छक्तितया भावेंद्रियाणि ग्राह्यग्राहकलक्षणसम्बन्धप्रत्यासत्तिवशेन सह संविदा परस्परमेकीभूतानिव चिच्छक्तेः स्वयमेवानुभूय-मानासंगतया भावेंद्रियावगृह्यमाणान् स्पर्शादीनिंद्रियार्थांश्च सर्वथा स्वतः पृथक्करणेन विजित्यो-परतसमस्तज्ञेयज्ञायकसंकरदोषत्वेनैकत्वे टंकोत्कीर्णं विश्वस्याप्यस्योपरि तरता प्रत्यक्षोद्योततया नित्य-मेवांतःप्रकाशमानेनानपायिना स्वतः सिद्धेन परमार्थसता भगवता ज्ञानस्वभावेन सर्वेभ्यो द्रव्यां-तरेभ्यः । परमार्थतोतिरिक्तमात्मानं संचेतयते स खलु जितेन्द्रियो जिन इत्येका निश्चयस्तुतिः ॥३१॥

अथ तामेव स्तुतिं द्वितीयप्रकारेण भाव्यभावकसंकरदोषपरिहारेण कथयति । अथवा उपशमश्रेण्यपेक्षया जितमोहरूपेणाह :—**जो मोहं तु जिणित्ता णाणसहावाधियं मुणइ आदं** यःपुरुषः उदयागतं मोहं सम्यग्दर्शनज्ञान चारित्रैकाग्र्यरूपनिर्विकल्पसमाधिबलेन जित्वा शुद्धज्ञानगुणेनाधिकं परिपूर्णमात्मानं मनुते जानाति भावयति **तं जिदमोहं साहुं परमट्ठवियाणया विंति** तं साधुं जितमोहं रहितमोहं परमार्थविज्ञायका ब्रुवंति कथयंतीति । इयं

भी पहले ज्ञेय ज्ञायक के संकरदोष का परिहार करके स्तुति करते हैं;— [**यः**] जो [**इन्द्रियाणि**] इंद्रियों को [**जित्वा**] जीतकर [**ज्ञानस्वभावाधिकं**] ज्ञानस्वभाव द्वारा अन्य द्रव्य से अधिक [**आत्मानं**] आत्मा को [**जानाति**] जानता है [**तं खलु**] उसको नियम से [**ये निश्चताः साधवः**] जो निश्चयनय में स्थित साधुलोक हैं [**ते**] वे [**जितेंद्रियं**] जितेंद्रिय ऐसा [**भणंति**] कहते हैं ।

टीका—जो मुनि द्रव्येंद्रिय, भावेंद्रिय तथा इन्द्रियों के विषयों के पदार्थ इन तीनों को ही अपने से पृथक् कर सब अन्य द्रव्यों से भिन्न अपने आत्मा का अनुभव करता है, वह निश्चय से जितेंद्रिय है । कैसी हैं द्रव्येंद्रियाँ ? अनादि अमर्यादरूप बंधपर्याय के वश से जिनसे समस्त स्व-पर का विभाग नष्ट हो गया है और जो शरीर परिणाम को प्राप्त हुई हैं अर्थात् आत्मा से ऐसे एक हो रही हैं कि भेद नहीं दीखता, उनको तो निर्मल भेद के अभ्यास की चतुराई से प्राप्त अन्तरंग में प्रकट अति सूक्ष्म चैतन्य स्वभाव के अवलंबन से अपने से पृथक् किया है, यही जीतना हुआ । कैसी हैं भावेंद्रियाँ ? पृथक्-पृथक् विशेषों को लिये हुए जो अपने विषय उनमें व्यापार करने के कारण जो विषयों को खंडखंड ग्रहण करती हैं अर्थात्

अथ भाव्यभावकसङ्करदोषपरिहारेण;—

जो मोहं तु जिणित्ता णाणसहावाधियं मुणइ आदं ।
तं जिदमोहं साहुं परमट्ठवियाणया विंति ॥ ३२ ॥

यो मोहं तु जित्वा ज्ञानस्वभावाधिकं जानात्यात्मानं ।
तं जितमोहं साधुं परमार्थविज्ञायका विंदन्ति ॥ ३२ ॥

यो हि नाम फलदानसमर्थतया प्रादुर्भूय भावकत्वेन भवंतमपि दूरत एव तदनुवृत्तेरात्मनो

द्वितीया स्तुतिरिति । किंच भाव्यभावकसंकरदोषपरिहारेण द्वितीया स्तुतिर्भवतीति पातनिकायां भणितं भवद्भिस्तत्कथं घटते इति भाव्यो रागादिपरिणत आत्मा, भावको रंजक उदयागतो मोहस्तयोर्भाव्यभावकयोः शुद्धजीवेन सह संकरः संयोगः संबंधः स एव दोषः । तं दोषं स्वसंवेदनज्ञानबलेन योऽसौ परिहरति सा द्वितीया स्तुतिरिति भावार्थः। एवमेव च मोहपदपरिवर्तनेन रागद्वेषक्रोधमानमायालोभकर्मनोकर्ममनोवचनकायसूत्राण्येकादश पंचानां श्रोत्रचक्षुर्घ्राणरसनस्पर्शनसूत्राणामिंद्रियसूत्रेण पृथग्व्याख्यातत्वाद्व्याख्येयानि। अनेनैव प्रकारेणान्यान्याप्यसंख्येयलोकमात्रविभावपरिणामरूपाणिज्ञातव्यानि ॥ ३२ ॥

ज्ञान को खंडखंड रूप जानती हैं, उनको प्रतीति में आती हुई अखंड एक चैतन्यशक्ति से अपने से भिन्न जानती है, इनका यही जीतना हुआ । इन्द्रियों के विषयभूत पदार्थ कैसे हैं ? ग्राह्य ग्राहक लक्षण सम्बन्ध की निकटता के वश से अपने संवेदन (अनुभव) के साथ परस्पर मानो एक सरीखे हो गये हो ऐसे दीखते हैं, उनको अपनी चैतन्य शक्ति के अपने आप अनुभव में आता हुआ जो असगपना—एकत्व उस के द्वारा भावेंद्रिय से ग्रहण किये हुए स्पर्शादिक पदार्थों को अपने से पृथक् किया है । इनका यही जीतना हुआ । इस प्रकार इन्द्रियज्ञान के और विषयभूत पदार्थों के ज्ञेयज्ञायक का संकरनामादोष आता था, उसके दूर होने से आत्मा एकपने में टङ्कोत्कीर्ण स्थित हुआ । जैसे टांकी से उकेरी पत्थर में मूर्ति एकाकार जैसी की तैसी ठहरती है, उसी तरह ठहरा यह ऐसा कैसे मालूम हुआ ? समस्त पदार्थों के ऊपर तरता जानता हुआ भी उनरूप नहीं होता, प्रत्यक्ष उद्योतपने से नित्य ही अन्तरंग में प्रकाशमान, अविनश्वर, आपही से सिद्ध हुआ और परमार्थरूप ऐसे भगवान ज्ञानस्वभाव के द्वारा सब अन्यद्रव्यों से परमार्थरूप से जुदा जाना । क्योंकि ज्ञानस्वभाव अन्य अचेतन द्रव्यों मे नहीं है इसलिये सबसे अधिक भिन्न ही है । ऐसे आत्मा को जानने वाला जितेंद्रिय जिन है, इस प्रकार एक निश्चय स्तुति तो यह हुई ।

भावार्थ—यहां ज्ञेय तो इन्द्रियों के विषयभूत पदार्थ और ज्ञायक आप आत्मा इन दोनो का विषयों की आसक्तता से अनुभव एकसा होता था, सो भेदज्ञान से भिन्नता जानी तब ज्ञेय ज्ञायक संकर दोष दूर हुआ ऐसा जानना ॥ ३१ ॥

आगे भाव्य भावक संकर दोष दूरकर स्तुति कहते हैं;—[**यः तु**] जो मुनि [**मोहं**] मोहको [**जित्वा**] जीतकर [**आत्मानं**] अपने आत्माको [**ज्ञानस्वभावाधिकं**] ज्ञानस्वभाव से अन्यद्रव्य-भावों मे अधिक [**जानाति**] जानता है [**तं साधु**] उस मुनिको [**परमार्थविज्ञायकाः**] परमार्थ के जानने वाले [**जितमोहं**] जितमोह ऐसा [**विंदंति**] जानते हैं--कहते हैं ।

भाव्यस्य व्यावर्त्तनेन हठान्मोहं न्यक्कृत्योपरतसमस्तभाव्यभावकसंकरदोषत्वेनैकत्वे टंकोत्कीर्णं विश्वस्याप्यस्योपरि तरता प्रत्यक्षोद्योततया नित्यमेवांतःप्रकाशमानेनानपायिना स्वतः सिद्धेन परमार्थसता भगवता ज्ञानस्वभावेन द्रव्यांतरस्वभावभाविभ्यः सर्वेभ्यो भावान्तरेभ्यः परमार्थतोऽतिरिक्तमात्मानं संचेतयते स खलु जितमोहो जिन इति द्वितीया निश्चयस्तुतिः। एवमेव च मोहपदपरिवर्त्तनेन रागद्वेषक्रोधमानमायालोभकर्मनोकर्ममनोवचनकायसूत्राण्येकादश पञ्चानां श्रोत्रचक्षुर्घ्राणरसनस्पर्शनसूत्राणामिंद्रियसूत्रेण पृथग्व्याख्यातत्वाद्व्याख्येयानि। अनया दिशान्यान्यप्यूह्यानि ॥ ३२ ॥

अथवा भाव्यभावकभावाभावरूपेण तृतीया निश्चयस्तुतिः कथ्यते। अथवा तामेव क्षपकश्रेण्यपेक्षया क्षीणमोहरूपेणाह — **जियमोहस्स दु जइया खीणो मोहो हविज्ज साहुस्स** पूर्वगाथाकथित क्रमेणजितमोहस्य सतो जातस्य यदा निर्विकल्पसमाधिकाले क्षीणो मोहो भवेत्। कस्य ? साधोः शुद्धात्मभावकस्य **तहिया हु खीणमोहो भण्णदि सो णिच्छयविदूहिं** तदा तु गुप्तिसमाधिकाले स साधुः क्षीणमोहो भण्यते। कैर्निश्चयविद्भिः परमार्थज्ञायकैर्गणधरदेवादिभि। इयं तृतीया निश्चयस्तुतिरिति। भाव्यभावकभावाभावरूपेण कथं जाता स्तुतिरिति चेत्—भाव्यो

टीका—जो मुनि फल देने की सामर्थ्यसे प्रकट उदयरूप होकर भावकरूपसे प्रगट हुए मोहकर्म को और तदनुकूल परिणत आत्मा-भाव्य, को भेदज्ञान के बल से दूर ही से पृथक् कर मोह को पृथक् कर तिरस्कार करने से, जिसमें समस्त भाव्यभावक संकरदोष दूर हो गया है, उस के रूप से एकत्व होने पर टकोत्कीर्ण निश्चल एक अपने आत्मा का अनुभव करताहै, वह मोह को जीतने वाला होने से जिन कहलाता है। वह आत्मा समस्त लोक के ऊपर तैरता, प्रत्यक्ष उद्योत होने से नित्य ही अंतरंग में प्रकाशमान, अविनाशी और आपसे ही सिद्ध हुआ परमार्थरूप भगवान् ऐसा जो ज्ञानस्वभाव, उससे अन्यद्रव्यके स्वभावसे होनेवाले सब ही अन्यभावों से परमार्थ दृष्टि से भिन्न है; क्योंकि ऐसा ज्ञानस्वभाव अन्य पदार्थोंमें नहीं है। ऐसे ज्ञानस्वरूप आत्माको अनुभव करता है।

भावार्थ—ऐसे अपना आत्मा भावक जो मोह उसके अनुसार प्रवृत्ति से भाव्यरूप होकर भेदज्ञान के बलसे उसे पृथक् अनुभव करता है, वह जितमोह जिन है। इस तरह भाव्यभावक भाव के संकरदोष को दूर कर दूसरी निश्चयस्तुति है। यहां पर ऐसा आशय है कि जो श्रेणी चढ़ने पर मोह का उदय अनुभव में न रहे, अपने बलसे उपशमादिकर आत्माको अनुभव करता है, उसको जितमोह कहा है। यहां पर मोह को जीता है, उसका नाश हुआ मत जानना। इस गाथासूत्र में एक मोह का ही नाम लिया है इससे मोह के पदको बदलकर उसकी जगह राग, द्वेष, क्रोध, मान, माया, लोभ, कर्म, नोकर्म, मन, वचन, काय ये ग्यारह तो इस सूत्रद्वारा और श्रोत्र, चक्षु, घ्राण, रसना, स्पर्शन ये पांच इंद्रियसूत्रकर ऐसे सोलह पद पलटने से सोलह सूत्र पृथक् पृथक् व्याख्यानरूप करने चाहिए और इसी उपदेशसे अन्य भी विचार लेने चाहिए ॥ ३२ ॥

अथ भाव्यभावकभावाभावेन :—

जिदमोहस्स दु जइया खीणो मोहो हविज्ज साहुस्स ।
तइया हु खीणमोहो भण्णदि सो णिच्छयविदूहिं ॥ ३३ ॥

जितमोहस्य तु यदा क्षीणो मोहो भवेत्साधोः ।
तदा खलु क्षीणमोहो भण्यते स निश्चयविद्भिः ॥ ३३ ॥

इह खलु पूर्वप्रक्रांतेन विधानेनात्मनो मोहं न्यक्कृत्य यथोदितज्ञानस्वभावातिरिक्तात्मसंचेतनेन जितमोहस्य सतो यदा स्वभावभावभावनासौष्ठवावष्टंभात्तत्संतानात्यंतविनाशेन पुनरप्रादुर्भावाय भावकः क्षीणो मोहः स्यात्तदा स एव भाव्यभावकभावाभावेनैकत्वे टंकोत्कीर्णपरमात्मानमवाप्तः क्षीणमोहो जिन इति तृतीया निश्चयस्तुतिः । एवमेव च मोहपदपरिवर्तनेन रागद्वेषक्रोधमानमायालोभकर्मनोकर्ममनोवचनकायश्रोत्रचक्षुर्घ्राणरसनस्पर्शनसूत्राणि षोडश व्याख्येयानि । अनया दिशान्यान्यप्यूह्यानि ।

रागादिपरिणत आत्मा, भावको रंजक उदयागतो मोहस्तयोर्भाव्यभावकयोर्भावः स्वरूपं तस्याभावः क्षयो विनाशः सा चैव तृतीया निश्चयस्तुतिरित्यभिप्रायः । एवं रागद्वेष इत्यादि दंडको ज्ञातव्यः ॥ ३३ ॥ इति प्रथमगाथायां पूर्वपक्षस्तवनंतरं

आगे भाव्यभावकभाव के अभाव द्वारा निश्चय स्तुति कहते हैं; [जितमोहस्य तु साधोः] जिसने मोह को जीत लिया है ऐसे साधु के [यदा] जिस समय [क्षीणो मोहः] मोह क्षीण सत्ता में से नाश [भवेत्] होता है [तदा] उस समय [निश्चयविद्भिः] निश्चय के जानने वाले [खलु] निश्चय कर [सः] उस साधु को [क्षीणमोहः] क्षीण मोह ऐसे नाम से [भण्यते] कहते हैं ।

टीका—इस निश्चय स्तुति में पूर्वोक्त विधान द्वारा आत्मा से मोह का तिरस्कार कर जैसा कहा, वैसे ज्ञान स्वभाव द्वारा अन्य द्रव्य से अधिक आत्मा का अनुभव करने से जितमोह हुआ, उसके जिस समय अपने स्वभाव भाव की भावना का अच्छी तरह अवलम्बन करने से मोह की संतान का ऐसा अत्यंत विनाश हो जाता है कि फिर उसका उदय नहीं होता । ऐसा भावक रूप मोह जिस समय क्षीण होता है, उस समय (भावक मोह का क्षय होने पर) आत्मा के विभावरूप भाव्यभाव का भी अभाव हो जाता है । इस तरह भाव्य भावकभाव के अभाव से एकत्व होने पर टंकोत्कीर्ण (निश्चल) परमात्मा को प्राप्त हुआ 'क्षीणमोह जिन' ऐसा कहा जाता है । यह तीसरी निश्चय स्तुति है ।

भावार्थ—जिस समय साधु पहले अपने बल से उपशमभाव द्वारा मोह को जीत पीछे जिस समय अपनी बड़ी सामार्थ्य से मोह का सत्ता में से नाश कर ज्ञानस्वरूप परमात्मा को प्राप्त होता है, तब क्षीणमोह जिन कहा जाता है । यहां भी जैसे पूर्व कहा था, उसी तरह मोह पद को पलट कर राग,

एकत्वं व्यवहारतो न तु पुनः कायात्मनोर्निश्चया-
न्नुस्तोत्रं व्यवहारतोऽस्ति वपुषः स्तुत्या न तत्तत्त्वतः ।
स्तोत्रं निश्चयतश्चितो भवति चित्स्तुत्यैव सैवं भवे-
न्नातस्तीर्थकरस्तवोत्तरबलादेकत्वमात्मांगयोः ॥ २७ ॥

इति परिचिततत्त्वैरात्मकायैकतायां नयविभजनयुक्त्यात्यंतमुच्छादितायां ।
अवतरति न बोधो बोधमेवाद्य कस्य स्वरसरभसकृष्टः प्रस्फुटन्नेक एव ॥ २८ ॥

इत्यप्रतिबुद्धोक्तिनिरासः ॥ ३३ ॥

गाथाचतुष्टये निश्चयव्यवहारसमर्थनरूपेण परिहारस्ततश्च गाथात्रये निश्चयस्तुतिकथनरूपेण च परिहार इति पूर्वपक्षपरिहारगाथाष्टकसमुदायेन षष्ठस्थलं गतं । अथ रागादिविकल्पोपाधिरहितं स्वसंवेदनज्ञानलक्षणप्रत्याख्यानविवरणरूपेण

द्वेष, क्रोध, मान, माया, लोभ, कर्म, नोकर्म, मन, वचन, काय, श्रोत्र, चक्षु, घ्राण, रसना, स्पर्शन,—ये पद रखकर सोलह सूत्र पढ़ना और व्याख्यान करना तथा इसी प्रकार उपदेश कर अन्य भी विचारना।

अब इस निश्चय व्यवहार रूप स्तुति के अर्थ के कलश रूप काव्य कहते हैं—**एकत्वं** इत्यादि। **अर्थ**—शरीर और आत्मा का व्यवहारनय से एकत्व है किन्तु निश्चयनय से एकत्व नहीं है। इसीलिए शरीर के स्तवन से आत्मा-पुरुष का स्तवन व्यवहारनय से हुआ कहा जाता है और निश्चयनय से नहीं। निश्चय से तो चैतन्य के स्तवन से ही चैतन्य का स्तवन होता है। वह चैतन्य का स्तवन तो जितेंद्रिय, जितमोह, क्षीणमोह—कहने से होता है। इसलिए यह सिद्ध हुआ कि जो अज्ञानी ने तीर्थकरके स्तवन का प्रश्न किया था, उसका यह नय विभाग द्वारा उत्तर दिया। उसके बल से आत्मा और शरीर का एकत्व निश्चय से नहीं है।

अब फिर इसी अर्थ के जानने से भेदज्ञान की सिद्धि होती है, ऐसा अर्थ रूप काव्य कहते हैं—**इति परिचित** इत्यादि। **अर्थ**—इस तरह जिसने वस्तु के यथार्थ स्वरूप का परिचय किया है, ऐसे मुनि ने आत्मा और शरीर के एकत्व को नय के विभाग की युक्ति द्वारा अत्यन्त उच्छादन किया है। ऐसा होने पर वह ज्ञान यथार्थ रूप में किस पुरुष के प्रकट नहीं होता अर्थात् अवश्य प्रगट होता ही है। वह अपने निज रस के वेग द्वारा खेंचा हुआ एक स्वरूप होकर प्रगट होता है।

भावार्थ—निश्चय व्यवहारनय के विभाग से आत्मा का और पर का अत्यन्त भेद दिखलाया है, इसको जानकर ऐसा कौन पुरुष है कि जिसके भेदज्ञान नहीं हो? होता ही है। क्योंकि ज्ञान अपने स्वरस से आप अपना स्वरूप जानता है तब अवश्य आप पृथक् ही अपने आत्मा को जानता है। यहां कोई दीर्घ संसारी ही होवे तो उसकी कुछ बात नहीं। इस प्रकार अप्रतिबुद्ध ने जो 'हमें तो यह निश्चय है कि जो देह है वही आत्मा है' ऐसा कहा था, उसका निराकरण (समाधान) किया ॥ ३३ ॥

आगे कहते हैं कि इस तरह यह अज्ञानी जीव अनादि के मोह की संतान से निरूपण किया जो

एवमयमनादिमोहसंताननिरूपितात्मशरीरैकत्वसंस्कारतयात्यंतमप्रतिबुद्धोपि प्रसभोज्जृम्भित-तत्त्वज्ञानज्योतिर्नेत्रविकारीव प्रकटोद्घाटितपटलष्टसितिप्रतिबुद्धः साक्षात् द्रष्टारं स्वं स्वयमेव हि विज्ञाय श्रद्धाय च तं चैवानुचरितुकामः स्वात्मारामस्यास्यान्यद्रव्याणां प्रत्याख्यानं किं स्यादिति पृच्छन्नित्थं वाच्यः—

सव्वे भावे जम्हा पच्चक्खाई परेत्ति णादूणं ।
तह्मा पच्चक्खाणं णाणं णियमा मुणेयव्वं ।। ३४ ।।

सर्वान् भावान् यस्मात्प्रत्याख्याति परानिति ज्ञात्वा।
तस्मात्प्रत्याख्यानं ज्ञानं नियमात् ज्ञातव्यं ।। ३४ ।।

यतो हि द्रव्यांतरस्वभावभाविनोऽन्यानखिलानपि भावान् भगवज्ज्ञातृद्रव्यं स्वस्वभाव-भावाव्याप्यतया परत्वेन ज्ञात्वा प्रत्याचष्टे ततो य एव पूर्वं जानाति स एव पश्चात्प्रत्याचष्टे न पुनरन्य इत्यात्मनि निश्चित्य प्रत्याख्यानसमये प्रत्याख्येयोपाधिमात्रप्रवर्तितकर्तृत्वव्यपदेशत्वेपि परमार्थेनाव्यपदेश्यज्ञानस्वभावादप्रच्यवनात्प्रत्याख्यानं ज्ञानमेवेत्यनुभवनीयम् ।। ३४ ।।

गाथाचतुष्टयं कथ्यते । तत्र स्वसंवेदनज्ञानमेव प्रत्याख्यानमिति कथनरूपेण प्रथमगाथा प्रत्याख्यानविषये दृष्टांतरूपे द्वितीया चेति गाथाद्वयं । तदनंतरं मोहपरित्यागरूपेण प्रथमगाथा ज्ञेयपदार्थपरित्यागरूपेण द्वितीया चेति गाथाद्वयं । एवं सप्त-मस्थले समुदायपातनिका । तथाहि—तीर्थंकराचार्यस्तुतिर्निरर्थिका भवतीति पूर्वपक्षबलेन जीवदेहयोरेकत्वं कर्तुं नायातीति ज्ञात्वा शिष्य इदानीं प्रतिबुद्धः सन् हे भगवन् रागादीनां किं प्रत्याख्यानमिति पृच्छति । इति पृच्छति कोर्थ इति पृष्टे प्रत्युत्तरं ददाति । एवं प्रश्नोत्तररूपपातनिकाप्रस्तावे सर्वत्रेति शब्दस्यार्थो ज्ञातव्यः । **णाणं सव्वे भावे पच्चक्खाई परेत्ति णादूणं** जानातीति व्युत्पत्त्या स्वसंवेदनज्ञानमात्मेति भण्यते तं ज्ञानं कर्तृ मिथ्यात्वरागादिविभावं परस्वरूपमिति ज्ञात्वा प्रत्याख्याति—त्यजति—निराकरोति **तह्मा पच्चक्खाणं णाणं णियमा मुणेदव्वं** तस्मात्कारणात् निर्वि-कल्पस्वसंवेदनज्ञानमेव प्रत्याख्यानं नियमान्निश्चयात् मतव्यं ज्ञातव्यमनुभवनीयमिति । इदमत्र तात्पर्यं—परमसमाधिकाले

आत्मा और शरीर का एकत्व उसके संस्कार से अत्यन्त अप्रतिबुद्ध था, सो अब तत्त्वज्ञान स्वरूप ज्योति के प्रकट होने से नेत्र के विकारी की तरह (जैसे किसी पुरुष के नेत्र में विकार था, तब वर्णादिक अन्यथा दीखते थे, जब विकार मिट गया तब जैसे का तैसा दीखने लगा) अच्छी तरह उघड़ गया है पटलरूप आवरण कर्म जिसका ऐसा प्रतिबुद्ध हुआ, तब साक्षात् देखने वाला अपने को अपने से ही जान श्रद्धान कर उसके आचरण करने का इच्छुक हुआ पूछता है कि इस आत्माराम के अन्य द्रव्यों का प्रत्याख्यान (त्यागना) क्या है, उसका समाधान आचार्य करते हैं,—[**यस्मात्**] जिस कारण [**सर्वान् भावान्**] अपने सिवाय सभी पदार्थ [**परान्**] पर है [**इति ज्ञात्वा**] ऐसा जानकर [**प्रत्याख्याति**] त्यागता है [**तस्मात्**] इस कारण [**ज्ञानं**] पर है यह जानना ही [**प्रत्याख्यानं**] प्रत्याख्यान है [**नियमात्**] यह नियम से जानना । अपने ज्ञान मे त्यागरूप अवस्था ही प्रत्याख्यान है दूसरा कुछ नही है ।

अथ ज्ञातुः प्रत्याख्याने को दृष्टांत इत्यत आह;—

जह णाम कोवि पुरिसो परदव्वमिणंति जाणिदुं चयदि।
तह सव्वे परभावे णाऊण विमुंचदे णाणी ॥३५॥

यथा नाम कोपि पुरुषः परद्रव्यमिदमिति ज्ञात्वा त्यजति।
तथा सर्वान् परभावान् ज्ञात्वा विमुञ्चति ज्ञानी ॥ ३५ ॥

यथा हि कश्चित्पुरुषः संभ्रांत्या रजकात्परकीयं चीवरमादायात्मीयप्रतिपत्त्या परिधाय शयानः स्वयमज्ञानी सन्नन्येन तदंचलमालंब्य बलान्नग्नीक्रियमाणो मंक्षु प्रतिबुध्यस्वार्पय

स्वसंवेदनज्ञानबलेन शुद्धमात्मात्मानमनुभवति तदेवानुभवनं निश्चय प्रत्याख्यानमिति ॥ ३४ ॥ अथप्रत्याख्यानविषये दृष्टांत-माहः— **जह णाम कोवि पुरिसो परदव्वमिणंति जाणिदुं चयदि** यथा नाम अहो स्फुटं वा कश्चित्पुरुषो वस्त्रा-भरणादिकं परद्रव्यमिदमिति ज्ञात्वा त्यजति **तह सव्वे परभावे णाऊण विमुंचदे णाणी** तथा तेन प्रकारेण सर्वान्

टीका—जिस कारण यह ज्ञाता द्रव्य आत्मा भगवान् है, वह अन्यद्रव्य के स्वभाव से हुए अन्य समस्त परभावों को अपने स्वभावभाव से व्याप्त न होने से पररूप जानकर त्यागता है, इस कारण जिसने पहले जाना है, वही पीछे त्याग करता है, दूसरा तो कोई त्यागने वाला नहीं है। ऐसे त्यागभाव आत्मा में ही निश्चयकर, त्याग के समय प्रत्याख्यान करने योग्य जो परभाव की उपाधिमात्र से प्रवृत्त त्याग के कर्तृत्व का नाम उसके होने पर भी परमार्थ से देखा जाय तब परभाव के त्याग के कर्तृत्व का नाम अपने को नहीं है। आप तो इस नाम से रहित है, ज्ञानस्वभाव से नहीं छूटा है, इसलिये प्रत्याख्यान ज्ञान ही है, ऐसा अनुभव करना चाहिये।

भावार्थ—आत्मा को परभाव के त्याग का कर्तृत्व है, वह नाम मात्र है। आप तो ज्ञान-स्वभाव है। परद्रव्य को पर जाना, फिर परभाव का ग्रहण नहीं किया। यही त्याग है। ऐसा जानना ही प्रत्याख्यान है। ज्ञान के सिवाय कुछ भी दूसरा भाव नहीं है ॥ ३४ ॥

आगे पूछते हैं कि ज्ञाता के प्रत्याख्यान ज्ञान ही कहा गया है इसका दृष्टांत क्या है? उसके उत्तर रूप दृष्टांत दार्ष्टान्त को गाथा द्वारा व्यक्त कर कहते हैं;—**[यथा नाम]** जैसे लोक में **[कोपि पुरुषः]** कोई पुरुष **[परद्रव्यं इति ज्ञात्वा]** पर वस्तु को ऐसा जानता है कि यह परवस्तु है तब ऐसा जान **[त्यजति]** परवस्तु को त्यागता है **[तथा]** उसी तरह **[ज्ञानी]** ज्ञानी **[सर्वान्]** सब **[परभावान्]** पर द्रव्यों के भावों को **[ज्ञात्वा]** ये परभाव हैं ऐसा जानकर **[विमुञ्चति]** उनको छोड़ता है।

टीका—जैसे कोई पुरुष धोबी के घर दूसरे का वस्त्र लाकर उसे भ्रम से अपना समझ ओढ़-कर सो गया उसने ऐसा नहीं जाना कि यह दूसरे का है। उसके पश्चात् दूसरे ने उस वस्त्र का पल्ला

परिवर्तितमेतद्वस्त्रं मामकमित्यसकृद्वाक्यं शृण्वन्नखिलैश्चिन्हैः सुष्ठु परीक्ष्य निश्चितमेतत्परकीयमिति ज्ञात्वा ज्ञानी सन्मुंचति तच्चीवरमचिरात् तथा ज्ञातापि संभ्रांत्या परकीयान्भावानादायात्मीयप्रतिपत्त्यात्मन्यध्यास्य शयानः स्वयमज्ञानी सन् गुरुणा परभावविवेकं कृत्वैकीक्रियमाणो मंक्षु प्रतिबुध्यस्वैकः खल्वयमात्मेत्यसकृच्छ्रौतं वाक्यं शृण्वन्नखिलैश्चिन्हैः सुष्ठु परीक्ष्य निश्चितमेते परभावा इति ज्ञात्वा ज्ञानी सन् मुंचति सर्वान्परभावानचिरात् ॥ ३५ ॥

अवतरति न यावद् वृत्तिमत्यंतवेगादनवमपरभावत्यागदृष्टांतदृष्टिः।
झटिति सकलभावैरन्यदीयैर्विमुक्ता स्वयमियमनुभूतिस्तावदाविर्बभूव ॥ २९ ॥

मिथ्यात्वरागादिपरभावान् पर्यायान् स्वसंवेदनज्ञानबलेन ज्ञात्वा विशेषेण त्रिशुद्धया विमुंचति त्यजति स्वसंवेदनज्ञानीति। अथ-नव भावार्थ.—यथा कश्चिद्देवदत्तः परकीयचीवरं भ्रांत्या मदीयमिति मत्वा रजकगृहादानीय परिधाय च शयान. सन् पश्चाद-

---

पकड़ खेंच कर उघाड़ के नंगा किया और कहा कि "तू शीघ्र जाग सावधान हो, मेरा वस्त्र बदले मे आ गया है, सो मेरा मुझे दे' ऐसा वारंवार बचन कहा। सो सुनता हुआ उस वस्त्र के चिह्न सब देख परीक्षा कर ऐसा जाना कि 'यह वस्त्र तो दूसरे का ही है' ऐसा जानकर ज्ञानी हुआ उस दूसरे के कपड़े को शीघ्र ही त्यागता है। उसी तरह ज्ञानी भी भ्रम से परद्रव्य के भावों को ग्रहण कर अपने जान आत्मा में एक रूप मान कर सोता है, बेखबर हुआ आप ही से अज्ञानी हो रहा है। जब श्रीगुरु इसको सावधान करें, परभाव का भेदज्ञान कराके एक आत्मभाव रूप करें और कहें कि तू शीघ्र जाग, सावधान हो, यह तेरा आत्मा है, वह एक ज्ञानमात्र है, अन्य सब परद्रव्य के भाव हैं' तब वारम्वार यह आगम के वाक्य सुनता हुआ समस्त अपने परके चिह्नों से अच्छी तरह परीक्षा करके ऐसा निश्चय करता है कि मैं एक ज्ञान मात्र हूँ, अन्य सब परभाव हैं। ऐसे ज्ञानी होकर सब परभावों को तत्काल छोड़ देता है।

भावार्थ—जब तक परवस्तु को भूलकर अपनी जानता है, तब तक ही ममत्व रहता है और जब यथार्थज्ञान हो जाने से पर को पराई जाने, तब दूसरे की वस्तु से ममत्व नहीं रहता यह बात प्रसिद्ध है।

अब इसी अर्थ का कलश रूप काव्य कहते हैं। **अवतरति** इति। **अर्थ**—यह परभाव के त्याग के दृष्टांत की दृष्टि जिस तरह पुरानी न पड़े, उस तरह अत्यंतवेग से जब तक प्रवृत्ति को नही प्राप्त हो; उसके पहले ही तत्काल सकल अन्य भावों से रहित आप ही यह अनुभूति तो प्रकट हो जाती है।

भावार्थ—यह परभाव के त्याग का दृष्टांत कहा, उस पर दृष्टि पड़े, उससे पहले सब अन्य भावों से रहित अपने स्वरूप का अनुभव तो तत्काल हो ही जाता है, क्योंकि यह प्रसिद्ध है कि जब वस्तु को पर की जान ली, तब उसके पश्चात् ममत्व नहीं रहता ॥ ३५ ॥

आगे इस अनुभूति से परभाव का भेदज्ञान किस तरह हुआ, ऐसी आशंका कर प्रथम भावक

अथ कथमनुभूतेः परभावविवेको भूत इत्याशंक्य भावकभावविवेकप्रकारमाहः—

णत्थि मम को वि मोहो बुज्झदि उवओग एव अहमिक्को।
तं मोहणिम्ममत्तं समयस्स वियाणया विंति ॥ ३६ ॥

नास्ति मम कोपि मोहो बुध्यते उपयोग एवाहमेकः ॥
तं मोहनिर्ममत्वं समयस्य विज्ञायकाः विंदंति ॥ ३६ ॥

इह खलु फलदानसमर्थतया प्रादुर्भूय भावकेन सता पुद्गलद्रव्येणाभिनिर्वर्त्यमानष्टंकोत्कीर्णैकज्ञायकस्वभावभावस्य परमार्थतः परभावेन भावयितुमशक्यत्वात्कतमोपि न नाम मम मोहोस्ति किंचैतत्स्वयमेव च विश्वप्रकाशचंचुरविकस्वरानवरतप्रतापसंपदा चिच्छक्तिमात्रेण स्वभावभावेन भगवानात्मैवावबुध्यते। यत्किलाहं खल्वेकः ततः समस्तद्रव्याणां परस्परसाधारणावगाहस्य निवारयितुमशक्यत्वान्मज्जितावस्थायामपि दधिखंडावस्थायामिव परिस्फुटस्वदमानस्वादभेद[1]तया मोहं प्रति निर्ममत्वोस्मि। सर्वदैवात्मैकत्वगतत्वेन [2]समयस्यैवमेव स्थितत्वात्। इतीत्थं भावकभावविवेको भूतः।

न्येन वस्त्रस्वामिना वस्त्रांचलमादायाच्छोद्य नग्नीक्रियमाणः सन् वस्त्रलांछनं निरीक्ष्य परकीयमिति मत्वा तद्वस्त्रं मुंचति

जो मोहकर्म के उदयरूप भाव, उनके भेदज्ञान का प्रकार कहते हैंः—[**बुध्यते**] जो ऐसा जाने कि [**मोहः मम कोपि नास्ति**] मोह मेरा कोई भी सम्बन्धी नहीं [**एकः उपयोग एव अहं**] एक उपयोग ही है वही मैं हूँ [**तं**] ऐसे जानने को [**समयस्य**] सिद्धांत के अथवा आपपर स्वरूप के [**विज्ञायकाः**] जानने वाले [**मोहनिर्ममत्वं**] मोह से निर्ममत्व [**विंदंति**] समझते हैं—कहते हैं।

टीका—मै सत्यार्थ रूप से ऐसा जानता हूँ कि यह मोह है, वह मेरा कुछ भी नहीं लगता है। यह मोह इस मेरे अनुभव में फल देने की सामर्थ्य द्वारा प्रकट होकर भावकरूप हुआ जो पुद्गलद्रव्य उसके द्वारा रचा हुआ है। सो यह मेरा नहीं है, क्योंकि मैं तो टंकोत्कीर्ण एक ज्ञायकस्वभाव हूँ, यह जड़ है। सो परमार्थ से पर के भाव को दूसरे के भाव से चिंतवन नहीं कर सकते। यहाँ यह समझना कि स्वयमेव सब वस्तुओं के प्रकाश करने में चतुर विकाश रूप हुई और जिसमें निरन्तर हमेशा प्रताप सम्पदा पायी जाती है ऐसी चैतन्यशक्ति, उस मात्र स्वभावभाव द्वारा भगवान् आत्मा को ही समझना जानना कि मैं परमार्थ से एक चित्शक्तिमात्र हूँ। सब द्रव्यों के परस्पर साधारण एक क्षेत्रावगाह होने से मेरा आत्मा जड़ के साथ श्रीखण्ड की तरह एकमेक हो रहा है अर्थात् जैसे दही और शक्कर मिलाने से श्रीखण्ड बनता है, उसमें दही खांड एक से मालूम पड़ते हैं तो भी प्रगटरूप खट्टे मीठे स्वाद के भेद से पृथक पृथक जाने जाते हैं। उसी प्रकार द्रव्यों के लक्षणभेद से जड़ चेतन का स्वरूप अनुभव

---

१. स्वदमान स्वभावभेदतया इति पाठान्तरेण भाव्यं। २. समयस्यैवमेवस्थितत्वात् इति टीकमगढ प्रति पाठः।

सर्वतः[१] स्वरसनिर्भरभावं चेतये स्वयमहं स्वमिहैकं ।
नास्ति नास्ति मम कश्चन मोहः शुद्धचिद्घनमहोनिधिरस्मि[२] ॥ ३० ॥

एवमेव च मोहपदपरिवर्त्तनेन रागद्वेषक्रोधमानमायालोभकर्मनोकर्ममनोवचनकायश्रोत्रचक्षुघ्राणरसनस्पर्शनसूत्राणि षोडश व्याख्येयानि । अनया दिशान्यान्याप्यूह्यानि ॥ ३६ ॥

तथायं ज्ञानीजीवोऽप्यतिविज्ञेन निर्विण्णेन गुरुणा मिथ्यात्वरागादिविभावा एते भवदीयस्वरूपं न भवंति, एक एव त्वमिति प्रतिबोध्यमानः सन् परकीयानिति ज्ञात्वा मुंचति शुद्धात्मानुभूतिमनुभवतीति । एवं गाथाद्वयं गतं ॥ ३५ ॥ अथ कथं शुद्धात्मानुभूतिमनुभवतीति पृष्टे सति मोहादिपरित्यागप्रकारमाहः—**णत्थि मम कोवि मोहो** नास्ति न विद्यते मम शुद्धनिश्चयेन टंकोत्कीर्णज्ञायकैकस्वभावस्य सतो रागादिपरभावेन कर्तृभूतेन भावयितुं रंजयितुमशक्यत्वात्कश्चिद्द्रव्यभावरूपो मोहः । **बुज्झदि उवओग एव अहमिक्को** बुध्यते जानाति । स कः कर्त्ता । ज्ञानदर्शनोपयोगलक्षणत्वादुपयोग आत्मैव । किं बुध्यते ? यतः कारणादहमेकः ततो मोहं प्रति निर्ममत्वोस्मि निर्मोहो भवामि । अथवा बुध्यते जानाति । किं जानाति । विशुद्धज्ञानदर्शनोपयोग एवाहमेकः । **तं मोहणिम्ममत्तं समयस्स वियाणया विंति** तं निर्मोहशुद्धात्मभावनास्वरूपं निर्ममत्वं ब्रुवंति वदंति जानंति वा । के ते । समयस्य शुद्धात्मस्वरूपस्य विज्ञायकाः पुरुषा इति । किंच विशेष.

करने में पृथक पृथक प्रकट मालूम हो जाता है कि मोहकर्म के उदय का स्वाद रागादिक हैं, वे चैतन्य के निजस्वभाव के स्वाद से भिन्न ही हैं । इसलिये मोह के प्रति मैं निर्मम ही हूं, क्योंकि यह आत्मा सदा काल ही अपने एकरूपताको प्राप्त हुआ अपने स्वभावरूप समय महल में विराज रहा है । इसतरह भावकभावरूप मोह के उदय से भेदज्ञान हुआ जानना ।

भावार्थ—यह मोहकर्म जड़ पुद्गल द्रव्य है, इसका उदय कलुष (मलिन) भावरूप है सो इसका भाव भी पुद्गल का विकार है, यही भावक का भाव है । जब यह चैतन्य के उपयोग के अनुभव में आता है, तब उपयोग भी विकारी हुआ रागादिरूप मलिन दीखता है । और जब इसका भेदज्ञान होवे कि चैतन्य की शक्तिकी व्यक्ति तो ज्ञानदर्शनोपयोग मात्र है तथा यह कलुषता राग द्वेष मोहरूप है, वह कलुषता द्रव्य कर्मरूप जड़ पुद्गलद्रव्य की है । ऐसा भेदज्ञान हो जाय, तब भावकभाव जो द्रव्यकर्मरूप मोह के भाव उनसे भेदभाव अवश्य हो सकता है और आत्मा भी अपने चैतन्य के अनुभवरूप ठहरे ही, ऐसा जानना ।

अब इस अर्थ का कलशरूप काव्य कहते हैं—**सर्वतः** इत्यादि । **अर्थ**—मैं इस लोक में अपने आपही से एक आत्मस्वरूप को अनुभव करता हूँ । जो मेरा स्वरूप सर्वांग अपने निजरसरूप चैतन्य के परिणमन से पूर्ण (भराहुआ) भाववाला है इसीकारण यह मोह मेरा कुछ भी नहीं लगता अर्थात् इसका और मेरा कुछ भी नाता नहीं है । मैं तो शुद्ध चैतन्य का समूहरूप तेज पुजका निधि हूँ । इस तरह भावकभाव का अनुभव करे । इसी प्रकार गाथा में जो मोहपद है, उसे पलटकर राग, द्वेष, क्रोध, मान, माया, लोभ, कर्म नोकर्म, मन, वचन, काय, श्रोत्र, चक्षु, घ्राण, रसना, स्पर्शन ये सोलह पृथक पृथक सोलह गाथा सूत्रों द्वारा व्याख्यान करने और इसी उपदेश से अन्य भी विचार लेना ॥ ३६ ॥

१. असंख्येयेष्वपि प्रदेशेषु स्वरसेन ज्ञानेन निर्भरः सम्पूर्णो भावः स्वरूपं यस्य । २. महोदधि इति पाठान्तरम् ।

अथ ज्ञेयभावविवेकप्रकारमाह :—

णत्थि मम धम्म आदी बुज्झदि उवओग एव अहमिक्को ।
तं धम्मणिम्ममत्तं समयस्स वियाणया विंति ।। ३७ ।।

न सन्ति मम धर्मादियोर्बुध्यते उपयोग एवाहमेकः ।
तं धर्मनिर्ममत्वं समयस्य विज्ञायका विंदंति ।। ३७ ।।

अमूनि हि धर्माधर्माकाशकालपुद्गलजीवांतराणि स्वरसविजृम्भितानिवारितप्रसरविश्वघस्मरप्रचंडचिन्मात्रशक्तिकवलिततयात्यंतमंतर्मग्नानीवात्मनि प्रकाशमानानि टंकोत्कीर्णैकज्ञायकस्वभावत्वेन तत्त्वतोंतस्तत्त्वस्य तदतिरिक्तस्वभावतया तत्त्वतो बहिस्तत्त्वरूपतां परित्यक्तुमशक्यत्वान्न नाम मम संति । किंचैतत्स्वयमेव च नित्यमेवोपयुक्तस्तत्त्वत एवैकमनाकुलमात्मानं कलयन् भगवानात्मैवावबुध्यते । यत्किलाहं खल्वेकः ततः संवेद्यसंवेदकभावमात्रोपजातेतरेतरसंवलनेपि परिस्फुटस्वदमानस्वभावभेदतया धर्माधर्माकाशकालपुद्गलजीवांतराणि प्रति निर्ममत्वोस्मि । सर्वदैवात्मैकत्वगतत्वेन समयस्यैवमेव स्थितत्वात् इतीत्थं ज्ञेयभावविवेको भूतः ।। ३७ ।।

यत्पूर्वं स्वसंवेदनज्ञानमेव प्रत्याख्यानं व्याख्यात तस्यैवेदं निर्मोहत्वं विशेषव्याख्यानमिति । **एवमेव** च मोहपदपरिवर्तनेन रागद्वेषक्रोधमानमायालोभकर्मनोकर्ममनोवचनकायश्रोत्रचक्षुर्घ्राणरसनस्पर्शनसूत्राणि षोडश व्याख्येयानि । अनेन प्रकारेणान्यान्यप्यसंख्येयलोकमात्रप्रमितानि विभावपरिणामरूपाणि ज्ञातव्यानि ।। ३६ ।। अथ धर्मास्तिकायादिज्ञेयपदार्था अपि

आगे ज्ञेयभाव से भेदज्ञान करने की रीति बतलाते हैं;—[**बुद्ध्यते**] ऐसा जाने कि [**धर्मादयः**] ये धर्म आदि द्रव्य [**मम न सन्ति**] मेरे कुछ भी नहीं लगते मैं ऐसा जानता हूँ कि [**एक उपयोग एव**] एक उपयोग ही है वही [**अहं**] मैं हूँ [**तं**] ऐसा जानने को [**समयस्य विज्ञायकाः**] सिद्धांत वा स्व-पर-समयरूप समय के जानने वाले [**धर्मनिर्ममत्वं**] धर्मद्रव्यसे निर्ममता [**विंदंति**] कहते हैं ।

टीका—धर्म, अधर्म, आकाश, काल, पुद्गल, अन्य जीव ये सब ही परद्रव्य हैं, वे आत्मा में प्रकाशमान हैं । वे अपने निजरस से प्रकट और निवारण नहीं किया जाय ऐसा जिसका फैलाव है तथा समस्त पदार्थों के ग्रसने का जिस का स्वभाव है ऐसी जो प्रचंड चिन्मात्रशक्ति, उससे ग्रासीभूत होने से मानों अत्यंत निमग्न हो रहे हैं, तो भी टंकोत्कीर्ण एक ज्ञायक स्वभाव रूप से परमार्थ से अंतरंग तत्त्व तो मैं हूँ और (अपने स्वरूप के अभाव द्वारा ज्ञान में आप नहीं बैठे इस कारण) वे परद्रव्य उस मेरे स्वभाव से भिन्न होने के कारण परमार्थ से बाह्य तत्त्व रूप छोड़ने को असमर्थ हैं, वे धर्म आदि मेरे संबंधी नहीं हैं । यहां ऐसा समझना कि यह आत्मा चैतन्य से आप ही उपयुक्त हुआ परमार्थ से निराकुल

इति सति सह सर्वैरन्यभावैर्विवेके स्वयमयमुपयोगो बिभ्रदात्मानमेकं ।
प्रकटितपरमार्थैर्दर्शनज्ञानवृत्तैः कृतपरिणतिरात्माराम एव प्रवृत्तः ॥ ३१ ॥

मम स्वरूपं न भवंतीति प्रतिपादयति :—**णत्थि मम धम्म आदी** न संति न विद्यंते धर्मास्तिकायाविशेयपदार्था ममेति **बुज्झदि** बुध्यते ज्ञानी । तर्हि किमहं । **उवओग एव अहमिक्को** विशुद्धज्ञानदर्शनोपयोग एवाहं अथवा ज्ञानदर्शनोपयोगलक्षणत्वादिन्यभेदेनोपयोग एवात्मा स जानाति । केन रूपेण, यतोहं टंकोत्कीर्णज्ञायकैकस्वभाव एकः ततो दधिखण्डशिखिरिणीवत् व्यवहारेणैकत्वेपि शुद्धनिश्चयनयेन मम स्वरूपं न भवतीति परद्रव्यं प्रति निर्ममत्वोस्मि **तं धम्मणिम्ममत्तं समयस्स वियाणया विंति** तं शुद्धात्मभावनास्वरूपं परद्रव्यनिर्ममत्वं समयस्य शुद्धात्मनो विज्ञायकाः पुरुषा ब्रुवंति कथयन्तीति । किंच इदमपि परद्रव्यनिर्ममत्वं यत्पूर्वं भणितं स्वसंवेदनज्ञानमेव प्रत्याख्यानं तस्यैव विशेषव्याख्यानं ज्ञातव्यं ॥ ३७ ॥ इति गाथाद्वयं गतं । एवं गाथाचतुष्टयसमुदायेन सप्तमस्थलं समाप्तं । अथ शुद्धात्मैवोपादेय इति श्रद्धानं सम्यक्त्वं तस्मिन्नेव शुद्धात्मनि स्वसंवेदनं सम्यग्ज्ञानं तत्रैव निजात्मनि वीतरागस्वसंवेदननिश्चलरूप चारित्रमिति निश्चयरत्नत्रयपरिणतजीवस्य कीदृशं स्वरूपं भवतीत्यावेदयन्सन् जीवाधिकारमुपसंहरति:—**अहं** अनादिदेहात्मैक्यभ्रांत्याऽज्ञानेन पूर्वमप्रतिबुद्धोपि करतलविन्यस्तसुप्तविस्मृतपश्चान्निद्राविनाशस्मृतचामीकरावलोकनन्यायेन परमगुरुप्रसादेन प्रतिबुद्धो भूत्वा शुद्धात्मनि रतो यः सोहं वीतरागश्चिन्मात्रं ज्योतिः । पुनरपि कथंभूतः । **इक्को** यद्यपि व्यवहारेण नरनारकादिरूपेणानेकस्तथापि शुद्धनिश्चयेन टंकोत्कीर्णज्ञायकैकस्वभावत्वादेकः । **खलु** स्फुटं । पुनरपि किंरूपः । **सुद्धो** व्यावहारिकनवपदार्थेभ्यः शुद्धनिश्चयनयेन भिन्नः, अथवा रागादिभावेभ्यो भिन्नोहमिति शुद्धः । पुनरपि किंविशिष्टः ।

एक आत्मा का ही अभ्यास करता है सो आत्मा द्वारा भगवान आत्मा ही जाना जाता है कि मैं प्रकट निश्चय से एक ही हूँ । इसलिए ज्ञेय ज्ञायक भावमात्र से उत्पन्न जो परद्रव्यों से परस्पर मिलना उसके होने पर भी प्रकट स्वाद में आता हुआ जो स्वभाव का भेद उसपनेकर धर्म अधर्म, आकाश, काल, पुद्गल अन्यजीव—उनके प्रति मैं निर्मम हूं । क्योंकि सदा काल ही अपने में एकत्व होने से पदार्थों की ऐसी ही व्यवस्था है कि अपने स्वभाव को कोई नहीं छोड़ता । ऐसे अनुभव करने से ज्ञेयभावों से भेदज्ञान हुआ कहा जाता है ।

यहां पर इसी अर्थ का कलश रूप काव्य कहते हैं—**इति सति** इत्यादि । **अर्थ**—इस तरह पूर्वकथितरीति से भावक-भाव और ज्ञेयभावों से भेदज्ञान होने से सभी अन्य भावों से जब भिन्नता हुई, तब यह उपयोग आपही अपने एक आत्मा को ही धारता हुआ, और जिनका परमार्थ प्रकट हुआ है ऐसे जो सम्यग्दर्शन ज्ञान चारित्र उन रूप जिसने परिणमन किया है ऐसा होता हुआ अपने आत्मा रूपी बाग (क्रीड़ावन) में प्रवृत्ति करता है, अन्य जगह नहीं जाता ।

भावार्थ—सब परद्रव्यों से तथा उनसे उत्पन्न हुए भावों से जब भेद जाना, तब उपयोग को रमने के लिए अपना आत्मा ही रहा, दूसरा स्थान नहीं रहा । इस तरह दर्शन, ज्ञान और चारित्र से एक रूप हुआ आत्मा में ही रमण करता है । ऐसा जानना ॥ ३७ ॥

अथैवं दर्शनज्ञानचारित्रपरिणतस्यास्यात्मनः कीदृक् स्वरूपसंचेतनं भवतीत्यावेदयन्नुपसंहरति;—

अहमिक्को खलु सुद्धो दंसणणाणमइओ सदारूवी ।
णवि अत्थि मज्झ किंचिवि अण्णं परमाणुमित्तंपि ॥ ३८ ॥

अहमेकः खलु शुद्धो दर्शनज्ञानमयः सदाऽरूपी ।
नाप्यस्ति मम किंचिदप्यन्यत्परमाणुमात्रमपि ॥ ३८ ॥

यो हि नामानादिमोहोन्मत्ततयात्यंतमप्रतिबुद्धः सन् निर्विण्णेन[1] गुरुणानवरतं प्रतिबोध्यमानः कथंचनापि प्रतिबुध्य निजकरतलविन्यस्तविस्मृतचामीकरावलोकनन्यायेन परमेश्वरमात्मानं ज्ञात्वा श्रद्धायानुचर्य च सम्यगेकात्मारामो भूतः स खल्वहमात्मात्मप्रत्यक्षं चिन्मात्रं ज्योतिः । समस्तक्रमाक्रमप्रवर्त्तमानव्यावहारिकभावैश्चिन्मात्राकारेणाभिद्यमानत्वादेको नारकादिजीवविशेषाजीवपुण्यपापास्रवसंवरनिर्जराबंधमोक्षलक्षणव्यावहारिकनवतत्त्वेभ्यष्टंकोत्कीर्णैकज्ञायकस्वभाव-

---

नास्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यत्षट्पर्याप्तित्रिशरीरयोग्यवस्तुरूपं नोकर्म तत्सर्वमपि नास्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यः शक्तिसमूहलक्षणो वर्गः स सर्वोपि नास्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । या वर्गसमूहलक्षणा वर्गणा सा सर्वापि नास्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि मंदतीव्ररसकर्मदलविशिष्टन्यासलक्षणानि स्पर्द्धकानि तानि सर्वाण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि स्वपरैकत्वाध्यासे सति विशुद्धचित्परिणामातिरिक्तत्वलक्षणान्यध्यात्मस्थानानि तानि सर्वाण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि प्रतिविशिष्टप्रकृतिरसपरिणामलक्षणान्यनुभागस्थानानि तानि सर्वाण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि कायवाङ्मनोवर्गणापरिस्पंदलक्षणानि योगस्थानानि तानि सर्वाण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि प्रतिविशिष्टप्रकृतिपरिणामलक्षणानि बंधस्थानानि तानि सर्वाण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि स्वफलसंपादनसमर्थकर्मावस्थालक्षणान्युदयस्थानानि तानि सर्वाण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि गतीन्द्रियकाययोगवेदकषायज्ञानसंयमदर्शनलेश्याभव्यसम्यक्त्वसंज्ञाहारलक्षणानि मार्गणास्थानानि तानि सर्वाण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि प्रतिविशिष्टप्रकृतिकालांतरसहत्वलक्षणानि स्थितिबंधस्थानानि

शुद्धनिश्चयनयेन 'वादरसुहमेइंदी वितिचउरिंदी असण्णिसण्णीणं । पज्जत्तापज्जत्ता एवं ते चउदसा होंति' इति गाथाकथितक्रमेण बादरैकेंद्रियादिचतुर्दशजीवस्थानानि मिथ्यादृष्ट्यादिचतुर्दशगुणस्थानानि च सर्वाण्यपि न संति पुद्गलद्रव्यपरिणाममयत्वे सति शुद्धात्मानुभूतेर्भिन्नत्वात् । कुतः इति चेत्, यतः कारणादेते वर्णादिगुणस्थानांता· परिणामा. शुद्धनिश्चय-

---

क्योंकि । १९ । काय, वचन, मनोरूप वर्गणा का चलना जिनका लक्षण है ऐसे योगस्थान भी जीव के नहीं हैं, क्योंकि०.... । २० । भिन्न-भिन्न विशेषों को लिये प्रकृतियों के परिणाम जिनका लक्षण है ऐसे बंधस्थान भी जीव के नहीं हैं, क्योंकि०.... । । २१ । अपने फल के उत्पन्न करने में समर्थ कर्म की अवस्था जिनका स्वरूप है ऐसे उदय स्थान भी जीव के नहीं हैं, क्योंकि०.... । २२ । गति, इन्द्रिय, काय, योग, वेद, कषाय, ज्ञान, संयम, दर्शन, लेश्या, भव्य, सम्यक्त्व, संज्ञा और आहार जिनका स्वरूप है ऐसे मार्गणास्थान भी जीव के नहीं हैं, क्योंकि.... । २३ । भिन्न-भिन्न विशेषों को लिये प्रकृतियों का कालान्तर में साथ रहना जिनका लक्षण है ऐसे स्थितिबंध के स्थान भी जीव के नहीं हैं, क्योंकि.... । २४ । कषाय के विपाक की उत्कृष्टता जिनका लक्षण है ऐसे संक्लेशस्थान भी जीव के नहीं हैं, क्योंकि .... । २५ । कषाय के विपाक की मंदता जिनका लक्षण है ऐसे विशुद्धिस्थान भी जीव के नहीं हैं, क्योंकि० .... । २६ । चारित्रमोह के उदय की क्रम से निवृत्ति जिनका लक्षण है, ऐसे

तानि सर्वाण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि कषाय-विपाकोद्रेकलक्षणानि संक्लेशस्थानानि तानि सर्वाण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि कषायविपाकानुद्रेकलक्षणानि विशुद्धिस्थानानि तानि सर्वाण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि चारित्रमोहविपाकक्रमनिवृत्ति-लक्षणानि संयमलब्धिस्थानानि तानि सर्वाण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि पर्याप्तापर्याप्तबादरसूक्ष्मैकेंद्रियद्वींद्रियत्रींद्रियचतुरिंद्रियसंज्ञ्यसंज्ञिपंचेंद्रि-यलक्षणानि जीवस्थानानि तानि सर्वाण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूते-र्भिन्नत्वात् । यानि मिथ्यादृष्टिसासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिसंयतासंयतप्रमत्त-संयताप्रमत्तसंयतापूर्वकरणोपशमकक्षपकानिवृत्तिबादरसांपरायोपशमकक्षपकसूक्ष्मसांपरायोपशमकक्ष-पकोपशांतकषायक्षीणकषायसयोगकेवल्ययोगकेवलिलक्षणानि गुणस्थानानि तानि सर्वाण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् ॥५०॥५१॥५२॥५३॥५४॥५५॥

वर्णाद्या वा रागमोहादयो वा भिन्ना भावाः सर्व एवास्य पुंसः ।
तेनैवांतस्तत्त्वतः पश्यतोऽमी नो दृष्टाः स्युर्दृष्टमेकं परं स्यात् ॥ ३७ ॥

नयेन पुद्गलद्रव्यस्य पर्याया इति । अयमत्रभावार्थः—सिद्धांतादिशास्त्रेषु अशुद्धपर्यायार्थिकनयेनाभ्यंतरे रागादयो बहिरंगे शरीरवर्णापेक्षया वर्णादयोपि जीवाः इत्युक्ताः । अत्र पुनरध्यात्मशास्त्रे शुद्धनिश्चयनयेन निषिद्धा इत्युभयत्रापि नयविभाग-विवक्षया नास्ति विरोध इति वर्णाद्यभावस्य विशेषव्याख्यानरूपेण सूत्रषट्कं गतं ॥५०॥५१॥५२॥५३॥५४॥५५॥

संयमलब्धिस्थान भी जीव के नहीं हैं, क्योंकि०.... । २७ । पर्याप्त, अपर्याप्त, बादर, सूक्ष्म, एकेंद्रिय द्वींद्रिय, त्रींद्रिय, चतुरिंद्रिय और संज्ञी, असंज्ञी, पंचेंद्रिय जिनका लक्षण है ऐसे जीवस्थान भी जीव के नहीं हैं, क्योंकि०.... ।२८। मिथ्यादृष्टि, सासादनसम्यग्दृष्टि, सम्यग्मिथ्यादृष्टि, अविरतसम्यग्दृष्टि, संयता-संयत, प्रमत्तसंयत, अप्रमत्तसंयत, अपूर्वकरण, अनिवृत्तिकरण, सूक्ष्मसांपराय, उपशांतमोह, क्षीणमोह, सयोग केवली और अयोगकेवली, जिनका लक्षण है ऐसे सब गुणस्थान भी जीव के नहीं हैं, क्योंकि०.... ।२९। इस प्रकार ये सभी पुद्गल द्रव्य के परिणाममय भाव हैं वे सब जीव के नहीं हैं। जीव तो परमार्थ से चैतन्य शक्तिमात्र है ।

अब इसी अर्थ का कलशरूप काव्य कहते हैं-**वर्णाद्या** इत्यादि । **अर्थ**—वर्णादिक अथवा राग-मोहादिक कहे हुए सभी भाव इस पुरुष (आत्मा) से भिन्न हैं, इसी कारण अंतर्दृष्टि से देखने वाले को ये सब नहीं दीखते केवल एक चैतन्यभाव स्वरूप अभेद रूप आत्मा ही दीखता है ।

भावार्थ—परमार्थनय अभेद ही है इसलिये उस दृष्टि से देखने पर भेद नहीं दीखता, उस नयकी दृष्टि में चैतन्य मात्र पुरुष (आत्मा) ही दीखता है इस कारण वे वर्णादिक तथा रागादिक पुरुष से भिन्न ही हैं। वर्ण को आदि लेकर गुणस्थानपर्यंत भावों का स्वरूप विशेषता से जानना हो तो **गोम्मटसार** आदि ग्रंथों से जान लेना ॥५०।५१।५२।५३।५४।५५॥

ननु वर्णादयो यद्यमी न संति जीवस्य तदा तंत्रांतरे कथं संतीति प्रज्ञाप्यंते इति चेत् :—

ववहारेण दु एदे जीवस्स हवंति वण्णमादीया ।
गुणठाणंता भावा ण दु केई णिच्छयणयस्स ।। ५६ ।।

व्यवहारेण त्वेते जीवस्य भवंति वर्णाद्याः ।
गुणस्थानांता भावा न तु केचिन्निश्चयनयस्य ।। ५६ ।।

इह हि व्यवहारनयः किल पर्यायाश्रितत्वाज्जीवस्य पुद्गलसंयोगवशादनादिप्रसिद्धबंध-पर्यायस्य कुसुंभरक्तस्य कार्पासिकवासस इवौपाधिकं भावमवलंब्योत्प्लवमानः परभावं परस्य विदधाति। निश्चयनयस्तु द्रव्याश्रितत्वात्केवलस्य जीवस्य स्वाभाविकं भावमवलंब्योत्प्लवमानः परभावं परस्य सर्वमेव प्रतिषेधयति। ततो व्यवहारेण वर्णादयो गुणस्थानांता भावा जीवस्य संति निश्चयेन तु न संतीति युक्ता प्रज्ञप्तिः ।। ५६ ।।

अथ यदुक्तं पूर्वं सिद्धांतादौ जीवस्य वर्णादयो व्यवहारेण कथिता अत्र तु प्राभृतग्रंथे निश्चयनयेन निषिद्धा. तमेवार्थं दृढयति;—व्यवहारनयेन त्वेते जीवस्य भवति वर्णाद्या गुणस्थानांता भावाः पर्याया न तु केऽपि निश्चयनयेनेति ।। ५६ ।। एवं निश्चयव्यवहारसमर्थनरूपेण गाथा गता । अथ कस्माज्जीवस्य निश्चयेन वर्णादयो न संतीति पृष्टे प्रत्युत्तरं ददाति;—**एदेहि य संबंधो जहेव खीरोदयं मुणेदव्वो** एतैः वर्णादिगुणस्थानांतैः पूर्वोक्तपर्यायैः सह संबंधो यथैव क्षीरनीरसंश्लेषस्तथा मंतव्यः । न चाग्न्युष्णत्वयोरिव तादात्म्यसंबंधः । कुत इति चेत्, **ण य हुंति तस्स ताणि दु** न च भवति तस्य जीवस्य ते तु वर्णादिगुणस्थानाना भावा. पर्याया । कस्मात्, **उवओगगुणाधिगो जम्हा** यस्मा-

---

आगे शिष्य पूछता है कि वर्णादिक भाव जो कहे गये हैं वे यदि जीव के नहीं हैं तो अन्य सिद्धांत ग्रंथों में 'ये जीव के हैं' ऐसा क्यों कहा गया ? उस का उत्तर गाथा में कहते हैं,—**[एते]** ये **[वर्णाद्याः गुणस्थानांताः भावाः]** वर्ण आदि गुणस्थानपर्यंत भाव कहे गये हैं वे **[व्यवहारेण तु]** व्यवहारनय से तो **[जीवस्य भवंति]** जीव के ही होते हैं, इस लिये सूत्र में कहे हैं **[तु]** परन्तु **[निश्चयनयस्य]** निश्चयनय के मत से **[केचित् न]** इन में से कोई भी जीव के नहीं है ।

टीका—यहां पर व्यवहारनय, पर्यायाश्रित होने से पुद्गल के संयोगवश अनादि काल से प्रसिद्ध जिस की बंधपर्याय है ऐसे जीव के 'कुसुम्भ के लाल रंग में रंगे हुए रुई के वस्त्र की भांति' औपाधिक वर्णादिभावों को आलंबन कर प्रवृत्त होता है इसलिये वह व्यवहारनय दूसरे के भावों को दूसरों का कहता है । और निश्चयनय द्रव्य के आश्रय होने से केवल एक जीव के स्वाभाविक भाव को अवलंबन कर प्रवृत्त होता है, वह सब परभावों को परके कहता है, निषेध करता है, इसलिये वर्ण आदि गुणस्थानपर्यंत भाव व्यवहार नय से जीव के हैं, निश्चयनय से नहीं हैं इस प्रकार भगवान् का कथन स्याद्वाद सहित युक्तिपूर्ण है ।। ५६ ।।

कुतो जीवस्य वर्णादयो निश्चयेन न संतीति चेत् :—

एएहिं य संबंधो जहेव खीरोदयं मुणेदव्वो ।
ण य हुंति तस्स ताणि दु उवओगगुणाधिगो जम्हा ॥ ५७ ॥

एतैश्च संबंधो यथैव क्षीरोदकं ज्ञातव्यः ।
न च भवंति तस्य तानि तूपयोगगुणाधिको यस्मात् ॥ ५७ ॥

यथा खलु सलिलमिश्रितस्य क्षीरस्य सलिलेन सह परस्परावगाहलक्षणे संबंधे सत्यपि स्वलक्षणभूतक्षीरत्वगुणव्याप्यतया सलिलादधिकत्वेन प्रतीयमानत्वादग्नेरुष्णगुणेनेव सह तादात्म्य-लक्षणसंबंधाभावान्न निश्चयेन सलिलमस्ति । तथा वर्णादिपुद्गलद्रव्यपरिणाममिश्रितस्यास्यात्मनः पुद्गलद्रव्येण सह परस्परावगाहलक्षणे संबंधे सत्यपि स्वलक्षणभूतोपयोगगुणव्याप्यतया सर्वद्रव्येभ्योऽधिकत्वेन प्रतीयमानत्वात् अग्नेरुष्णगुणेनेव सह तादात्म्यलक्षणसंबंधाभावान्न निश्चयेन वर्णादिपुद्गलपरिणामाः जीवस्य संति ॥ ५७ ॥

दुष्णगुणेनाग्निरिव केवलज्ञानदर्शनगुणेनाधिकः परिपूर्ण इति । ननु वर्णादयो बहिरंगास्तत्र व्यवहारेण क्षीरनीरवत्-संश्लेषसंबंधो भवतु नचाभ्यंतराणां रागादीनां तत्राशुद्धनिश्चयेन भवितव्यमिति । नैवं, द्रव्यकर्मबंधापेक्षया योसौ असद्भूत-व्यवहारस्तदपेक्षया तारतम्यज्ञापनार्थं रागादीनामशुद्धनिश्चयो भण्यते । वस्तुतस्तु शुद्धनिश्चयापेक्षया पुनरशुद्धनिश्चयोपि व्यवहार एवेति भावार्थः ॥ ५७ ॥

ये वर्णादिक निश्चय से जीव के क्यों नहीं हैं ? उस का कारण कहो, इस प्रश्न का उत्तर कहते हैं:—**[एतैश्च संबंधः]** इन वर्णादिक भावों के साथ जीव का संबंध **[क्षीरोदकं यथैव]** जल और दूध के एक क्षेत्रावगाह रूप संबंधसदृश **[ज्ञातव्यः]** जानना **[च]** और **[तानि]** वे **[तस्य तु न भवंति]** उस जीव के नहीं हैं **[यस्मात्]** क्योंकि जीव **[उपयोगगुणाधिकः]** इन से उपयोग गुण के कारण अधिक है ।

टीका—जैसे जल से मिला हुआ दूध जल के साथ परस्पर अवगाह स्वरूप संबंध होने पर भी अपने स्वलक्षणभूत क्षीरत्व गुण में व्याप्त होने के कारण पृथक् प्रतीत होता है क्योंकि उस के और दूध के तादात्म्य स्वरूप संबंध का अभाव है । जैसे अग्नि का और उष्णता का तादात्म्यसंबंध है, उस प्रकार दूध और जल का नहीं है, इस कारण निश्चय से दूध का जल नहीं है । उसी प्रकार वर्णादिक पुद्गलद्रव्य के परिणामों से मिला हुआ आत्मा पुद्गलद्रव्य के साथ परस्पर अवगाह स्वरूप संबंध होने पर भी अपने लक्षण स्वरूप उपयोग गुण से व्याप्त होने के कारण सब द्रव्यों से भिन्न प्रतीत होता है । जैसे अग्नि का और उष्णता का तादात्म्य स्वरूप संबंध है, उस प्रकार आत्मा और वर्णादिकों का तादात्म्यसंबंध नहीं है । इस लिये निश्चयनय से वर्णादिक पुद्गल के परिणाम हैं, वे जीव के नहीं हैं ॥ ५७ ॥ यहां पुनः प्रश्न होता है कि इस प्रकार से तो व्यवहारनय और निश्चयनय का विरोध आता है अतः इनमें अविरोध

कथं तर्हि व्यवहारोऽविरोधक इति चेत् :—

पंथे मुस्संतं पस्सिदूण लोगा भणंति ववहारी ।
मुस्सदि एसो पंथो ण य पंथो मुस्सदे कोई ॥ ५८ ॥
तह जीवे कम्माणं णोकम्माणं च पस्सिदुं वण्णं ।
जीवस्स एस वण्णो जिणेहिं ववहारदो उत्तो ॥ ५९ ॥
गंध[1] रसफासरूवा देहो संठाणमाइया जे य ।
सव्वे ववहारस्स य णिच्छयदण्हू ववदिसंति ॥ ६० ॥ (त्रिकलम्)

पथि मुष्यमाणं दृष्ट्वा लोका भणंति व्यवहारिणः ।
मुष्यते एष पंथा न च पंथा मुष्यते कश्चित् ॥ ५८ ॥
तथा जीवे कर्मणां नोकर्मणां च दृष्ट्वा वर्णं ।
जीवस्यैष वर्णो जिनैर्व्यवहारत उक्तः ॥ ५९ ॥
गंधरसस्पर्शरूपाणि देहः संस्थानादयो ये च ।
सर्वे व्यवहारस्य च निश्चयद्रष्टारो व्यपदिशंति ॥ ६० ॥

यथा पथि प्रस्थितं कंचित्सार्थं मुष्यमाणमवलोक्य तात्स्थ्यात्तदुपचारेण मुष्यत एष

अथ तर्हि कृष्णवर्णोयं धवलवर्णोयं पुरुष इति व्यवहारो विरोधं प्राप्नोतीत्येवं पूर्वपक्षे कृते सति व्यवहाराविरोधं दर्शयतीत्येका पातनिका। द्वितीया तु तस्यैव पूर्वोक्तव्यवहारस्य विरोधं लोकप्रसिद्धदृष्टांतद्वारेण परिहरति;—**पंथे मुस्संतं पस्सिदूण लोगा भणंति ववहारी** पथि मार्गे मुष्यमाणं सार्थं दृष्ट्वा व्यवहारि-

---

किस तरह से कहा जा सकता है? उसका उत्तर दृष्टांत द्वारा तीन गाथाओं से कहते हैं:—**[पथि मुष्यमाणं]** जैसे मार्ग में चलते हुए को लुटा हुआ **[दृष्ट्वा]** देखकर **[व्यवहारिणः]** व्यवहारी **[लोकाः]** जन **[भणंति]** कहते हैं कि **[एष पंथा]** वह मार्ग **[मुष्यते]** लुटता है, वहां परमार्थ से विचारा जाय तो **[कश्चित् पंथाः]** कोई मार्ग **[न च मुष्यते]** नहीं लुटता, जाते हुए लोक ही लुटते हैं **[तथा]** उसी तरह **[जीवे]** जीव में **[कर्मणां नोकर्मणां च]** कर्मों का और नोकर्मों का **[वर्णं]** वर्ण **[दृष्ट्वा]** देखकर **[जीवस्य]** जीव का **[एषः वर्णः]** यह वर्ण है ऐसा **[जिनैः]** जिनदेव ने **[व्यवहारतः]** व्यवहारसे **[उक्तः]** कहा है **[एवं]** इसी प्रकार **[गंधरसस्पर्शरूपाणि]** गंध, रस और स्पर्श रूप **[देहः संस्थानादयः]** देह संस्थान आदिक **[ये च सर्वे]** सभी **[व्यवहारस्य]** व्यवहार से हैं **[निश्चयद्रष्टारः]** ऐसा निश्चयनय के देखने वाले **[व्यपदिशंति]** कहते हैं।

---

१. तात्पर्यवृत्तौ तु 'एवं रसगंध' इत्यादि टीका स्थित पाठः।

पंथा इति व्यवहारिणां व्यपदेशेपि न निश्चयतो विशिष्टाकाशदेशलक्षणः कश्चिदपि पंथा मुष्येत। तथा जीवे बंधपर्यायेणावस्थितं कर्मणो नोकर्मणो वा वर्णमुत्प्रेक्ष्य तात्स्थ्यात्तदुपचारेण जीवस्यैष वर्ण इति व्यवहारतोऽर्हद्देवानां प्रज्ञापनेपि न निश्चयतो नित्यमेवामूर्तस्वभावस्योपयोगगुणाधिकस्य जीवस्य कश्चिदपि वर्णोऽस्ति। एवं गंधरसस्पर्शरूपशरीरसंस्थानसंहननरागद्वेषमोहप्रत्ययकर्मनोकर्मवर्गवर्गणास्पर्द्धकाध्यात्मस्थानानुभागस्थानयोगस्थानबंधस्थानोदयस्थानमार्गणास्थानस्थितिबंधस्थानसंक्लेशस्थानविशुद्धिस्थानसंयमलब्धिस्थानजीवस्थानगुणस्थानान्यपि व्यवहारतोऽर्हद्देवानां प्रज्ञापनेपि निश्चयतो नित्यमेवामूर्तस्वभावस्योपयोगगुणेनाधिकस्य जीवस्य सर्वाण्यपि न संति तादात्म्यलक्षणसंबंधाभावात् ॥५८॥५९॥६०॥

लोका भणंति। किं भणंति, **मुस्सदि एसो पंथो** मुष्यत एषः प्रत्यक्षीभूतः पंथाश्चोरैः कर्तृभूतैः **ण य पंथो मुस्सदे कोई** न च विशिष्टशुद्धाकाशलक्षणः पंथा मुष्यते कश्चिदपि किन्तु पथानमाधारीकृत्य तदाधेयभूता जना मुष्यंत इति दृष्टांतगाथा गता। **तह जीवे कम्माणं णोकम्माणं च पस्सिदुं वण्णं** तथा तेन पथि सार्थदृष्टांतेन जीवेधिकरणभूते कर्मनोकर्मणां शुक्लादिवर्णं दृष्ट्वा **जीवस्स एस वण्णो जिणेहि ववहारदो उत्तो** जीवस्य एष वर्णो जिनैर्व्यवहारतो भणित इति दार्ष्टांतगाथा गता। **एवं रसगंधफासा संठाणादीय जे समुद्दिट्ठा** एवमनेनैव दृष्टांतदार्ष्टांतन्यायेन रसगंधस्पर्शसंस्थानसंहननरागद्वेषमोहादयो ये पूर्वगाथाषट्केन समुद्दिष्टाः **सव्वे ववहारस्स य णिच्छयदण्हू ववदिसंति** ते सर्वे व्यवहारनयस्याभिप्रायेण निश्चयज्ञा जीवस्य व्यपदिशंति कथयंतीति नास्ति व्यवहारविरोधः। इति दृष्टांतदार्ष्टांताभ्यां व्यवहारनयसमर्थनरूपेण गाथात्रयं गतं ॥५८॥ ५९ ॥६०॥

टीका—जैसे मार्ग में जाते हुए धनिक को लुटता हुआ देख कोई कहता है कि यह मार्ग लुटता है, वहां उस मार्ग में लुटने से मार्ग का लुटना उपचार से कहा जाता है, ऐसा व्यवहारी लोकों का कहना है। निश्चय से देखा जाय, मार्ग तो आकाश के विशेष प्रदेशों को कहते हैं सो वह तो लुटता नहीं है। वैसे जीव में बंधपर्याय से अवस्थित जो कर्म का और नोकर्म का वर्ण है उसे देखकर जीव में स्थित होने से उस का उपचार से जीव का यह वर्ण है, ऐसे व्यवहार से भगवान् अरहंत देव प्रज्ञापन करते हैं—प्रकट करते हैं, तो भी निश्चय से जीव नित्य ही अमूर्तस्वभाव है और उपयोग गुण के कारण अन्य द्रव्य से भिन्न है, इसलिये उस के कोई वर्ण नहीं है। इसी प्रकार गंध, रस और स्पर्श रूप, शरीर, संस्थान, संहनन, राग-द्वेष, मोह, प्रत्यय, कर्म, नोकर्म, वर्ग, वर्गणा, स्पर्धक, अध्यात्मस्थान, अनुभागस्थान, योगस्थान, बंधस्थान, उदयस्थान, मार्गणास्थान, स्थितिबंधस्थान संक्लेशस्थान, विशुद्धिस्थान, संयमलब्धिस्थान, जीवस्थान, और गुणस्थान—ये सभी व्यवहार से जीव के अरहंत देवने कहे हैं तो भी निश्चय से जीव नित्य ही अमूर्त स्वभाव है—और उपयोग गुण के कारण अन्य से भिन्न है, इसलिये उसके ये सब नहीं हैं क्योंकि इन वर्णादि भावों के और जीव के तादात्म्यलक्षण संबंध का अभाव है।

कुतो जीवस्य वर्णादिभिः सह तादात्म्यलक्षणः संबंधो नास्तीति चेत् :—

तत्थभवे जीवाणं संसारत्थाण होंति वण्णादी ।
संसारपमुक्काणं णत्थि हु वण्णादओ केई ॥ ६१ ॥

तत्र भवे जीवानां संसारस्थानां भवंति वर्णादयः ।
संसारप्रमुक्तानां न संति खलु वर्णादयः केचित् ॥ ६१ ॥

यत्किल सर्वास्वप्यवस्थासु यदात्मकत्वेन व्याप्तं भवति तदात्मकत्वव्याप्तिशून्यं न भवति

एवं शुद्धजीव एवोपादेय इति प्रतिपादनमुख्यत्वेन द्वादशगाथाभिः द्वितीयातराधिकारो व्याख्यातः। अतः परं जीवस्य निश्चयनयेन वर्णादितादात्म्यसंबंधो नास्तीति पुनरपि दृढीकरणार्थं गाथाष्टकपर्यंतं व्याख्यानं करोति। तत्रादौ संसारिजीवस्य व्यवहारेण वर्णादितादात्म्यं भवति, मुक्तावस्थायां नास्तीति ज्ञापनार्थं **तत्थभवे** इत्यादि सूत्रमेकं। ततःपरं जीवस्य वर्णादितादात्म्यमस्तीति दुरभिनिवेशे सति जीवाभावो दूषणं प्राप्नोतीति कथनमुख्यत्वेन **जीवो चेवहि** इत्यादिगाथात्रयं। तदनंतरमेकेंद्रियादिचतुर्दशजीवसमासानां जीवेन सह शुद्धनिश्चयनयेन तादात्म्यं

भावार्थ—ये जो वर्ण से लेकर गुणस्थान पर्यन्त भाव कहे हैं, वे सिद्धांत में जीव के कहे हैं, सो व्यवहारनय से कहे गये हैं, निश्चयनय से ये जीव के नहीं हैं। क्योंकि जीव तो परमार्थतः उपयोग स्वरूप है। यहां ऐसा जानना कि पहले व्यवहारनय को असत्यार्थ कहा है, वहां ऐसा नहीं समझना कि वह सर्वथा असत्यार्थ है कथंचित् असत्यार्थ जानना। क्योंकि जब एक द्रव्य को उसकी भिन्न-भिन्न पर्यायों से अभेद रूप असाधारण गुण मात्र को प्रधानरूप से कहा जाय, तब परस्पर द्रव्यों का निमित्तनैमित्तिक भाव, तथा निमित्त से हुए पर्याय ये सब गौण हो जाते हैं, उस एक अभेदद्रव्य की दृष्टि में उनका प्रतिभास नहीं होता। इसलिये वे सब उस द्रव्य में नहीं हैं, इस प्रकार कथंचित् निषेध किया जाता है। यदि यह कहा जाय कि ये उस द्रव्य में हैं तो व्यवहारनय से कह सकते हैं, ऐसा नयविभाग है। सो यहां शुद्ध द्रव्य की दृष्टि से कथन है इसलिये उन सभी को व्यवहारनय से जीवका कहा है ऐसा सिद्ध किया है। और निमित्तनैमित्तिकभाव की दृष्टि से देखा जाय तो कथंचित् सत्यार्थ भी कहते हैं। यदि सर्वथा असत्यार्थ ही कहें तो सब व्यवहार का लोप हो जायगा, तब परमार्थ का भी लोप हो जायगा। इसलिये जिनदेव का उपदेश स्याद्वाद रूप समझना ही सम्यग्ज्ञान है, सर्वथा एकांत करना मिथ्यात्व है ॥ ५८ । ५९ । ६० ॥

यहां प्रश्न होता है कि वर्णादि के साथ जीव का तादात्म्य संबंध क्यों नहीं है? उसका उत्तर कहते हैं;—**[वर्णादयः]** वर्ण आदिक हैं वे **[संसारस्थानां जीवानां]** संसार में स्थित जीवों के **[तत्र भवे]** उस संसार में **[भवंति]** होते हैं **[संसारप्रमुक्तानां]** संसार से छूटे हुए (मुक्त हुए) जीवों के **[खलु]** निश्चय कर **[वर्णादयः केचित्]** वर्णादिक कोई भी **[न संति]** नहीं हैं। इसलिये तादात्म्य संबंध भी नहीं है।

टीका—जो निश्चय से सब अवस्थाओं में तत्स्वरूप से व्याप्त हो और उस स्वरूप की व्याप्ति से रहित न हो, उस वस्तु के साथ उन भावों का तादात्म्य संबंध है। इसलिए सब ही अवस्थाओं के

तस्य तैः सह तादात्म्यलक्षणः संबंधः स्यात्। ततः सर्वास्वप्यवस्थासु वर्णाद्यात्मकत्वव्याप्तस्य भवतो वर्णाद्यात्मकत्वव्याप्तिशून्यस्याभवतश्च पुद्गलस्य वर्णादिभिः सह तादात्म्यलक्षणः संबंधः स्यात्। संसारावस्थायां कथंचिद्वर्णाद्यात्मकत्वव्याप्तस्य भवतो वर्णाद्यात्मकत्वव्याप्तिशून्यस्याभवतश्चापि मोक्षावस्थायां सर्वथा वर्णाद्यात्मकत्वव्याप्तिशून्यस्य भवतो वर्णाद्यात्मकत्वव्याप्तस्याभवतश्च जीवस्य वर्णादिभिः सह तादात्म्यलक्षणः सम्बन्धो न कथंचनापि स्यात् ॥ ६१ ॥

नास्तीति कथनार्थं तथैव वर्णादितादात्म्यनिषेधार्थं च **एक्कं च दोण्णि** इत्यादिगाथात्रयं। ततश्च मिथ्यादृष्ट्यादिचतुर्दशगुणस्थानानामपि जीवेन सह शुद्धनिश्चयनयेन तादात्म्यनिराकरणार्थं, तथैवाभ्यंतरे रागादितादात्म्यनिषेधार्थं च **मोहणकम्म** इत्यादिसूत्रमेकं। एवमष्टगाथाभिस्तृतीयस्थले समुदायपातनिका। तद्यथा—अथ कथं जीवस्य वर्णादिभिः सह तादात्म्यलक्षणसम्बन्धो नास्तीति पृष्टे प्रत्युत्तरं ददाति;—**तत्थभवे जीवाणं संसारत्थाण होंति वण्णादी** तत्र विवक्षिताविवक्षितभवे संसारस्थानां जीवानामशुद्धनयेन वर्णादयो भवंति **संसारपमुक्काणं** संसारप्रमुक्ताना **णत्थि दु वण्णादओ केई** पुद्गलस्थवर्णादितादात्म्यसम्बन्धाभावात्। केवलज्ञानादिगुणसिद्धत्वादिपर्यायैः सह यथा तादात्म्यसम्बन्धोस्ति तथा वा तादात्म्यसम्बन्धाभावादशुद्धनयेनापि न संति पुनर्वर्णादयः केपि ॥ ६१ ॥ इति वर्णादितादात्म्यनिषेधरूपेण गाथा गता। अथ जीवस्य वर्णादितादात्म्यदुराग्रहे सति दोषं दर्शयति;—**जीवो चेव हि एदे सव्वे भावत्ति मण्णसे जदि हि** यथानंतज्ञानाव्याबाधसुखादिगुणा एव जीवो भवति वर्णादिगुणा एव पुद्गलस्तथा जीव एव हि स्फुटमेते वर्णादयः सर्वे भावा मनसि मन्यसे यदि चेत् **जीवस्साजीवस्स य णत्थि विसेसो हि दे कोई** तदा किं दूषणं, विशुद्धज्ञानदर्शनस्वभावजीवस्य जडत्वादिलक्षणाजीवस्य च तस्यैव मते कोपि विशेषो भेदो नास्ति। ततश्च जीवाभावदूषणं प्राप्नोतीति सूत्रार्थः ॥ ६२ ॥ अथ संसारावस्थायामेव जीवस्य वर्णादितादात्म्यसंबंधोस्तीति दुरभिनिवेशेपि जीवाभाव एव दोष इत्युपदिशति;—**जदि संसारत्थाणं जीवाणं तुज्झ होंति वण्णादी** यदि चेत्संसारस्थजीवाना पुद्गलस्येव वर्णादयो गुणास्तव मतेन तवाभिप्रायेणैकांतेन भवंतीति **तम्हा संसारत्था जीवा**

वर्णादि रूप से व्याप्त हुए और वर्णादिक की व्याप्ति से शून्य न हुए पुद्गल द्रव्य का वर्णादिक भावों के साथ तादात्म्य सम्बन्ध है। और संसार अवस्था में कथंचित् वर्णादि स्वरूप से हुए तथा वर्णादि स्वरूप की व्याप्ति से शून्य न हुए जीव का मोक्ष अवस्था में सर्वथा वर्णादि स्वरूप की व्याप्ति से शून्य होने के कारण तथा वर्णादि स्वरूप से व्याप्त न होने के कारण वर्णादि भावों के साथ तादात्म्य सम्बन्ध किसी प्रकार भी नहीं है।

भावार्थ—जो वस्तु जिन भावों से सब अवस्थाओं में व्याप्त हो उस वस्तु का उन भावों के साथ तादात्म्य सम्बन्ध कहा जाता है। सो वर्णादिक तो पुद्गल की सब अवस्थाओं में व्यापक है और जीव की संसार अवस्था में तो वर्णादिक किसी तरह कह सकते हैं परन्तु मोक्ष अवस्था में सर्वथा ही नहीं। इसलिए जीव का वर्णादिक के साथ तादात्म्य सम्बन्ध नहीं है, ऐसा न्याय है। ६१।

आगे जीव का वर्णादिक के साथ तादात्म्य ही है, ऐसा मिथ्या अभिप्राय करे उसमें जो दोष है

जीवस्य वर्णादितादात्म्यदुरभिनिवेशे दोषश्चायं;—

जीवो चेव हि एदे सव्वे भावात्ति मण्णसे जदि हि।
जीवस्साजीवस्स य णत्थि विसेसो दु दे कोई॥ ६२॥

जीवश्चैव ह्येते सर्वे भावा इति मन्यसे यदि हि।
जीवस्याजीवस्य च नास्ति विशेषस्तु ते कश्चित्॥ ६२॥

यथा वर्णादयो भावाः क्रमेण भाविताविर्भावतिरोभावाभिस्ताभिस्ताभिर्व्यक्तिभिः पुद्गलद्रव्यमनुगच्छंतः पुद्गलस्य वर्णादितादात्म्यं प्रथयंति। तथा वर्णादयो भावाः क्रमेण भाविताविर्भावतिरोभावाभिस्ताभिस्ताभिर्व्यक्तिभिर्जीवमनुगच्छंतो जीवस्य वर्णादितादात्म्यं प्रथयंतीति यस्याभिनिवेशः तस्य शेषद्रव्यासाधारणस्य वर्णाद्यात्मकत्वस्य पुद्गललक्षणस्य जीवेन स्वीकरणाज्जीवपुद्गलयोरविशेषप्रसक्तौ सत्यां पुद्गलेभ्यो भिन्नस्य जीवद्रव्यस्याभावाद्भवत्येव जीवाभावः॥६२॥

रूवित्तमावण्णा ततः किं दूषणं, संसारस्थजीवा अमूर्तमनंतज्ञानादिचतुष्टयस्वभावलक्षणं त्यक्त्वा शुक्लकृष्णादिलक्षणं रूपित्वमापन्ना भवंति। अथ—**एवं पुग्गलदव्वं जीवो तह लक्खणेण मूढमई** एवं पूर्वोक्तप्रकारेण जीवस्य रूपित्वे सति पुद्गलद्रव्यमेव जीवः नान्यः कोपि विशुद्धचैतन्यचमत्कारमात्रस्तव लक्षणेन तवाभिप्रायेण हे मूढमते न केवलं संसारावस्थायां पुद्गल एव जीवत्वं प्राप्तः **णिव्वाणमुवगदो वि य जीवत्तं पुग्गलो पत्तो** निर्वाणमुपगतोपि

उसे अगली गाथा में कहते हैं;—[यदि हि] जो तू [इति मन्यसे] ऐसा मानेगा कि [एते भावाः] ये वर्णादिक भाव [सर्वे हि जीवा एव] सभी जीव हैं [तु ते] तो तेरे मत में [जीवस्य च अजीवस्य] जीव और अजीव का [कश्चित्] कोई [विशेषः] भेद [नास्ति] नहीं रहेगा।

टीका—जैसे वर्णादिक भाव हैं, वे अनुक्रम से प्रगट होने (उपजने) वाली और छिपने (नाश होने) वाली उन उन व्यक्तियों पर्यायों से पुद्गल द्रव्य को अन्वय रूप प्राप्त हुए पुद्गल द्रव्य के ही तादात्म्य स्वरूप को विस्तृत करते हैं, उसी प्रकार वर्णादिक भाव क्रम से भावित आविर्भावतिरोभाव वाली पर्यायों से जीव को अन्वयरूप प्राप्त हुए जीव के वर्णादिक के साथ तादात्म्य स्वरूप को विस्तारते हैं ऐसा जिसका अभिप्राय है, उसके अन्य शेष द्रव्यों से असाधारण वर्णादिस्वरूप जो पुद्गल द्रव्य का लक्षण उसको जीव का अङ्गीकार करने से जीव और पुद्गल में अविशेष का प्रसंग होगा। ऐसा होने से पुद्गल से भिन्न जीव द्रव्य का अभाव हो जायगा। तब जीव द्रव्य का ही अभाव हो जायगा।

भावार्थ—जैसे वर्णादि पुद्गल द्रव्य के साथ तादात्म्य स्वरूप हैं, उसी प्रकार जीव के साथ भी तादात्म्य स्वरूप हो जाय तो जीव पुद्गल में कुछ भी भेद न रहे, तब जीव का भी अभाव हो जायगा। यह बड़ा दोष आ जायगा॥ ६२॥

संसारावस्थायामेव जीवस्य वर्णादितादात्म्यमित्यभिनिवेशेप्ययमेव दोषः—

अह संसारत्थाणं जीवाणं तुज्झ होंति वण्णादी।
तम्हा संसारत्था जीवा रूवित्तमावण्णा ॥ ६३ ॥
एवं पुग्गलदव्वं जीवो तहलक्खणेण मूढमदी।
णिव्वाणमुवगदो वि य जीवत्तं पुग्गलो पत्तो ॥ ६४ ॥ (युगलं)

अथ संसारस्थानां जीवानां तव भवंति वर्णादयः।
तस्मात्संसारस्था जीवा रूपित्वमापन्नाः ॥ ६३ ॥
एवं पुद्गलद्रव्यं जीवस्तथालक्षणेन मूढमते।
निर्वाणमुपगतोपि च जीवत्वं पुद्गलः प्राप्तः ॥ ६४ ॥

यस्य तु संसारावस्थायां जीवस्य वर्णादितादात्म्यमस्तीत्यभिनिवेशस्तस्य तदानीं स जीवो रूपित्वमवश्यमवाप्नोति। रूपित्वं च शेषद्रव्यासाधारणं कस्यचिद् द्रव्यस्य लक्षण-

---

पुद्गल एव जीवत्वं प्राप्तः नान्यः कोपि चिद्रूपः। कस्मादिति चेत्, वर्णादितादात्म्यस्य पुद्गलद्रव्यस्यैव निषेधयितुमशक्यत्वादिति भवत्येव जीवाभावः। किंच संसारावस्थायामेकांतेन वर्णादितादात्म्ये सति मोक्ष एव न घटते, कस्मादिति चेत् ? केवलज्ञानादिचतुष्टयव्यक्तिरूपस्य कार्यसमयसारस्यैव मोक्षसंज्ञा सा च जीवस्य पुद्गलत्वे सति न संभवतीति भावार्थः

आगे संसार अवस्था में ही जीव को वर्णादिक से तादात्म्य है, ऐसा अभिप्राय होने पर भी यही दोष आता है, ऐसा कहते हैं;—[अथ] अथवा [संसारस्थानां जीवानां] संसार में स्थित जीवों के [तव] तेरे मत में [वर्णादयः] वर्णादिक तादात्म्यस्वरूप [भवंति] हैं [तस्मात्] तो इसी कारण [संसारस्थाः जीवाः] संसार में स्थित जीव [रूपित्वं आपन्नाः] रूपीपने को प्राप्त हो गए। [एवं] ऐसा होने पर [पुद्गलद्रव्यं] पुद्गल द्रव्य ही [जीवः] जीव सिद्ध हुआ [तथालक्षणेन] पुद्गल के लक्षण के समान जीव का लक्षण होने से [मूढमते] हे मूढ बुद्धि [निर्वाणं] निर्वाण को [उपगतोपि च] प्राप्त हुआ [पुद्गलः] पुद्गल ही [जीवत्वं] जीवपने को [प्राप्तः] प्राप्त हुआ।

टीका—जिसके मत में संसार अवस्था में जीव का वर्णादि भावों के साथ तादात्म्य संबंध है, ऐसा अभिप्राय है, उसके संसार अवस्था के समय वह जीव रूपित्व दशा को अवश्य प्राप्त होता है। और रूपित्व किसी द्रव्य का असाधारण (अन्य द्रव्यों से पृथक् कराने वाला लक्षण है।) इसलिये रूपित्व लक्षण मात्र से जो कुछ लक्ष्यमाण है वही जीव है इस तरह रूपित्व से लक्ष्यमाण पुद्गल द्रव्य ही है। इस प्रकार पुद्गल द्रव्य ही आप जीव है अन्य कोई नहीं है। ऐसा होने पर मोक्ष अवस्था में भी पुद्गल द्रव्य ही आप जीव होता है। क्योंकि जो द्रव्य है, वह नित्य अपने लक्षण से लक्षित है, वह सभी अवस्थाओं में अविनाशस्वभाव है इसलिये अनादि निधन है, इस कारण पुद्गल ही जीव है, इससे भिन्न कोई जीव नहीं है।

मस्ति। ततो रूपित्वेन लक्ष्यमाणं यत्किंचिद्भवति स जीवो भवति। रूपित्वेन लक्ष्यमाणं पुद्गलद्रव्यमेव भवति। एवं पुद्गलद्रव्यमेव स्वयं जीवो भवति न पुनरितरः कतरोपि। तथा च सति मोक्षावस्थायामपि नित्यस्वलक्षणलक्षितस्य द्रव्यस्य सर्वास्वप्यवस्थास्वनपायित्वादनादिनिधनत्वेन पुद्गलद्रव्यमेव स्वयं जीवो भवति न पुनरितरः कतरोपि। तथा च सति तस्यापि पुद्गलेभ्यो भिन्नस्य जीवद्रव्यस्याभावात् भवत्येव जीवाभावः। एवमेतत् स्थितं यद्वर्णादयो भावा न जीव इति ॥६३।६४॥

एक्कं च दोण्णि तिण्णि य चत्तारि य पंच इंदिया जीवा।
बादरपज्जत्तिदरा पयडीओ णामकम्मस्स ॥ ६५ ॥
एदाहि य णिव्वत्ता जीवट्ठाणाउ करणभूदाहिं।
पयडीहिं पुग्गलमईहिं ताहिं कहं भण्णदे जीवो ॥ ६६ ॥ (युग्मम्)

एकं वा द्वे त्रीणि च चत्वारि च पंचेन्द्रियाणि जीवाः।
बादरपर्याप्तेतराः प्रकृतयो नामकर्मणः ॥ ६५ ॥
एताभिश्च निर्वृत्तानि जीवस्थानानि करणभूताभिः।
प्रकृतिभिः पुद्गलमयीभिस्ताभिः कथं भण्यते जीवः ॥ ६६ ॥

निश्चयतः कर्मकरणयोरभिन्नत्वात् यद्येन क्रियते तत्तदेवेति कृत्वा यथा कनकपत्रं कनकेन

॥ ६३। ६४॥ एवं जीवस्य वर्णादितादात्म्ये सति जीवाभावदूषणद्वारेण गाथात्रयं गतं। अथैवं स्थित बादरसूक्ष्मैकेंद्रियादिसंज्ञिपंचेंद्रियपर्यंतं चतुर्दशजीवस्थानानि शुद्धनिश्चयेन जीवस्वरूपं न भवंति तथा देहगता वर्णादयोपीत्यावेदयति;—एकद्वित्रिचतु.पंचेंद्रियसंज्ञ्यसंज्ञिबादरपर्याप्तेतराभिधानाः प्रकृतयो भवंति। कस्य संबंधिन्यो नामकर्मण इति। अथ—एताभिरमूर्तातींद्रियनिरजनपरमात्मतत्त्वविलक्षणाभिर्नामकर्मप्रकृतिभिः पुद्गलमयीभिः

ऐसा होने पर पुद्गलों से भिन्न जीव द्रव्य का अभाव होने से जीव का अभाव ही सिद्ध हुआ। इसलिये यह निश्चित हुआ कि जो वर्णादिक भाव हैं, वे जीव नहीं हैं।

भावार्थ—जो कोई वर्णादि भावों से जीव को ससार अवस्था में भी तादात्म्य सम्बन्ध मानता है, उसके भी जीव का अभाव हो आता है क्योंकि वर्णादिक मूर्तिमान द्रव्य के लक्षण हैं ऐसा मूर्तिमान पुद्गल द्रव्य है यदि वर्णादिक रूप जीव माना जाय, तब जीव भी पुद्गल ही ठहरेगा। जब जीव मुक्त होगा, तब वहाँ भी पुद्गल ही ठहरेगा, तब पुद्गल से भिन्न तो जीव सिद्ध नहीं होगा। इस प्रकार जीव का अभाव सिद्ध होगा। इसलिये वर्णादिक जीव के नहीं हैं ऐसा निश्चय है ॥ ६३। ६४॥

आगे इसी अर्थ को विशेष रूप से स्पष्ट करते हैं;—**[एकं वा]** एकेंद्रिय **[द्वे]** द्वीद्रिय **[त्रीणि च]** त्रीद्रिय **[चत्वारि च]** चतुरिंद्रिय **[पंचेंद्रियाणि]** पंचेंद्रिय **[जीवाः]** जीव तथा **[बादरपर्याप्तेतराः]** बादर, सूक्ष्म, पर्याप्त, अपर्याप्त ये जीव हैं वे **[नामकर्मणः]** नाम कर्म की **[प्रकृतयः]**

क्रियमाणं कनकमेव न त्वन्यत्। तथा जीवस्थानानि बादरसूक्ष्मैकेंद्रियद्वित्रिचतुःपंचेंद्रियपर्याप्ता-पर्याप्ताभिधानाभिः पुद्गलमयीभिः नामकर्मप्रकृतिभिः क्रियमाणानि पुद्गल एव न तु जीवः। नामकर्म-प्रकृतीनां पुद्गलमयत्वं चागमप्रसिद्धं दृश्यमानशरीराकारादिमूर्त्तकार्यानुमेयं च। एवं गंधरस-स्पर्शरूपशरीरसंस्थानसंहननान्यपि पुद्गलमयनामकर्मप्रकृतिनिर्वृत्तत्वे सति तदव्यतिरेकाज्जी-वस्थानैरेवोक्तानि। ततो न वर्णादयो जीव इति निश्चयसिद्धान्तः ॥६५।६६ ॥

निर्वर्त्यते येन यदत्र किंचित्तदेव तत्स्यान्न कथंचनान्यत्।
रुक्मेण निर्वृत्तमिहासिकोशं पश्यंति रुक्मं न कथंचनासिं ॥३८॥

पूर्वोक्ताभिर्निर्वर्तितानि चतुर्दशजीवस्थानानि निश्चयनयेन कथं जीवा भवंति ? न कथमपि। तथाहि—यथा रुक्मेण करणभूतेन निर्वृत्तमसिकोशं तु रुक्ममेव भवति तथा पुद्गलमयप्रकृतिभिर्निष्पन्नानि जीवस्थानानि पुद्गलद्रव्यस्वरूपाण्येव भवंति न च जीवस्वरूपाणि। तथा तेनैव जीवस्थानदृष्टांतेन तदाश्रिता वर्णादयोपि पुद्गलस्वरूपा भवंति, न च जीव-स्वरूपा इत्यभिप्रायः। ॥ ६५ ॥ ६६ ॥ अथ—ग्रंथांतरे पर्याप्तापर्याप्तबादरसूक्ष्मजीवाः कथ्यंते तत्कथं घटत इति पूर्वपक्षे परिहारं ददाति;—**पज्जत्तापज्जत्ता जे सुहुमा बादरा य जे चेव** पर्याप्तापर्याप्ता ये जीवाः कथिताः सूक्ष्मबादरा-

---

प्रकृतियां हैं **[एताभिः च]** इन प्रकृतियों से ही **[करणभूताभिः]** करण स्वरूप होकर **[जीवस्थानानि]** जीवसमास **[निर्वृत्तानि]** रचे गये हैं **[ताभिः]** उन **[पुद्गलमयीभिः]** पुद्गलमय **[प्रकृतिभिः]** प्रकृतियों से रचे हुए को **[जीवः]** जीव **[कथं]** कैसे **[भण्यते]** कह सकते हैं।

टीका—निश्चयनय से कर्म और करण में अभेदभाव है, इस न्याय से जो जिससे किया जाय वह वही है। ऐसा होने पर जैसे सुवर्ण का पत्र सुवर्ण से किया हुआ सुवर्ण ही है, अन्य तो कुछ नहीं उसी प्रकार ये जीवस्थान हैं, वे बादर, सूक्ष्म, एकेंद्रिय, द्वींद्रिय, त्रींद्रिय, चतुरिंद्रिय और पंचेंद्रिय वे सब पर्याप्त अपर्याप्त हैं, वे सभी पुद्गलमयी नामकर्म की प्रकृतियां हैं, वे करण रूप हैं उनसे किये गये हैं, इसलिये पुद्गल ही हैं, वे जीव नहीं हैं। तथा नामकर्म की प्रकृतियों की पुद्गलमयता आगम में प्रसिद्ध है। और जो प्रत्यक्ष देखने में आने वाले शरीर आदि मूर्तिकभाव हैं वे पुद्गल कर्म प्रकृतियों के कार्य होने के कारण अनुमान प्रमाण से ही सिद्ध है। इसी प्रकार गंध, रस, स्पर्श, रूप, शरीर, संस्थान, संह-नन—ये भी नामकर्म की प्रकृतियों द्वारा किए हुए हैं, इसलिए उस पुद्गल से अभेद रूप हैं इसी कारण जीवस्थान पुद्गलमय कहने चाहिए। इस कारण ये वर्णादिक जीव नहीं हैं ऐसा निश्चयनय का सिद्धान्त है।

यहां इसी अर्थ का कलशरूप काव्य है—**निर्वर्त्यते** इत्यादि। **अर्थ**—जिस वस्तु से जो पर्याय निष्पन्न होती है। वह पर्याय उस वस्तु रूप ही है कुछ अन्य वस्तु नहीं है। जैसे सोने से खड्ग का (तलवार का) म्यान बना, उसे लोक सोना ही देखते हैं, खड्ग को तो किसी तरह भी नहीं देखते।

भावार्थ—वर्णादिक पुद्गल से बने हैं वे पुद्गल ही है, जीव नहीं हैं।

वर्णादिसामग्र्यमिदं विदंतु निर्माणमेकस्य हि पुद्गलस्य ।
ततोस्त्विदं पुद्गल एव नात्मा यतः स विज्ञानघनस्ततोन्यः ।। ३६ ।।

शेषमन्यद्व्यवहारमात्रं;—

पज्जत्तापज्जत्ता जे सुहुमा बादरा य जे चेव ।
देहस्स जीवसण्णा सुत्ते ववहारदो उत्ता ।। ६७ ।।

पर्याप्तापर्याप्ता ये सूक्ष्मा बादराश्च ये चैव ।
देहस्य जीवसंज्ञाः सूत्रे व्यवहारतः उक्ताः ।। ६७ ।।

यत्किल बादरसूक्ष्मैकेंद्रियद्वित्रिचतुःपंचेंद्रियपर्याप्तापर्याप्ता इति शरीरस्य संज्ञाः सूत्रे जीवसंज्ञात्वेनोक्ताः अप्रयोजनार्थः परप्रसिद्ध्या घृतघटवद्व्यवहारः । यथा हि कस्यचिदाजन्मप्रसिद्धैकघृतकुंभस्य तदितरकुंभानभिज्ञस्य प्रबोधनाय योऽयं घृतकुंभः स मृण्मयो न घृतमय इति तत्प्रसिद्ध्या कुम्भे घृतकुम्भव्यवहारः तथास्याज्ञानिनो लोकस्यासंसारप्रसिद्धाशुद्धजीवस्य शुद्धजीवानभिज्ञस्य प्रबोधनाय योयं वर्णादिमान् जीवः स ज्ञानमयो न वर्णादिमयः इति तत्प्रसिद्ध्या जीवे वर्णादिमद्व्यवहारः ।। ६७ ।।

यथैव ये कथिताः **देहस्स जीवसण्णा सुत्ते ववहारदो उत्ता** पर्याप्तापर्याप्तदेहं दृष्ट्वा पर्याप्तापर्याप्तबादरसूक्ष्म-विलक्षणपरमचिज्ज्योतिर्लक्षणशुद्धात्मस्वरूपात्पृथग्भूतस्य देहस्य सा जीवसंज्ञा कथिता । क्व, सूत्रे परमागमे । कस्मात्, व्यवहारादिति नास्ति दोषः । एवंजीवस्थानानि जीवस्थानाश्रिता वर्णादयश्च निश्चयेन जीवस्वरूपं न भवंतीति कथनरूपेण

अब दूसरा काव्य कहते हैं—**वर्णादि** इत्यादि । **अर्थ**—ये वर्णादिक गुणस्थानपर्यंत सभी भाव केवल एक पुद्गल की रचना हैं ऐसा तुम जानो इसलिए ये पुद्गल ही हैं आत्मा नहीं हैं । क्योंकि आत्मा तो विज्ञानघन है ज्ञान का पिण्ड है इस कारण पुद्गल से अन्य है ।। ६५ । ६६ ।।

आगे कहते हैं कि इस ज्ञान घन आत्मा के अतिरिक्त अन्य भावों को जीव कहना सो सब ही व्यवहारमात्र है;—[ये] जो [पर्याप्तापर्याप्ताः] पर्याप्त अपर्याप्त, [ये चैव] और जो [सूक्ष्माः बादराश्च] सूक्ष्म बादर आदि जितनी [देहस्य] देह की [जीवसंज्ञाः] जीव संज्ञाएं कहीं हैं वह सभी [सूत्रे] सूत्र में [व्यवहारतः] व्यवहार नय से [उक्ताः] कहीं हैं ।

टीका—निश्चय से यह जानना कि बादर, सूक्ष्म, एकेंद्रिय, द्वींद्रिय, त्रींद्रिय, चतुरिंद्रिय, पंचेंद्रिय, पर्याप्त, अपर्याप्त ऐसे शरीर को सूत्र में जीव संज्ञा द्वारा कहा है । वहां पर की प्रसिद्धि से घृत के घड़े की तरह व्यवहार है । यह व्यवहार अप्रयोजनभूत है । उसको दृष्टांत द्वारा स्पष्ट कहते हैं—जैसे कोई पुरुष ऐसा था कि जिसने जन्म से लेकर घी का ही घड़ा देखा था, घृत से खाली भिन्न घट नहीं देखा, उसको समझाने के लिए ऐसा कहते हैं कि यह जो घृत का घट है, वह

घृतकुम्भाभिधानेपि कुम्भो घृतमयो न चेत् ।
जीवो वर्णादिमज्जीवजल्पनेपि न तन्मयः ॥ ४० ॥

एतदपि स्थितमेव यद्रागादयो भावा न जीवा इति;—

मोहणकम्मस्सुदया दु वरिणया जे इमे गुणट्ठाणा ।
ते कह हवंति जीवा जे णिच्चमचेदणा उत्ता ॥ ६८ ॥

मोहनकर्मण उदयात्तु वर्णितानि यानीमानि गुणस्थानानि ।
तानि कथं भवंति जीवा यानि नित्यमचेतनान्युक्तानि ॥ ६८ ॥

गाथात्रयं गतं ॥ ६७ ॥ अथ न केवलं बहिरंगवर्णादयो शुद्धनिश्चयेन जीवस्वरूपं न भवंति अभ्यंतरमिथ्यात्वादिगुणस्थानरूपरागादयोपि न भवंतीति स्थितं;—**मोहणकम्मस्सुदया दु वरिणदा जे इमे गुणट्ठाणा** निर्मोहपरमचैतन्यप्रकाशलक्षणपरमात्मतत्त्वप्रतिपक्षभूतानाद्यविद्याकंदलीकंदायमानसंतानागतमोहकर्मोदयात्सकाशात् यानीमानि वर्णितानि

मिट्टीमय है, घृतमय नहीं है, ऐसे उस पुरुष के घृत के घट की प्रसिद्धि से समझाने वाला भी घृत का घट कहता है ऐसा व्यवहार है। उसी प्रकार इस अज्ञानी प्राणी के अनादि संसार से लेकर अशुद्ध जीव ही प्रसिद्ध है, शुद्ध जीव को नहीं जानता, उसको शुद्ध जीव का ज्ञान कराने के लिए ऐसा सूत्र में कहा है कि जो यह वर्णादिमान् जीव कहा जाता है, वह ज्ञानमय है, वर्णादिमय नहीं है। इस प्रकार उस अज्ञानी प्राणी के वर्णादिमान् प्रसिद्ध है। उस प्रसिद्धि से जीव में वर्णादिमान् होने का व्यवहार सूत्र में किया है।

अब इसी अर्थ का कलशरूप काव्य कहते हैं—**घृतकुंभा** । इत्यादि । **अर्थ**—यह घृत का कुंभ है, ऐसा कहने पर भी कुंभ है, वह घृतमय नहीं है मृत्तिकामय ही है, उसी प्रकार जीव वर्णादिमान् है ऐसा कहने पर भी जीव वर्णादिमान् नहीं है, ज्ञानघन ही है।

भावार्थ—जिसने पहले घट को मृत्तिका का नहीं जाना और घृत के भरे घट को लोक घृत का घट कहते हैं ऐसा सुना, वहां यही जाना कि घट घृत का ही कहा जाता है। उसको समझाने के लिए मृत्तिका का घट जानने वाला मृत्तिका का घट कह कर समझाता है। उसी प्रकार ज्ञानस्वरूप आत्मा को तो जिसने जाना नहीं और वर्णादिक के सम्बन्ध रूप ही जीव को जाना, उसके समझाने को सूत्र में भी कहा है कि यह वर्णादिमान् तो पुद्गल है। जीव ज्ञानघन है ऐसा जानना।

अब कहते हैं कि जैसे वर्णादिकभाव जीव नहीं हैं, उसी प्रकार यह भी सिद्ध हुआ कि रागादिक भाव भी जीव नहीं हैं;—**[यानि इमानि]** जो ये **[गुणस्थानानि]** गुणस्थान हैं वे **[मोहनकर्मणः उदयात् तु]** मोहकर्म के उदय से होते हैं ऐसे **[वर्णितानि]** सर्वज्ञ के आगम में वर्णन किये गये हैं **[तानि]** वे **[जीवाः]** जीव **[कथं]** कैसे **[भवंति]** हो सकते हैं क्योंकि **[यानि]** ये **[नित्यं]** हमेशा **[अचेतनानि]** अचेतन **[उक्तानि]** कहे हैं।

मिथ्यादृष्ट्यादीनि गुणस्थानानि हि पौद्गलिकमोहकर्मप्रकृतिविपाकपूर्वकत्वे सति नित्यमचेतनत्वात् कारणानुविधायीनि कार्याणीति कृत्वा यवपूर्वका यवा यवा एवेति न्यायेन पुद्गल एव न तु जीवः। गुणस्थानानां नित्यमचेतनत्वं चागमाच्चैतन्यस्वभावव्याप्तस्यात्मनोतिरिक्तत्वेन विवेचकैः स्वयमुपलभ्यमानत्वाच्च प्रसाध्यं। एवं रागद्वेषमोहप्रत्ययकर्मनोकर्मवर्गवर्गणास्पर्द्धकाध्यात्मस्थानानुभागस्थानयोगस्थानबंधस्थानोदयस्थानमार्गणास्थानस्थितिबंधस्थानसंक्लेशस्थानविशुद्धिस्थानसंयमलब्धिस्थानान्यपि पुद्गलकर्मपूर्वकत्वे सति नित्यमचेतनत्वात्पुद्गल एव न तु जीव इति स्वयमायातं। ततो रागादयो भावा न जीव इति सिद्धं। तर्हि को जीव इति चेत्।

कथितानि गुणस्थानानि। तथा चोक्तं "गुणसण्णा सा च मोहजोगभवा" **ते कह हवंति जीवा** तानि कथं भवंति जीवा न कथमपि। कथंभूतानि, **ते णिच्चमचेदणा उत्ता** यद्यप्यशुद्धनिश्चयेन चेतनानि तथापि शुद्धनिश्चयेन नित्यं सर्वकालमचेतनानि। अशुद्धनिश्चयस्तु वस्तुतो यद्यपि द्रव्यकर्मापेक्षयाभ्यंतररागादयश्चेतना इति मत्वा निश्चयसंज्ञां लभते तथापि शुद्धनिश्चयापेक्षया व्यवहार एव। इति व्याख्यानं निश्चयव्यवहारनयविचारकाले सर्वत्र ज्ञातव्यं। एवमभ्यंतरे यथा मिथ्यादृष्ट्यादिगुणस्थानानि जीवस्वरूपं न भवंति तथा रागादयोपि शुद्धजीवस्वरूपं न भवंतीति कथनरूपेणाष्टमगाथा गता ॥ ६८ ॥ एवमष्टगाथाभिस्तृतीयांतराधिकारो व्याख्यातः। ननु रागादयो जीवस्वरूपं न भवंतीति जीवाधिकारे व्याख्यातं अस्मिन्नजीवाधिकारेपि तदेवेति पुनरुक्तमिदं। तन्न, विस्तररुचिशिष्यं प्रति नवाधिकारैः समयसार एव व्याख्यायते न पुनरन्यदिति

टीका—जो ये मिथ्यादृष्टि आदि गुणस्थान हैं, वे पुद्गल रूप मोहकर्म की प्रकृति के उदय होने से होते हैं, इसलिये नित्य ही अचेतन हैं, क्योंकि जैसा कारण होता है, उसी के अनुसार कार्य होता है। जैसे जौ से जौ होते हैं, वे जौ ही है, इस न्याय से वे पुद्गल ही हैं जीव नही हैं। यहां गुणस्थानो की नित्य अचेतनता आगम से सिद्ध है और चैतन्यस्वभाव से व्याप्त आत्मा से भिन्न रूप से भेदज्ञानी पुरुषों के द्वारा स्वयं प्राप्य है, इस हेतु से सिद्ध करना। चैतन्यमात्र आत्मा के अनुभव से ये बाह्य हैं इसलिये अचेतन ही हैं। इसी प्रकार राग, द्वेष, मोह, प्रत्यय, कर्म, नोकर्म, वर्ग, वर्गणा, स्पर्धक, अध्यात्मस्थान, अनुभागस्थान, योगस्थान, बंधस्थान, उदयस्थान, मार्गणास्थान, स्थितिबंधस्थान, संक्लेशस्थान, विशुद्धिस्थान, संयमलब्धिस्थान ये सभी पुद्गल कर्म पूर्वक होने से नित्य अचेतन होने के कारण पुद्गल ही हैं, जीव नहीं हैं, ऐसा स्वयं (अपने आप) सिद्ध हुआ, इसलिये रागादिक भाव जीव नहीं हैं, ऐसा भी सिद्ध हुआ।

भावार्थ—पुद्गल कर्म के उदय के निमित्त से हुए चैतन्य के विकार भी पुद्गल ही हैं क्योंकि शुद्धद्रव्यार्थिकनय की दृष्टि में चैतन्य अभेद रूप है और इसके परिणाम भी स्वाभाविक शुद्ध ज्ञान दर्शन हैं। इस कारण परनिमित्त से जो विकार होते हैं, वे चैतन्यसरीखे दीखते हैं, तो भी चैतन्य की सर्व अवस्थाओं में व्यापक नहीं हैं। इसलिये चैतन्य शून्य (जड़) हैं इस तरह जो जड़ है वह पुद्गल है, ऐसा निश्चय हुआ।

अनाद्यनंतमचलं स्वसंवेद्यमिदं स्फुटं ।
जीवः स्वयं तु चैतन्यमुच्चैश्चकचकायते ॥ ४१ ॥
वर्णाद्यैः सहितस्तथा विरहितो द्वेधास्त्यजीवो यतो ।
नामूर्तत्वमुपास्य पश्यति जगज्जीवस्य तत्त्वं ततः ।
इत्यालोच्य विवेचकैः समुचितं नाव्याप्यतिव्यापि वा ।
व्यक्तं व्यंजितजीवतत्त्वमचलं चैतन्यमालंब्यतां ॥ ४२ ॥
जीवादजीवमिति लक्षणतो विभिन्नं ज्ञानी जनोऽनुभवति स्वयमुल्लसंतं ।
अज्ञानिनो निरवधिप्रविजृंभितोयं मोहस्तु तत्कथमहो बत नानटीति ॥ ४३ ॥

प्रतिज्ञावचनं । तत्रापि समयसारव्याख्यानमात्रापि समयसारव्याख्यानमेव । यदि पुनः समयसारं त्यक्त्वान्यद्व्याख्यायते तदा प्रतिज्ञाभंग इति नास्ति पुनरुक्तं । अथवा भावनाग्रंथे समाधिशतकपरमात्मप्रकाशादिग्रंथवद्रागिणां शृङ्गारकथावद्वा

यहां पूछते हैं कि वर्णादिक और रागादिक जीव नहीं हैं तो जीव क्या है ? उसका उत्तर रूप श्लोक कहते हैं **अनाद्य** इत्यादि । **अर्थ**—जीव है वह चैतन्य है, यह अपने आप अतिशय से चमत्कार रूप प्रकाशमान है । अनादि है, किसी समय में नया नहीं उत्पन्न हुआ, अनंत है जिसका किसी काल में विनाश नहीं है, 'अचल है, चैतन्यपने से अन्य रूप (चलाचल) कभी नहीं होता' स्वसंवेद्य है, आप ही कर जाना जाता है और प्रकट है, छिपा हुआ नहीं है ।

आगे दूसरे लक्षण के अव्याप्ति अतिव्याप्ति दूषणों को दूर करने के लिये काव्य कहते हैं—**वर्णाद्यैः** इत्यादि । **अर्थ**—यदि जीव का लक्षण अमूर्तिक कहा जाय तो अजीव पदार्थ भी दो प्रकार हैं-धर्म, अधर्म, आकाश और काल—ये तो वर्णादि भाव से रहित हैं और पुद्गल वर्णादि सहित है इसलिये अमूर्तिकपने को ग्रहण करके लोक जीव के यथार्थस्वरूप को नहीं देखते । इस में अतिव्याप्ति दोष आता है । वर्णादिक से रागादि का भी ग्रहण है सो रागादिक जीव का लक्षण कहा जाय तो उन की व्याप्ति पुद्गल से ही है, जीव की सब अवस्थाओं में व्याप्ति नहीं इसलिये अव्याप्ति दोष आता है । इस प्रकार भेदज्ञानी पुरुषों ने परीक्षा कर अतिव्याप्ति, अव्याप्ति दोष से रहित चेतनपना ही लक्षण कहा है वही ठीक है । उसी ने जीव का यथार्थस्वरूप प्रकट किया है । जीव तो कभी चलाचल नहीं है, सदा मौजूद है । इसलिये जगत् इसी लक्षण को अवलंबन करे, इसी से यथार्थ जीव का ग्रहण होता है ।

यदि ऐसे लक्षण से जीव प्रकट है तो भी अज्ञानी लोकों को इसका अज्ञान किस तरह रहता है ? उस को आचार्य आश्चर्य तथा खेदसहित कहते हैं—**जीवाद्** इत्यादि **अर्थ**—इस प्रकार पूर्वकथित लक्षण से जीव से अजीव भिन्न है । ज्ञानीजन उसे अपने आप प्रकट उदय हुआ अनुभव करते हैं तो भी अज्ञानी जनों के यह अमर्यादित मोह (अज्ञान) प्रकट फैलता हुआ कैसे अत्यंत नृत्य करता है ? यह हम को बड़ा अचंभा है, तथा खेद है ।

नानट्यतां तथापि—

अस्मिन्ननादिनि महत्यविवेकनाट्ये वर्णादिमान्नटति पुद्गल एव नान्यः ।
रागादिपुद्गलविकारविरुद्धशुद्धचैतन्यधातुमयमूर्तिरयं च जीवः ॥ ४४ ॥

इत्थं ज्ञानक्रकचकलनापाटनं[1] नाटयित्वा जीवाजीवौ स्फुटविघटनं नैव यावत्प्रयातः ।
विश्वं व्याप्य प्रसभविकसद्व्यक्तचिन्मात्रशक्त्या ज्ञातृद्रव्यं स्वयमतिरसात्तावदुच्चैश्चकाशे ॥४५॥

इति जीवाजीवौ पृथग्भूत्वा निष्क्रांतौ ॥ ६८ ॥

इति श्रीमदमृतचंद्रसूरिविरचितायां समयसारव्याख्यायामात्मख्यातौ
जीवाजीवप्ररूपकः प्रथमोऽङ्कः ॥ १ ॥

पुनरुक्तदोषो नास्ति । अथवा तत्र जीवस्य मुख्यता, अत्राजीवस्य मुख्यता । विवक्षितो मुख्य इति वचनात् । अथवा तत्र सामान्यव्याख्यानमत्र तु विस्तरेण अथवा तत्र रागादिभ्यो भिन्नो जीवो भवतीति विधिमुख्यतया व्याख्यानं, अत्र तु रागादयो जीवस्वरूपं न भवंतीति निषेधमुख्यतया व्याख्यानं । किंवत्, एकत्वान्यत्वानुप्रेक्षाप्रस्तावे विधिनिषेधव्याख्यानवदिति परिहारपंचकं ज्ञातव्यं । एवं जीवाजीवाधिकाररंगभूमौ शृङ्गारसहितपात्रवद्व्यवहारेणैकीभूतौ प्रविष्टौ निश्चयेन तु शृङ्गाररहितपात्रवत्पृथग्भूत्वा निष्क्रांताविति ।

इति श्रीजयसेनाचार्यकृतायां समयसारव्याख्याया शुद्धात्मानुभूतिलक्षणाया तात्पर्य-
वृत्तौ स्थलत्रयसमुदायेन त्रिंशद्गाथाभिर्जीवाधिकारः समाप्तः ॥ १ ॥

फिर भी इसका निषेध करते हैं कि मोह नृत्य करता है तो करे तो भी यह जीव ऐसा है—**अस्मिन्** इत्यादि । **अर्थ**—यह अनादि काल का बड़ा अविवेक रूप नृत्य है, उसमें वर्णादिमान् पुद्गल ही नृत्य करता है, अन्य कोई नहीं है । अभेदज्ञान में पुद्गल ही अनेक प्रकार दीखता है, जीव तो अनेक प्रकार नहीं है । यह जीव, रागादिक पुद्गल विकारों से विलक्षण शुद्धचैतन्य-धातुमय-मूर्ति है ।

भावार्थ—रागादि चैतन्य विकार को देख ऐसा भ्रम न करना कि ये भी चैतन्य ही हैं क्योंकि चैतन्य की सब अवस्थाओं में व्याप्त होकर रहें, तब चैतन्य के कहे जायें, सो ऐसा नहीं है, मोक्षअवस्था में इनका अभाव है । तथा इनका अनुभव भी आकुलतामय दुःखरूप है । चैतन्य का अनुभव निराकुल है, वही जीव का स्वभाव है ऐसा जानना ।

आगे भेदज्ञान की प्रवृत्तिपूर्वक यह ज्ञाता द्रव्य आप प्रकट होता है ऐसी महिमा कहकर प्रथम अधिकार को पूर्ण करते हैं । उसका कलश रूप काव्य कहते हैं **इत्थं** इत्यादि । **अर्थ**—इस प्रकार ज्ञान-रूप आरे को चलाने का बारंबार अभ्यास करना, उसको चलाकर जीव और अजीव दोनों स्पष्ट रूप से जब तक पृथक् न हुए तब तक यह ज्ञाता द्रव्य आत्मा, समस्त पदार्थों में व्याप्त होकर तथा प्रकट विकास रूप हुई चैतन्यमात्र शक्ति से अपने आप वेग के अतिशय से प्रकट होकर प्रकाशमान होता है ।

---

१. कलनाद् इति पाठान्तरम् ।

भावार्थ—जीव अजीव दोनों अनादिकाल से संयोग रूप हैं सो अज्ञान से एक सरीखे दीखते हैं। वहां भेदज्ञान के अभ्यास से जब तक प्रकट पृथक् नहीं हुए अर्थात् जीव कर्मों से छूट मोक्ष को प्राप्त न हुआ, तब तक यह ज्ञाताद्रव्य जीव अपनी ज्ञानशक्ति से समस्त वस्तुओं को जानकर अति वेग से आप प्रकट हुआ। यहां ऐसा तात्पर्य है कि सम्यग्दृष्टि होने के बाद जब तक केवलज्ञान उत्पन्न नहीं होता, तब तक तो सर्वज्ञ के आगम से उत्पन्न हुए श्रुतज्ञान से समस्त वस्तुओं का संक्षेप तथा विस्तार से परोक्ष ज्ञान होता है, उस ज्ञान स्वरूप आत्मा का जो अनुभव होता है, वही इसका प्रकट होना है। और जब घातिया कर्मों के नाश से केवलज्ञान प्रकट हो जाता है, तब सब वस्तुओं को साक्षात् प्रत्यक्ष जानता है। ऐसे ज्ञानस्वरूप आत्मा का साक्षात् अनुभव करता है। वही इसका प्रकट होना है। इस प्रकार मोक्ष होने के पूर्व ही आत्मा प्रकाशमान होता है। यह जीव अजीव के पृथक् होने की रीति है। इस प्रकार जीव अजीव का पहला अधिकार पूर्ण हुआ। उसमें टीकाकार ने पहले रंगभूमि का स्थल जुदा कह उसके बाद यह कहा था कि नृत्य के अखाड़े में जीव अजीव दोनों एक होकर प्रवेश करते हैं। दोनों ने एकत्व का स्वांग बनाया है। उस अवसर में भेदज्ञानी सम्यग्दृष्टि पुरुष ने अपने सम्यग्ज्ञान से दोनों को लक्षण-भेद से परीक्षा कर पृथक् जान लिये, तब स्वांग हो चुका, दोनों पृथक्-पृथक् होके अखाड़े में से बाहर आ गये। ऐसा अलंकार द्वारा वर्णन किया है।

जीव अजीव अनादि संयोग मिलै लखि मूढ़ न आतम पावैं
सम्यक् भेद-विज्ञान भये पुन भिन्न गहै निजभाव सुदावें।
श्रीगुरु के उपदेश सुनै रु भले दिन पाय अज्ञान गमावैं
ते जगमांहि महंत कहाय वसें शिव जाय सुखी नित थावें ॥ १ ॥

इति श्रीपंडितजयचंद्रकृत समयसारग्रंथ की आत्मख्याति टीका की भाषाटीका में पहला **जीवाजीवाधिकार** पूर्ण हुआ ॥ १ ॥

अथ कर्तृकर्माधिकारः ॥ २ ॥

अथ जीवाजीवावेव कर्तृकर्मवेषेण प्रविशतः ।

एकः कर्ता चिदहमिह मे कर्म कोपादयोऽमी, इत्यज्ञानां शमयदभितः कर्तृकर्मप्रवृत्तिं ।
ज्ञानज्योतिः स्फुरति परमोदात्तमत्यंतधीरं साक्षात्कुर्वन्निरुपधि पृथग्द्रव्यनिर्भासि विश्वं ॥४६॥

जाव ण वेदि विसेसंतरं तु आदासवाण दोह्णं पि ।
अण्णाणी तावदु सो कोधादिसु वट्टदे जीवो ॥६९॥
कोधादिसु वट्टंतस्स तस्स कम्मस्स संचओ होदि ।
जीवस्सेवं बंधो भणिदो खलु सव्वदरसीहिं ॥७०॥ (युग्मं)

यावन्न वेत्ति विशेषांतरं त्वात्मास्रवयोर्द्वयोरपि ।
अज्ञानी तावत्स क्रोधादिषु वर्त्तते जीवः ॥ ६९ ॥
क्रोधादिषु वर्त्तमानस्य तस्य कर्मणः संचयो भवति ।
जीवस्यैवं बंधो भणितः खलु सर्वदर्शिभिः ॥ ७० ॥

यथायमात्मा तादात्म्यसिद्धसंबंधयोरात्मज्ञानयोरविशेषाद्भेदमपश्यन्नविशंकमात्मतया

अथ पूर्वोक्तजीवाधिकाररंगभूमौ जीवाजीवावेव यद्यपि शुद्धनिश्चयेन कर्तृकर्मभावरहितौ तथापि व्यवहारनयेन कर्तृकर्मवेषेण शृंगारसहितपात्रवत्प्रविशत इति दंडकान्विहायाष्टाधिकसप्ततिगाथापर्यंतं नवभिः स्थलैर्व्याख्यानं करोतीति पुण्यपापादिसप्तपदार्थपीठिकारूपेण तृतीयाधिकारे समुदायपातनिका। अथवा **जो खलु संसारत्थो जीवो** इत्यादि-

---

दोहा—कर्ताकर्मविभावकूं, मेंटि ज्ञानमय होय ।
कर्म नाशि शिव में बसे, तिन्हें नमूं मद खोय ॥ १ ॥

अब टीकाकार कहते हैं कि, जीव अजीव दोनों एक कर्ता कर्म का वेष धारण करके प्रवेश करते हैं। (जैसे दो पुरुष आपस में कोई स्वांग रच कर नृत्य के अखाड़े में प्रवेश करते हैं, उसी प्रकार यहां अलंकार जानना। उसमें पहले उस स्वांग को ज्ञान यथार्थ जान लेता है, उस की महिमा में काव्य कहते हैं)—**एकः** इत्यादि। **अर्थ**—ज्ञानज्योति प्रकट स्फुरायमान होती है। अज्ञानी, जीवों की ऐसी कर्ता कर्म की प्रवृत्ति है कि इस लोक में मैं चैतन्यस्वरूप आत्मा तो एक कर्ता हूं और ये क्रोधादिक भाव मेरे कर्म हैं, इस प्रकार कर्ता कर्म की प्रवृत्ति को यह ज्ञानज्योति शमन करती है। जो ज्ञानज्योति उत्कृष्ट उदात्त है, किसी के आधीन नहीं है, अत्यंत धीर है अर्थात् किसी प्रकार की आकुलता नहीं है, और दूसरे की सहायता के बिना भिन्न भिन्न द्रव्यों के प्रकाशित करने का जिस का स्वभाव है इसी कारण समस्त लोकालोक को साक्षात् करती है।

ज्ञाने वर्तते तत्र वर्तमानश्च ज्ञानक्रियायाः स्वभावभूतत्वेनाप्रतिषिद्धत्वाज्जानाति तथा संयोगसिद्ध-संबंधयोरप्यात्मक्रोधाद्यास्रवयोः स्वयमज्ञानेन विशेषमजानन् यावद्भेदं न पश्यति तावदशंकमात्मतया क्रोधादौ वर्तते। तत्र वर्तमानश्च क्रोधादिक्रियाणां परभावभूतत्वात्प्रतिषिद्धत्वेपि स्वभावभूतत्वाध्यासात्क्रुध्यति रज्यते मुह्यति चेति। तदत्र योयमात्मा स्वयमज्ञानभवने ज्ञानभवनमात्रसहजोदासीनावस्थात्यागेन व्याप्रियमाणः प्रतिभाति स कर्ता। यत्तु ज्ञानभवनव्याप्रियमाणत्वेभ्यो भिन्नं क्रियमाणत्वेनांतरुत्प्लवमानं प्रतिभाति क्रोधादि तत्कर्म। एवमियमनादिरज्ञानजा कर्तृकर्म-

---

गाथात्रयेण पुण्यपापादिसप्तपदार्था जीवपुद्गलसंयोगपरिणामनिवृत्ता न च शुद्धनिश्चयेन शुद्धजीवस्वरूपमिति पंचास्तिकायप्राभृते यत्पूर्वं संक्षेपेण व्याख्यातं तस्यैवेदानीं व्यक्त्यर्थं पुण्यपापादिसप्तपदार्थानां पीठिकासमुदायकथनं तात्पर्यं कथ्यत इति द्वितीयपातनिका। प्रथमतस्तावत् **जाव ण वेदि विसेसंतरं** इत्यादिगाथामादिं कृत्वा पाठक्रमेण गाथाषट्कपर्यंतं व्याख्यानं करोति। तत्र गाथाद्वयमज्ञानिजीवमुख्यत्वेन गाथाचतुष्टयं, संज्ञानिजीवमुख्यत्वेन कथ्यत इति प्रथमस्थले समुदायपातनिका। तद्यथा—अथ क्रोधाद्यास्रवशुद्धात्मनोर्यावत्कालं भेदविज्ञानं न जानाति तावदज्ञानी भवतीत्यावेदयति;—**जाव ण वेदि विसेसंतरं तु आदासवाण दोण्हंपि** यावत्कालं न वेत्ति न जानाति विशेषांतरं भेदज्ञानं शुद्धात्मक्रोधाद्यास्रवस्वरूपयोर्द्वयोः **अण्णाणी ताव दु सो** तावत्कालपर्यंतमज्ञानी बहिरात्मा भवति। स जीवः। अज्ञानी सन्किं करोति। **कोधादिसु वट्टदे जीवो** यथा ज्ञानमहं इत्यभेदेन वर्तते तथा क्रोधाद्यास्रवरहितनिर्मलात्मानुभूतिलक्षणनिजशुद्धात्मस्वभावात्पृथग्भूतेषु क्रोधादिष्वपि क्रोधोहमित्यभेदेन वर्तते परिणमतीति। अथ—**कोधादिसु वट्टंतस्स तस्स** उत्तमक्षमादिस्वरूपपरमात्मविलक्षणेषु क्रोधादिषु वर्तमानस्य तस्य जीवस्य। किं फलं भवति, **कम्मस्स संचओ होदि** परमात्मप्रच्छादककर्मणः संचयः आस्रव आगमनं भवति। **जीवस्सेवं बंधो भणिदो खलु सव्वदरसीहिं** तैलम्रक्षिते धूलिसमागमवदास्रवे सति ततो मलादितैलसंबंधेन मलबंधवत्प्रकृतिस्थित्यनुभागप्रदेशलक्षणः स्वशुद्धात्मा-

---

भावार्थ—ऐसा ज्ञानस्वरूप आत्मा परद्रव्य तथा परभावों के कर्ताकर्मपने के अज्ञान को दूर कर आप प्रकट प्रकाशमान होता है।

आगे कहते हैं कि यह जीव जब तक आस्रव के और आत्मा के भेद को नहीं जानता तब तक अज्ञानी हुआ आस्रवों में आप लीन होकर कर्मों का बंध करता है;—**[जीवः]** यह जीव **[यावत्]** जबतक **[आत्मास्रवयोः द्वयोः अपि तु]** आत्मा और आस्रव इन दोनों के **[विशेषांतरं]** भिन्न भिन्न लक्षण **[न वेत्ति]** नहीं जानता **[तावत्]** तब तक **[स अज्ञानी]** वह अज्ञानी हुआ **[क्रोधादिषु]** क्रोधादिक आस्रवों में **[वर्तते]** प्रवर्तता है। **[क्रोधादिषु]** क्रोधादिकों में **[वर्तमानस्य तस्य]** वर्तते हुए उसके **[कर्मणः]** कर्मों का **[संचयः भवति]** संचय होता है **[एवं]** इस प्रकार **[जीवस्य]** जीव के **[बंधः]** कर्मों का बंध **[सर्वदर्शिभिः]** सर्वज्ञदेवों ने **[भणितः खलु]** निश्चय से कहा है।

टीका—यह आत्मा अपने और ज्ञान के तादात्म्य सिद्ध सम्बन्ध होने के कारण अपने और

प्रवृत्तिः। एवमस्यात्मनः[1] स्वयमज्ञानात्कर्तृकर्मभावेन क्रोधादिषु वर्त्तमानस्य तमेव क्रोधादिवृत्ति-रूपं परिणामं निमित्तमात्रीकृत्य स्वयमेवपरिणममानं पौद्गलिकं कर्म संचयमुपयाति। एवं जीव-पुद्गलयोः परस्परावगाहलक्षणसम्बन्धात्मा बंधः सिद्ध्येत्। सचानेकात्मकैकसंतानत्वेन निरस्तेतरेत-राश्रयदोषः कर्तृकर्मप्रवृत्तिनिमित्तस्याज्ञानस्य निमित्तं॥ ६९ ॥ ७० ॥

वाप्तिस्वरूपमोक्षविलक्षणो बंधो भवति। जीवस्यैवं खलु स्फुट भणितं सर्वदर्शिभि सर्वज्ञै। किं च यावत्क्रोधाद्यास्रवेभ्यो भिन्नं शुद्धात्मस्वरूपं स्वसंवेदनज्ञानबलेन न जानाति तावत्कालमज्ञानी भवति। अज्ञानी सन् अज्ञानजा कर्तृकर्मप्रवृत्तिं न मुंचति तस्माद्बन्धो भवति। बंधात्संसारं परिभ्रमतीत्यभिप्राय। एवमज्ञानिजीवस्वरूपकथनरूपेण गाथाद्वयं गतं॥६९॥७०॥

ज्ञान में भेद नहीं देखता; अतः ज्ञान में निःशंक होकर आत्म रूप से प्रवृत्त होना है।

वहां प्रवर्तन करने वाले के ज्ञान क्रिया रूप प्रवृत्ति स्वभावभूत है, अतः परके निमित्त से न होने के कारण उसका निषेध नहीं है। इसलिये उस ज्ञान क्रिया से जानता है। यह विभाव परिणति नहीं है। जिस प्रकार ज्ञान क्रिया रूप परिणमन करता है, उसी प्रकार सयोग सिद्ध सम्बन्ध रूप जो आत्मा और क्रोधादिक आस्रव उनमे भी अपने अज्ञान से विशेष भेद न जानता हुआ जब तक भेद नहीं देखता तब तक निःशंक होकर क्रोधादि में आत्म रूप से प्रवृत्ति करता है। वहां प्रवृत्ति करते हुए उसके जो क्रोधादि क्रिया है वह परभाव से हुई है, इसलिये वे क्रोधादि प्रतिषेध रूप है तो भी उनमे स्वभाव का अध्यास है। इस कारण आप क्रोध, राग और मोहरूप परिणमन करता है। अतः आत्मा अपने अज्ञान भाव से परि-णमन मात्र स्वभावजन्य उदासीन-ज्ञाता-दृष्टा मात्र अवस्था का त्याग कर क्रोधादि व्यापार रूप परिणमन करता हुआ प्रतिभासित होता है, इसलिये कर्मों का कर्ता है। तथा जो ज्ञान परिणमन रूप प्रवर्तने से पृथक् किये गये अंतरंग मे उत्पन्न क्रोधादिक प्रतिभासित होते है, वे उस कर्ता के कर्म है। इस प्रकार यह अनादि काल से हुई इस आत्मा की कर्ता कर्म की प्रवृत्ति है। ऐसे अपने अज्ञान भाव से कर्ता कर्म भाव कर क्रोधादिकों में वर्तमान जो यह आत्मा उसके क्रोधादिक की प्रवृत्ति रूप परिणाम को निमित्तमात्र कर अपने आप ही परिणमता हुआ पुद्गलमय कर्म का सचय करता है। इस भांति जीव के और पुद्गल के परस्पर अवगाह लक्षण सम्बन्ध स्वरूप बध सिद्ध होता है। वही बध अनेक वस्तु का एकरूप हो परम्परा से इतरेतराश्रय दोष रहित है। वही बध कर्ता-कर्म की प्रवृत्ति का निमित्त जो अज्ञान उसका निमित्त कारण है।

भावार्थ—यह आत्मा जैसे अपने ज्ञान स्वभाव रूप परिणमन करता है उसी प्रकार क्रोधादि रूप भी परिणमन करता है, ज्ञान में और क्रोधादिक में जब तक भेद नहीं जानता तब तक इसके कर्ता कर्म की प्रवृत्ति है। क्रोधादि रूप परिणमन करता हुआ आप तो कर्ता है और वे क्रोधादिक इसके कर्म हैं। अनादि अज्ञान से कर्ता कर्म की प्रवृत्ति है और कर्ता कर्म की प्रवृत्ति से बध है तथा उसकी संतान

---

१. 'एवमप्यात्मनः' इत्यपिपाठः।

कदाऽस्याः कर्तृकर्मप्रवृत्तेर्निवृत्तिरिति चेत् :—

जइया इमेण जीवेण अप्पणो आसवाण य तहेव ।
णादं होदि विसेसंतरं तु तइया ण बंधो से ।। ७१ ।।

यदानेन जीवेनात्मनः आस्रवाणां च तथैव ।
ज्ञातं भवति विशेषांतरं तु तदा न बंधस्तस्य ।। ७१ ।।

इह किल स्वभावमात्रं वस्तु, स्वस्य भवनं तु स्वभावः, तेन ज्ञानस्य भवनं खल्वात्मा । क्रोधादेर्भवनं क्रोधादिः । अथ ज्ञानस्य यद्भवनं तन्न क्रोधादेरपि भवनं यतो यथा ज्ञानभवने ज्ञानं भवद्विभाव्यते न तथा क्रोधादिरपि । यत्तु क्रोधादेर्भवनं तन्न ज्ञानस्यापि भवनं यतो यथा क्रोधादि-भवने क्रोधादयो भवंतो विभाव्यंते न तथा ज्ञानमपि इत्यात्मनः क्रोधादीनां च न खल्वेकवस्तुत्वं

अथ कदा कालेऽस्याः कर्तृकर्मप्रवृत्तेर्निवृत्तिरित्येवं पृष्टे प्रत्युत्तरं ददाति.—**जइया** यदा श्रीधर्मलब्धिकाले **इमेण जीवेण** अनेन प्रत्यक्षीभूतेन जीवेन **अप्पणो आसवाण य तहेव णादं होदि विसेसंतरं तु** यथा शुद्धात्मनस्तथैव कामक्रोधाद्यास्रवाणां च ज्ञातं भवति विशेषांतरं भेदज्ञानं **तइया** तदा काले सम्यग्ज्ञानी भवति। सम्यग्ज्ञानी सन् किं करोति,

---

(परम्परा) अज्ञान है । अतः अनादि सतान है । इस प्रकार इसमें इतरेतराश्रय दोष भी नही है । ऐसे जब तक आत्मा क्रोधादिक कर्म का कर्ता होकर परिणमन करता है, तब तक कर्ता कर्म की प्रवृत्ति है और तभी तक कर्म का बंध होता है । ६९ । ७० ।

यहां प्रश्न होता है कि इस कर्ता-कर्म की प्रवृत्ति का अभाव किस काल में होता है, उसका उत्तर कहते है :—**[यदा]** जिस समय **[अनेन जीवेन]** इस जीव को **[आत्मनः]** अपना **[तथैव च]** और **[आस्रवाणां]** आस्रवों का **[विशेषांतरं]** भिन्नलक्षण **[ज्ञातं भवति]** मालूम हो जाता है **[तदा तु]** उसी समय **[तस्य]** उसके **[बंधः न]** बंध नहीं होता ।

टीका—इस लोक में वस्तु अपने स्वभावमात्र है और अपने भाव का होना ही स्वभाव है इसलिये यह सिद्ध हुआ कि ज्ञान का जो होना—परिणमना, वह आत्मा है तथा क्रोधादिक का होना—परिणमना क्रोधादिक हैं । ऐसा होने से जो ज्ञान का परिणमन है, वह क्रोधादि का परिणमन नहीं है क्योंकि जैसे ज्ञान होने पर ज्ञान ही हुआ मालूम होता है वैसे क्रोधादिक नहीं मालूम होते । जो क्रोधादिक का परिणमन है, वह ज्ञान का परिणमन नहीं है क्योंकि क्रोधादिक होने पर क्रोधादिक हुए ही प्रतीत होते हैं, ज्ञान हुआ मालूम नहीं होता । इस प्रकार क्रोधादिक और ज्ञान इन दोनों के निश्चय से एक वस्तुत्व नहीं है । अतः आत्मा और आस्रवों का भेद देखने से जिस समय भेद जानता है, उस समय इसके (आत्मा) अनादिकाल से उत्पन्न हुई पर में कर्ता कर्म की प्रवृत्ति निवृत्त हो जाती है । और उसकी निवृत्ति होने पर

इत्येवमात्मात्मास्रवयोर्विशेषदर्शनेन यदा भेदं जानाति तदास्यानादिरप्यज्ञानजा कर्तृकर्मप्रवृत्ति-निवर्तते तन्निवृत्तावज्ञाननिमित्तं पुद्गलद्रव्यकर्मबंधोपि निवर्तते। तथा सति ज्ञानमात्रादेव बंधनि-रोधः सिद्ध्येत् ॥ ७१ ॥

कथं ज्ञानमात्रादेव बंधनिरोध इति चेत्;—

णादूण आसवाणं असुचित्तं च विवरीयभावं च।
दुक्खस्स कारणं ति य तदो णियत्तिं कुणदि जीवो ॥ ७२ ॥

ज्ञात्वा आस्रवाणामशुचित्वं च विपरीतभावं च।
दुःखस्य कारणानीति च ततो निवृत्तिं करोति जीवः ॥ ७२ ॥

जले जंबालवत्कलुषत्वेनोपलभ्यमानत्वादशुचयः खल्वास्रवाः भगवानात्मा तु नित्यमेवाति-

---

अहं कर्ता भावक्रोधादिरूपमंतरंगं मम कर्मेत्यज्ञानजां कर्तृकर्मप्रवृत्तिं मुंचति। ततः कर्तृकर्मप्रवृत्तेर्निवृत्तौ सत्यां निर्वि-कल्पसमाधौ सति **ण बंधो** न बंधो भवति **से** तस्य जीवस्येति ॥ ७१ ॥ अथ कथं ज्ञानमात्रादेव बंधनिरोध इति पूर्वपक्षे कृते परिहारं ददाति;—क्रोधाद्यास्रवाणां संबंधि कालुष्यरूपमशुचित्वं जडत्वरूपं, विपरीतभावं, व्याकुल-

---

अज्ञान के निमित्त से हुआ जो पुद्गलद्रव्य कर्म का बंध है वह भी निवृत्त हो जाता है। ऐसा होने पर ज्ञानमात्र से ही बंध का निरोध सिद्ध होता है।

भावार्थ—क्रोधादिक और ज्ञान पृथक्-पृथक् वस्तु हैं। ज्ञान में क्रोधादिक नहीं, हैं, क्रोधादिक में ज्ञान नहीं है। इस प्रकार इनका भेदज्ञान हो जाता है, तब एकत्व का अज्ञान मिट जाता है, तभी कर्म का बंध भी नहीं होता। इस प्रकार ज्ञान से ही बंध का निरोध होता है ॥ ७१ ॥

आगे पूछते हैं कि ज्ञान मात्र से ही बंध का निरोध किस प्रकार है? उसका उत्तर कहते हैं;—**[आस्रवाणां च]** आस्रवों का **[अशुचित्वं]** अशुचिपना **[च विपरीतभावं]** और विपरीतपना **[च दुःखस्य कारणानि इति]** तथा ये दुःख के कारण हैं ऐसा **[ज्ञात्वा]** जानकर **[जीवः]** यह जीव **[ततो निवृत्तिं]** उनसे निवृत्ति **[करोति]** करता है।

टीका—जैसे जल में सेवाल मलिन होने से जल को मैला दिखलाती है, उसी प्रकार ये आस्रव भी कलुषता से प्राप्यमान हैं; आप मलिन हैं, इसलिये आत्मा को भी मलिन अनुभव कराते हैं। आत्मा ज्ञानवान् है। वह सदा अति निर्मल चैतन्य भाव से उसका ज्ञापक है इस कारण अत्यंत पवित्र है, उज्ज्वल है। और आस्रव हैं वे आत्मा से भिन्न स्वभाव हैं, ज्ञेय हैं अर्थात् जड़ स्वभाव होने से पर से जानने योग्य हैं। जो जड़ होता है, वह अपने को तथा पर को नहीं जानता, उसको दूसरा ही जानता है और आत्मा सदा ही विज्ञानघनस्वभाव है इसलिये आप ज्ञाता है, ज्ञान से अनन्य स्वभाव है (आस्रवों से अन्य स्वभाव है,) अपने को पर को जानता है। आस्रव दुःख के कारण हैं इसलिये आत्मा को आकुलता के उपजाने वाले हैं और भगवान् आत्मा सदा ही निराकुल स्वभाव है; इस कारण किसी का न तो कार्य है और

निर्मलचिन्मात्रत्वेनोपलंभकत्वादत्यंतं शुचिरेव जडस्वभावत्वे सति परचेत्यत्वादन्यस्वभावाः खल्वास्रवाः भगवानात्मा तु नित्यमेव विज्ञानघनस्वभावत्वे सति स्वयं चेतकत्वादनन्यस्वभाव[1] एव। आकुलत्वोत्पादकत्वाद् दुःखस्य कारणानि खल्वास्रवाः भगवानात्मा तु नित्यमेवानाकुलत्वस्वभावेनाकार्यकारणत्वाद् दुःखस्याकारणमेव। इत्येवं विशेषदर्शनेन यदैवायमात्मास्रवयोर्भेदं जानाति तदैव क्रोधादिभ्य आस्रवेभ्यो निवर्त्तते। तेभ्योऽनिवर्त्तमानस्य पारमार्थिकतद्भेदज्ञानासिद्धेः। ततः क्रोधाद्यास्रवनिवृत्त्यविनाभाविनो ज्ञानमात्रादेवाज्ञानजस्य पौद्गलिकस्य कर्मणो बंधनिरोधः सिद्ध्येत्। किंच यदिदमात्मास्रवयोर्भेदज्ञानं तत्किमज्ञानं किं वा ज्ञानं? यद्यज्ञानं तदा तदभेदज्ञानान्न तस्य विशेषः।

स्वलक्षणं दुःखकारणत्वं च ज्ञात्वा तथैव निजात्मनः संबंधि निर्मलात्मानुभूतिरूपं शुचित्वं सहजशुद्धाखंडकेवलज्ञानरूपं ज्ञातृत्वमनाकुलत्वलक्षणानंतसुखत्वं च ज्ञात्वा ततश्च स्वसंवेदनज्ञानानंतरं सम्यग्दर्शनज्ञानचारित्रैकाग्र्यपरिणतिरूपे परमसामयिके स्थित्वा क्रोधाद्यास्रवाणां निवृत्ति करोति जीवः। इति ज्ञानमात्रादेव बंधनिरोधो भवति नास्ति सांख्यादिमतप्रवेशः। किं च यच्चात्मास्रवयोः सम्बन्धि भेदज्ञानं तद्रागाद्यास्रवेभ्यो निवृत्तं न वेति निवृत्तं चेत्तर्हि तस्य भेदज्ञानस्य मध्ये पानकवदभेदनयेन वीतरागचारित्रं वीतरागसम्यक्त्वं च लभ्यत इति सम्यग्ज्ञानादेव बंधनिरोधसिद्धिः। यदि रागादिभ्यो निवृत्तं न भवति तदा तत्सम्यग्भेदज्ञानमेव न भवतीति भावार्थः ॥ ७२ ॥ अथ केन भावनाप्रकारेणायमात्मा क्रोधाद्यास्रवेभ्यो निवर्त्तते इति चेत्;—**अहं** निश्चयनयेन स्वसंवेदनज्ञानप्रत्यक्षं शुद्धचिन्मात्र-

न किसी का कारण है इसलिये दुःख का भी कारण नहीं है। इस प्रकार आत्मा और आस्रवों के तीन विशेषणों द्वारा भेद देखने से जिस समय भेद जान लिया, उसी समय वह क्रोधादिक आस्रवों से निवृत्त हो जाता है। और उन से जब तक निवृत्त नहीं होता, तब तक उस आत्मा के पारमार्थिक सच्ची भेदज्ञान की सिद्धि नहीं होती। इसलिये यह सिद्ध हुआ कि क्रोधादिक आस्रवों की निवृत्ति से अविनाभावी जो ज्ञान, उसी से अज्ञान जन्य पौद्गलिक कर्मबंध का निरोध होता है। यहां यह विशेष जानना कि यह आत्मा और आस्रव का भेद है वह अज्ञान है कि ज्ञान? यदि अज्ञान है तो आस्रव से अभेद हुआ, विशेष नहीं हुआ, तथा यदि ज्ञान है तो आस्रवों में प्रवृत्ति रूप है या उनसे निवृत्ति रूप है? यदि आस्रवों में प्रवर्तता है तो ज्ञान आस्रवों से अभेद रूप अज्ञान ही है, इससे भी विशेषता नहीं हुई और जो आस्रवों से निवृत्ति रूप है तो ज्ञान से ही बंध का निरोध क्यों नहीं कह सकते? सिद्ध हुआ ही कह सकते हैं। ऐसा सिद्ध होने पर अज्ञान के अंश क्रियानय का खण्डन हुआ। तथा जो आत्मा और आस्रवों का भेदज्ञान है वह भी आस्रवों से निवृत्ति न हुआ तो वह ज्ञान ही नहीं है, ऐसा कहने से ज्ञान के अंश ज्ञाननय का निराकरण हुआ।

भावार्थ—आस्रव अशुचि हैं, जड़ हैं, दुःख के कारण हैं, और आत्मा पवित्र है, ज्ञाता है, सुख स्वरूप है। ऐसे दोनों को लक्षण भेद से भिन्न जानकर आत्मा आस्रवों से निवृत्त होता है, उसके कर्म का बंध नहीं होता क्योंकि यदि ऐसा जानने से भी निवृत्त न हो तो वह ज्ञान ही नहीं है, अज्ञान ही है। यहाँ कोई प्रश्न करे कि अविरतसम्यग्दृष्टि के मिथ्यात्व और अनन्तानुबन्धी प्रकृतियों का तो

१. अन्यस्वभाव एव इति पाठान्तरम्।

ज्ञानं चेत् किमास्रवेषु प्रवृत्तं किंवास्रवेभ्यो निवृत्तं ? आस्रवेषु प्रवृत्तं चेत्तदपि तदभेदज्ञानान्न तस्य विशेषः। आस्रवेभ्यो निवृत्तं चेत्तर्हि कथं न ज्ञानादेव बंधनिरोधः इति निरस्तोऽज्ञानांशः क्रियानयः। यस्त्वात्मास्रवयोर्भेदज्ञानमपि नास्रवेभ्यो निवृत्तं भवति तज्ज्ञानमेव न भवतीति ज्ञानांशो ज्ञाननयोपि निरस्तः[1] ॥ ७२ ॥

परपरणतिमुज्झत् खंडयद्भेदवादानिदमुदितमखंडं ज्ञानमुच्चंडमुच्चैः।
ननु कथमवकाशः कर्तृकर्मप्रवृत्तेरिह भवति कथं वा पौद्गलः कर्मबंधः ॥ ४७ ॥

ज्योतिरहं **इक्को** अनाद्यनंतटंकोत्कीर्णज्ञायकैकस्वभावत्वादेकः **खलु** स्फुट **शुद्धो य:** कर्तृकर्मकरणसप्रदानापादानाधिकरणषट्कारकीयविकल्पचक्ररहितत्वाच्छुद्धश्च **णिम्ममो** निर्मोहशुद्धात्मतत्त्वविलक्षणमोहोदयजनितक्रोधादिकषायचक्रस्वामित्वाभावान् ममत्वरहित:। **णाणदंसणसमग्गो** प्रत्यक्षप्रतिभासमयविशुद्धज्ञानदर्शनाभ्यां समग्र परिपूर्ण:। एवं गुण-

---

आस्रव नही होता परन्तु अन्य प्रकृतियों का तो आस्रव पूर्वक बंध होता है, वह ज्ञानी है या अज्ञानी ? उसका समाधान--जो इसके प्रकृतियों का बंध होता है, वह अभिप्राय पूर्वक नही है, सम्यग्दृष्टि होने के पश्चात् परद्रव्य के स्वामित्व का अभाव है। इस कारण जब तक इसके चारित्रमोह का उदय है तब तक उसके उदय के अनुसार आस्रव-बंध होते हैं, उसका स्वामित्व नहीं है। वह अभिप्राय मे निवृत्त होना ही चाहता है इसलिए ज्ञानी ही कहा जाता है। यहां मिथ्यात्व सम्बन्धी बध ही अनत ससार का कारण है, वही प्रधानता से विवक्षित है। जो अविरतादिक से बंध होता है, वह अल्पस्थिति अनुभाग रूप है, दीर्घ संसार का कारण नही है इसलिए प्रधान नही गिना जाता। ज्ञान बंध का कारण नही है। जब तक ज्ञान में मिथ्यात्व का उदय था तब तक अज्ञान कहलाता था, मिथ्यात्व चले जाने के बाद अज्ञान नहीं, ज्ञान ही है। इसमे जो कुछ चारित्रमोह सम्बन्धी विकार है, उसका स्वामी ज्ञानी नही बनता, इसी कारण ज्ञानी के बध नही है। विकार बध रूप है, वह बंध की पद्धति मे है, ज्ञान की पद्धति में नहीं है।

इसी अर्थ का समर्थन आगे की गाथा मे होगा। यहा पर कलश रूप काव्य कहा है। **परपरणति** इत्यादि। **अर्थ**--ज्ञान प्रत्यक्ष उदय को प्राप्त हुआ है, जिसमें ज्ञेय के निमित्त से तथा क्षयोपशम के विशेष से अनेक खंड रूप आकार प्रतिभासित होते थे, उनका खण्डन करके ज्ञान मात्र आकार अनुभव में आया इसी से 'अखंड' ऐसा विशेषण कहा है। जो मतिज्ञान आदि अनेक भेद कहे जाते थे, उनको दूर करके उदय हुआ है इसी से "अखड" विशेषण है; पर के निमित्त से रागादिरूप परिणमन करता था, उस परिणति को छोड़ कर उदय हुआ है, तथा अतिशय प्रचंड है, पर के निमित्त से रागादिरूप नही परिणमन करता, वलवान् है। आचार्य कहते है कि अहो ऐसे ज्ञान में परद्रव्य के कर्ता कर्म की प्रवृत्ति का अवकाश कैसे हो सकता है तथा पौद्गलिक कर्म बध भी कैसे हो सकता है ? नहीं होता।

---

१ एकान्तेन ज्ञानमपि न बन्धनिरोधकं, एकान्तेन क्रियापि न बन्धनिरोधिका इति सिद्धं। उभाभ्यामेव मोक्षः। इति नया मंदिर धर्मपुरा प्राचीन प्रतौ टिप्पणं।

केन विधिनायमास्रवेभ्यो निवर्त्तत इति चेत्;—

अहमिक्को खलु सुद्धो णिम्ममश्रो णाणदंसणसमग्गो ।
तह्मि ठिश्रो तच्चित्तो सव्वे एए खयं णेमि ॥ ७३ ॥

अहमेकः खलु शुद्धः निर्ममतः ज्ञानदर्शनसमग्रः ।
तस्मिन् स्थितस्तच्चित्तः सर्वानेतान् क्षयं नयामि ॥ ७३ ॥

अहमयमात्मा प्रत्यक्षमक्षुण्णमनंतं चिन्मात्रं ज्योतिरनाद्यनंतनित्योदितविज्ञानघनस्वभावभावत्वादेकः । सकलकारकचक्रप्रक्रियोत्तीर्णनिर्मलानुभूतिमात्रत्वाच्छुद्धः । पुद्गलस्वामिकस्य क्रोधादिभाववैश्वरूपस्य स्वस्य स्वामित्वेन नित्यमेवापरिणमनान्निर्ममतः । चिन्मात्रस्य महसो वस्तुस्वभावत एव सामान्यविशेषाभ्यां सकलत्वाद् ज्ञानदर्शनसमग्रः । गगनादिवत्पारमार्थिको

विशिष्टपदार्थविशेषोस्मि भवामि । **तह्मि ठिदो** तस्मिन्नुक्तलक्षणे शुद्धात्मस्वरूपे स्थितः । **तच्चित्तो** तच्चित्तः सहजानदैकलक्षणसुखसमरसीभावेन तन्मयो भूत्वा **सव्वे एदे खयं णेमि** सर्वानेतान्निरास्रवपरमात्मपदार्थपृथग्भूतांस्तान्

भावार्थ—कर्म बंध तो अज्ञान से हुए कर्ता कर्म की प्रवृत्ति से था । भेद भाव को और परपरिणति को दूर कर एकाकार ज्ञान प्रकट हुआ तब भेद रूप कारक की प्रवृत्ति मिट गई तब कैसे बंध हो सकता है ? नही हो सकता ॥ ७२ ॥

आगे शिष्य पूछता है कि आस्रवो से किस तरह निवृत्ति होती है ? उसका उत्तर रूप गाथा कहते हैं;—ज्ञानी विचारता है कि **[अहं]** मैं **[खलु एकः]** निश्चय से एक हूँ **[शुद्धः]** शुद्ध हूँ **[निर्ममतः]** ममता रहित हूँ **[ज्ञानदर्शनसमग्रः]** ज्ञान दर्शन से पूर्ण हूँ **[तस्मिन् स्थितः]** ऐसे स्वभाव में स्थित **[तच्चित्तः]** उसी चैतन्य अनुभव में लीन हुआ **[एतान्]** इन **[सर्वान्]** क्रोधादिक सब आस्रवों को **[क्षयं]** क्षय **[नयामि]** कर देता हूँ ।

टीका—यह मैं आतमा हूँ सो प्रत्यक्ष अखंड, अनंत, चैतन्यमात्र ज्योति हूँ। अनादि, अनंत, नित्य उदयरूप, विज्ञानघन स्वभाव रूप से तो एक हूँ और समस्त कर्ता, कर्म, करण, सम्प्रदान, अपादान, अधिकरण स्वरूप जो कारकों का समूह उसकी प्रक्रिया से पार उतरा दूरवर्ती निर्मल चैतन्य अनुभूति मात्र रूप से शुद्ध हूँ । जिनका पुद्गल द्रव्य स्वामी है ऐसे जो क्रोधादि भाव, उनकी विश्वरूपता (समस्तरूपता) उसका स्वामित्व से सदा ही अपने नहीं परिणमने के कारण उनसे ममता रहित हूँ । तथा वस्तु का स्वभाव सामान्य विशेष स्वरूप है इसलिए चैतन्यमात्र तेज पुंज भी वस्तु है इस कारण सामान्यविशेष स्वरूप जो ज्ञानदर्शन उनसे पूर्ण हूँ । ऐसा आकाशादि द्रव्य की तरह परमार्थ स्वरूप वस्तु विशेष हूं । इसलिये मैं इसी आत्मस्वभाव में समस्त परद्रव्य से प्रवृत्ति की निवृत्ति करके निश्चल स्थित हुआ समस्त परद्रव्य के निमित्त से जो विशेष रूप चैतन्य में चंचल कल्लोलें होतीं

वस्तुविशेषोस्मि तदहमधुनास्मिन्नेवात्मनि निखिलपरद्रव्यप्रवृत्तिनिवृत्त्या निश्चलमवतिष्ठमानः सकलपरद्रव्यनिमित्तकविशेषचेतनचंचलकल्लोलनिरोधेनेममेव चेतयमानः स्वाज्ञानेनात्मन्युत्प्लवमानानेतान् भावानखिलानेव क्षपयामीत्यात्मनि निश्चित्य चिरसंगृहीतमुक्तपोतपात्रः समुद्रावर्त इव झगित्येवोद्वांतसमस्तविकल्पोऽकल्पितमचलितममलमात्मानमालंबमानो विज्ञानघनभूतः खल्वयमात्मास्रवेभ्यो निवर्तते ॥ ७३ ॥

कथं ज्ञानास्रवनिवृत्त्योः समकालत्वमिति चेत्;—

जीवणिवद्धा एए अधुव अणिच्चा तहा असरणा य ।
दुक्खा दुक्खफलात्ति य णादूण णिवत्तए तेहिं ॥ ७४ ॥

जीवनिबद्धा एते अध्रुवा अनित्यास्तथा अशरणाश्च ।
दुःखानि दुःखफला इति च ज्ञात्वा निवर्तते तेभ्यः ॥ ७४ ॥

जतुपादपवद्वध्यघातकस्वभावत्वाज्जीवनिबद्धाः खल्वास्रवाः, न पुनरविरुद्धस्वभावत्वाभावाज्जीव एव । अपस्माररयवद्वर्द्धमानहीयमानत्वादध्रुवाः खल्वास्रवाः ध्रुवश्चिन्मात्रो जीव एव ।

कामक्रोधाद्यास्रवान् क्षयं विनाशं नयामि प्रापयामीत्यर्थः ॥ ७३ ॥ अथ यस्मिन्नेव काले स्वसंवेदनज्ञानं तस्मिन्नेव काले रागाद्यास्रवनिवृत्तिरिति समानकालत्वं दर्शयति;—**एदे जीवणिबद्धा** एते क्रोधाद्यास्रवा जीवेन सह निबद्धा संबद्धा औपाधिकाः । न पुनः निरुपाधिस्फटिकवच्छुद्धजीवस्वभावाः । **अधुव** विद्युच्चमत्कारवदध्रुवा अतीव्रक्षणिकाः । ध्रुव. शुद्धजीव एव । **अणिच्चा** शीतोष्णज्वरावेशवदध्रुवापेक्षया क्रमेण स्थिरत्वं न गच्छंतीत्यनित्या विनश्वराः नित्यश्चिच्चम-

---

थीं, उनके निरोध से इस चैतन्य स्वरूप को ही अनुभव करता हुआ अपने ही अज्ञान से आत्मा में उत्पन्न क्रोधादिक भावों को क्षय करता हूं ऐसा आत्मा में निश्चय कर तथा जैसे बहुत काल का ग्रहण किया जो जहाज था, वह जिसने छोड़ दिया है, ऐसे समुद्र के भंवर की तरह शीघ्र ही दूर किये हैं समस्त विकल्प जिसने, ऐसा निर्विकल्प, अचलित, निर्मल आत्मा को अवलंबन करता विज्ञानघन हुआ यह आत्मा आस्रवों से निवृत्त होता है ।

भावार्थ—शुद्धनय से ज्ञानी ने आत्मा का ऐसा निश्चय किया कि मैं एक हूं, शुद्ध हूं, परद्रव्य से निर्ममत्व हूं, ज्ञान दर्शन से पूर्ण वस्तु हूं, सो जब ऐसे अपने स्वरूप में स्थित होने से उसी का अनुभव रूप हो, तब क्रोधादिक आस्रव क्षय हो सकते हैं । जैसे समुद्र के आवर्त ने बहुत काल से जहाज को पकड़ रक्खा था, पीछे किसी काल में आवर्त पलटता है तब वह जहाज को छोड़ देता है; उसी प्रकार आत्मा आस्रवों को छोड़ देता है ॥ ७३ ॥

आगे पूछते हैं कि ज्ञान होने का और आस्रवों की निवृत्ति का समकाल किस तरह है ? उसका उत्तर रूप गाथा कहते हैं;—**[एते]** ये आस्रव **[जीवनिबद्धाः]** जीव के साथ निबद्ध हैं **[अध्रुवाः]** अध्रुव हैं **[तथा]** और **[अनित्याः]** अनित्य हैं **[च]** तथा **[अशरणाः]** अशरण हैं **[दुःखानि]** दुःखरूप

शीतदाहज्वरावेशवत् क्रमेणोज्जृंभमाणत्वादनित्याः खल्वास्रवाः, नित्यो विज्ञानघनस्वभावो जीव एव । बीज[1]निर्मोक्षक्षणक्षीयमाणदारुणस्मरसंस्कारवत् त्रातुमशक्यत्वादशरणाः खल्वास्रवाः, सशरणः स्वयं गुप्तः सहजचिच्छक्तिर्जीव एव । नित्यमेवाकुलस्वभावत्वाद् दुःखानि खल्वास्रवाः, अदुःखं नित्यमेवानाकुलस्वभावो जीव एव । आयत्यामाकुलत्वोत्पादकस्य पुद्गलपरिणामस्य हेतुत्वाद् दुःखफलाः खल्वास्रवाः अदुःखफलः सकलस्यापि पुद्गलपरिणामस्याहेतुत्वाज्जीव एव ।

त्कारमात्रशुद्धजीव एव । **तहा असरणा य** तथा तेनैव प्रकारेण तीव्रकामोद्रेकवत् त्रातु धर्तुं रक्षितुं न शक्यंत इत्यशरणाः सशरणो निर्विकारबोधस्वरूपः शुद्धजीव एव । **दुक्खा** आकुलत्वोत्पादकत्वाद् दुःखानि भवंति कामक्रोधाद्यास्रवाः अनाकुलत्वलक्षणत्वात्पारमार्थिकसुखस्वरूपः शुद्धजीव एव । **दुक्खफलाणि य** आगामिनारकादिदुःखफलकारणत्वाद् दुःखफलाः खल्वास्रवाः । वास्तवसुखफलस्वरूपशुद्धजीव एव । **णादूण णिवत्तदे तेसु** इति भेदविज्ञानानंतरमेव इत्थंभूतान्मिथ्यात्वरागाद्यास्रवान् ज्ञात्वास्रवेभ्यो यस्मिन्नेव क्षणे मेघपटलरहितादित्यवन्निवर्त्तते तस्मिन्नेव क्षणे

हैं [च] और [दुःखफलाः] जिन का फल दुःख ही है [इति ज्ञात्वा] ऐसा जान कर ज्ञानी पुरुष [तेभ्यः] उनसे [निवर्तते] निवृत्ति करता है ।

टीका—ये आस्रव लाख और वृक्ष इन दोनों की तरह बध्य घातक स्वभाव हैं। जैसे पीपल आदि के वृक्ष में लाख उत्पन्न होती है, उससे वृक्ष बंध जाता है, बाद में उसके निमित्त से वृक्ष का नाश हो जाता है। इसी प्रकार जो बध्य-घातक स्वभावरूप से जीव के साथ बंधे हैं और विरुद्ध स्वभाव वाले हैं, इस कारण जीव ही नहीं हैं, ऐसे आस्रव हैं वे मृगी के वेग की तरह बढ़ते जाते हैं, फिर घटते हैं, इस प्रकार अध्रुव हैं, जीव तो चैतन्य भावमात्र है सो ध्रुव है। वे आस्रव शीतदाहज्वर के स्वभाव की तरह क्रम से उत्पन्न होते हैं इसलिये अनित्य हैं और जीव विज्ञानघन स्वभाव है इस कारण नित्य है। वे आस्रव अशरण हैं। जैसे काम सेवन में वीर्य छूटता है, उस समय अत्यंत काम का संस्कार क्षीण हो जाता है, किसी से नहीं रोका जाता, उसी प्रकार उदयकाल आने के बाद आस्रव झड़ जाते हैं, रोके नहीं जा सकते, इसलिये अशरण हैं, और जीव अपनी स्वाभाविक चित्शक्ति रूप से आप ही रक्षा रूप है इसलिये शरण सहित है। वे आस्रव सदा ही आकुलित स्वभाव को लिये हुए हैं इसलिये दुःखरूप हैं, और जीव सदा ही निराकुल स्वभाव रूप है इस कारण सुखरूप है। आस्रव आगामी काल में आकुलता के उत्पन्न कराने वाले पुद्गल परिणाम के कारण हैं, इसलिये वे दुःखफल स्वरूप हैं और जीव समस्त पुद्गलपरिणाम का कारण नहीं हैं इसलिये दुःख फलस्वरूप नहीं है। ऐसा आस्रवों का और जीव का भेदज्ञान होने से जिसके कर्म का उदय शिथिल हो गया है और जैसे दिशा बादलों की रचना के अभाव होने से निर्मल हो जाती है उस भांति अमर्याद विस्तृत तथा स्वभावसे ही उदयवान हुई चिच्छक्ति रूप से जैसा जैसा विज्ञान घन स्वभाव होता है वैसा वैसा आस्रवों से निवृत्त होता जाता है तथा जैसा जैसा आस्रवों से निवृत्त होता जाता है वैसा वैसा विज्ञानघनस्वभाव होता जाता है। उतना विज्ञान घनस्वभाव होता

---

१. वीर्यमित्यर्थः

इति विकल्पानंतरमेव शिथिलितकर्मविपाको विघटितघनौघघटनो दिगाभोग इव निरर्गलप्रसरः सहजविजृम्भमाणचिच्छक्तितया यथा यथा विज्ञानघनस्वभावो भवति तथातथास्रवेभ्योनिवर्त्तते। यथायथास्रवेभ्यश्च निवर्त्तते तथा तथा विज्ञानघनस्वभावो भवतीति। तावद्विज्ञानघनस्वभावो भवति यावत्सम्यगास्रवेभ्यो निवर्त्तते। तावदास्रवेभ्यश्च निवर्त्तते यावत्सम्यग्विज्ञानघनस्वभावो भवतीति ज्ञानास्रवनिवृत्त्योः समकालत्वं ॥ ७४ ॥

ज्ञानी भवतीति भेदज्ञानेन सहास्रवनिवृत्तेः समानकालत्वं सिद्धमिति। ननु पुण्यपापादिसप्तपदार्थाना पीठिकाव्याख्यानं क्रियत इति पूर्वं प्रतिज्ञा कृता भवद्भिः व्याख्यान पुन अज्ञानिसज्ञानिजीवस्वरूपमुख्यत्वेन कृत पुण्यपापादिसप्तपदार्थानां पीठिकाव्याख्यान कथ घटत इति। तन्न। जीवाजीवौ यदि नित्यमेकांतेनापरिणामिनौ भवतस्तदा द्वावेव पदार्थौ जीवाजीवाविति। यदि च एकांतेन परिणामिनौ तन्मयौ भवतस्तदैक एव पदार्थः। किंतु कथंचित्परिणामिनौ भवतः। कथंचित्कोर्थः ? यद्यपि जीवः शुद्धनिश्चयेन स्वरूप न त्यजति तथापि व्यवहारेण कर्मोदयवशाद्रागाद्युपाधिपरिणाम गृह्णाति। यद्यपि रागाद्युपाधिपरिणामं गृह्णाति तथापि स्वरूप न त्यजति स्फटिकवत्। तत्रैव कथंचित्परिणामित्वे सति अज्ञानी बहिरात्मा मिथ्यादृष्टिर्जीवो विषयकषायरूपाशुभोपयोगपरिणाम करोति। कदाचित्पुनश्चिदानंदैकस्वभावं शुद्धात्मानं त्यक्त्वा भोगाकांक्षानिदानस्वरूपं शुभोपयोगपरिणाम च करोति। तदा काले द्रव्यभावरूपाणा पुण्यपापास्रवबंधपदार्थानां कर्तृत्व घटते। तत्र ये भावरूपाः पुण्यपापादयस्ते जीवपरिणामाये द्रव्यरूपास्ते चाजीवपरिणामा इति। य पुनः सम्यग्दृष्टिरन्तरात्मा स ज्ञानी जीवः स मुख्यवृत्त्या निश्चयरत्नत्रयलक्षणशुद्धोपयोगबलेन निश्चयचारित्राविनाभाविवीतरागसम्यग्दृष्टिर्भूत्वा निर्विकल्पसमाधिरूपपरिणामपरिणति करोति तदा तेन परिणामेन सवरनिर्जरामोक्षपदार्थानां द्रव्यभावरूपाणां कर्ता भवति। कदाचित्पुनः निर्विकल्पसमाधिपरिणामाभावे सति विषयकषायवचनार्थं शुद्धात्मभावनासाधनार्थंवा [1]बहिर्बुद्ध्या ख्यातिपूजालाभभोगाकांक्षानिदानबंधरहितः सन् शुद्धात्मलक्षणार्हत्सिद्धशुद्धात्माराधकप्रतिपादकसाधकाचार्योपाध्यायसाधूनां गुणस्मरणादिरूप शुभोपयोगपरिणामं च करोति। अस्मिन्नर्थे दृष्टांतमाहुः। यथा कश्चिद्देवदत्तः स्वकीयदेशातरस्थित-

---

है जितना आस्रवों से सम्यक् निवृत्त होता है। तथा उतना आस्रवों से सम्यक् निवृत्त होता है, जितना सम्यक् विज्ञान घनस्वभाव होता है। इस प्रकार ज्ञान और आस्रवकी निवृत्ति के समकालता है ॥

भावार्थ—आस्रव और आत्मा का पूर्वकथितरीति से भेद जानने के बाद जितना अंश जिस जिस प्रकार आस्रवों से निवृत्त होता है उस उस प्रकार उतना अंश विज्ञानघनस्वभाव होता जाता है। जब समस्त आस्रवों से निवृत्त हो जाता है, तब संपूर्ण विज्ञान घनस्वभाव आत्मा होता है। ऐसे आस्रव की निवृत्ति का और ज्ञान के होने का एक काल जानना चाहिये। इस आस्रव का अभाव और संवरका होना गुणस्थानों की परिपाटीरूप तत्त्वार्थ सूत्र की टीका आदि सिद्धात ग्रंथों में है वहा से जान लेना, यहा सामान्य प्रकरण है इसलिये सामान्य रूप से कहा है। और यहां विज्ञानघनस्वभाव होना कहा सो जहां तक मिथ्यात्व है वहांतक तो ज्ञान को अज्ञान कहा जाता है और मिथ्यात्व जाने के बाद अज्ञान संज्ञा नहीं है, विज्ञान संज्ञा है। वह ज्ञान कर्म के क्षय तथा क्षमोपशमकी अपेक्षा से हीन अधिक होता है सो जैसी जैसी आस्रवों की निवृत्ति होती है, वैसा वैसा ज्ञान बढ़ता जाता है; उसी का विज्ञान नाम कहा जाता है। थोड़ा ज्ञान मिथ्यात्व के विना अज्ञान नहीं कहा जा सकता ॥

---

१. हेय बुद्ध्या इति पाठान्तरम्।

इत्येवं विरचय्य संप्रति परद्रव्यान्निवृत्तिं परां,
स्वं विज्ञानघनस्वभावमभयादास्तिघ्नुवानः परं ।
अज्ञानोत्थितकर्तृकर्मकलनात् क्लेशान्निवृत्तः स्वयं,
ज्ञानीभूत इतश्चकास्ति जगतः साक्षी पुराणः पुमान् ॥ ४८ ॥

स्त्रीनिमित्तं तत्समीपागतपुरुषाणां सन्मानं करोति, वार्त्तां पृच्छति, तत्स्त्रीनिमित्तं तेषा स्वीकारं स्नेहदानादिकं च करोति । तथा सम्यग्दृष्टिरपि शुद्धात्मस्वरूपोपलब्धिनिमित्त शुद्धात्माराधकप्रतिपादकाचार्योपाध्यायसाधूना गुणस्मरणं दानादिकं च स्वयं शुद्धात्माराधनारहितः सन् करोति । एवमज्ञानिसज्ञानिजीवस्वरूपव्याख्याने कृते सति पुण्यपापादिसप्तपदार्था जीव-पुद्गलसंयोगपरिणामनिवृत्ता इति पीठिकाव्याख्यानं घटते । नास्ति विरोधः । एव सज्ञानिजीवव्याख्यानमुख्यत्वेन गाथाचतुष्टयं गतं । इति पुण्यपापादिसप्तपदार्थपीठिकाधिकारे गाथाषट्केन प्रथमातराधिकारो व्याख्यातः ।। ७४ ।। अतः पर यथाक्रमेणै-कादशगाथापर्यंतं पुनरपि सज्ञानीजीवस्य विशेषव्याख्यान करोति । तत्रैकादशगाथासु मध्ये जीव. कर्त्ता मृत्तिकाकलशमिवो-पादानरूपेण निश्चयेन कर्म नोकर्म च न करोतीति जानन् सन् शुद्धात्मानं स्वसंवेदनज्ञानेन जानाति यः स ज्ञानी भवतीति कथनरूपेण **'कम्मस्स य परिणामं,'** इत्यादिप्रथमगाथा । ततः पर पुण्यपापादिपरिणामान् व्यवहारेण करोति निश्चयेन न करोतीति मुख्यत्वेन सूत्रमेकं । अथ कर्मत्व स्वपरिणामत्वं सुखदुःखादिकर्मफलं चात्मा जानन्नप्युदयागतपरद्रव्यं न करोतीति प्रतिपादनरूपेण **'णवि परिणमदि'** इत्यादिगाथात्रयं । तदनंतरं पुद्गलोपि वर्णादिस्वपरिणामस्यैव कर्त्ता न च ज्ञानादिजीवपरिणामस्येति कथनरूपेण **णवि परिणमदि'** इत्यादिसूत्रमेकं । अतः परं जीवपुद्गलयोरन्योन्यनिमित्तकर्तृत्वेपि सति परस्परोपादानकर्तृत्वं नास्तीति कथनमुख्यतया **'जीवपरिणाम'** इत्यादि गाथात्रयं । तदनंतरं निश्चयेन जीवस्य स्वपरिणामैरेव सह कर्तृकर्मभावो भोक्तृभोग्यभावश्चेति प्रतिपादनरूपेण **'णिच्छयणयस्स'** इत्यादिसूत्रमेकं । ततश्च व्यवहारेण जीवः पुद्गलकर्मणां कर्त्ता भोक्ता चेति कथनरूपेण **'ववहारस्सदु'** इत्यादिसूत्रमेकं । एवं ज्ञानिजीवस्य विशेषव्याख्यानमुख्यत्वेनैकादशगाथाभिर्द्वितीयस्थले समुदायपातनिका । तद्यथा—अथ कथमात्मा ज्ञानीभूतो लक्ष्यत इति प्रश्ने प्रत्युत्तरं ददाति;- **कम्मस्स य परिणामं णोकम्मस्स य तहेव परिणामं ण करेदि एदमादा जो जाणदि** यथा मृत्तिका कलशमुपादानरूपेण करोति तथा कर्मणः नोकर्मणश्च परिणामं पुद्गलेनोपादानकारणभूतेन क्रिय-माणं न करोत्यात्मेति यो जानाति **'सो हवदि णाणी'** स निश्चयशुद्धात्मानं परमसमाधिबलेन भावयन्सन् ज्ञानी भवति ॥७५॥ इति ज्ञानीभूतजीवलक्षणकथनरूपेण गाथा गता । अथ पुण्यपापादिपरिणामान् व्यवहारेण करोतीति प्ररूपयति;—

कत्ता आदा भणिदो ण य कत्ता केण सो उवाएण ।
धम्मादी परिणामे जो जाणदि सो हवदि णाणी ॥

अब इसी अर्थ का कलश रूप तथा आगे के कथन की सूचना रूप काव्य कहते हैं । **इत्येवं** इत्यादि । **अर्थ**—इसके बाद पुराण पुरुष आत्मा जगत का साक्षीभूत, ज्ञाता, द्रष्टा आप ही ज्ञानी हुआ प्रकाशमान होता है । वह इस प्रकार है, पहले कही हुई रीति से परद्रव्य से उत्कृष्ट सब प्रकार निवृत्तिकर और विज्ञान घन स्वभावरूप केवल अपने आत्मा को निःशंक, आस्तिक्यभाव रूप स्थिरीभूत करता हुआ अज्ञान से हुई कर्ता-कर्म की प्रवृत्ति के अभ्यास से हुए क्लेशों से निवृत्त हुआ प्रकाशमान होता है ।

कथमात्मा ज्ञानीभूतो लच्यत इति चेत्:—

कम्मस्स य परिणामं णोकम्मस्स य तहेव परिणामं ।
ण करेइ एयमादा जो जाणदि सो हवदि णाणी ॥ ७५ ॥

कर्मणश्च परिणामं नोकर्मणश्च तथैव परिणामं ।
न करोत्येनमात्मा यो जानाति स भवति ज्ञानी ॥ ७५ ॥

यः खलु मोहरागद्वेषसुखदुःखादिरूपेणांतरुत्प्लवमानं कर्मणः परिणामं स्पर्शरसगंधवर्ण-शब्दबंधसंस्थानस्थौल्यसौक्ष्म्यादिरूपेण बहिरुत्प्लवमानं नोकर्मणः परिणामं च समस्तमपि पर-मार्थतः पुद्गलपरिणामपुद्गलयोरेव घटमृत्तिकयोरिव व्याप्यव्यापकभावसद्भावात्पुद्गलद्रव्येण कर्त्रा स्वतंत्रव्यापकेन स्वयं व्याप्यमानत्वात्कर्मत्वेन क्रियमाणं पुद्गलपरिणामात्मनोर्घटकुंभकारयोरिव

कर्त्ता आत्मा भणित. न च कर्ता केन स उपायेन । धर्मादीन् परिणामान् यः जानाति स भवति ज्ञानी । **कत्ता आदा भणिदो** कर्तात्मा भणितः **ण य कत्ता सो** न च कर्त्ता भवति स आत्मा **केण उवायेण** केनाप्युपायेन नयविभागेन । केन नयविभागेनेति चेत्, निश्चयेन अकर्त्ता व्यवहारेण कर्त्तेति । कान् । **धम्मादी परिणामे** पुण्यपापादिकर्मजनितोपाधिपरिणामान् **जो जाणदि सो हवदि णाणी** ख्यातिपूजालाभादिसमस्तरागादिविकल्पोपाधि-रहितसमाधौ स्थित्वा यो जानाति स ज्ञानी भवति । इति निश्चयनयव्यवहाराभ्यामकर्तृत्वकर्तृत्वकथनरूपेण गाथा गता ।

यहां पूछते हैं कि ऐसा आत्मा ज्ञानी हुआ यह कैसे पहचाना जा सकता है उसके चिह्न कहने चाहिये? उसका उत्तर रूप गाथा कहते हैं;—**[यः]** जो **[आत्मा]** जीव **[एनं]** इस **[कर्मणः परिणामं च]** कर्म के परिणाम को **[तथैव च]** उसी भांति **[नोकर्मणः परिणामं]** नोकर्म के परि-णाम को **[न करोति]** नहीं करता है परंतु **[जानाति]** जानता है **[सः]** वह **[ज्ञानी]** ज्ञानी **[भवति]** है।

टीका—निश्चय से मोह, राग, द्वेष, सुख दुःख आदि स्वरूप से अन्तरंग में उत्पन्न होने वाला कर्म का परिणाम और स्पर्श, रस, गंध, वर्ण, शब्द, बंध, संस्थान, स्थौल्य, सूक्ष्म आदि रूप से बाहर उत्पन्न होने वाला नोकर्म का परिणाम है। इस प्रकार ये सभी परमार्थ से पुद्गल परिणाम के और पुद्गल के ही हैं। जैसे घड़े के और मिट्टी के व्याप्य-व्यापक भाव के सद्भाव से कर्ता-कर्मपना है, उसी प्रकार वे पुद्गल द्रव्य से स्वतंत्र व्यापक कर्ता होकर किये गये हैं और वे आप अंतरंग व्याप्य रूप होकर व्याप्त हैं इस कारण पुद्गल के कर्म हैं। परंतु पुद्गल परिणाम और आत्मा का घट और कुम्हार की तरह व्याप्यव्यापक रूप नहीं है इसलिये कर्ता कर्मत्व की असिद्धि है। इसी कारण कर्म नोकर्म परि-णाम को आत्मा नहीं करता। किन्तु यह विशेषता है कि परमार्थ से पुद्गल परिणाम का ज्ञान के और पुद्गल के घट और कुम्हार की तरह व्याप्यव्यापक भाव के अभाव से कर्ता-कर्मत्व की सिद्धि न होने पर आत्म परिणाम के और आत्मा के घट मृतिका की तरह व्याप्य व्यापक भाव के सद्भाव से आत्मद्रव्य

व्याप्यव्यापकभावाभावात् कर्तृकर्मत्वासिद्धौ न नाम करोत्यात्मा। किंतु परमार्थतः पुद्गलपरिणामज्ञानपुद्गलयोर्घटकुंभकारवद्व्याप्यव्यापकभावाभावात् कर्तृकर्मत्वासिद्धावात्मपरिणामात्मनोर्घटमृत्तिकयोरिव व्याप्यव्यापकभावसद्भावादात्मद्रव्येण कर्त्रा स्वतंत्रव्यापकेन स्वयं व्याप्यमानत्वात्पुद्गलपरिणामज्ञानं कर्मत्वेन कुर्वन्तमात्मानं जानाति सोत्यंतविविक्तज्ञानीभूतो ज्ञानी स्यात्। न चैवं ज्ञातुः पुद्गलपरिणामो व्याप्यः पुद्गलात्मनोर्ज्ञेयज्ञायकसंबंधव्यवहारमात्रे सत्यपि पुद्गलपरिणामनिमित्तकस्य ज्ञानस्यैव ज्ञातुर्व्याप्यत्वात्॥ ७५॥

व्याप्यव्यापकता तदात्मनि भवेन्नैवातदात्मन्यपि,
व्याप्यव्यापकभावसंभवमृते का कर्तृकर्मस्थितिः।
इत्युद्दामविवेकघस्मरमहो भारेण भिंदंस्तमो,
ज्ञानीभूय तदा स एष लसितः कर्तृत्वशून्यः पुमान्॥ ४९॥

अथ पुद्गलकर्म जानतो जीवस्य पुद्गलेन सह तादात्म्यसम्बन्धो नास्तीति निरूपयति;—**पुग्गलकम्मं अणेयविहं** कर्मवर्गणायोग्यपुद्गलद्रव्येणोपादानकारणभूतेन क्रियमाणं पुद्गलकर्मानेकविधं मूलोत्तरप्रकृतिभेदभिन्नं **जाणंतो वि हु**

कर्ता ने आप स्वतंत्र व्यापक होकर ज्ञान नामक कर्म किया है इसलिये वह ज्ञान आप ही आत्मा से व्याप्य रूप होकर कर्म रूप हुआ है; इसी कारण पुद्गल परिणाम के ज्ञान को कर्म रूप से कर्ता आत्मा उसे आप जानता है। ऐसा आत्मा पुद्गल परिणाम रूप कर्म नोकर्म से अत्यंत भिन्न ज्ञानी हुआ ज्ञानी ही है। कर्ता नहीं है। ऐसा होने पर ज्ञाता पुरुष के पुद्गल परिणाम व्याप्य स्वरूप नहीं हैं क्योंकि पुद्गल और आत्मा का ज्ञेयज्ञायक संबंध व्यवहार मात्र से होता हुआ भी जिसको पुद्गल परिणाम निमित्त है ऐसा पुद्गलपरिणाम का ज्ञान वही ज्ञाता के व्याप्य है। इसलिये वह ज्ञान ही ज्ञाता का कर्म है।

अब इसी अर्थ के समर्थन का कलश रूप काव्य कहते हैं। **व्याप्य** इत्यादि। **अर्थ**—व्याप्य-व्यापकता तत्स्वरूप के ही होती है अतत्स्वरूप में नहीं होती और व्याप्य-व्यापक भाव के संभव विना कर्ता कर्म की स्थिति कुछ भी नहीं है ऐसे उदार विवेक रूप और समस्त को ग्रासीभूत करने का स्वभाव जिसका है ऐसे ज्ञान स्वरूप प्रकाश के भार से अज्ञान रूप अंधकार को भेदता हुआ यह आत्मा ज्ञानी होकर उस समय कर्तृत्व से रहित हुआ भासता है।

भावार्थ—जो सब अवस्थाओं में व्याप्त हो वह तो व्यापक है और अवस्था के विशेष हैं वे व्याप्य हैं। ऐसा होने पर द्रव्य तो व्यापक है सो द्रव्य पर्याय अभेद रूप ही हैं। जो द्रव्य का आत्मा है वही पर्याय का आत्मा है ऐसा व्याप्य व्यापक भाव तत्स्वरूप में ही होता है, अतत्स्वरूप में नहीं होता। ऐसा सिद्ध होता है कि व्याप्य व्यापक भाव के विना कर्ता कर्म भाव नहीं होता, इस प्रकार जो जानता है। वह पुद्गल के और आत्मा के कर्ता कर्म भाव को नहीं करता, तभी ज्ञानी होता है। कर्ता कर्म भाव से रहित होकर ज्ञाता द्रष्टा जगत का साक्षीभूत होता है॥

पुद्गलकर्म जानतो जीवस्य सह पुद्गलेन कर्तृकर्मभावः किं भवति किं न भवतीति चेत्;—

णवि परिणमइ ण गिह्णइ उपज्जइ ण परदव्वपज्जाए।
णाणी जाणंतो वि हु पुग्गलकम्मं अणेयविहं ॥ ७६ ॥

नापि परिणमति न गृह्णात्युत्पद्यते न परद्रव्यपर्याये।
ज्ञानी जानन्नपि खलु पुद्गलकर्मानेकविधं ॥ ७६ ॥

यतो यं प्राप्यं विकार्यं निर्वर्त्यं च व्याप्यलक्षणं पुद्गलपरिणामं कर्म पुद्गलद्रव्येण स्वयमंतर्व्यापकेन भूत्वादिमध्यांतेषु व्याप्य तं गृह्णता तथा परिणमता तथोत्पद्यमानेन च क्रियमाणं जानन्नपि हि ज्ञानी स्वयमंतर्व्यापको भूत्वा बहिःस्थस्य परद्रव्यस्य परिणामं मृत्तिकाकलशमिवादिमध्यांतेषु व्याप्य न तं गृह्णाति न तथा परिणमति न तथोत्पद्यते च। ततः प्राप्यं विकार्यं निर्वर्त्यं च व्याप्यलक्षणं परद्रव्यपरिणामं कर्माकुर्वाणस्य पुद्गलकर्म जानतोपि ज्ञानिनः पुद्गलेन सह न कर्तृकर्मभावः ॥ ७६ ॥

विशिष्टभेदज्ञानेन जानन्नपि हु स्फुटं स । क कर्ता, **णाणी** सहजानंदैकस्वभावनिजशुद्धात्मरागाद्यास्रवयोर्भेदज्ञानी **णवि परिणमदि ण गिण्हदि उप्पज्जदि ण परदव्वपज्जाये** तत्पूर्वोक्त परद्रव्यपर्यायरूपं कर्म निश्चयेन मृत्तिकाकलशरूपेणेव न परिणमति न तादात्म्यरूपतया गृह्णाति न च तदाकारेणोत्पद्यते । कस्मादिति चेत्, मृत्तिकाकलशयोरिव तेन पुद्गलकर्मणा सह तादात्म्यसम्बन्धाभावात् । तत एतदायाति पुद्गलकर्म जानतो जीवस्य पुद्गलेन सह निश्चयेन कर्तृकर्मभावो नास्तीति ॥ ७६ ॥ अथ स्वपरिणामं सकल्पविकल्परूपं जानतो जीवस्य तत्परिणामनिमित्तेनोदयागतकर्मणा

आगे पूछते हैं कि जो जीव पुद्गल कर्म को जानता है, उसका पुद्गल के साथ कर्ता कर्म भाव है या नहीं है ? उसका उत्तर कहते है,—**[ज्ञानी]** ज्ञानी **[अनेकविधं]** अनेक प्रकार **[पुद्गलकर्म]** पुद्गल द्रव्य के पर्याय रूप कर्मों को **[जानन् अपि]** जानता है तो भी **[खलु]** निश्चय से **[परद्रव्यपर्याये]** परद्रव्य के पर्यायों मे **[नपरिणमति]** उन स्वरूप परिणमन नहीं करता **[न गृह्णाति]** ग्रहण भी नहीं करता और **[न उत्पद्यते]** उनमें उत्पन्न भी नहीं होता ।

टीका—यह ज्ञानी पुद्गल के परिणाम स्वरूप कर्म को जानता है । कर्म का स्वरूप सामान्य रूप से तीन प्रकार है—प्राप्य, विकार्य, निर्वर्त्य । सिद्ध हुए को ग्रहण करना प्राप्य है, वस्तु की अवस्था पलटना विकाररूप होना विकार्य है, और जो अवस्था पहले तो नहीं थी फिर उत्पन्न हो उसे निर्वर्त्य कहते हैं । ऐसा कर्म का स्वरूप है । वह पुद्गल का परिणाम तीनों ही स्वरूप से पुद्गल द्रव्य के द्वारा व्याप्त होने योग्य है सो पुद्गल द्रव्य आप अन्तर्व्यापक होता हुआ आदि, मध्य और अन्त तीनों भावों में व्याप्त होकर उसको ग्रहण करता है, उस रूप परिणमन करता है, उस स्वरूप से उपजता है, इस प्रकार वह परिणाम पुद्गल द्रव्य के द्वारा ही किया गया है, ऐसे को ज्ञानी जानता है तो भी आप उसमें अन्त-

स्वपरिणामं जानतो जीवस्य सह पुद्गलेन कर्तृकर्मभावः किं भवति, किं न भवति इति चेत्:—

णवि परिणमदि ण गिह्णदि उप्पज्जदि ण परदव्वपज्जाए।
णाणी जाणंतो वि हु सगपरिणामं अणेयविहं ॥ ७७ ॥

नापि परिणमति न गृह्णात्युत्पद्यते न परद्रव्यपर्याये।
ज्ञानी जानन्नपि खलु स्वकपरिणाममनेकविधं ॥ ७७ ॥

यतो यं प्राप्यं विकार्यं निर्वर्त्यं च व्याप्यलक्षणमात्मपरिणामं कर्म आत्मना स्वयमं-

---

सह तादात्म्यसंबंधो नास्तीति दर्शयति;—**सगपरिणामं अणेयविहं** क्षायोपशमिकं संकल्प-विकल्परूपं स्वेनात्मनोपादानकारणभूतेन क्रियमाणं स्वपरिणाममनेकविधं **णाणी जाणंतो वि हु** निर्विकारस्वसंवेदनज्ञानी जीवः स्वपरमात्मनो

व्यापक होकर बाह्य स्थित परद्रव्य के परिणाम को आदि और मध्य अन्त में व्याप्त कर उस रूप नहीं परिणमन करता, उसको आप ग्रहण नहीं करता और उसमें उपजता भी नहीं है। जैसे मिट्टी घट रूप होती है, उसको ग्रहण करती है, और उसको उपजाती है, यह उस प्रकार नहीं है। इससे यह सिद्ध हुआ कि जो प्राप्य, विकार्य, निर्वर्त्य स्वरूप व्याप्य लक्षण परद्रव्य का परिणाम स्वरूप कर्म है उसे नहीं करता किन्तु उसे जानता हुआ जो ज्ञानी उसका पुद्गल के साथ कर्तृकर्म भाव नहीं है।

भावार्थ—पुद्गल कर्म को जीव जानता है तो भी उसका पुद्गल के साथ कर्ताकर्म भाव नहीं है क्योंकि कर्म तीन प्रकार से कहा जाता है। जिस परिणामरूप आप परिणमे, वह परिणाम—प्राप्य। आप किसी को ग्रहण करे, वह वस्तु—विकार्य। किसी को आप उत्पन्न करे वह कार्य—निर्वर्त्य। ऐसे तीनों ही तरह से जीव अपने से भिन्न पुद्गल द्रव्य रूप परमार्थ से नहीं परिणमन करता, क्योंकि आप चेतन है, पुद्गल जड़ है, चेतन जड़ रूप नहीं परिणमन करता पुद्गल को ग्रहण भी परमार्थ से नहीं करता क्योंकि पुद्गल मूर्तिक है आप अमूर्तिक है, अमूर्तिक का ग्रहण योग्य नहीं है। तथा पुद्गल को आप परमार्थ से उत्पन्न भी नहीं करता। क्योंकि चेतन जड़ को किस प्रकार उपजा सकता है? इस प्रकार पुद्गल जीव का कर्म नही है और जीव उसका कर्ता नहीं है। जीव का स्वभाव ज्ञाता है, वह आप ज्ञानरूप परिणमन करता हुआ उसको जानता है। ऐसे जाननेवाले का पर के साथ कर्ता कर्म भाव कैसे हो सकता है? नहीं हो सकता ॥ ७६ ॥

आगे पूछते हैं कि अपने परिणामों को जानता हुआ जो जीव उसका पुद्गल के साथ कर्ता-कर्म भाव, है या नहीं? उसका उत्तर कहते हैं;—**[ज्ञानी]** ज्ञानी **[स्वकपरिणामं]** अपने परिणामों को **[अनेकविधं]** अनेक प्रकार **[जानन् अपि]** जानता हुआ भी **[खलु]** निश्चयसे **[परद्रव्यपर्याये]** परद्रव्य के पर्याय में **[नापि परिणमति]** न तो परिणत होता है **[न गृह्णाति]** न उसको ग्रहण करता है **[न उत्पद्यते]** और न उपजता है (इस लिये उस के साथ कर्ता कर्म भाव नहीं हैं)।

तव्द्यापिकेन भूत्वादिमध्यांतेषु व्याप्य तं गृह्णता तथा परिणमता तथोत्पद्यमानेन च क्रियमाणं जानन्नपि हि ज्ञानी स्वयमंतर्व्यापको भूत्वा बहिःस्थस्य परद्रव्यस्य परिणामं मृत्तिकाकलशमिवादि-मध्यांतेषु व्याप्य न तं गृह्णाति न तथा परिणमति न तथोत्पद्यते च। ततः प्राप्यं विकार्यं निर्वर्त्यं च व्याप्यलक्षणं परद्रव्यपरिणामं कर्माकुर्वाणस्य स्वपरिणामं जानतोपि ज्ञानिनः पुद्गलेन सह न कर्तृकर्मभावः ॥ ७७ ॥

पुद्गलकर्मफलं जानतो जीवस्य सह पुद्गलेन कर्तृकर्मभावः किं भवति, किं न भवतीति चेत्:—

णवि परिणमदि ण गिह्णदि उप्पज्जदि ण परदव्वपज्जाए।
णाणी जाणंतो वि हु पुग्गलकम्मफलमणंतं ॥ ७८ ॥

नापि परिणमति न गृह्णात्युत्पद्यते न परद्रव्यपर्याये।
ज्ञानी जानन्नपि खलु पुद्गलकर्मफलमनंतं ॥ ७८ ॥

यतो यं प्राप्यं विकार्यं निर्वर्त्यं च व्याप्यलक्षणं सुखदुःखादिरूपं पुद्गलकर्मफलं कर्म

विशिष्टभेदज्ञानेन जानन्नपि हु स्फुटं णवि परिणमदि ण गिण्हदि उप्पज्जदि ण परदव्वपज्जाये तस्य पूर्वोक्त-स्वकीयपरिणामस्य निमित्तभूतमुदयागतं पुद्गलकर्मपर्यायरूप मृत्तिकाकलशरूपेणेव शुद्धनिश्चयनयेन न परिणमति न तन्मयत्वेन गृह्णाति न तत्पर्यायेणोत्पद्यते च। कस्मात् मृत्तिकाकलशयोरिव तेन पुद्गलकर्मणा सह परस्परोपादानकारणा-भावादिति। एतावता किमुक्तं भवति स्वकीयक्षायोपशमिकपरिणामनिमित्तमुदयागत कर्म जानतोपि जीवस्य तेन सह निश्चयेन कर्तृकर्मभावो नास्तीति ॥ ७७ ॥ अथ पुद्गलकर्मफलं जानतो जीवस्य पुद्गलकर्मफलनिमित्तेन द्रव्यकर्मणा सह

टीका—जिस कारण यह ज्ञानी, प्राप्य विकार्य और निर्वर्त्य इस प्रकार जिनका लक्षण व्याप्य है ऐसे तीन प्रकार कर्म आत्मा के अपने परिणाम ही है उसे अपने आप स्वयं अंतर्व्यापक होकर आदि मध्य और अंत में व्याप्य कर उन्हीं को ग्रहण करता है उन्हीं रूप परिणामन करता है उन्ही रूप उत्पन्न होता है। इसप्रकार उसी अपने परिणाम रूप कर्म को करता है। उसको आप जानता हुआ भी बाह्य स्थित परद्रव्य के परिणाम को 'जैसे मिट्टी कलशको व्याप्त होकर करती है' उसी प्रकार, आप उस परद्रव्य के परिणाम में आदि मध्य, अंत में व्याप्त होकर न तो उसे ग्रहण करता है, न उस रूप परिणामन करता है और न उस प्रकार उपजता है। इस कारण प्राप्य विकार्य और निर्वर्त्य तीन प्रकार के व्याप्य लक्षण पर द्रव्य के परिणाम रूप कर्म को करने वाला ज्ञानी अपने परिणाम को जानता हुआ प्रवृत्त होता है। उसका पुद्गल के साथ कर्तृकर्मभाव नहीं है।

आगे पूछते हैं कि पुद्गल कर्म के फल को जानते हुए जीव का पुद्गल के साथ कर्तृ कर्म भाव है या नहीं? उसका उत्तर कहते हैं;— **[ज्ञानी]** ज्ञानी **[अनंतं]** अनंत **[पुद्गलकर्मफलं]** पुद्गल कर्म के फलों को **[जानन् अपि]** जानता हुआ प्रवृत्त होता है तो भी **[खलु]** निश्चय से **[परद्रव्यपर्याये]** परद्रव्य के पर्याय में **[नापि]** नहीं **[परिणमति]** परिणमन करता है **[न गृह्णाति]** उसमें कुछ ग्रहण नहीं करता तथा **[न उत्पद्यते]** उसमें उपजता भी नहीं है। इस प्रकार उस में इस के कर्तृकर्म भाव नहीं है।

पुद्गलद्रव्येण स्वयमंतर्व्यापकेन भूत्वादिमध्यांतेषु व्याप्य तद्गृह्णता तथा परिणमता तथोत्पद्यमानेन च क्रियमाणं जानन्नपि हि ज्ञानी स्वयमंतर्व्यापको भूत्वा बहिःस्थस्य परद्रव्यस्य परिणामं मृत्तिकाकलशमिवादिमध्यांतेषु व्याप्य न तं गृह्णाति न तथा परिणमति न तथोत्पद्यते च[1]। ततः प्राप्यं विकार्यं निर्वर्त्यं च व्याप्यलक्षणं परद्रव्यपरिणामं कर्माकुर्वाणस्य सुखदुःखादिरूपं पुद्गलकर्मफलं जानतोपि ज्ञानिनः पुद्गलेन[2] सह न कर्तृकर्मभावः ॥ ७८ ॥

निश्चयेन कर्तृकर्मभावो नास्तीति कथयति;—**पुग्गलकम्मफलमणंतं** उदयागतद्रव्यकर्मणोपादानकारणभूतेन क्रियमाणं सुखदु.खरूपंशक्त्यपेक्षयानंतकर्मफल **णाणी जाणंतो वि हु** वीतरागशुद्धात्मसंवित्तिसमुत्पन्नसुखामृतरसतृप्तो भेदज्ञानी निर्मलविवेकभेदज्ञानेन जानन्नपि हि स्फुटं **ण परिणमदि ण गिह्णदि उप्पज्जदि ण परदव्वपज्जाये** वर्त्तमान-सुखदु.खरूपं शक्त्यपेक्षानिमित्तमुदयागतं परपर्यायरूपं पुद्गलकर्मं मृत्तिकाकलशरूपेणेव शुद्धनयेन न परिणमति न तन्मयत्वेन गृह्णाति न तत्पर्यायेणोत्पद्यते च। कस्मादिति चेत्, मृत्तिकाकलशयोरिव तेन द्रव्यकर्मणा सह तादात्म्यलक्षण-संबंधाभावादिति। किं च विशेषः। यदि पुद्गलद्रव्यकर्मरूपेण न परिणमति न गृह्णाति न तदाकारेणोत्पद्यते तर्हि किं करोति ज्ञानी जीवः, मिथ्यात्वविषयकषायख्यातिपूजालाभभोगाकांक्षारूपनिदानबंधशल्यादिविभावपरिणामकर्तृत्वभोक्तृत्वविकल्पशून्यं पूर्णकलशवच्चिदानंदैकस्वभावेन भरितावस्थं शुद्धात्मानं निर्विकल्पसमाधौ ध्यायतीति भावार्थः ॥ ७८ ॥ एवमात्मा निश्चयेन द्रव्यकर्मादिकं परद्रव्यं न परिणमतीत्यादिव्याख्यानमुख्यत्वेन गाथात्रयं गतं। अथ जीवपरिणामं, स्वपरिणामं, स्वपरिणामफलं च जडस्वभावत्वादजानतः पुद्गलस्य निश्चयेन जीवेन सह कर्तृकर्मभावो नास्तीति प्रति-पादयति;—**णवि परिणमदि ण गिह्णदि उप्पज्जदि ण परदव्वपज्जाए** यथा जीवो निश्चयेनानंतसुखादिस्व-रूप त्यक्त्वा पुद्गलद्रव्यरूपेण न परिणमति न च तन्मयत्वेन गृह्णाति न तत्पर्यायरूपेणोत्पद्यते। **पुग्गलदव्वं पि तहा** तथा पुद्गलद्रव्यमपि स्वयमंतर्व्यापकं भूत्वा मृत्तिकाद्रव्यकलशरूपेणेव चिदानंदैकलक्षणजीवस्वरूपेण न परिणमति

टीका—जिस कारण प्राप्य, विकार्य, और निर्वर्त्य ऐसे जिस का लक्षण व्याप्य है ऐसा तीन प्रकार का सुखदुःखादिरूप पुद्गलकर्म का फल उसे पुद्गलद्रव्य ने अंतर्व्यापक होकर, आदि मध्य, अंत में व्याप्त होकर ग्रहण करता हुआ, उसी प्रकार परिणमन करता हुआ तथा उसी प्रकार उत्पन्न होता हुआ उसे जानता यह ज्ञानी, आप अंतर्व्यापक होकर बाह्य स्थित पर द्रव्य के परिणाम को मिट्टी और घड़े की भांति आदि, मध्य और अन्त में व्याप्त कर नहीं ग्रहण करता, उस प्रकार परिणमन भी नहीं करता तथा उस प्रकार उत्पन्न भी नहीं होता? प्राप्य, विकार्य, और निर्वर्त्य रूप व्याप्य लक्षण अपने स्वभाव रूप कर्म को आप अन्तर्व्यापक होकर आदि मध्य और अन्त में व्याप्त उसी को ग्रहण करता है, उसी प्रकार परिणमता है और उसी प्रकार उत्पन्न होता है। इस कारण प्राप्य, विकार्य और निर्वर्त्यरूप व्याप्य लक्षण परद्रव्य के परिणाम रूप कर्म को नहीं करता सुखदुःख रूप कर्म के फल को जानता है तो भी ज्ञानी के पुद्गल के साथ कर्तृकर्म भाव नहीं है ॥ ७८ ॥

---

१. किन्तु प्राप्यंविकार्यं निर्वर्त्यं च व्याप्यलक्षणंस्वभावं कर्मस्वयमन्तर्व्यापको भूत्वाऽऽदिमध्यान्तेषुव्याप्यतमेव गृह्णाति, तथैवपरिणमति, तथैवो-त्पद्यते च इति अधिकाः पाठः, दिल्ली, नया-मन्दिर प्रतौ।

२. पुद्गलफलेन इति पाठान्तरं।

जीवपरिणामं स्वपरिणामफलं चाजानतः पुद्गलद्रव्यस्य सह जीवेन कर्तृकर्मभावः किं भवति, किं न भवतीति चेत्:—

णवि परिणमदि ण गिह्णदि उप्पज्जदि ण परदव्वपज्जाए।
पुग्गलदव्वं पि तहा परिणमइ सएहिं भावेहिं ॥ ७९ ॥

नापि परिणमति न गृह्णात्युत्पद्यते न परद्रव्यपर्याये।
पुद्गलद्रव्यमपि तथा परिणमति स्वकैर्भावैः ॥ ७९ ॥

यतो जीवपरिणामं स्वपरिणामं स्वपरिणामफलं चाप्यजानत् पुद्गलद्रव्यं स्वयमंतर्व्यापकं भूत्वा परद्रव्यस्य परिणामं मृत्तिकाकलशमिवादिमध्यांतेषु व्याप्य न तं गृह्णाति न तथा परिणमति न तथोत्पद्यते च। किंतु प्राप्यं विकार्यं निर्वर्त्यं च व्याप्यलक्षणं स्वभावं कर्म स्वयमंतर्व्यापकं भूत्वादिमध्यांतेषु व्याप्य तमेव गृह्णाति तथैव परिणमति तथैवोत्पद्यते च। ततः प्राप्यं विकार्यं निर्वर्त्यं च व्याप्यलक्षणं परद्रव्यपरिणामं कर्माकुर्वाणस्य जीवपरिणामं स्वपरिणामं स्वपरिणामफलं चाजानतः पुद्गलद्रव्यस्य जीवेन सह न कर्तृकर्मभावः ॥ ७९ ॥

न च जीवस्वरूपं तन्मयत्वेन गृह्णाति न च जीवपर्यायेणोत्पद्यते। तर्हि किं करोति **परिणमइ सएहिं भावेहिं** परिणमति स्वकीयैर्वर्णादिस्वभावैः परिणामैर्गुर्णधर्मैरिति। कस्मादिति चेत्, मृत्तिकाकलशयोरिव जीवेन सह तादात्म्य-

---

यहां पूछते हैं कि जीव के परिणाम को तथा अपने परिणाम को और अपने परिणाम के फल को नहीं जानता, ऐसे पुद्गलद्रव्य का जीव के साथ कर्तृकर्मभाव है या नहीं उसका उत्तर कहते हैं;—**[पुद्गलद्रव्यं अपि]** पुद्गल द्रव्य भी **[परद्रव्ये पर्याये]** पर द्रव्य के पर्याय में **[तथा]** उस प्रकार **[नापि]** नहीं **[परिणमति]** परिणमन करता है, **[न गृह्णाति]** उसको ग्रहण भी नहीं करता और **[न उत्पद्यते]** न उत्पन्न होता है क्योंकि **[स्वकैः भावैः]** अपने भावों से ही **[परिणमति]** परिणमन करता है।

टीका—जिस कारण पुद्गल द्रव्य जीव के परिणाम को, अपने परिणाम को तथा अपने परिणाम के फल को न जानता हुआ वर्तता है। पर द्रव्य के परिणाम रूप कर्म को मृत्तिका कलश की तरह आप अंतर्व्यापक हो कर आदि, मध्य और अंत में व्याप्त कर नहीं ग्रहण करता उसी प्रकार परिणमन भी नहीं करता है तथा उत्पन्न भी नहीं होता है परंतु प्राप्य, विकार्य और निर्वर्त्यरूप व्याप्त लक्षण अपने स्वभाव रूप कर्म को अंतर्व्यापक होकर आदि, मध्य और अंत में व्याप्य उसी को ग्रहण करता है, उसी प्रकार परिणत होता है तथा उसी प्रकार उपजता है। इस कारण प्राप्य विकार्य और निर्वर्त्य रूप व्याप्य लक्षण पर द्रव्य के परिणाम स्वरूप कर्म को न करता हुआ पुद्गल द्रव्य जीव के परिणाम को, अपने परिणाम को तथा अपने परिणाम के फल को नहीं जानता, उसका जीव के साथ कर्तृकर्म-भाव नहीं है।

ज्ञानी जानन्नपीमां स्वपरपरिणतिं पुद्गलश्चाप्यजानन्,
व्याप्तृव्याप्यत्वमंतः कलयितुमसहौ नित्यमत्यंतभेदात् ।
अज्ञानात्कर्तृकर्मभ्रममतिरनयोर्भाति तावन्न यावत्,
विज्ञानार्चिश्चकास्ति क्रकचवददयं भेदमुत्पाद्य सद्यः ॥ ५० ॥

लक्षणसंबंधाभावादिति ॥७९॥ एवं पुद्गलद्रव्यमपि जीवेन सह न परिणमतीत्यादिव्याख्यानमुख्यत्वेन गाथा गता । अथ यद्यपि जीवपुद्गलपरिणामयोरन्योन्यनिमित्तमात्रत्वमस्ति तथापि निश्चयनयेन तयोर्न कर्तृकर्मभावं इत्यावेदयति;—**जीवपरिणामहेदुं कम्मत्तं पुग्गला परिणमंति** यथा कुंभकारनिमित्तेन मृत्तिका घटरूपेण परिणमति तथा जीवसंबंधिमिथ्यात्वरागादिपरिणामहेतुं लब्ध्वा कर्मवर्गणायोग्यं पुद्गलद्रव्यं कर्मत्वेन परिणमति **पुग्गलकम्मणिमित्तं तहेव जीवो वि परिणमदि** यथैव च घटनिमित्तेन एवं घटं करोमीति कुंभकारः परिणमति तथैवोदयागतपुद्गलकर्महेतुं लब्ध्वा जीवोपि निर्विकारचिच्चमत्कारपरिणतिमलभमानः सन् मिथ्यात्वरागादिविभावेन परिणमतीति । अथ—**णवि कुव्वदि कम्मगुणे जीवो** यद्यपि परस्परनिमित्तेन परिणमति तथापि निश्चयनयेन जीवो वर्णादिपुद्गलकर्मगुणान्नकरोति । **कम्मं तहेव जीवगुणे** कर्म च तथैवानंतज्ञानादिजीवगुणान्न करोति **अण्णोण्णणिमित्तेण दु परिणामं जाणदोण्हंपि** यद्यप्युपादानरूपेण न करोति तथाप्यन्योन्यनिमित्तेन घटकुंभकारयोरिव परिणामं जानीहि द्वयोरपि जीवपुद्गलयोरिति । अथ—**एदेण कारणेण दु कत्ता आदा सएण भावेण** एतेन कारणेन पूर्वसूत्रद्वयव्याख्यानरूपेण तु निर्मलात्मानुभूतिलक्षणपरिणामेन शुद्धोपादानकारणभूतेनाव्याबाधानंतसुखादिशुद्धभावानां कर्ता । तद्विलक्षणेनाशुद्धोपादानकारणभूतेन रागाद्यशुद्धभावानां कर्ता भवत्यात्मा । कथं ? यथा मृत्तिकाकलशस्येति **पुग्गलकम्मकदाणं ण दु कत्ता सव्वभावाणं** पुद्गलद्रव्यकर्मकृतानां

भावार्थ—यदि कोई माने कि पुद्गल जड़ है वह किसी को जानता नहीं, अतः उसका जीव के साथ कर्तृकर्म भाव हो जायगा किन्तु यह बात नहीं है। परमार्थ से परद्रव्य के साथ किसी के कर्तृकर्म भाव नहीं है।

अब इसी अर्थ का कलश रूप काव्य कहते हैं। **ज्ञानी** इत्यादि। **अर्थ**—ज्ञानी तो अपनी और पर की दोनों की परिणति को जानता हुआ प्रवृत्त होता है तथा पुद्गल द्रव्य अपनी और पर की दोनों ही परिणतियों को नहीं जानता हुआ प्रवृत्त होता है इसलिये वे दोनों परस्पर अंतरंग व्याप्य व्यापक भाव को प्राप्त होने में असमर्थ हैं क्योंकि दोनों भिन्न द्रव्य हैं सदाकाल उनमें अत्यंत भेद है। ऐसा होने पर इनके कर्तृकर्म भाव मानना भ्रमबुद्धि है। यह जब तक इन दोनों में करोंत की तरह निर्दय होकर उसी समय भेद को उपजाकर भेदज्ञान प्रकाश वाला ज्ञान प्रकाशित नहीं होता, यह तभी तक है।

भावार्थ—भेदज्ञान होने के बाद पुद्गल और जीव के कर्तृकर्म भाव की बुद्धि नहीं रहती क्योंकि जब तक भेदज्ञान नहीं होता, तभी तक अज्ञान से कर्तृकर्म भाव की बुद्धि है।

अब कहते हैं कि जीव के परिणाम में और पुद्गल के परिणाम में परस्पर निमित्तमात्रता है

जीवपुद्गलपरिणामयोरन्योन्यनिमित्तमात्रत्वमस्ति तथापि न तयोः कर्तृकर्मभावइत्याह;—

जीवपरिणामहेदुं कम्मत्तं पुग्गला परिणमंति ।
पुग्गलकम्मणिमित्तं तहेव जीवो वि परिणमइ ॥ ८० ॥
णवि कुव्वइ कम्मगुणे जीवो कम्मं तहेव जीवगुणे ।
अण्णोण्णणिमित्तेण दु परिणामं जाण दोह्णम्पि ॥ ८१ ॥
एएण कारणेण दु कत्ता आदा सएण भावेण ।
पुग्गलकम्मकयाणं ण दु कत्ता सव्वभावाणं ॥ ८२ ॥ (त्रिकलम्)

जीवपरिणामहेतुं कर्मत्वं पुद्गलाः परिणमंति ।
पुद्गलकर्मनिमित्तं तथैव जीवोपि परिणमति ॥ ८० ॥
नापि करोति कर्मगुणान् जीवः कर्म तथैव जीवगुणान् ।
अन्योन्यनिमित्तेन तु परिणामं जानीहि द्वयोरपि ॥ ८१ ॥
एतेन कारणेन तु कर्ता आत्मा स्वकेन भावेन ।
पुद्गलकर्मकृतानां न तु कर्ता सर्वभावानां ॥ ८२ ॥

यतो जीवपरिणामं निमित्तीकृत्य पुद्गलाः कर्मत्वेन परिणमंति पुद्गलकर्मनिमित्तीकृत्य

न तु कर्ता सर्वभावानां ज्ञानावरणादिपुद्गलकर्मपर्यायाणामिति । एवं जीवपु ्गलपरस्परनिमित्तकारणव्याख्यानमुख्यत्वेन गाथात्रयं गतं ॥ ८० ॥ ८१ ॥ ८२ ॥ अथ तत एतदायाति—जीवस्य स्वपरिणामैरेव सह निश्चयनयेन कर्तृकर्मभावो भोक्तृभोग्यभावश्च भवति;—**णिच्छयणयस्स एवं आदा अप्पाणमेव हि करेदि** यथा यद्यपि समीरो निमित्तं भवति तथापि निश्चयनयेन पारावार एव कल्लोलान् करोति परिणमति च । एत्र यद्यपि द्रव्यकर्मोदयासद्भावसद्भावात्

तो भी उन दोनों में कर्तृकर्म तो है ही नही,—**[पुद्गलाः]** पुद्गल **[जीवपरिणामहेतुं]** जिसको जीव के परिणाम निमित्त हैं ऐसे **[कर्मत्वं]** कर्मत्व रूप **[परिणमंति]** परिणमन करते है **[तथैव]** उसी प्रकार **[जीवः अपि]** जीव भी **[पुद्गलकर्मनिमित्तं]** जिसको पुद्गल कर्मनिमित्त है ऐसे कर्मत्व रूप **[परिणमति]** परिणमन करता है। **[जीवः]** जीव **[कर्मगुणान्]** कर्म के गुणों को **[नापि]** नहीं **[करोति]** करता **[तथैव]** उसी भांति **[कर्म]** कर्म **[जीवगुणान्]** जीव के गुणों को नहीं करता। **[तु]** किंतु **[द्वयोरपि]** इन दोनों के **[अन्योन्यनिमित्तेन]** परस्पर निमित्त मात्र से **[परिणामं]** परिणाम **[जानीहि]** जानो **[एतेन कारणेन तु]** इसी कारण से **[स्वकेन भावेन]** अपने भावों से **[आत्मा]** आत्मा **[कर्ता]** कर्ता कहा जाता है **[तु]** परंतु **[पुद्गलकर्मकृतानां]** पुद्गल कर्म से किये गये **[सर्वभावानां]** सब भावों का **[कर्ता न]** कर्ता नहीं है।

जीवोपि परिणमतीति जीवपुद्गलपरिणामयोरितरेतरहेतुत्वोपन्यासेपि जीवपुद्गलयोः परस्परं व्याप्यव्यापकभावाभावाज्जीवस्य[1] पुद्गलपरिणामानां पुद्गलकर्मणोपि जीवपरिणामानां कर्तृकर्मत्वासिद्धौ निमित्तनैमित्तिकभावमात्रस्याप्रतिषिद्धत्वादितरेतरनिमित्तमात्रीभवनेनैव द्वयोरपि परिणामः। ततः कारणान्मृत्तिकया कलशस्येव स्वेन भावेन स्वस्य भावस्य करणाज्जीवः स्वभावस्य कर्ता कदाचित्स्यात्। मृत्तिकया वसनस्येव स्वेन भावेन परभावस्य कर्तुमशक्यत्वात्पुद्गलभावानां तु कर्ता न कदाचिदपि स्यादिति निश्चयः। ततःस्थितमेतज्जीवस्य स्वपरिणामैरेव सह कर्तृकर्मभावो भोक्तृभोग्यभावश्च ॥ ८० ॥ ८१ ॥ ८२ ॥

शुद्धाशुद्धभावयोर्निमित्तं भवति तथापि निश्चयेन निर्विकारपरमस्वसंवेदनज्ञानपरिणतः केवलज्ञानादिशुद्धभावान् तथैवाशुद्धपरिणतस्तु सांसारिकसुखदुःखाद्यशुद्धभावांश्चोपादानरूपेणात्मैव करोति। अत्र परिणामानां परिणमनमेव कर्तृत्वं ज्ञातव्यमिति। न केवलं करोति **वेदयदि पुणो तं चेव जाण अत्ता दु अत्ताणं** वेदयत्यनुभवति भुक्ते परिणमति पुनश्च स्वशुद्धात्मभावनोत्थसुखरूपेण शुद्धोपादानेन तदेव शुद्धात्मानमशुद्धोपादानेनाशुद्धात्मानं च। स कः कर्ता ? आत्मेति जानीहि। एवं निश्चयकर्तृत्वभोक्तृत्वव्याख्यानरूपेण गाथा गता ॥ ८३ ॥ अथ लोकव्यवहारं दर्शयति;—**ववहारस्स दु आदा पुग्गलकम्मं करेदि अणेयविहं** यथा लोके यद्यपि मृत्पिड उपादानकारणं तथापि कुंभकारो घटं करोति तत्फलं च जलधारणमूल्यादिकं भुक्तं इति लोकानामनादिरूढोस्ति व्यवहारः। तथा यद्यपि कर्मवर्गणायोग्यपुद्गलद्रव्यमुपादानकारणभूतं तथापि व्यवहारनयस्याभिप्रायेणात्मा पुद्गलकर्मानेकविधं मूलोत्तरप्रकृतिभेदभिन्नं करोति **तं चेव य वेदयदे पुग्गलकम्मं अणेयविहं** तथैव च तदेवोदयागतं पुद्गलकर्मानेकविधं इष्टानिष्टपंचेन्द्रियविषयरूपेण

टीका—जिस कारण जीव परिणाम को निमित्त मात्र करके पुद्गलकर्म भाव से परिणमन करते है और पुद्गल कर्म को निमित्त मात्र कर जीव भी परिणमन करता है। ऐसे जीव के परिणाम का तथा पुद्गल के परिणाम का परस्पर हेतुत्व का स्थापन होने पर भी जीव और पुद्गल के परस्पर व्याप्यव्यापक भाव के अभाव से जीव के तो पुद्गल परिणामों का और पुद्गल कर्म के जीव के परिणामों के कर्ता कर्म पने की असिद्धि होने पर निमित्तनैमित्तिकभावमात्र का निषेध नही है क्योंकि परस्पर निमित्तमात्र होने से ही दोनों का परिणाम है। इस कारण मृत्तिका के कलश की तरह अपने भाव द्वारा अपने भाव के करने से जीव अपने भाव का कर्ता सदा काल होता है। तथा मृत्तिका जैसे कपड़े की कर्ता नहीं है, वैसे अपने भाव द्वारा परके भावो के करने की असमर्थता से पुद्गल के भावों का तो कर्ता कभी नहीं है ऐसा निश्चय है।

भावार्थ—जीव और पुद्गल परिणामों की परस्परनिमित्तमात्रता है तो भी परस्पर कर्तृकर्म भाव नहीं है। पर के निमित्त से जो अपने भाव हुए थे, उन का कर्ता तो उसे अज्ञान दशा में कदाचित् कह भी सकते हैं, लेकिन परभाव का कर्ता कभी नहीं हो सकता ॥ ८० । ८१ । ८२ ॥

---

[1] जीव परिणामस्य इत्यर्थः।

णिच्छयणयस्स एवं आदा अप्पाणमेव हि करेदि ।
वेदयदि पुणो तं चेव जाण अत्ता दु अत्ताणं ॥ ८३ ॥

निश्चयनयस्यैवमात्मात्मानमेव हि करोति ।
वेदयते पुनस्तं चैव जानीहि आत्मा त्वात्मानं ॥ ८३ ॥

यथोत्तरंगनिस्तरंगावस्थयोः समीरसंचरणासंचरणनिमित्तयोरपि समीरपारावारयोर्व्याप्यव्यापकभावाभावात्कर्तृकर्मत्वासिद्धौ पारावार एव स्वयमंतर्व्यापको भूत्वादिमध्यांतेषूत्तरंगनिस्तरंगावस्थे व्याप्योत्तरंगं निस्तरंगं त्वात्मानं कुर्वन्नात्मानमेकमेव कुर्वन् प्रतिभाति न पुनरन्यत् । यथा स एव च भाव्यभावकभावाभावात्परभावस्य परेणानुभवितुमशक्यत्वादुत्तरंगं निस्तरंगं त्वात्मानमनुभवन्नात्मानमेकमेवानुभवन् प्रतिभाति न पुनरन्यत् । तथा ससंसारनिःसंसारावस्थयोः

वेदयति अनुभवति इत्यज्ञानिनां निर्विषयस्वशुद्धात्मोपलंभसंजातसुखामृतरसास्वादरहितानामनादिरूढोऽस्ति व्यवहारः ॥८४॥ एवं व्यवहारेण सुखदुःखकर्तृत्वभोक्तृत्वकथनमुख्यतया गाथा गता । इति ज्ञानिजीवस्य विशेषव्याख्यानरूपेणैकादशगाथाभि-

---

यहाँ कहते हैं कि इस हेतु से यह सिद्ध हुआ कि जीव का अपने परिणामों के ही साथ कर्तृकर्मभाव और भोक्तृभोग्यभाव है;—**[निश्चयनयस्य]** निश्चयनय का **[एवं]** यह मत है कि **[आत्मा]** आत्मा **[आत्मानं एव हि]** अपने को ही **[करोति]** करता है **[तु पुनः]** फिर **[आत्मा]** वह आत्मा **[तं चैव आत्मानं]** अपने को ही **[वेदयते]** भोगता है ऐसा तू **[जानीहि]** तू जान ।

टीका—जैसे पवन का चलना और न चलना जिनको निमित्त है, ऐसी समुद्र की तरंगों का उठना और विलय होना रूप दो अवस्था उनके पवन और समुद्र के व्याप्यव्यापकभाव के अभाव से कर्ता कर्मपने की असिद्धि होने पर समुद्र ही आप उन अवस्थाओं में अंतर्व्यापक होकर आदि, मध्य और अंत में उन अवस्थाओं में व्याप्त होकर उत्तरंगनिस्तरंग रूप अपने को एक ही करता हुआ प्रतिभासित होता है, किसी दूसरे को नहीं करता है । उसी प्रकार वही समुद्र उस पवन और समुद्र के भाव्यभावक भाव के अभाव से परभाव को पर कर अनुभव करने के असामर्थ्य से उत्तरंगनिस्तरंग स्वरूप अपने को ही अनुभव करता हुआ प्रतिभासित होता है, अन्य किसी का अनुभव नहीं करता । उसी प्रकार पुद्गल कर्म के उदय का संभव असंभव जिसको निमित्त है ऐसी जो संसार और निःसंसार दो अवस्था उनके पुद्गल कर्म और जीव के व्याप्य-व्यापक रूप के अभाव से कर्ताकर्म रूप की असिद्धि है । क्योंकि जीव आप अन्तर्व्यापक होकर आदि, मध्य और अन्त में ससंसार निःसंसार अवस्था में व्याप्त होकर ससंसार निःसंसार रूप आत्मा को करता हुआ अपने को कर्ता प्रतिभासित करे तो अन्य को प्रतिभासित न करे । उसी प्रकार यही जीव भाव्यभावकभाव के अभाव से परभाव को पर द्वारा अनुभव करने की असामर्थ्य है इसलिये ससंसार निःसंसार रूप आत्मा एक अपने को ही अनुभव करता हुआ प्रतिभासित हो अन्य को अनुभव करता हुआ प्रतिभासित न हो ।

पुद्गलकर्मविपाकसंभवासंभवनिमित्तयोरपि पुद्गलकर्मजीवयोर्व्याप्यव्यापकभावाभावात्कर्तृकर्मत्वा-सिद्धौ जीव एव स्वयमंतर्व्यापको भूत्वादिमध्यांतेषु ससंसारनिःसंसारावस्थे व्याप्य ससंसारं निःसंसारं वात्मानं कुर्वन्नात्मानमेकमेव कुर्वन् प्रतिभातु मा पुनरन्यत् । तथायमेव च भाव्य-भावकभावाभावात् परभावस्य परेणानुभवितुमशक्यत्वात्ससंसारं निःसंसारं वात्मानमनुभवन्नात्मान-मेकमेवानुभवन्प्रतिभातु मा पुनरन्यत् ॥ ८३ ॥

अथ व्यवहारं दर्शयति :—

ववहारस्स दु आदा पुग्गलकम्मं करेदि णेयविहं ।
तं चेवपुणो वेयइ पुग्गलकम्मं अणेयविहं ॥ ८४ ॥

व्यवहारस्य त्वात्मा पुद्गलकर्म करोति नैकविधं ।
तच्चैव पुनर्वेदयते पुद्गलकर्मानेकविधं ॥ ८४ ॥

यथांतर्व्याप्यव्यापकभावेन मृत्तिकया कलशे क्रियमाणे भाव्यभावकभावेन मृत्तिकयैवा-नुभूयमाने च बहिर्व्याप्यव्यापकभावेन कलशसंभवानुकूलं व्यापारं कुर्वाणः कलशकृततोयोपयोगजां तृप्तिं भाव्यभावकभावेनानुभवंश्च कुलालः कलशं करोत्यनुभवति चेति लोकानामनादिरूढोऽस्ति

द्वितीयांतराधिकारो व्याख्यातः। अतः परं पञ्चविंशतिगाथापर्यंतं द्विक्रियावादिनिराकरणरूपेण व्याख्यानं करोति। तत्र चेतनाचेतनयोरेकोपादानकर्तृत्वं द्विक्रियावादित्वमुच्यते तस्य संक्षेपव्याख्यानरूपेण **जदिपुग्गलकम्ममिणं** इत्यादि गाथाद्वयं भवति। तद्विवरणद्वादशगाथासु मध्ये **पुग्गलकम्मणिमित्तं** इत्यादिगाथाक्रमेण प्रथमगाथाषट्कं स्वतंत्रं। तदनंतरमज्ञानिज्ञानिजीवकर्तृत्वाकर्तृत्वमुख्यतया **परमप्पाणंकुव्वदि** इत्यादिद्वितीयषट्कं। अतःपरं तस्यैव द्विक्रिया-वादिनः पुनरपि विशेषव्याख्यानार्थमुपसंहाररूपेणैकादशगाथा भवंति। तत्रैकादशगाथासु मध्ये व्यवहारनयमुख्यत्वेन

भावार्थ—आत्मा की ससंसार निःसंसार अवस्था परद्रव्य पुद्गलकर्म के निमित्त से है वहां, उन अवस्था रूप आप ही परिणमन करता है इसलिये अपना ही कर्ता भोक्ता है, निमित्तमात्र पुद्गल-कर्म है, उसका कर्ता भोक्ता नहीं हैं ॥ ८३ ॥

अब व्यवहार को दिखलाते हैं;—**[व्यवहारस्य तु]** व्यवहारनय का यह मत है कि **[आत्मा]** आत्मा **[नैकविधं]** अनेक प्रकार **[पुद्गलकर्म]** पुद्गल कर्मों को **[करोति]** करता है **[पुनः]** और **[तदेव]** उसी **[अनेकविधं]** अनेक प्रकार **[पुद्गलकर्म]** पुद्गल कर्म को **[वेदयते]** भोगता है।

टीका—जैसे मिट्टी घड़े को करती और भोगती है, वह अन्तर्व्याप्यव्यापक भाव से करती है तथा भाव्यभावकभाव से भोगती है तो भी बाह्य व्याप्यव्यापकभाव से कलश होने में संभव उसके अनुकूल व्यापार को अपने हस्तादिक से करने वाला तथा कलश में भरे जल के उपयोग से हुए तृप्तिभाव को भाव्यभावक भाव से अनुभव करने वाला कुम्हार इस कलश को बनाता तथा भोगता है, ऐसा लोकों का अनादि से प्रसिद्ध व्यवहार रहा है। उसी प्रकार यद्यपि पुद्गल कर्म को अन्तर्व्याप्यव्यापक भाव से

तावद्व्यवहारः, तथांतर्व्याप्यव्यापकभावेन पुद्गलद्रव्येण कर्मणि क्रियमाणे भाव्यभावकभावेन पुद्गलद्रव्येणैवानुभूयमाने च बहिर्व्याप्यव्यापकभावेनाज्ञानात्पुद्गलकर्मसंभवानुकूलं परिणामं[1] कुर्वाणः पुद्गलकर्मविपाकसंपादितविषयसन्निधिप्रधावितां सुखदुःखपरिणतिं भाव्यभावकभावेनानुभवंश्च जीवः पुद्गलकर्म करोत्यनुभवति चेत्यज्ञानिनामासंसारप्रसिद्धोस्ति तावद्व्यवहारः ॥ ८४ ॥

अथैनं दूषयति :—

जदि पुग्गलकम्ममिणं कुव्वदि तं चेव वेदयदि आदा ।
दो किरियावदिरित्तो पसज्जए सो जिणावमदं ॥ ८५ ॥

यदि पुद्गलकर्मेदं करोति तच्चैव वेदयते आत्मा ।
द्विक्रियाव्यतिरिक्तः प्रसजति स जिनावमतं ॥ ८५ ॥

इह खलु क्रिया हि तावदखिलापि परिणामलक्षणतया न नाम परिणामतोरित भिन्ना, परिणामोपि परिणामपरिणामिनोरभिन्नवस्तुत्वात्परिणामिनो न भिन्नस्ततो या काचन क्रिया किल

ववहारस्स दु इत्यादि गाथात्रयं। तदनंतरं निश्चयनयमुख्यतया **जो पुग्गलदव्वाणं** इत्यादिसूत्रचतुष्टय। ततश्च द्रव्यकर्मणामुपचारकर्तृत्वमुख्यत्वेन **जीवंहि हेदुभूदे** इत्यादिसूत्रचतुष्टयमिति समुदायेन पचविंशतिगाथाभिस्तृतीय-

---

पुद्गल द्रव्य करता है और भाव्यभावक भाव से पुद्गल द्रव्य ही अनुभव करता (भोगता) है तो भी बाह्य व्याप्यव्यापकभाव से अज्ञान से पुद्गल कर्म के होने के अनुकूल अपने रागादि परिणाम को करता और पुद्गल कर्म के उदय होने से उत्पन्न विषयों की समीपता होने वाली अपनी सुखदुःखरूप परिणति को भाव्यभावकभाव के अनुभव करने वाला जीव पुद्गल कर्म को करता है और भोगता है। ऐसे अज्ञानी लोकों का अनादि संसार से व्यवहार प्रसिद्ध है।

भावार्थ—पुद्गल कर्म को परमार्थ से पुद्गल द्रव्य ही करता है और पुद्गल कर्म के होने के अनुकूल अपने रागादि परिणामों को जीव करता है, उसके निमित्तनैमित्तिकभाव को देखकर अज्ञानी को यह भ्रम है कि जीव ही पुद्गल कर्म को करता है। वह अनादि अज्ञान से प्रसिद्ध व्यवहार है। जब तक जीव पुद्गल का भेदज्ञान नहीं है, तब तक दोनों की प्रवृत्ति एक सरीखी दीखती है, इस कारण जब तक भेदज्ञान न हो, तब तक ही दीखती है। श्रीगुरु भेदज्ञान करा के परमार्थ जीव का स्वरूप दिखला कर अज्ञानी के प्रतिभास को व्यवहार कहते हैं ॥८४॥

आगे इस व्यवहार को दूषण देते हैं;—**[यदि]** जो **[आत्मा]** आत्मा **[इदं]** इस **[पुद्गलकर्म]** पुद्गल कर्म को **[करोति]** करे **[च]** और **[तत् एव]** उसी को **[वेदयते]** भोगे तो **[सः]** वह **[द्विक्रियाव्यतिरिक्तः]** आत्मा दो क्रिया से अभिन्न **[प्रसजति]** ठहरे ऐसा प्रसंग आता है सो यह **[जिनावमतं]** जिनदेव का मत नहीं है।

---

१. रागादि परिणाम मित्यर्थः।

सकलापि सा क्रियावतो न भिन्नेति क्रियाकर्त्रोरव्यतिरिक्ततायां वस्तुस्थित्या प्रतपत्यां यथा व्याप्यव्यापकभावेन स्वपरिणामं करोति, भाव्यभावकभावेन तमेवानुभवति च जीवस्तथा व्याप्यव्यापकभावेन पुद्गलकर्मापि यदि कुर्यात् भाव्यभावकभावेन तदेवानुभवेच्च ततो यं स्वपरसमवेतक्रियाद्वयाव्यतिरिक्ततायां प्रसजंत्यां स्वपरयोः परस्परविभागप्रत्यस्तमनादनेकात्मकमेकमात्मानमनुभवन्मिथ्यादृष्टितया सर्वज्ञावमतः स्यात् ॥ ८५ ॥

स्थले समुदायपातनिका। तद्यथा—अथेदं पूर्वोक्तं कर्मकर्तृत्वभोक्तृत्वनयविभागव्याख्यानं कर्मतापन्नमनेकांतेन सम्मतमप्येकांतनयेन मन्यते। किं मन्यते भावकर्मवन्निश्चयेन द्रव्यकर्मापि करोतीति चेतनाचेतनकार्ययोरेकोपादानकर्तृत्वलक्षणं द्विक्रियावादित्वं स्यात्। तान् द्विक्रियावादिनो दूषयति;—**जदि पुग्गलकम्ममिणं कुव्वदि तं चेव वेदयदि आदा** यदि चेत्पुद्गलकर्मोदयमुपादानरूपेण करोति तदेव च पुनरुपादानरूपेण वेदयत्यनुभवत्यात्मा **दोकिरियावादित्तं पसजदि** तदा चेतनाचेतनक्रियाद्वयस्योपादानकर्तृत्वरूपेण द्विक्रियावादित्वं प्रसजति प्राप्नोति। अथवा **दो किरियाविदिरित्तो पसजदि सो** तत्र पाठांतरे द्वाभ्यां चेतनाचेतनक्रियाभ्यामव्यतिरिक्तोऽभिन्नः प्रसजति प्राप्नोति स पुरुषः। **सम्मं जिणावमदं** तच्च व्याख्यानं जिनानां सम्यगसंमतं। यश्चेदं व्याख्यानं मन्यते स निजशुद्धात्मोपादेयरुचिरूपं निर्विकारचिच्चमत्कारमात्रलक्षणं शुद्धोपादानकारणोत्पन्नं निश्चयसम्यक्त्वमलभमानो मिथ्यादृष्टिर्भवतीति ॥ ८५ ॥ अथ कुतो द्विक्रियावादी मिथ्यादृष्टिर्भवतीति प्रश्ने प्रत्युत्तरं प्रयच्छंस्तमेवार्थं प्रकारांतरेण दृढयति;—**जह्मा दु अत्त भावं पुद्गलभावं च दोवि कुव्वंति** यस्मादात्मभाव चिद्रूपं पुद्गलभावं चाचेतनं जडस्वरूपं द्वयमप्युपादानरूपेण कुर्वंति **तेण दु मिच्छादिट्ठी दोकिरियावादिणो हुंति** ततस्तेन कारणेन चेतनाचेतनक्रियाद्वयवादिनः

टीका—इस लोक में जो क्रिया है वह पहले तो सभी परिणाम स्वरूप है इस कारण परिणाम ही है कुछ भिन्न वस्तु नहीं है और परिणाम तथा परिणामी द्रव्य दोनों अभिन्न वस्तु हैं भिन्न भिन्न वस्तु नहीं हैं इसलिये परिणाम परिणामी से पृथक् नहीं है। इससे यह सिद्ध हुआ कि जो कुछ क्रिया है वह क्रियावान् द्रव्य से पृथक् नहीं है। इस प्रकार क्रिया का और क्रियावान् की अभिन्नता है। ऐसी वस्तु की मर्यादा होने पर जैसा जीव व्याप्यव्यापक भाव से अपने परिणाम को करता है और भाव्य भावक भाव से उसी अपने परिणाम को अनुभव करता है भोगता है, उसी तरह व्याप्यव्यापकभाव से पुद्गलकर्म को भी करे तथा भाव्यभावक भाव से उसी का अनुभव करे, भोगे तो अपनी और पर की मिली दो क्रियाओं का अभेद सिद्ध हुआ। ऐसा होने पर अपने और परके भेद का अभाव हुआ। इसप्रकार अनेक द्रव्य स्वरूप एक आत्मा को अनुभव करने वाला मिथ्यादृष्टि होता है। परंतु ऐसा वस्तु स्वरूप जिनदेव ने नहीं कहा है इसलिये जिनदेव के मत के बाहर है ॥

भावार्थ—दो द्रव्यों की क्रिया भिन्न ही है। जड़ की क्रिया चेतन नहीं करता, चेतन की क्रिया जड़ नहीं करता। जो पुरुष एक द्रव्य को दो द्रव्यों की क्रियाओं का कर्ता मानता है, वह मिथ्यादृष्टि है क्योंकि दो द्रव्यों की क्रिया एक द्रव्य से मानना यह जिनदेव का मत नहीं है ॥ ८५ ॥

कुतो द्विक्रियानुभावी मिथ्यादृष्टिरिति चेत् :—

जह्मा दु अत्तभावं पुग्गलभावं च दोवि कुव्वंति ।
तेण दु मिच्छादिट्ठी दोकिरियावादिणो हुंति ॥ ८६ ॥

यस्मात्त्वात्मभावं पुद्गलभावं च द्वावपि कुर्वंति ।
तेन तु मिथ्यादृष्टयो द्विक्रियावादिनो भवंति ॥ ८६ ॥

यतः किलात्मपरिणामं पुद्गलपरिणामं च कुर्वंतमात्मानं मन्यंते द्विक्रियावादिनस्ततस्ते मिथ्यादृष्टय एवेति सिद्धांतः। मा चैकद्रव्येण द्रव्यद्वयपरिणामः क्रियमाणः प्रतिभातु। यथा किल कुलालः कलशसंभवानुकूलमात्मव्यापारपरिणाममात्मनोऽव्यतिरिक्तमात्मनोऽव्यतिरिक्तया परिणतिमात्रया क्रियया क्रियमाणं कुर्वाणः प्रतिभाति न पुनः कलशकरणाहंकारनिर्भरोपि स्वव्यापारानुरूपं मृत्तिकायाः कलशपरिणामं मृत्तिकायाः अव्यतिरिक्तंमृत्तिकायाः अव्यतिरिक्तया परिणतिमात्रया क्रियया क्रियमाणं कुर्वाणः प्रतिभाति। तथात्मापि पुद्गलकर्मपरिणामानुकूलमज्ञानादात्मपरिणाममात्मनोऽव्यतिरिक्तमात्मनोऽव्यतिरिक्तया परिणतिमात्रया क्रियया क्रियमाणं कुर्वाणः प्रतिभातु मा पुनः पुद्गलपरिणामकरणाहंकारनिर्भरोपि स्वपरिणामानुरूपं पुद्गलस्य परिणामं

पुरुषाः मिथ्यादृष्टयो भवंतीति। तथाहि—यथा कुंभकारः स्वकीयपरिणाममुपादानरूपेण करोति तथा घटमपि यद्युपादानरूपेण करोति तदा कुंभकारस्याचेतनत्वं घटरूपत्वं प्राप्नोति। घटस्य वा चेतनत्वंकुंभकाररूपत्वं च प्राप्नोतीति। तथा जीवोपि यद्युपादानरूपेण पुद्गलद्रव्यकर्म करोति तदा जीवस्याचेतनपुद्गलद्रव्यत्वं प्राप्नोति। पुद्गलकर्मणो वा चिद्रूपं

यहां प्रश्न उठता है कि दो क्रियाओं का अनुभव करने वाला पुरुष मिथ्यादृष्टि कैसे हो सकता है। उसका समाधान करते हैं;—[यस्मात् तु] जिस कारण [आत्मभावं] आत्मा के भाव को [च] और [पुद्गलभावं] पुद्गल के भाव को [द्वौ अपि] दोनों ही को आत्मा [कुर्वंति] करता है ऐसा कहते हैं [तेन तु] इसी कारण [द्विक्रियावादिनः] दो क्रियाओं को एक के ही कहने वाले [मिथ्यादृष्टयः] मिथ्यादृष्टि ही [भवंति] हैं।

टीका—निश्चय से जो आत्मा को आत्मा और पुद्गल के परिणामों का कर्ता मानते हैं, दोनों क्रियायें एक के ही कहने वाले हैं, वे मिथ्यादृष्टि ही हैं, ऐसा सिद्धान्त है। सो एक द्रव्य से दो परिणाम प्रतिभासित नहीं होते; जैसे कुम्हार के घड़े के होने के अनुकूल अपना व्यापार रूप हस्तादिक क्रिया, तथा इच्छा रूप परिणाम अपने से अभिन्न है तथा अपने से अभिन्नपरिणतिमात्रक्रिया से किये हुए को करता हुआ प्रतिभासित होना है और घट बनाने के अहंकार सहित है, तो भी मृत्तिका का मृत्तिका के व्यापार के अनुकूल घट परिणाम मिट्टी से अभेद रूप तथा मिट्टी से अभिन्न मृत्तिका परिणति मात्र क्रिया द्वारा किये हुए का करता नहीं मालूम होता। उसी प्रकार आत्मा भी अज्ञान से पुद्गलकर्म के अनुकूल अपने से अभिन्न, अपने परिणाम अपने से अभिन्न अपनी परिणतिमात्र क्रिया से किये हुए को करता हुआ प्रति-

पुद्गलादव्यतिरिक्तं पुद्गलादव्यतिरिक्तया परिणतिमात्रया क्रियया क्रियमाणं कुर्वाणः प्रतिभातु ॥ ८६ ॥

य: परिणमति स कर्ता यः परिणामो भवेत्तु तत्कर्म ।
या परिणतिः क्रिया सा त्रयमपि भिन्नं न वस्तुतया ॥ ५१ ॥
एकः परिणमति सदा परिणामो जायते सदैकस्य ।
एकस्य परिणतिः स्यादनेकमप्येकमेव यतः ॥ ५२ ॥

जीवत्वं प्रप्नोति । किं च । शुभाशुभं कर्म कुर्वेहमिति महाहंकाररूपं तमो मिथ्याज्ञानिनां न नश्यति । तर्हि केषां नश्यतीति चेत्, विषयसुखानुभवानंदवर्जिते वीतरागस्वसंवेदनवेद्ये भूतार्थनयेनैकत्वव्यवस्थापिते चिदानंदैकस्वभावे शुद्धपरमात्मद्रव्ये स्थितानामेव समस्तशुभाशुभपरभावशून्येन निर्विकल्पसमाधिलक्षणेन शुद्धोपयोगभावनाबलेन सज्ञानिनामेव विलयं विनाशं

भासित हो (जानो) परंतु पुद्गल परिणाम के करने के अहंकार युक्त होने पर भी पुद्गल के परिणाम के अनुकूल पुद्गल से अभिन्न जो पुद्गल परिणाम तथा पुद्गल से अभिन्न जो पुद्गल की परिणति मात्र क्रिया उससे किये हुए को करता हुआ मत प्रतिभासो (जानो) ।

भावार्थ—आत्मा अपने ही परिणाम को करता हुआ प्रतिभासित हो, पुद्गल के परिणाम को करता हुआ प्रतिभासित नहीं हो, इसी कारण आत्मा और पुद्गल इन दोनों की क्रियायें एक आत्मा की ही मानने वाले को मिथ्यादृष्टि कहा है । यदि जड़ और चेतन की एक क्रिया हो जाय, तो सर्व द्रव्य पलटने से सत् का लोप हो जाय, यह बड़ा भारी दोष हो ।

अब इसी अर्थ के समर्थन का कलशरूप काव्य कहते हैं—**यःपरिणमति** इत्यादि । **अर्थ**—जो परिणमन करता है, वह कर्ता है और जिसने परिणमन किया, उसका परिणाम कर्म है तथा परिणति क्रिया है । ये तीनों ही वस्तुत्व से भिन्न नहीं हैं ।

भावार्थ—द्रव्यदृष्टि से परिणाम और परिणामी में अभेद है तथा पर्यायदृष्टि से भेद है । वहां भेददृष्टि से तो कर्ता कर्म और क्रिया ये तीन कहे गये हैं और अभेददृष्टि से वास्तव में यह कहा गया है कि कर्ता, कर्म और क्रिया ये तीनों ही एक द्रव्य की अवस्थायें है, प्रदेश भेद रूप भिन्न वस्तु नहीं हैं ॥

फिर भी कहते हैं—**एकः** इत्यादि । **अर्थ**—वस्तु अकेली ही सदा परिणमन करती है, एक के ही सदा परिणाम होते हैं अर्थात् एक अवस्था से अन्य अवस्था होती है । तथा एक की ही परिणति क्रिया होती है । अनेक रूप हुई तो भी एक ही वस्तु है, भेद नहीं है ।

भावार्थ—एक वस्तु की अनेक पर्याय होती हैं, उनको परिणाम भी कहते हैं, अवस्था भी कहते हैं । वे संज्ञा, संख्या, लक्षण, प्रयोजनादिक से भिन्न-भिन्न प्रतिभास रूप हैं, तो भी एक वस्तु ही हैं, भिन्न नहीं हैं, ऐसा भेदाभेद स्वरूप ही वस्तु का स्वभाव है ।

नोभौ परिणमतः खलु परिणामो नोभयोः प्रजायेत ।
उभयोर्न परिणतिः स्याद्यदनेकमनेकमेव सदा ॥ ५३ ॥
नैकस्य हि कर्तारौ द्वौ स्तो द्वे कर्मणी न चैकस्य ।
नैकस्य च क्रिये द्वे एकमनेकं यतो न स्यात् ॥ ५४ ॥
आसंसारत एव धावति परं कुर्वेहमित्युच्चकैः,
दुर्वारं ननु मोहिनामिह महाहंकाररूपं तमः ।
तद्भूतार्थपरिग्रहेण विलयं यद्येकवारं व्रजेत् ,
तत्किं ज्ञानघनस्य बंधनमहो भूयो भवेदात्मनः ॥ ५५ ॥

गच्छति । तस्मिन्महाहंकारविकल्पजाले नष्टे सति पुनरपि बंधो न भवतीति ज्ञात्वा बहिर्द्रव्यविषये इदं करोमीदं न करोमीति दुराग्रहं त्यक्त्वा रागादिविकल्पजालशून्ये पूर्णकलशवच्चिदानंदैकस्वभावेन भरितावस्थे स्वकीयपरमात्मनि निरंतर भावना कर्त्तव्येति भावार्थः ॥ ८६ ॥

फिर कहते हैं—**नोभौ** इत्यादि । **अर्थ**—दो द्रव्य एक होकर परिणमन नहीं करते और दो द्रव्य का एक परिणाम भी नहीं होता तथा दो द्रव्य की एक परिणति क्रिया भी नही होती । क्योंकि जो अनेक द्रव्य हैं, वे अनेक ही है, एक नहीं होते ॥

भावार्थ—दो वस्तुयें सर्वथा भिन्न ही हैं, प्रदेश भेदरूप ही हैं, दोनों एक रूप होकर नहीं परिणमन करतीं, एक परिणाम को भी नही उपजातीं और एक क्रिया भी उनकी नहीं होती, ऐसा नियम है । जो दो द्रव्य एक रूप होकर परिणमन करें तो सब द्रव्यों का लोप हो जाय ॥

इसी अर्थ को दृढ़ करते हैं—**नैकस्य** इत्यादि । **अर्थ** एक द्रव्य के दो कर्ता नहीं होते, एक द्रव्य के दो कर्म नही होते और एक द्रव्य की दो क्रियायें भी नहीं होतीं क्योंकि एक द्रव्य अनेक द्रव्य रूप नही होता ।

अब कहते है कि आत्मा के अनादि से परद्रव्य के कर्ता कर्मत्व का अज्ञान है वह यदि परमार्थनय के ग्रहण से एक बार भी विलय हो जाय तो फिर कभी नहीं आ सकता—**आसंसारत** इत्यादि । **अर्थ**—इस जगत में मोही अज्ञानी जीवों का यह "मै परद्रव्य को करता हूं" ऐसा परद्रव्य के कर्तृत्व का अहंकार रूप अज्ञानांधकार अनादि संसार से लेकर चला आया है । जो कि अत्यंत दुर्निवार है, यदि परमार्थ-सत्यार्थ-शुद्ध-द्रव्यार्थिक अभेद नय के ग्रहण से वह एकबार भी नष्ट हो जाय तो यह जीव ज्ञानघन है। अतः यथार्थ ज्ञान होने के बाद ज्ञान कहां जा सकता है जब ज्ञान नहीं जा सकता, तब फिर कैसे अज्ञान से बंध हो सकता है ॥

भावार्थ—यहां ऐसा तात्पर्य है कि अज्ञान तो अनादि का ही है परंतु यदि दर्शनमोह का नाश कर एक बार यथार्थ ज्ञान होकर क्षायिकसम्यक्त्व उत्पन्न हो जाय तो फिर मिथ्यात्व नहीं आ सकता तब उस मिथ्यात्व का बंध भी नहीं हो सकता और मिथ्यात्व गये बाद संसार-बंधन कैसे रह सकता है ?

आत्मभावान्करोत्यात्मा परभावान्सदा परः ।
आत्मैव ह्यात्मनो भावाः परस्य पर एव ते ॥ ५६ ॥

मिच्छत्तं पुण दुविहं जीवमजीवं तहेव अण्णाणं ।
अविरदि जोगो मोहो कोहादीया इमे भावा ॥ ८७ ॥

मिथ्यात्वं पुनर्द्विविधं जीवोऽजीवस्तथैवाज्ञानं ।
अविरतियोगो मोहः क्रोधाद्या इमे भावाः ॥ ८७ ॥

मिथ्यादर्शनमज्ञानमविरतिरित्यादयो हि भावाः ते तु प्रत्येकं मयूरमुकुरंदवज्जीवाजीवाभ्यां भाव्यमानत्वाज्जीवाजीवौ । तथाहि—यथा नीलकृष्णहरितपीतादयो भावाः स्वद्रव्यस्वभावत्वेन मयूरेण भाव्यमानाः मयूर एव । यथा च नीलकृष्णहरितपीतादयो भावाः स्वच्छताविकारमात्रेण मुकुरंदेन भाव्यमाना मुकुरंद एव । तथा मिथ्यादर्शनमज्ञानमविरतिरित्यादयो भावाः स्वद्रव्यस्वभावत्वेनाजीवेन भाव्यमाना अजीव एव । तथैव च मिथ्यादर्शनमज्ञानमविरतिरित्यादयो भावाश्चैतन्यविकारमात्रेण जीवेन भाव्यमाना जीव एव ॥ ८७ ॥

इति द्विक्रियावादिसंक्षेपव्याख्यानमुख्यत्वेन गाथाद्वयं गतं । अथ तस्यैव विशेषव्याख्यानं करोति;—

पुग्गलकम्मणिमित्तं जह आदा कुणदि अप्पणो भावं ।
पुग्गलकम्मणिमित्तं तह वेददि अप्पणो भावं ॥

फिर भी विशेषता से कहते हैं—**आत्म** इत्यादि । **अर्थ**—आत्मा तो अपने भावों को ही करता है और परद्रव्य पर के भावों को करता है । क्योंकि अपने भाव तो अपने ही हैं तथा परभाव परके ही हैं, यह नियम है ॥ ८६ ॥

शंका:—परद्रव्य का कर्ताकर्मत्व मानने वाला मिथ्यादृष्टि है यह कहा है । वहां पर शंका होती है कि यह मिथ्यात्वादि भाव क्या वस्तु हैं ? यदि जीव के परिणाम कहे जांय तो पहले रागादि भावों को पुद्गल के परिणाम कहा था, उस कथन से यहां विरोध आता है । यदि पुद्गल का परिणाम कहे जांय तो जीव का कुछ प्रयोजन नहीं इसलिये फिर उसका फल जीव क्यों पावे ? इस शंका के दूर करने के लिये यह कहते हैं **[पुनः]** जो **[मिथ्यात्वं]** मिथ्यात्व कहा गया था वह **[द्विविधं]** दो प्रकार है **[जीवं अजीवं]** एक जीव मिथ्यात्व, एक अजीव मिथ्यात्व **[तथैव]** और उसी प्रकार **[अज्ञानं]** अज्ञान **[अविरतिः]** अविरति **[योगः]** योग **[मोहः]** मोह और **[क्रोधाद्याः]** क्रोधादि कषाय **[इमे भावाः]** ये सभी भाव जीव अजीव के भेद से दो-दो प्रकार हैं ।

टीका—मिथ्यादर्शन, अज्ञान, अविरति इत्यादिक जो भाव हैं वे प्रत्येक पृथक्-पृथक् मयूर और दर्पण की भांति जीव अजीव से भावित हैं । इसलिये जीव भी हैं और अजीव भी हैं । जैसे मयूर के नीले,

काविह जीवाजीवाविति चेत् :—

पुग्गलकम्मं मिच्छं जोगो अविरदि अणाणमज्जीवं ।
उवओगो अण्णाणं अविरइ मिच्छं च जीवो दु ॥ ८८ ॥

पुद्गलकर्म मिथ्यात्वं योगोऽविरतिरज्ञानमजीवः ।
उपयोगोऽज्ञानमविरतिर्मिथ्यात्वं च जीवस्तु ॥ ८८ ॥

यः खलु मिथ्यादर्शनमज्ञानमविरतिरित्यादिरजीवस्तदमूर्त्तांच्चैतन्यपरिणामादन्यत् मूर्त्तं पुद्गलकर्म, यस्तु मिथ्यादर्शनमज्ञानमविरतिरित्यादि जीवः स मूर्त्तात्पुद्गलकर्मणोऽन्यश्चैतन्य-परिणामस्य विकारः ॥ ८८ ॥

पुद्गलकर्मनिमित्तं यथात्मा करोति आत्मनः भावं । पुद्गलकर्मनिमित्तं तथा वेदयति आत्मनो भावं **पुग्गलक-म्मणिमित्तं जह आदा कुणदि अप्पणो भावं** उदयागत द्रव्यकर्मनिमित्तं कृत्वा यथात्मा निर्विकारस्वसं-वित्तिपरिणामशून्यः सन्करोत्यात्मनः संबंधिनं सुखदुःखादिभावं परिणामं **पुग्गलकम्मणिमित्तं तह वेददि अप्पणो**

काले, हरे, पीले आदि वर्ण रूप भाव मयूर के निज स्वभाव से आये हुए मयूर ही हैं। तथा जैसे दर्पण में उन वर्णों के प्रतिबिंब दीखते हैं, वे दर्पण की स्वच्छता निर्मलता के विकार मात्र से आये हुए दर्पण ही है। मयूर की और दर्पण की अत्यंत भिन्नता है। उसी प्रकार मिथ्या दर्शन, अज्ञान, अविरति इत्यादिक भाव अपने अजीव के द्रव्य स्वभाव से अजीव रूप से आये हुए अजीव ही हैं तथा वे मिथ्यादर्शन, अज्ञान, अविरति आदि भाव चैतन्य के विकार मात्र से जीव से आये हुए जीव ही हैं।

भावार्थ—कर्म के निमित्त से जीव विभाव रूप परिणमन करते हैं वे जो चेतन के विकार हैं, वे जीव ही हैं और जो पुद्गल मिथ्यात्वादिक कर्मरूप परिणमन करते हैं, वे पुद्गल के परमाणु है तथा उनका विपाक उदय रूप होकर वे स्वाद रूप होते हैं, वे मिथ्यात्वादि अजीव हैं। ऐसे मिथ्यात्वादि भाव जीव अजीव के भेद से दो प्रकार हैं। यहांपर ऐसा जानना कि जो मिथ्यात्वादि कर्म की प्रकृतियां है, वे पुद्गल द्रव्य के परमाणु हैं, उनका उदय हो तब उपयोग स्वरूप जीव के उपयोग की स्वच्छता के कारण जिसके उदय का स्वाद आये, तब उसी के आकार उपयोग हो जाता है। तब अज्ञान से उसका भेदज्ञान नहीं होता, उस स्वाद को ही अपना भाव जानता है। जब इसका भेद ज्ञान ऐसा हो जाय कि जीवभाव को जीव जानें और अजीवभाव को अजीव जानें, तभी मिथ्यात्व का अभाव होकर सम्यग्ज्ञान होता है ॥ ८७ ॥

यहाँ पूछते हैं कि मिथ्यात्वादिक जीव अजीव कहे हैं वे कौन हैं, उसका उत्तर कहते हैं—**[मिथ्या-त्वं]** जो मिथ्यात्व **[योगः]** योग **[अविरतिः]** अविरति **[अज्ञानं]** अज्ञान **[अजीवः]** ये अजीव हैं वे तो **[पुद्गलकर्म]** पुद्गल कर्म हैं **[च]** और जो **[अज्ञानं]** अज्ञान **[अविरतिः]** अविरति **[मिथ्यात्वं]** मिथ्यात्व **[तु जीवः]** ये जीव हैं वे **[उपयोगः]** उपयोग हैं।

मिथ्यादर्शनादिश्चैतन्यपरिणामस्य विकारः कुत इति चेत् :—

उवओगस्स अणाई परिणामा तिण्ण मोहजुत्तस्स ।
मिच्छत्तं अण्णाणं अविरदिभावो य णायव्वो ॥ ८९ ॥

उपयोगस्यानादयः परिणामास्त्रयो मोहयुक्तस्य ।
मिथ्यात्वमज्ञानमविरतिभावश्च ज्ञातव्यः ॥ ८९ ॥

उपयोगस्य हि स्वरसत एव समस्तवस्तुस्वभावभूतस्वरूपपरिणामसमर्थत्वे सत्यनादिवस्त्वंतरभूतमोहयुक्तत्वान्मिथ्यादर्शनमज्ञानमविरतिरिति त्रिविधः परिणामविकारः। स तु तस्य स्फटिकस्वच्छताया इव परतोपि प्रभवन् दृष्टः। यथा हि स्फटिकस्वच्छतायाःस्वरूपपरिणामसमर्थत्वे सति कदाचिन्नीलहरितपीततमालकदलीकांचनपात्रोपाश्रययुक्तत्वान्नीलो हरितः पीत इति त्रिविधः परिणामविकारो दृष्टस्तथोपयोगस्यानादिमिथ्यादर्शनाज्ञानाविरतिस्वभाववस्त्वंतरभूतमोहयुक्तत्वान्मिथ्यादर्शनमज्ञानमविरतिरिति त्रिविधः परिणामविकारो दृष्टव्यः ॥ ८९ ॥

भावं तथैवोदयागतद्रव्यकर्मनिमित्तं लब्ध्वा स्वशुद्धात्मभावनोत्थवास्तवसुखास्वादमवेदयन्सन् तमेव कर्मोदयजनितस्वकीयरागादिभाव वेदयत्यनुभवति। न च द्रव्यकर्मरूपपरभावमित्यभिप्रायः। अथ चिद्रूपानात्मभावानात्मा करोति तथैवाचिद्रूपान् द्रव्यकर्मादिपरभावान् परः पुद्गलः करोतीत्याख्याति;—**मिच्छत्तं पुण दुविहं जीवमजीवं** मिथ्यात्वं पुनर्द्विविधं जीवस्वभावमजीवस्वभावं च **तहेव अण्णाणं अविरदि जोगो मोहो कोहादीया इमे भावा** तथैव चाज्ञान-

---

टीका—जो निश्चय से मिथ्यादर्शन, अज्ञान, अविरति इत्यादि अजीव हैं, अमूर्तिक चैतन्य के परिणाम से अन्य हैं मूर्तिक हैं वे तो पुद्गल कर्म हैं और जो मिथ्यादर्शन, अज्ञान, अविरति इत्यादि जीव हैं वे मूर्तिक पुद्गलकर्म से अन्य हैं, चैतन्यपरिणाम के विकार हैं। ८८ ॥

प्रश्न—जीव मिथ्यात्वादि चैतन्यपरिणाम का विकार किस कारण है ? **उत्तर—[मोहयुक्तस्य]** अनादि से मोहयुक्त होने से **[उपयोगस्य]** उपयोग के **[अनादयः]** अनादि से लेकर **[त्रयः परिणामाः]** तीन परिणाम हैं वे **[मिथ्यात्वं]** मिथ्यात्व **[अज्ञानं]** अज्ञान **[च अविरतिभावः]** और अविरतिभाव ये तीन **[ज्ञातव्यः]** जानना चाहिये।

टीका—निश्चय से समस्त वस्तुओं का अपने स्वरसपरिणमन से स्वभावभूत स्वरूप परिणाम में समर्थता होने पर भी आत्मा के उपयोग के अनादि से ही अन्य वस्तुभूत मोहयुक्त होने से मिथ्यादर्शन, अज्ञान, अविरति ऐसे तीन प्रकार परिणाम के विकार हैं। ये, जैसे स्फटिकमणि की स्वच्छता में पर के डंक से परिणाम विकार हुआ देखा जाता है, उसी प्रकार हैं। जैसे स्फटिक की स्वच्छता में अपना स्वरूप उज्जवलतारूप परिणाम की सामर्थ्य होने पर भी किसी समय काला, हरा, पीला जो तमाल, केला, कंचन के पात्र समीपवर्ती आश्रय की युक्तता से नीला, हरा, पीला ऐसा तीन प्रकार परिणाम का

अथात्मनस्त्रिविधपरिणामविकारस्य कर्तृत्वं दर्शयति:—

एएसु य उवओगो तिविहो सुद्धो णिरंजणो भावो।
जं सो करेदि भावं उवओगो तस्स सो कत्ता ॥ ६० ॥

एतेषु चोपयोगस्त्रिविधः शुद्धो निरंजनो भावः।
यं स करोति भावमुपयोगस्तस्य स कर्ता ॥ ६० ॥

अथैवमयमनादिवस्त्वंतरभूतमोहयुक्तत्वादात्मन्युत्प्लवमानेषु मिथ्यादर्शनाज्ञानाविरतिभावेषु परिणामविकारेषु त्रिष्वेतेषु निमित्तभूतेषु परमार्थतः शुद्धनिरंजनानादिनिधनवस्तु सर्वस्वभूतचिन्मात्रभावत्वेनैकविधोऽप्यशुद्धसांजनानेकभावत्वमापद्यमानस्त्रिविधो भूत्वा स्वयमज्ञानीभूतः

मविरतिर्योगो मोह: क्रोधादयोऽमी भावा: पर्याया जीवरूपा अजीवरूपाश्च भवंति मयूरमुकुरंदवत्। तद्यथा— यथा मयूरेण भाव्यमाना अनुभूयमानानीलपीताद्याकारविशेषा मयूरशरीराकारपरिणता मयूर एव चेतना एव तथा निर्मलात्मानुभूतिच्युतजीवेन भाव्यमाना अनुभूयमाना सुखदुःखादिविकल्पा जीव एवाशुद्धनिश्चयेन चेतना एव। यथा च मुकुरंदेन स्वच्छतारूपेण भाव्यमाना: प्रकाशमानमुखप्रतिबिंबादिविकारा मुकुरंद एव अचेतना एव तथा कर्मवर्गणायोग्यपुद्गलद्रव्येणोपादानभूतेन क्रियमाणा ज्ञानावरणादिद्रव्यकर्मपर्याया: पुद्गल एव अचेतना एवेति ॥ ८७ ॥ अथ कतिविधौ जीवाजीवाविति पृष्टे प्रत्युत्तरमाह;—**पुग्गलकम्मं मिच्छं जोगो अविरदि अणाणमज्जीवं** पुद्गलकर्मरूपं मिथ्यात्वं योगोऽविरतिरज्ञानमित्यजीव:। **उवओगो अण्णाणं अविरदि मिच्छत्त जीवो दु** उपयोगरूपो भावरूप: शुद्धात्मादितत्त्वभावविषये विपरीतपरिच्छित्तिविकारपरिणामो जीवस्याज्ञानं निर्विकारस्वसंवित्तिविपरीताव्रतपरिणामविकारोऽविरति:। विपरीताभिनिवेशोपयोगविकाररूपं शुद्धजीवादिपदार्थविषये विपरीतश्रद्धानं मिथ्यात्वमिति जीव:। जीव इति कोऽर्थ:। जीवरूपाभावप्रत्यया इति ॥ ८८ ॥ अथ शुद्धचैतन्यस्वभावजीवस्य कथं मिथ्यादर्शनादिविकारो जात इति चेत्;—**उवओगस्स अणाई परिणामा तिण्णि** उपयोगलक्षणत्वादुपयोग आत्मा तस्य संबंधित्वेनादिसंतानापेक्षया त्रय: परिणामा ज्ञातव्या:। कथंभूतस्य तस्य। **मोहजुत्तस्स** मोहयुक्तस्य। के ते परिणामा:। **मिच्छत्तं अण्णाणं अविरदिभावो य णादव्वो** मिथ्यात्वमज्ञानमविरतिभावश्चेति ज्ञातव्य इति। तथाहि-यद्यपि शुद्धनिश्चयन-

---

विकार दीखता है, उसी प्रकार आत्मा के उपयोग के अनादि मिथ्यादर्शन, अज्ञान, अविरति स्वभावरूप अन्य वस्तुभूत मोह की युक्तता मिथ्यादर्शन, अज्ञान, अविरति ऐसे तीन प्रकार परिणाम विकार जानना ॥

भावार्थ—आत्मा के उपयोग में ये तीन प्रकार के परिणाम विकार अनादि कर्म के निमित्त से हैं, ऐसा नहीं कि पहले आत्मा शुद्ध ही था, अब यह नवीन अशुद्ध हुआ है। ऐसा हो तो सिद्धों को भी नवीन अशुद्ध होना चाहिये किन्तु ऐसा नहीं है ॥ ८९ ॥

अब आत्मा के इन तीन प्रकार के परिणाम विकारों का कर्तृत्व दिखलाते हैं;— **[एतेषु च]** मिथ्यात्व, अज्ञान, अविरति इन तीनों का अनादि से निमित्त होने पर **[उपयोगः]** आत्मा का उपयोग **[शुद्धः]** शुद्धनय से एक शुद्ध **[निरंजनः]** निरंजन है तोभी **[त्रिविधः भावः]** मिथ्यादर्शन, अज्ञान, अविरति इस तरह तीन प्रकार परिणामवाला है। **[सः]** वह आत्मा **[यं]** इन तीनों में से जिस **[भावं]** भाव को

कर्तृत्वमुपढौकमानो विकारेण परिणम्य यं यं भावमात्मनः करोति तस्य तस्य किलोपयोगः कर्त्ता स्यात् ॥ ९० ॥

अथात्मनस्त्रिविधपरिणामविकारकर्तृत्वे सति पुद्गलद्रव्यं स्वत एव कर्मत्वेन परिणमतीत्याह:—

जं कुणइ भावमादा कत्ता सो होदि तस्स भावस्स ।
कम्मत्तं परिणमदे तह्मि सयं पुग्गलं दव्वं ॥ ९१ ॥

यं करोति भावमात्मा कर्त्ता स भवति तस्य भावस्य ।
कर्मत्वं परिणमते तस्मिन् स्वयं पुद्गलद्रव्यं ॥ ९१ ॥

येन शुद्धबुद्धैकस्वभावो जीवस्तथाप्यनादिमोहनीयादिकर्मबंधवशान्मिथ्यात्वाज्ञानाविरतिरूपास्त्रयः परिणामविकाराः संभवंति । तत्र शुद्धजीवस्वरूपमुपादेयं मिथ्यात्वादिविकारपरिणामा हेया इति भावार्थः ॥ ८९ ॥ अथात्मनो मिथ्यात्वादित्रिविधपरिणामविकारस्य कर्तृत्वमुपदिशति;—**एदेसु य** एतेषु च मिथ्यादर्शनज्ञानचारित्रेषूदयागतेषु निमित्तभूतेषु सत्सु **उवओगो** ज्ञानदर्शनोपयोगलक्षणत्वादुपयोग आत्मा **तिविहो** कृष्णनीलपीतत्रिविधोपाधिपरिणतस्फटिकवत्त्रिविधो भवति । परमार्थेन तु **सुद्धो** शुद्धो रागादिभावकर्मरहितः **णिरंजणो** निरंजनो ज्ञानावरणादिद्रव्यकर्मांजनरहितः । पुनश्च कथंभूतः । **भावो**

[करोति] स्वयं करता है **[तस्य]** उसी का **[सः]** वह **[कर्ता]** कर्ता **[भवति]** होता है ।

टीका—पहली गाथा मे कहे गये जो तीन प्रकार के उपयोग के परिणाम हैं वे अब पूर्वोक्त प्रकार अनादि अन्य वस्तुभूतमोहसहित होने से आत्मा में उत्पन्न हुए जो मिथ्यादर्शन, अज्ञान, अविरति भावरूप तीन परिणाम विकार उनके निमित्त कारण होने से, आत्मा का स्वभाव परमार्थ से देखा जाय तो शुद्ध, निरंजन, एक, अनादिनिधन वस्तु का सर्वस्वभूत चैतन्यभावरूप से एक प्रकार है, तो भी अशुद्ध सांजन अनेक भावपने को प्राप्त हुआ तीन प्रकार होकर आप अज्ञानी हुआ कर्तृत्व को प्राप्त होता हुआ विकार रूप परिणाम से जिस जिस भाव को आप करता है, उस उस भाव का उपयोग निश्चय से कर्ता होता है ।

भावार्थ—पहले कहा था कि जो परिणमन करे, वह कर्ता है सो यहां अज्ञानरूप होकर उपयोग से परिणमन करता है, वह जिस रूप परिणमन करता है, उसी का कर्ता कहा जाता है । शुद्ध द्रव्यार्थिकनय से आत्मां कर्ता नहीं है । यहां उपयोग को कर्ता जानना, उपयोग और आत्मा एक ही वस्तु है, इसलिये आत्मा को ही कर्ता कहा जाता है ॥ ९० ॥

आगे आत्मा के तीन प्रकार परिणाम विकार का कर्तापना होने पर पुद्गलद्रव्य आप ही कर्मत्व रूप होकर परिणमन करता है, ऐसा कहते हैं :—**[आत्मा]** आत्मा **[यं भावं]** जिस भाव को **[करोति]** करता है **[तस्य भावस्य]** उस भाव का **[कर्ता]** कर्ता **[सः]** आप **[भवति]** होता है **[तस्मिन्]** उसके कर्ता होने पर **[पुद्गलद्रव्यं]** पुद्गलद्रव्य **[स्वयं]** अपने आप **[कर्मत्वं]** कर्मरूप **[परिणमते]** परिणमन करता है ।

आत्मा ह्यात्मना तथापरिणमनेन यं भावं किल करोति तस्यायं कर्ता स्यात्साधकवत् तस्मिन्निमित्ते सति पुद्गलद्रव्यं कर्मत्वेन स्वयमेव परिणमते। तथाहि–यथा साधकः किल तथाविधध्यानभावेनात्मना परिणममानो ध्यानस्य कर्ता स्यात्। तस्मिंस्तु ध्यानभावे सकलसाध्य-भावानुकूलतया निमित्तमात्रीभूते सति साधकं कर्तारमन्तरेणापि स्वयमेव बाध्यंते विषव्याप्तयो, विडंब्यंते योषितो, ध्वंस्यंते बंधास्तथायमज्ञानादात्मा मिथ्यादर्शनादिभावेनात्मना परिणममानो मिथ्यादर्शनादिभावस्य कर्ता स्यात्। तस्मिंस्तु मिथ्यादर्शनादौ भावे स्वानुकूलतया निमित्तमात्रीभूते सत्यात्मानं कर्तारमंतरेणापि पुद्गलद्रव्यं मोहनीयादिकर्मत्वेन स्वयमेव परिणमते ॥ ९१ ॥

भाव. पदार्थः अखडैकप्रतिभासमयज्ञानस्वभावेनैकविधोपि पूर्वोक्तमिथ्यादर्शनज्ञानचारित्रपरिणामविकारेण त्रिविधो भूत्वा **जं सो करेदि भावं** यं परिणाम करोति स आत्मा **उवओगो** चैतन्यानुविधायिपरिणाम उपयोगो भण्यते तल्लक्षणत्वादुपयोगरूप.। **तस्स सो कत्ता** निर्विकारस्वसवेदनज्ञानपरिणामच्युत. सन् तस्यैव मिथ्यात्वादित्रिविधविकारपरिणामस्य कर्त्ता भवति। न च द्रव्यकर्मण इति भावः ॥ ९० ॥

अथात्मनो मिथ्यात्वादित्रिविधपरिणामविकारकर्तृत्वे सति कर्मवर्गणायोग्यपुद्गलद्रव्यं स्वत एवोपादानरूपेण कर्मत्वेन परिणमतीति कथयतिः—**जं कुणदि भावमादा कत्ता सो होदि तस्स भावस्स** यं भावं मिथ्यात्वादिविकारपरिणामं शुद्धस्वभावच्युतः सन् आत्मा करोति तस्य भावस्य स कर्त्ता भवति **कम्मत्तं परिणमदे तम्हि सयं पुग्गलं दव्वं** तस्मिन्नेव त्रिविधविकारपरिणामकर्तृत्वे सति कर्मवर्गणायोग्यपुद्गलद्रव्य स्वयमेवोपादानरूपेण द्रव्यकर्मत्वेन परिणमति। किंवत् गारुडादिमंत्रपरिणतपुरुषपरिणामे सति देशातरे स्वयमेव तत्पुरुषव्यापारमतरेणापि

टीका—आत्मा निश्चय से आप ही उस प्रकार परिणमन कर प्रगटरूप से जिस भाव को करता है उसी का वह कर्ता होता है मंत्र साधने वाले की तरह। तथा उस आत्मा को वैसा निमित्त होने पर पुद्गलद्रव्य कर्मभाव रूप आप ही परिणमन करता है। जैसे मंत्र साधने वाला पुरुष जिस प्रकार के ध्यानरूपभाव से स्वयं परिणमन करता है, उसी ध्यान का कर्ता होता है। और जो समस्त उस साधक के साधने योग्य वस्तु उसकी अनुकूलता से उस ध्यानभाव के निमित्तमात्र होने पर उस साधक के विना ही अन्य सर्पादिक की विष की व्याप्ति स्वयमेव मिट जाती है, स्त्रीजन विडंबना रूप हो जाती है और बंधन खुल जाते हैं। इत्यादि कार्य मंत्र के ध्यान की सामर्थ्य से हो जाते हैं। उसी प्रकार यह आत्मा अज्ञान से मिथ्यादर्शनादिभाव से परिणमन करता हुआ मिथ्यादर्शनादिभाव का कर्ता होता है, तब उस मिथ्यादर्शनादिभाव को अपने करने की अनुकूलता से निमित्तमात्र होने पर आत्मा कर्ता के विना पुद्गलद्रव्य आप ही मोहनीयादि कर्मरूप से परिणमन करता है।

भावार्थ—आत्मा जब अज्ञानरूप परिणमन करता है, तब किसी से ममत्व करता है, किसी से राग करता है, किसी से द्वेष करता है, उन भावों का आप कर्ता होता है। उसके निमित्तमात्र होने पर पुद्गलद्रव्य आप अपने भाव से कर्मरूप होकर परिणमन करता है। परस्पर निमित्तनैमित्तिक भाव है। कर्ता दोनों अपने-अपने भाव के हैं, यह निश्चय है ॥ ९१ ॥

अज्ञानादेव कर्म प्रभवतीति तात्पर्यमाह;—

परमप्पाणं कुव्वं अप्पाणं पि य परं करिंतो सो।
अण्णाणमओ जीवो कम्माणं कारगो होदि ॥ ९२ ॥

परमात्मानं कुर्वन्नात्मानमपि च परं कुर्वन् सः।
अज्ञानमयो जीवः कर्मणां कारको भवति ॥ ९२ ॥

अयं किलाज्ञानेनात्मा परात्मनोः परस्परविशेषानिर्ज्ञाने सति परमात्मानं कुर्वन्नात्मानं च परं कुर्वन्स्वयमज्ञानमयीभूतः कर्मणां कर्ता प्रतिभाति। तथाहि—तथाविधानुभवसंपादनसमर्थायाः रागद्वेषसुखदुःखादिरूपायाः पुद्गलपरिणामावस्थायाः शीतोष्णानुभवसंपादनसमर्थायाः शीतोष्णायाः पुद्गलपरिणामावस्थाया इव पुद्गलादभिन्नत्वेनात्मनो नित्यमेवात्यंतभिन्नायास्तन्निमित्ततथाविधानुभवस्य चात्मनोऽभिन्नत्वेन पुद्गलान्नित्यमेवात्यंतभिन्नस्याज्ञानात्परस्परविशेषानिर्ज्ञाने

विषापहारबंधविध्वंसस्त्रीविडंबनादिपरिणामवत्। तथैव च मिथ्यात्वरागादिविभावविनाशकाले निश्चयरत्नत्रयरूपशुद्धोपयोगपरिणामे सति गारुडमंत्रस्यसामर्थ्येन निर्बीजविषवत् स्वयमेव नीरसीभूय पूर्वबद्धं द्रव्यकर्म जीवात्पृथग्भूत्वा निर्जरां गच्छतीति भावार्थः। एवं स्वतंत्रव्याख्यानमुख्यत्वेन गाथाषट्कं गतं ॥ ९१ ॥ अथ निश्चयेन वीतरागस्वसंवेदनज्ञानस्याभाव एवाज्ञानं भण्यते। तस्मादज्ञानादेव कर्म प्रभवतीति तात्पर्यमाह;—**परं** परद्रव्यं भावकर्मद्रव्यकर्मरूपं **अप्पाणं कुव्वदि** परद्रव्यात्मनोर्भेदज्ञानाभावादात्मानं करोति **अप्पाणं पि य परं करंतो** शुद्धात्मानं च परं करोति यः **सो अण्णाणमओ जीवो कम्माणं कारगो होदि** स चाज्ञानमयो जीवः कर्मणां कर्ता भवति। तद्यथा—यथा कोपि पुरुषः शीतोष्णरूपायाः पुद्गलपरिणामावस्थायास्तथाविधशीतोष्णानुभवस्य चैकत्वाभ्यासाद्भेदमजानन् शीतोहमुष्णोहमिति प्रकारेण

अज्ञान से ही कर्म होता है यह स्पष्ट करते हुए कहते हैं;—यह[जीवः]जीव[अज्ञानमयः]स्वयं अज्ञानी हुआ [परं] पर को [आत्मानं कुर्वन्] अपने करता है [च] और [आत्मानं अपि] अपने को [परं] पर के [कुर्वन्] करता है इस तरह [सः] वह [कर्मणां] कर्मों का [कारकः] कर्ता [भवति] होता है।

टीका—यह आत्मा अज्ञान से पर के और अपने विशेष का भेदज्ञान न होने से पर को तो अपने करता है, और अपने को परके करता है, इस प्रकार स्वयं अज्ञानी हुआ कर्मों का कर्ता होता है। जैसे शीत उष्ण का अनुभव कराने में समर्थ जो पुद्गल परिणाम की शीत उष्ण अवस्था है वह पुद्गल से अभिन्न होने से आत्मा से नित्य ही अत्यंत भिन्न है, वैसे उस प्रकार का अनुभव कराने में समर्थ जो रागद्वेष सुखदुःखादिरूप पुद्गल परिणाम की अवस्था वह पुद्गल की अभिन्नता के कारण आत्मा से नित्य ही अत्यन्त भिन्न है। उस निमित्त से हुए उस प्रकार के रागद्वेषादिक के अनुभव का आत्मा से अभिन्नता के कारण पुद्गल से नित्य ही अत्यन्त भिन्नता है, तौ भी उस रागद्वेषादिक का और उसके अनुभव का अज्ञान से परस्पर भेदज्ञान होने से एकत्व के निश्चय से जिस प्रकार शीत उष्णरूप से आत्मा

सत्येकत्वाध्यासात् शीतोष्णरूपेणैवात्मना परिणमितुमशक्येन रागद्वेषसुखदुःखादिरूपेणाज्ञानात्मना परिणममानो ज्ञानस्याज्ञानत्वं प्रकटीकुर्वन्स्वयमज्ञानमयीभूत एषोहं रज्ये इत्यादिविधिना रागादेः कर्मणो (ज्ञानविरुद्धस्य) कर्ता प्रतिभाति ॥ ६२ ॥

ज्ञानात्तु न कर्म प्रभवतीत्याह;—

परमप्पाणमकुव्वं अप्पाणं पि य परं अकुव्वंतो ॥
सो णाणमओ जीवो कम्माणमकारओ होदि ॥ ९३ ॥

परमात्मानमकुर्वन्नात्मानमपि च परमकुर्वन् ।
स ज्ञानमयो जीवः कर्मणामकारको भवति ॥ ९३ ॥

अयं किल ज्ञानादात्मा परात्मनोः परस्परविशेषनिर्ज्ञाने सति परमात्मानमकुर्वन्नात्मानं च परमकुर्वन्स्वयं ज्ञानमयीभूतः कर्मणामकर्ता प्रतिभाति । तथाहि—तथाविधानुभवसंपादन-

---

शीतोष्णपरिणतेः कर्ता भवति । तथा जीवोपि निजशुद्धात्मानुभूतेर्भिन्नाया उदयागतपुद्गलपरिणामावस्थायास्तन्निमित्त-सुखदुःखानुभवस्य चैकत्वाध्यवसायारोपात् परद्रव्यात्मनोः समस्तरागादिविकल्परहितस्वसंवेदनज्ञानाभावाद्भेदमजानन्नहं सुखी दुःखीति प्रकारेण परिणामस्कर्मणां कर्ता भवतीति भावार्थः ॥ ९२ ॥ अथ वीतरागस्वसंवेदनज्ञानात्सकाशात्कर्म न प्रभवतीत्याह;—**परं** परं परद्रव्यं बहिर्विषये देहादिकमभ्यंतरे रागादिकं भावकर्मरूपं द्रव्यकर्मरूपं वा **अप्पाणमकुव्वी** भेदविज्ञानबलेनात्मानमकुर्वन्नात्मसम्बन्धमकुर्वन् **अप्पाणं पि य परं अकुव्वंतो** शुद्धद्रव्यगुणपर्यायस्वभावं निजा-

---

परिणमन करता है, उसी प्रकार रागद्वेष सुख-दुःखादिरूप भी अपने आप परिणमन करने में असमर्थ है तौ भी रागद्वेषादिक पुद्गल परिणाम की अवस्था को उसके अनुभव का निमित्त मात्र होने से अज्ञान स्वरूप रागद्वेषादिरूप परिणमन करता हुआ अपने ज्ञान की अज्ञानता को प्रकट करता आप अज्ञानी हुआ 'यह मैं रागी हूं' इत्यादि विधान कर रागादिककर्म का कर्ता प्रतिभासित होता है ।

भावार्थ—रागद्वेष सुख-दुःखादि अवस्था पुद्गलकर्म के उदय का स्वाद है, अतः यह पुद्गल कर्म से अभिन्न है, आत्मा से अत्यन्त भिन्न है । आत्मा को अज्ञान से इसका भेदज्ञान नहीं है; इसलिए ऐसा जानता है कि यह स्वाद मेरा ही है; क्योंकि ज्ञान की स्वच्छता ऐसी ही है कि रागद्वेषादि का स्वाद शीत उष्ण की तरह ज्ञान में प्रतिबिम्बित होता है तब ऐसा मालूम होता है, कि मानों ये ज्ञान ही हैं । इस कारण ऐसे अज्ञान से इस अज्ञानी जीव के इनका कर्तृत्व भी आया । क्योंकि इसके ऐसी मान्यता हुई । मैं रागी हूं, द्वेषी हूं, क्रोधी हूं मानी हूं इत्यादि । इस प्रकार वह परका कर्ता होता है ॥ ९२ ॥

अब ऐसा कहते हैं कि ज्ञान से कर्म नहीं उत्पन्न होता;—[जीवः] जो जीव [आत्मानं] अपने को [परं] पर [अकुर्वन्] नहीं करता [च] और [परं] परको [आत्मानं अपि] अपने रूप भी [अकुर्वन्] नहीं करता [स जीवः] वह जीव [ज्ञानमयः] ज्ञानमय है [कर्मणां] कर्मों का [अकारकः] करने वाला नहीं [भवति] है ।

समर्थायाः रागद्वेषसुखदुःखादिरूपायाः पुद्गलपरिणामावस्थायाः शीतोष्णानुभवसंपादनसमर्थयाः शीतोष्णायाः पुद्गलपरिणामावस्थाया इव पुद्गलादभिन्नत्वेनात्मनो नित्यमेवात्यंतमिन्नायास्तन्निमित्ततथाविधानुभवस्य चात्मनोऽभिन्नत्वेन पुद्गलान्नित्यमेवात्यंतभिन्नस्य ज्ञानात्परस्परविशेषनिर्ज्ञाने सति नानात्वविवेकाच्छीतोष्णरूपेणैवात्मना परिणमितुमशक्येन रागद्वेषसुखदुःखादिरूपेणाज्ञानात्मना मनागप्यपरिणममानो ज्ञानस्य ज्ञानत्वं प्रकटीकुर्वन् स्वयं ज्ञानमयीभूतः एषोऽहं जानाम्येव, रज्यते तु पुद्गल इत्यादिविधिना समग्रस्यापिरागादेः कर्मणो ज्ञानविरुद्धस्याकर्ता प्रतिभाति ।। ९३ ।।

त्मानं च परमकुर्वन् **सो णाणमओ जीवो कम्माणमकारओ होदि** स निर्मलात्मानुभूतिलक्षणभेदज्ञानी जीवः कर्मणामकर्ता भवतीति । तथाहि—यथा कश्चित् पुरुषः शीतोष्णरूपायाः पुद्गलपरिणामावस्थायास्तथाविधशीतोष्णानुभवस्य चात्मनः सकाशाद्भेदज्ञानात् शीतोहमुष्णोहमिति परिणतेः कर्ता न भवति । तथा जीवोपि निज शुद्धात्मानुभूतेर्भिन्नायाः पुद्गलपरिणामावस्थायास्तन्निमित्तसुखदुःखानुभवस्य च स्वशुद्धात्मभावनोत्थसुखानुभवभिन्नस्य भेदज्ञानाभ्यासात्परात्मनोर्भेदज्ञाने सति रागद्वेषमोहपरिणाममकुर्वाणः कर्मणां कर्ता न भवति । ततः स्थितं ज्ञानात्कर्म न प्रभवतीत्यभिप्रायः ।। ९३ ।। अथ कथमज्ञानात्कर्मं प्रभवतीति पृष्टे गाथाद्वयेन प्रत्युत्तरमाह :—**तिविहो एसुवओगो** त्रिविधस्त्रिप्रकार एष प्रत्यक्षीभूत उपयोगलक्षणत्वादुपयोग आत्मा **अस्सवियप्पं करेदि** स्वस्थ-

---

टीका—यह जीव ज्ञान से परका और अपना परस्पर भेदज्ञान होने से परको तो आप नहीं करता है और अपने को पर नहीं करता है, तब आप ज्ञानी हुआ कर्मों का अकर्ता प्रतिभासित होता है। उसी को स्पष्ट करते हैं—जैसे शीत उष्ण स्वरूप जो पुद्गलपरिणाम की अवस्था है, वह शीत उष्ण अनुभवन कराने को समर्थ है। वह पुद्गल से अभिन्नता के कारण आत्मा से नित्य ही अत्यंत भिन्न है, उसी प्रकार राग-द्वेष सुख-दुःखादिरूप जो पुद्गल परिणाम की अवस्था है, वह राग-द्वेष-सुख-दुःखादिरूप अनुभव कराने में समर्थ है, ऐसी अवस्था जिसको निमित्त है और उस प्रकार का अनुभव आत्मा से अभिन्नता के कारण पुद्गल से अत्यंत सदा ही भिन्नता के ज्ञान से परस्पर विशेष का भेदज्ञान होने पर नानात्व के विवेक से, जैसे शीत उष्ण रूप आत्मा स्वयं परिणमन में असमर्थ है, उसी प्रकार राग-द्वेष सुख-दुःखादिरूप भी स्वयं परिणमन करने में असमर्थ है। इसतरह अज्ञान स्वरूप जो राग-द्वेष-सुख-दुःखादिक उन रूपसे न परिणमन करता, ज्ञान के ज्ञानत्व को प्रकट करता, ज्ञानमय हुआ, ऐसा जानता है कि "यह मैं रागद्वेषादिक को जानता ही हूं और ये रागरूप पुद्गल हैं। इत्यादि विधान कर सर्व ही जो ज्ञान से विरुद्ध रागादिक कर्म उनका कर्ता प्रतिभासित नहीं होता ।।

भावार्थ—जब राग-द्वेष सुख-दुःख अवस्था को ज्ञान से भिन्न जाने कि 'जैसे पुद्गल की शीत उष्ण अवस्था है, उसी प्रकार रागद्वेषादिक भी हैं' ऐसा भेदज्ञान हो तब अपने को ज्ञाता जाने, रागादिरूप पुद्गल को जाने। ऐसा होने पर इनका कर्ता आत्मा नहीं होता ज्ञाता ही रहता है ।। ९३ ।।

कथमज्ञानात्कर्म प्रभवतीति चेत्:—

तिविहो एसुवश्रोगो अप्पवियप्पं करेइ कोहोहं ।
कत्ता तस्सुवश्रोगस्स होइ सो अत्तभावस्स ॥ ९४ ॥

त्रिविध एष उपयोग आत्मविकल्पं करोति क्रोधोहं ।
कर्ता तस्योपयोगस्य भवति स आत्मभावस्य ॥ ९४ ॥

एष खलु सामान्येनाज्ञानरूपो मिथ्यादर्शनाज्ञानाविरतिरूपस्त्रिविधः सविकारश्चैतन्यपरिणामः परात्मनोरविशेषदर्शनेनाविशेषज्ञानेनाविशेषविरत्या च समस्तं भेदमपह्नुत्य भाव्यभावकभावापन्नयोश्चेतनाचेतनयोः सामानाधिकरण्येनानुभवनात्क्रोधोहमित्यात्मनो विकल्पमुत्पादयति । ततोयमात्मा क्रोधोहमिति भ्रांत्या सविकारेण चैतन्यपरिणामेन परिणमन् तस्य सविकारचैतन्यपरिणामरूपस्यात्मभावस्य कर्ता स्यात् । एवमेव च क्रोधपदपरिवर्तनेन मानमायालोभमोहरागद्वेषकर्मनोकर्म-

---

भावस्याभावादसद्विकल्पं मिथ्याविकल्पं करोति । केन रूपेण, **कोहोहं** क्रोधोहमित्यादि **कत्ता तस्सुवश्रोगस्स होदि सो** स जीवः तस्य क्रोधाद्युपयोगस्य विकल्पस्य कर्त्ता भवति । कथंभूतस्य, **अत्तभावस्स** आत्मभावस्याशुद्धनिश्चयेन जीवपरिणामस्येति । तथाहि—सामान्येनाज्ञानरूपेणैकविधोपि विशेषेण मिथ्यादर्शनज्ञानचारित्ररूपेण त्रिविधो भूत्वा एष उपयोग आत्मा क्रोधाद्यात्मनोर्भाव्यभावकभावापन्नयो । भाव्यभावकभावापन्नयोः कोर्थः ? भाव्यः क्रोधादिपरिणत आत्मा, भावको रंजकश्चांतरात्मभावनाविलक्षणो भावक्रोधः । इत्थंभूतयोर्द्वयोर्भेदज्ञानाभावाद्भेदमजानन्निर्विकल्पस्वरूपाद् भ्रष्टः सन् क्रोधोहमित्यात्मनो विकल्पमुत्पादयति, तस्यैव क्रोधाद्युपयोगपरिणामस्याशुद्धनिश्चयेन कर्ता भवतीति भावार्थः ।

आगे पूछते हैं कि अज्ञान से कर्म कैसे उत्पन्न होता है ? उसका उत्तर कहते हैं;— **[एषः]** यह **[त्रिविधः]** तीन प्रकार का **[उपयोगः]** उपयोग **[आत्मविकल्पं]** अपने मे विकल्प करता है, कि **[अहं क्रोधः]** मैं क्रोध स्वरूप हूं **[तस्य]** उस **[आत्मभावस्य]** अपने **[उपयोगस्य]** उपयोग भाव का **[सः]** वह **[कर्ता]** कर्ता **[भवति]** होता है ।

टीका—निश्चय से यह विकार सहित चैतन्य परिणाम सामान्यतः अज्ञान रूप है, वही मिथ्या दर्शन अज्ञान और अविरति रूप तीन प्रकार हैं । सो यह परिणाम परके और आत्मा की अभेद श्रद्धा से, अभेद ज्ञान से और अभेद रूप रति से सब भेद को छिपाकर और भाव्यभावकभाव को प्राप्त हुए जो चेतन अचेतन दोनों को समान अनुभव करने से 'मैं क्रोध हूं' ऐसा आत्मा का विकल्प उत्पन्न करता है और वह क्रोध को ही अपना जानता है । इसलिये यह आत्मा 'मैं क्रोध हूं' ऐसी भ्रांति से विकार सहित चैतन्य परिणाम से परिणमन करता हुआ, उस विकार सहित चैतन्य परिणाम रूप अपने भाव का कर्ता होता है । इस प्रकार जैसे क्रोध कहा है, उसी भांति क्रोध की जगह मान, माया, लोभ, राग, द्वेष, कर्म, नोकर्म, मन, वचन, काय, श्रोत्र, चक्षु, घ्राण, रसन, स्पर्शन, इन सोलह सूत्रों का व्याख्यान करना चाहिये । और इसी उपदेश से अन्य भी विचार लेना चाहिये ।

मनोवचनकायश्रोत्रचक्षुर्घ्राणरसनस्पर्शनसूत्राणि षोडश व्याख्येयान्यनया दिशान्यान्यप्यूह्यानि ॥ ९४ ॥

तिविहो एसुवओगो अप्पवियप्पं करेदि धम्माई ।
कत्ता तस्सुवओगस्स होदि सो अत्तभावस्स ॥ ९५ ॥

त्रिविध एष उपयोग आत्मविकल्पं करोति धर्मादिकं ।
कर्त्ता तस्योपयोगस्य भवति स आत्मभावस्य ॥ ९५ ॥

एष खलु सामान्येनाज्ञानरूपो मिथ्यादर्शनाज्ञानाविरतिरूपस्त्रिविधः सविकारश्चैतन्यपरिणामः परस्परमविशेषदर्शनेनाविशेषज्ञानेनाविशेषविरत्या च समस्तं भेदमपह्नुत्य ज्ञेयज्ञायकभावापन्नयोः परात्मनोः सामानाधिकरण्येनानुभवनाद्धर्मोऽहमधर्मोऽहमाकाशमहं कालोऽहं पुद्गलोऽहं जीवांतरमहमित्यात्मनो विकल्पमुत्पादयति। ततोऽयमात्मा धर्मोऽहमधर्मोहमाकाशमहं

एवमेव च क्रोधपदपरिवर्त्तनेन मानमायालोभमोहरागद्वेषकर्मनोकर्ममनोवचनकायश्रोत्रचक्षुर्घ्राणरसनस्पर्शनसूत्राणि षोडश व्याख्येयानि । अनेन प्रकारेणाविक्षिप्तचित्तस्वभावशुद्धात्मतत्त्वविलक्षणा असंख्येयलोकमात्रप्रमिता विभावपरिणामा ज्ञातव्या इति ।। ९४ ।। अथ;—**तिविहो एसुवओगो** सामान्येनाज्ञानरूपेणैकविधोपि विशेषेण मिथ्यादर्शनज्ञानचारित्ररूपेण त्रिविधः सन्नेष उपयोग आत्मा **अप्पवियप्पं करेदि धम्मादी** परद्रव्यात्मनोर्ज्ञेयज्ञायकभावापन्नयोरविशेषदर्शनेनाविशेषज्ञानेनाविशेषपरिणत्या च भेदज्ञानाभावाद्भेदमजानन् धर्मास्तिकायोहमित्याद्यात्मनोऽसद्विकल्पमुत्पादयति । **कत्ता तस्सुवओगस्स होदि सो अत्तभावस्स** निर्मलात्मानुभूतिरहितस्यैव मिथ्याविकल्परूपजीवपरिणा-

---

भावार्थ—मिथ्यादर्शन, अज्ञान और अविरति ऐसे तीन प्रकार विकार सहित चैतन्य परिणाम हैं। वह अपना और परका भेद न जानकर ऐसा मानता है कि मैं क्रोधी हूं, मैं मानी हूं इत्यादि। ऐसा मानने से अपने विकार सहित चैतन्य परिणाम का यह अज्ञानी जीव कर्ता होता है और जब कर्ता हुआ, तब वे अज्ञानभाव अपने कर्म हुए। इस प्रकार अज्ञान से ही कर्म होता है ।। ९४ ।। यहां कहते हैं कि ऐसे ही यह धर्मद्रव्य आदि अन्य द्रव्यों में भी आत्मविकल्प करता है;—**[एषः]** यह **[उपयोगः]** उपयोग **[त्रिविधः]** तीन प्रकार का होने से **[धर्मादिकं]** धर्मआदिक द्रव्यरूप **[आत्मविकल्पं]** आत्म विकल्प **[करोति]** करता है—उनको अपने जानता है **[सः]** वह **[तस्य]** उस **[उपयोगस्य]** उपयोग रूप **[आत्मभावस्य]** अपने भाव का **[कर्ता]** कर्ता **[भवति]** होता है।

टीका—सामान्य से अज्ञान रूप सविकार चैतन्य परिणाम ही मिथ्यादर्शन अज्ञान अविरतिरूप तीन प्रकार का है। जब यह पर के और अपने परस्पर अविशेष दर्शन से, अविशेष ज्ञान से और अविशेष चारित्र से समस्त भेदों को लोप कर के ज्ञेयज्ञायक भाव को प्राप्त धर्मादि द्रव्यों के अपने और उनके एक समान आधार के अनुभव करने से ऐसा मानता है कि मैं धर्मद्रव्य हूँ, मैं अधर्मद्रव्य हूँ,

कालोऽहं पुद्गलोहं जीवांतरमहमिति भ्रांत्या सोपाधिना चैतन्यपरिणामेन परिणमन् तस्य सोपाधिचैतन्यपरिणामरूपस्यात्मभावस्य कर्ता स्यात् । ततः स्थितं कर्तृत्वमूलमज्ञानं ॥ ९५ ॥

एवं पराणि दव्वाणि अप्पयं कुणदि मंदबुद्धीओ ।
अप्पाणं अवि य परं करेइ अण्णाणभावेण ॥ ९६ ॥

एवं पराणि द्रव्याणि आत्मानं करोति मंदबुद्धिस्तु ।
आत्मानमपि च परं करोति अज्ञानभावेन ॥ ९६ ॥

यत्किल क्रोधोऽहमित्यादिवद्धर्मोऽहमित्यादिवच्च परद्रव्याण्यात्मीकरोत्यात्मानमपि पर-

---

मस्याशुद्धनिश्चयेन कर्ता भवति । ननु धर्मास्तिकायोहमित्यादि कोपि न ब्रूते तत्कथं घटत इति ? अत्र परिहारः । धर्मास्तिकायोयमिति योसौ परिच्छित्तिरूपविकल्पो मनसि वर्तते सोप्युपचारेण धर्मास्तिकायो भण्यते । यथा घटाकारविकल्पपरिणतिज्ञानं घट इति । तथा तद्धर्मास्तिकायोयमित्यादिविकल्पः यदा ज्ञेयतत्त्वविचारकाले करोति जीवः तदा शुद्धात्मस्वरूपं विस्मरति तस्मिन्विकल्पे कृते सति धर्मोहमिति विकल्प उपचारेण घटत इति भावार्थः । ततः स्थितं शुद्धात्मसंवित्तेरभावरूपमज्ञानं कर्मकर्तृत्वस्य कारणं भवति ॥ ९५ ॥ **एवं** एवं पूर्वोक्तगाथाद्वयकथितप्रकारेण **पराणि दव्वाणि अप्पयं कुणदि** क्रोधोहमित्यादिवद्धर्मास्तिकायोहमित्यादिवच्च क्रोधादिस्वकीयपरिणामरूपाणि तथैव धर्मास्तिकायादि-

---

मैं आकाश द्रव्य हूं, मैं काल द्रव्य हूं, मै पुद्गल द्रव्य हूं, मैं अन्य जीव भी हूं, ऐसे भ्रम से उपाधि सहित अपने चैतन्य परिणाम से परिणमन करता हुआ उस उपाधि सहित चैतन्य परिणमन रूप अपने भाव का कर्ता होता है ।

भावार्थ—यह आत्मा अज्ञान से धर्मादि द्रव्य में भी आपा मानता है । अतः उस अपने अज्ञानरूप चैतन्य परिणाम का स्वयं ही कर्ता होता है । यहां कोई प्रश्न करता है कि पुद्गल और अन्य जीव तो प्रवृत्ति में दीखते हैं, उनमें तो अज्ञान से आपा मानना ठीक है; परंतु धर्मद्रव्य, अधर्मद्रव्य, आकाशद्रव्य, कालद्रव्य तो देखने में भी नही आते, उनमें आपा मानना कैसे कहा ? उसका समाधान करते हुए कहते हैं—कि धर्मादिक का भी लक्षण अनुभव में आता है । धर्म अधर्म का लक्षण गतिहेतुत्व और स्थितिहेतुत्व है, उनका गमन करना, ठहरना जिससे होता है उसमें ममत्व बुद्धि होती है । और आकाश के अवगाह रूप क्षेत्र में ममत्व होता है । तथा काल के समय मुहूर्त आदि में मरना जीना आदि कार्य होता है उसमें ममत्व बुद्धि होती है ऐसा जानना ॥ ९५ ॥

यहां इस हेतु से कर्तृत्व का मूल कारण अज्ञान ठहरा ऐसा कहते हैं;—**[एवं तु]** ऐसे पूर्वकथितरीति से **[मंदबुद्धिः]** अज्ञानी **[अज्ञानभावेन]** अज्ञानभाव से **[पराणि द्रव्याणि]** परद्रव्यो को **[आत्मानं]** अपनी **[करोति]** करता है **[अपि च]** और **[आत्मानं]** अपने को **[परं करोति]** परका करता है ।

टीका—जो प्रकट रूप से यह आत्मा मैं क्रोध हूं, मैं धर्मद्रव्य हूं इत्यादि पूर्वोक्त प्रकार से पर-

द्रव्यीकरोत्येवमात्मा, [१]तदयमशेषवस्तुसंबंधविधुरनिरवधिविशुद्धचैतन्यधातुमयोऽप्यज्ञानादेव सविकारसोपाधीकृतचैतन्यपरिणामतया तथाविधस्यात्मभावस्य कर्ता प्रतिभातीत्यात्मनो भूताविष्टध्यानाविष्टस्येव प्रतिष्ठितं कर्तृत्वमूलमज्ञानं। तथाहि—यथा खलु भूताविष्टोऽज्ञानाद्भूतात्मानावेकीकुर्वन्नमानुषोचितविशिष्टचेष्टावष्टंभनिर्भरभयंकरारंभगंभीरामानुषव्यवहारतया तथाविधस्य भावस्य कर्ता प्रतिभाति। तथायमात्माप्यज्ञानादेव भाव्यभावकौ परात्मानावेकीकुर्वन्नविकारानुभूतिमात्रभावकानुचितविचित्रभाव्यक्रोधादिविकारकरंबितचैतन्यपरिणामविकारतया तथाविधस्य भावस्य कर्ता प्रतिभाति। यथा वापरीक्षकाचार्यादेशेन मुग्धः कश्चिन्महिषध्यानाविष्टोऽज्ञानान्महिषात्मानावेकीकुर्वन्नात्मन्यभ्रंकषविषाणमहामहिषत्वाध्यासात्प्रच्युतमानुषोचितापवरकद्वारविनिस्सरणतया

ज्ञेयरूपाणि च परद्रव्याणि आत्मानं करोति। सः कः कर्ता, **मंदबुद्धीओ** मंदबुद्धिर्निर्विकल्पसमाधिलक्षणभेदविज्ञानरहितः **अप्पाणं अवि य परं करेदि** शुद्धबुद्धैकस्वभावमात्मानमपि च परं स्वस्वरूपाद्भिन्नं करोति रागादिषु योजयतीत्यर्थः। केन, **अण्णाणभावेण** अज्ञानभावेनेति। तत. स्थितं क्रोधादिविषये भूताविष्टदृष्टांतेन धर्मादिज्ञेयविषये ध्यानाविष्टदृष्टांतेनेव शुद्धात्मसंवित्त्यभावरूपमज्ञानं कर्मकर्तृत्वस्य कारणं भवति। तद्यथा—यथा कोपि पुरुषो भूतादिग्रहाविष्टो भूतात्मनोर्भेदमजानन् सन्नमानुषोचितशिलास्तंभचालनादिकमद्भुतव्यापारं कुर्वन्सन् तस्य व्यापारस्य कर्ता भवति। तथा जीवोपि वीतरागपरमसामायिकपरिणतशुद्धोपयोगलक्षणभेदज्ञानाभावात्कामक्रोधादिशुद्धात्मनोर्द्वयोर्भेदमजानन् क्रोधोहं कामोहमित्यादिविकल्पं कुर्वन्सन् कर्मणः कर्ता भवति। एवं क्रोधादिविषये भूताविष्टदृष्टांतो गतः। तथैव च यथा कश्चित् महामहिषादिध्यानाविष्टो महिषाद्यात्मनोर्द्वयोर्भेदमजानन्महामहिषोहं गरुडोहं कामदेवोहमग्निरहं दुग्धधारासमानामृतराशि-

द्रव्यों को अपनी करता है और अपने को परद्रव्य रूप करता है, ऐसा यह आत्मा यद्यपि समस्त वस्तु के संबंध से रहित अमर्यादरूप शुद्ध चैतन्य धातुमय है तो भी अज्ञान से सविकार सोपाधिरूप किये अपने चैतन्य परिणाम रूप से उस प्रकार का अपने परिणाम का कर्ता प्रतिभासित होता है। इस प्रकार आत्मा के भूताविष्ट पुरुष की भांति तथा ध्यानाविष्ट पुरुष की भांति कर्तापने का मूल अज्ञान प्रतिष्ठित हुआ यही प्रकट दृष्टांत से दिखलाते हैं—जैसे कोई पुरुष भूताविष्ट हुआ (अपने शरीर में भूतप्रवेश किया हुआ) अज्ञान से भूत को और अपने को एक रूप करता हुआ जैसी मनुष्य के योग्य चेष्टा न हो, वैसी करने लगा। उसी चेष्टा का आलंबन रूप अत्यंत भयकारी आरंभ से भरा अमानुष व्यवहार से उस प्रकार चेष्टा रूप भाव का कर्ता प्रतिभासित होता है, उसी प्रकार यह आत्मा भी अज्ञान से ही पर और आत्मा को भाव्य-भावक रूप एक करता हुआ निर्विकार अनुभूति मात्र भावक के अयोग्य अनेक प्रकार भाव्यरूप क्रोधादि विकार से मिले चैतन्य के विकार सहित परिणाम से उस प्रकार के भाव का कर्ता प्रतिभासित होता है। जैसे कोई भोला पुरुष अपरीक्षक आचार्य के उपदेश से भैंसे का ध्यान करने लगा वह अज्ञान से भैंसे को और अपने को एकरूप करता हुआ अपने में बादल को स्पर्श करते हुए सींग वाले महान् भैंसापने के अध्यास से मनुष्य के योग्य छोटी कुटी के द्वार से निकलने से च्युत हुआ उस प्रकार के भाव का कर्ता प्रतिभासित होता है। उसी प्रकार यह आत्मा भी अज्ञान से ज्ञेयज्ञायक जो पर और आत्मा

१ तदयमशेषशेषवस्तु इत्यपिपाठः।

तथाविधस्य भावस्य कर्ता प्रतिभाति । तथायमात्माप्यज्ञानाद् ज्ञेयज्ञायकौ परात्मानावेकीकुर्वन्नात्मनि परद्रव्याध्यासान्नोइंद्रियविषयीकृतधर्माधर्माकाशकालपुद्गलजीवांतरनिरुद्धशुद्धचैतन्यधातुतया तथेंद्रियविषयीकृतरूपिपदार्थतिरोहितकेवलबोधतया मृतककलेवरमूर्छितपरमामृतविज्ञानघनतया च तथाविधस्य भावस्य कर्ता प्रतिभाति ॥ ९६ ॥

रहमित्याद्यात्मविकल्पं कुर्वाणः सन् तस्य विकल्पस्य कर्ता भवति । तथा च जीवोपि सुखदुःखादिसमताभावनापरिणतशुद्धोपयोगलक्षणभेदज्ञानाभावाद्धर्मादिज्ञेयपदार्थानां शुद्धात्मनश्च भेदमजानन् धर्मास्तिकायोहमित्याद्यात्मविकल्पं करोति, तस्यैव विकल्पस्य कर्ता भवति । तस्मिन् विकल्पकर्तृत्वे सति द्रव्यकर्मबंधो भवतीति । एवं धर्मास्तिकायादिज्ञेयपदार्थविषये ध्यानदृष्टान्तो गतः । हे भगवन् धर्मास्तिकायोयं जीवोयमित्यादिज्ञेयतत्त्वविचारविकल्पे क्रियमाणे यदि कर्मबंधो भवतीति तर्हि ज्ञेयतत्त्वविचारो वृथेति न कर्तव्यः । नैव वक्तव्यं । त्रिगुप्तिपरिणतनिर्विकल्पसमाधिकाले यद्यपि न कर्तव्यस्तथापि तस्य त्रिगुप्तिध्यानस्याभावे शुद्धात्मानमुपादेयं कृत्वा आगमभाषया तु मोक्षमुपादेयं कृत्वा सरागसम्यक्त्वकाले विषयकषायवंचनार्थं कर्तव्यः । तेन तत्त्वविचारेण मुख्यवृत्त्या पुण्यबंधो भवति परंपरया निर्वाणं च भवतीति नास्ति दोषः । किंतु तत्र तत्त्वविचारकाले वीतरागस्वसंवेदनज्ञानपरिणतः शुद्धात्मा साक्षादुपादेयः कर्तव्यः इति ज्ञातव्यं । ननु वीतरागस्वसंवेदनज्ञानविचारकाले वीतरागविशेषणं किमिति क्रियते प्रचुरेण भवद्भिः, किं सरागमपि स्वसंवेदनज्ञानमस्तीति ? अत्रोत्तरं विषयसुखानुभवानंदरूपं स्वसंवेदनज्ञानं सर्वजनप्रसिद्धं सरागमप्यस्ति । शुद्धात्मसुखानुभूतिरूपं स्वसवेदनज्ञानंवीतरागमिति । इदंव्याख्यानं स्वसंवेदनज्ञानव्याख्यानकाले सर्वत्र ज्ञातव्यमिति भावार्थः ॥ ९६ ॥ ततः स्थितमेतत् शुद्धात्मानुभूतिलक्षणसम्यग्ज्ञानान्नश्यति कर्मकर्तृत्वं;—**एदेण दु सो कत्ता आदा णिच्छयविदूहिं परिकहिदो** एतेन पूर्वोक्तगाथात्रयव्याख्यानरूपेणाज्ञानभावेन स आत्मा कर्ता भणितः । कैंनिश्चयविद्भिर्निश्चयज्ञैः सर्वज्ञैः । तथाहि—वीतरागपरमसामायिकसंयमपरिणताभेदरत्नत्रयस्य प्रतिपक्षभूतेन पूर्वगाथात्रयव्याख्यानप्रकारेणाज्ञानभावेन यदात्मा परिणमति, तदा तस्यैव मिथ्यात्वरागादिरूपस्याज्ञानभावस्य कर्ता भवति ततश्च द्रव्यकर्मबन्धो भवति । यदा तु चिदानंदैकस्वभावशुद्धात्मानुभूतिपरिणामेन परिणमति तदा सम्यग्ज्ञानी भूत्वा मिथ्यात्वरागादिभावकर्मरूपस्याज्ञानभावस्य कर्ता न भवति । तत्कर्तृत्वाभावेहि द्रव्यकर्मबंधोपि न भवति । **एवं खलु जो जाणदि सो मुंचदि सव्वकत्तित्तं** एवं गाथापूर्वार्द्धव्याख्यानप्रकारेण मनसि

उनको एक रूप करता हुआ आत्मा में परद्रव्य के अध्यास के निश्चय से मन के विषय रूप किये धर्म, अधर्म, आकाश, काल, पुद्गल और अन्य जीवद्रव्य उनसे रुकी जो शुद्ध चैतन्य धातु, उससे तथा इंद्रियों के विषय रूप किये जो रूपी पदार्थ उन से ढका गया जो अपना केवल (एक) ज्ञान उससे तथा मृतक शरीरमें मूर्छित हुआ परम अमृत रूप विज्ञानघन आत्मा उससे उस प्रकार के भाव का कर्ता प्रतिभासित होता है।

भावार्थ—यह आत्मा अज्ञान से क्रोधादिक को तो भाव्यभावकसंबंध से अपने से एक रूप मानता है और धर्मादिद्रव्य ज्ञेयरूप हैं, उनको भी अपने से एकरूप मानता है। अतः जैसा अपना भाव होता है, उसी भाव का कर्ता होता है। वहां क्रोधादिक से एक मानने का तो भूताविष्ट पुरुष का दृष्टांत है और धर्मादि अन्य द्रव्य से एकता मानने का ध्यानाविष्ट पुरुष का दृष्टांत है ॥ ९६ ॥

आगे कहते हैं कि इसी कारण से यह स्थित हुआ कि ज्ञान से कर्तृत्व का नाश होता है;—

ततः स्थितमेतद् ज्ञानान्नश्यति कर्तृत्वं;—

एदेण दु सो कत्ता आदा णिच्छयविदूहिं परिकहिदो ।
एवं खलु जो जाणदि सो मुंचदि सव्वकत्तित्तं ॥ ९७ ॥

एतेन तु स कर्तात्मा निश्चयविद्भिः परिकथितः ।
एवं खलु यो जानाति स मुंचति सर्वकर्तृत्वं ॥ ९७ ॥

येनायमज्ञानात्परात्मनोरेकत्वविकल्पमात्मनः करोति तेनात्मा निश्चयतः कर्ता प्रतिभाति । यस्त्वेवं जानाति स समस्तं कर्तृत्वमुत्सृजति, ततः स खल्वकर्ता प्रतिभाति । तथाहि—इहायमात्मा किलाज्ञानीसन्नज्ञानादासंसारप्रसिद्धेन मिलितस्वादस्वादनेन मुद्रितभेदसंवेदनशक्तिरनादित एव स्यात् ततः परात्मानावेकत्वेन जानाति ततः क्रोधोहमित्यादिविकल्पमात्मनः करोति ततो निर्विकल्पादकृतकादेकस्माद्विज्ञानघनात्प्रभ्रष्टो वारंवारमनेकविकल्पैः परिणमन् कर्ता प्रतिभाति । ज्ञानी तु सन् ज्ञानात्तदादिप्रसिद्ध्यता प्रत्येकस्वादस्वादनेनोन्मुद्रितभेदसंवेदनशक्तिः स्यात् । ततोऽनादिनिधनानवरतस्वदमाननिखिलरसांतरविविक्तात्यंतमधुरचैतन्यैकरसोऽयमात्मा भिन्नरसाः

योसौ वस्तुस्वरूपं जानाति स सरागसम्यग्दृष्टिः सन्नशुभकर्मकर्तृत्वं मुंचति । निश्चयचारित्राविनाभाविवीतरागसम्यग्दृष्टिर्भूत्वा शुभाशुभसर्वकर्मकर्तृत्वं च मुचति । एवमज्ञानात्कर्म प्रभवति संज्ञानान्नश्यतीति स्थितं । इत्यज्ञानिसंज्ञानिजीवप्रति-

[एतेन तु] इस पूर्वकथित कारण से [निश्चयविद्भिः] निश्चय के जानने वाले ज्ञानियों ने [स आत्मा] वह आत्मा [कर्ता परिकथितः] कर्ता कहा है [एवं खलु] इस प्रकार [यः] जो [जानाति] जानता है [सः] वह ज्ञानी हुआ [सर्वकर्तृत्वं] सब कर्तृत्व को [मुंचति] छोड़ देता है ।

टीका—जिस कारण से यह आत्मा अज्ञान से पर के और आत्मा के एकत्व का विकल्प करता है, उस कारण से निश्चय से कर्ता प्रतिभासित होता है ऐसा जो जानता है, वह समस्त कर्तृत्व को छोड़ देता है, इस कारण वह अकर्ता प्रतिभासित होता है । यही प्रकट कहते हैं—इस जगत में यह आत्मा अज्ञानी हुआ अज्ञान से अनादि संसार से लगाकर पुद्गल कर्मका और अपने भाव के मिले हुए आस्वाद का स्वाद लेने से जिसकी अपने भिन्न अनुभव की शक्ति मुद्रित हो गई है, ऐसा अनादि काल से ही है । इस कारण पर को और अपने को एक रूप जानता है । मै क्रोध हूँ इत्यादिक विकल्प अपने में करता है, इसलिए निर्विकल्प रूप अकृत्रिम अपने विज्ञानघन स्वभाव से भ्रष्ट हुआ बारंबार अनेक विकल्पों से परिणमन करता हुआ कर्ता प्रतिभासित होता है । और जब ज्ञानी हो जाय, तब सम्यग्ज्ञान से उस सम्यग्ज्ञान को आदि लेकर प्रसिद्ध हुआ जो पुद्गल कर्म के स्वाद से अपना भिन्न स्वाद, उसके आस्वादन से जिसकी भेद के अनुभव की शक्ति उघड़ गई है, ऐसा होता है, तब ऐसा जानता है कि अनादि निधन निरंतर स्वाद में आता हुआ समस्त अन्य रस के स्वादों से विलक्षण, अत्यन्त मधुर एक चैतन्य रस स्वरूप तो यह

कषायास्तैः सह यदेकत्वविकल्पकरणं तदज्ञानादित्येवं नानात्वेन परात्मानौ जानाति। ततोऽकृतकमेकं ज्ञानमेवाहं न पुनः कृतकोऽनेकः क्रोधादिरपीति क्रोधोहमित्यादिविकल्पमात्मनो मनागपि न करोति ततः समस्तमपि कर्तृत्वमपास्यति । ततो नित्यमेवोदासीनावस्थो जानन् एवास्ते । ततो निर्विकल्पोऽकृतक एको विज्ञानघनो भूतोऽत्यंतमकर्ता प्रतिभाति ॥ ९७ ॥

अज्ञानतस्तु सतृणाभ्यवहारकारी ज्ञानं स्वयं किल भवन्नपि रज्यते यः ।
पीत्वा दधीक्षुमधुराम्लरसातिगृद्ध्या गां दोग्धि दुग्धमिव नूनमसौ रसालां ॥ ५७ ॥

पादनमुख्यत्वेन द्वितीयस्थले गाथाषट्कं गतं । एवं द्विक्रियावादिनिराकरणविशेषव्याख्यानरूपेण द्वादशगाथा गताः । अथ पुनरप्युपसंहाररूपेणैकादशगाथापर्यंतं द्विक्रियावादिनिराकरणविषये विशेषव्याख्यानं करोति ॥ ९७ ॥ तद्यथा—परभावानात्मा करोतीति यदव्यवहारिणो वदति स व्यामोह इत्युपदिशति:—**ववहारेण दु एवं[1] करेदि घडपडरथाणि दव्वाणि** यतो यथा अन्योन्यव्यवहारेणैवं तु पुनः घटपटरथादि बहिर्द्रव्याणीहापूर्वेण करोत्यात्मा **करणाणि य कम्माणि य णोकम्माणीह विविहाणि** तथाभ्यंतरेपि करणानींद्रियाणि कर्माणि च नोकर्माणि इह जगति

आत्मा है, और कषाय इससे भिन्न रस हैं, कसैले हैं, बेस्वाद हैं, उनसे युक्त एकत्व का विकल्प करना है; वह अज्ञान से है । इस प्रकार परको और आत्मा को पृथक् पृथक् नाना रूप से जानना है । इसलिए अकृत्रिम, नित्य, एक ज्ञान ही मैं हूँ और कृत्रिम, अनित्य, अनेक जो ये क्रोधादिक हैं, वे मैं नही हूँ ऐसा जाने तब 'क्रोधादिक मैं हूँ' इत्यादिक विकल्प अपने में किंचिन्मात्र भी नही करता । इस कारण समस्त ही कर्तृत्व को छोड़ता हुआ सदा ही उदासीन वीतराग अवस्था स्वरूप होकर ज्ञायक ही रहता है इसीलिए निर्विकल्प स्वरूप अकृत्रिम नित्य एक विज्ञानघन हुआ अत्यन्त अकर्ता प्रतिभासित होता है ।

भावार्थ—जो परद्रव्य के और परद्रव्य के भावो के अपने कर्तृत्व को अज्ञान जाने तब आप कर्ता क्यों बनें ? अज्ञानी रहना हो तो पर द्रव्य का कर्ता बने । इसलिए ज्ञान होने के बाद परद्रव्य का कर्तृत्व नहीं रहता ॥ ९७ ॥

अब इसी अर्थ का कलशरूप काव्य कहते है—**अज्ञान** इत्यादि । **अर्थ**—जो पुरुष आप निश्चय से ज्ञानस्वरूप हुआ भी अज्ञान से तृण सहित मिले हुये अन्नादिक सुन्दर आहार को खाने वाले हस्ती आदि तिर्यंच के समान होना है, वह शिखरिन (श्रीखण्ड) को पीकर उसके दही मीठे के मिले हुए खट्टे मीठे रस की अत्यंत इच्छा से उसके रस भेद को न जानकर दूध के लिये गाय को दोहता है ।

भावार्थ—जैसे कोई पुरुष शिखरिन को पीकर उसके स्वाद की अतिइच्छा से रस के ज्ञान विना ऐसा जानता है कि यह गाय के दूध में स्वाद है, अत. अतिलुब्ध हुआ गाय को दोहता है; उसी प्रकार अज्ञानी पुरुष अपना और पर का भेद न जान कर और विषयो में स्वाद जानकर पुद्गलकर्म को अतिलुब्ध होकर ग्रहण करता है, अपने ज्ञान का और पुद्गलकर्म का स्वाद पृथक् नहीं अनुभव करता । वह पशु की भांति घास मे मिले हुए अन्न का एक स्वाद लेता है ॥ ४७ ॥

१. अत्र आदा इत्यपि पाठः ।

अज्ञानान्मृगतृष्णिकां जलधिया धावंति पातुं मृगा,
अज्ञानात्तमसि द्रवंति भुजगाध्यासेन रज्जौ जनाः।
अज्ञानाच्च विकल्पचक्रकरणाद्वातोत्तरंगाब्धिवत्,
शुद्धज्ञानमया अपि स्वयममी कर्त्रीभवंत्याकुलाः ॥ ५८ ॥

ज्ञानाद्विवेचकतया तु परात्मनोर्यो, जानाति हंस इव वाः पयसोर्विशेषं ।
चैतन्यधातुमचलं स सदाधिरूढो जानीत एव हि करोति न किंचनापि ॥ ५६ ॥

ज्ञानादेव ज्वलनपयसोरौष्ण्यशैत्यव्यवस्था,
ज्ञानादेवोल्लसति लवणस्वादभेदव्युदासः ।
ज्ञानादेव स्वरसविकसन्नित्यचैतन्यधातोः,
क्रोधादेश्च प्रभवति भिदा भिंदती कर्तृभावं ॥ ६० ॥

विविधानि क्रोधादिद्रव्यकर्माणीहापूर्वेण विशेषेण करोमीति मन्यते, ततोस्ति व्यामोहो मूढत्वं व्यवहारिणा ॥६८॥ अथ स

पुनः कहते हैं कि ऐसे अज्ञान से पुद्गलकर्म का कर्ता होता है—**अज्ञानान्मृग** इत्यादि । **अर्थ**—ये लोक के जन निश्चय से शुद्ध एक ज्ञानमय हैं, तो भी वे अज्ञान से व्याकुल होकर परद्रव्य के कर्तारूप होते हैं। जैसे पवन से कल्लोलों सहित समुद्र होता है, उसी भांति ये विकल्पों के समूह करते हैं, इसलिये कर्ता बन रहे हैं। देखो अज्ञान से ही मृग बालू को जल जानकर पीने को दौड़ते हे और अज्ञान से ही लोक अंधकार में रस्सी में सर्प का निश्चय कर भय से भागते हैं।

भावार्थ—अज्ञान से क्या नहीं होता ? मृग तो बालू को जल जानकर पीने को दौड़ता है और खेद-खिन्न होता है, लोक अंधेरे में रस्से को सर्प मान डर कर भागते हैं, उसी प्रकार यह आत्मा, जैसे वायु से समुद्र क्षोभ रूप हो जाता है, वैसे अज्ञान से अनेक विकल्पों से क्षोभ रूप होता है। यद्यपि वह परमार्थ से शुद्ध ज्ञानघन है तो भी अज्ञान मे कर्ता होता है। ॥५८॥

फिर कहते हैं कि ज्ञान से कर्ता नहीं होता—**ज्ञानाद्** इत्यादि । **अर्थ**—जो पुरुष ज्ञान से और भेदज्ञान से पर का तथा आत्मा का विशेष भेद जानता है, वह पुरुष हंस के समान (जैसे हंस दूध जल मिले हुए को भेदकर ग्रहण करता है) चैतन्य धातु अचल को सदा आश्रय करता हुआ जानता ही है, और कुछ भी नहीं करता।

भावार्थ—जो अपना पराया भेद जानता है, वह ज्ञाता ही है, कर्ता नहीं है। ॥५६॥

जो कुछ जाना जाता है, वह ज्ञान से ही जाना जाता है—**ज्ञानादेव** इत्यादि । **अर्थ**—जैसे अग्नि और जल की उष्णता और शीतलता की व्यवस्था है, वह ज्ञान से ही जानी जाती है; लवण तथा व्यंजन के स्वाद का भेद ज्ञान से ही जाना जाता है। उसी प्रकार अपने रस से विकास रूप हुआ नित्य चैतन्य धातु उसका तथा क्रोधादिक भावों का भेद भी ज्ञान से ही जाना जाता है। यह भेद कर्तृत्व के भाव को भेदरूप करता हुआ प्रकट होता है ॥६०॥

अज्ञानं ज्ञानमप्येवं कुर्वन्नात्मानमंजसा ।
स्यात्कर्तात्मात्मभावस्य परभावस्य न क्वचित् ॥ ६१ ॥
आत्मा ज्ञानं स्वयं ज्ञानं ज्ञानादन्यत्करोति किं ।
परभावस्य कर्तात्मा मोहोऽयं व्यवहारिणां ॥ ६२ ॥

तथा हिः—

ववहारेण दु आदा करेदि घडपडरथाणि दव्वाणि ।
करणाणि य कम्माणि य णोकम्माणीह विविहाणि ॥ ९८ ॥

व्यवहारेण त्वात्मा करोति घटपटरथान् द्रव्याणि ।
करणानि च कर्माणि च नोकर्माणीह विविधानि ॥ ९८ ॥

व्यवहारिणां हि यतो यथायमात्मात्मविकल्पव्यापाराभ्यां घटादिपरद्रव्यात्मकं बहिःकर्म कुर्वन् प्रतिभाति ततस्तथा क्रोधादिपरद्रव्यात्मकं च समस्तमंतःकर्मापि करोत्यविशेषादित्यस्ति व्यामोहः ॥ ९८ ॥

व्यामोहः सत्यो न भवतीति कथयति—**जदि सो परदव्वाणि य करिज्ज णियमेण तम्मओ होज्ज** यदि स आत्मा

यद्यपि आत्मा कर्ता होता है तो भी वह अपने भाव का ही है—**अज्ञानं** इत्यादि । **अर्थ**—इस प्रकार अज्ञानरूप तथा ज्ञानरूप भी आत्मा को ही करता हुआ आत्मा प्रकट रूप से अपनेही भाव का कर्ता है, वह परभाव का कर्ता तो कभी नहीं है । अब आगे की गाथा की सूचनिकारूप श्लोक कहते हैं ॥६१॥ **आत्मा** इत्यादि । **अर्थ**—आत्मा ज्ञान स्वरूप है, वह स्वयं ज्ञान ही है, ज्ञान से अन्य किस को करे ? किसी को नही करता । और परभाव का कर्ता आत्मा है ऐसा मानना तथा कहना व्यवहारी जीवो का मोह (अज्ञान) है ॥ ६२ ॥

आगे यही कहते हैं कि व्यवहारी ऐसा कहते हैः—**[आत्मा]** आत्मा **[व्यवहारेण तु]** व्यवहार से **[घटपटरथान् द्रव्याणि]** घट पट रथ इन वस्तुओं को **[करोति]** करता है **[च]** और **[करणानि]** इंद्रियादिक करणपदार्थों को करता है **[च]** और **[कर्माणि]** ज्ञानावरणादिक तथा क्रोधादिक द्रव्यकर्म, भावकर्मों को करता है **[च इह]** तथा इस लोक में **[विविधानि]** अनेक प्रकार के **[नोकर्माणि]** शरीरादि नोकर्मों को करता है ।

टीका—जिस कारण व्यवहारी जीवों को यह आत्मा अपने विकल्प और व्यापार इन दोनों के घट आदि परद्रव्य स्वरूप बाह्यकर्म का करता प्रतिभासित होता है, इस कारण उसी प्रकार क्रोधादिक परद्रव्य स्वरूप समस्त अंतरंग कर्म को भी करता है । क्योंकि दोनों परद्रव्य स्वरूप हैं, इनके करने में भेद नहीं, यह व्यवहारी जीवों का अज्ञान है ।

स न सन्;—

जदि सो परदव्वाणि य करिज्ज णियमेण तम्मग्रो होज्ज ।
जह्मा ण तम्मग्रो तेण सो ण तेसिं हवदि कत्ता ।। ६६ ।।

यदि स परद्रव्याणि च कुर्यान्नियमेन तन्मयो भवेत् ।
यस्मान्न तन्मयस्तेन स न तेषां भवति कर्ता ।। ६६ ।।

यदि खल्वयमात्मा परद्रव्यात्मकं कर्म कुर्यात् तदा परिणामपरिणामिभावान्यथानुपपत्ते-र्नियमेन तन्मयः स्यात् न च द्रव्यांतरमयत्वे द्रव्योच्छेदापत्तेस्तन्मयोस्ति । ततो व्याप्यव्यापक-भावेन न तस्य कर्तास्ति ।। ६६ ।।

परद्रव्याणि नियमेनैकांतरूपेण करोति तदा तन्मयः स्यात् **जह्मा ण तम्मग्रो तेण सो ण तेसिं हवदि कत्ता** यस्मा-त्सहजशुद्धस्वाभाविकानतसुखादिस्वरूपं त्यक्त्वा परद्रव्येण सह तन्मयो न भवति । ततः स आत्मा तेषां परद्रव्याणामुपादान रूपेण कर्ता न भवतीत्यभिप्रायः ।। ६६ ।। अथ न केवलमुपादानरूपेण कर्ता न भवति किंतु निमित्तरूपेणापीत्युपदिशति;— **जीवो ण करेदि घडं णेव पडं णेव सेसगे दव्वे** न केवलमुपादानरूपेण निमित्तरूपेणापि जीवो न करोति घटं न पटं नैव शेषद्रव्याणि । कुत इति चेत् ? नित्यं सर्वकालं कर्मकर्तृत्वानुषंगात् । कस्तर्हि करोति ? **जोगुवग्रोगा उप्पादगा य** आत्मनो विकल्पव्यापाररूपौ विनश्वरौ योगोपयोगावेव तत्रोत्पादकौ भवतः । **सो तेसिं हवदि कत्ता** सुखदुःखजीवित-मरणादिसमताभावनापरिणताभेदरत्नत्रयलक्षणभेदविज्ञानाभावाद्यदा काले शुद्धबुद्धैकस्वभावात्परमात्मस्वरूपाद्भ्रष्टो

भावार्थ—परद्रव्यों का कर्ता अपने को मानना यह व्यवहार है, वह परमार्थ दृष्टि में अज्ञान है ।। ६८ ।।

यह व्यवहार का मानना परमार्थ दृष्टि में अच्छा नहीं है, सत्यार्थ नहीं है;—**[यदि]** जो **[सः]** वह आत्मा **[परद्रव्याणि]** पर द्रव्यों को **[कुर्यात्]** करे **[च]** तो **[नियमेन]** वह आत्मा उन परद्रव्यों से नियम से **[तन्मयः]** तन्मय **[भवेत्]** हो जाय **[यस्मात्]** परंतु **[तन्मयः न]** तन्मय नहीं होता **[तेन]** इसी कारण **[सः]** वह **[तेषां]** उनका **[कर्ता]** कर्ता **[न भवति]** नहीं है ।

टीका—यदि निश्चय से यह आत्मा परद्रव्य स्वरूप कर्म को करे, तो परिणाम-परिणामि-भाव की अन्यथा अप्राप्ति होने से नियम से तन्मय हो जाय, किन्तु ऐसा नहीं है । यदि ऐसे हो तो अन्य द्रव्य से अन्य द्रव्य तन्मय होने से अन्य द्रव्य का नाश हो जाय । इसलिये व्याप्यव्यापकभाव से तो उस द्रव्य का कर्ता आत्मा नहीं है ।

भावार्थ—यदि आत्मा अन्य द्रव्य का कर्ता होवे, तो पृथक्-पृथक् द्रव्य क्यों रहें, अन्य द्रव्य का नाश हो जाय यह बड़ा दोष आवे । इसलिये अन्य द्रव्य का कर्ता अन्य द्रव्य को कहना अच्छा नहीं है ।। ६६ ।।

निमित्तनैमित्तकभावेनापि न कर्तास्तिः—

जीवो ण करेदि घडं णेव पडं णेव सेसगे दव्वे ।
जोगुवओगा उप्पादगा य तेसिं हवदि कत्ता ॥ १०० ॥

जीवो न करोति घटं नैव पटं नैव शेषकानि द्रव्याणि ।
योगोपयोगावुत्पादकौ च तयोर्भवति कर्ता ॥ १०० ॥

यत्किल घटादि क्रोधादि वा परद्रव्यात्मकं कर्म तदयमात्मा तन्मयत्वानुषंगाद् व्याप्य-व्यापकभावेन तावन्न करोति नित्यकर्तृत्वानुषंगान्निमित्तनैमित्तकभावेनापि न तत्कुर्यात् । अनित्यौ योगोपयोगावेव तत्र निमित्तत्वेन कर्तारौ योगोपयोगयोस्त्वात्मविकल्पव्यापारयोः कदाचिदज्ञानेन करणादात्मापि कर्तास्तु तथापि न परद्रव्यात्मककर्मकर्ता स्यात् ॥ १०० ॥

भवति तदा स जीवस्तयोर्योगोपयोगयोः कदाचित्कर्ता भवति । न सर्वदा । अत्र योगशब्देन बहिरंगहस्तादिव्यापारः उपयोगशब्देन चांतरंगविकल्पो गृह्यते । इति परंपरया निमित्तरूपेण घटादिविषये जीवस्य कर्तृत्वं स्यात् । यदि पुनः मुख्यवृत्त्या निमित्तकर्तृत्वं भवति तर्हि जीवस्य नित्यत्वात् सर्वदैव कर्मकर्तृत्वप्रसंगात् मोक्षाभावः । इति व्यवहारव्याख्यानमुख्यत्वेन गाथात्रयं गतं ॥ १०० ॥

यदि कोई माने, कि व्याप्य-व्यापक भाव से तो वह कर्ता नहीं है, तो भी निमित्तनैमित्तिकभाव से तो कर्ता होगा, उसका निषेध करते हैं कि निमित्तनैमित्तिक भाव से भी कर्ता नहीं है;—[जीवः] जीव [घटं] घड़े को [न करोति] नहीं करता [एव] और [पटं] पट को भी [न] नहीं करता [शेषकाणि] शेष [द्रव्याणि] द्रव्यों को भी [नैव] नहीं करता [योगोपयोगौ च] जीव के योग और उपयोग दोनों [उत्पादकौ] घटादिक के उत्पन्न करने के निमत्त हैं [तयोः] उन दोनों योग और उपयोगों का यह जीव [कर्ता] कर्ता [भवति] है ।

टीका—जो कुछ घटादिक तथा क्रोधादिक परद्रव्य स्वरूप प्रगट कर्म देखे जाते हैं उनको यह आत्मा व्याप्यव्यापक भाव से नहीं करता । यदि ऐसे करे तो उनसे तन्मयता का प्रसंग आ जाय । तथा निमित्तनैमित्तिकभाव से भी नहीं करता क्योंकि ऐसे करे तो सदा सब अवस्थाओं में कर्तृत्व का प्रसंग आ जाय । इन कर्मों को कौन करता है, वह कहते हैं । इस आत्मा के योग और उपयोग ये दोनों अनित्य हैं, सब अवस्थाओं में व्यापक नहीं हैं । वे उन घटादिक के तथा क्रोधादि परद्रव्य स्वरूप कर्मों के निमित्तमात्र से कर्ता कहे जाते हैं । योग तो आत्मा के प्रदेशों का चलन रूप व्यापार है और उपयोग आत्मा के चैतन्य का रागादि विकार रूप परिणाम है । कदाचित् अज्ञान से इन दोनों को करने से इनका आत्मा को भी कर्ता कहा जाता है । परन्तु वह परद्रव्य स्वरूप कर्म का तो कर्ता कभी भी नहीं है ।

ज्ञानी ज्ञानस्यैव कर्ता स्यात्;—

जे पुग्गलदव्वाणं परिणामा होंति णाणआवरणा ।
ण करेदि ताणि आदा जो जाणदि सो हवदि णाणी ॥ १०१ ॥

ये पुद्गलद्रव्याणां परिणामा भवंति ज्ञानावरणानि ।
न करोति तान्यात्मा यो जानाति स भवति ज्ञानी ॥ १०१ ॥

ये खलु पुद्गलद्रव्याणां परिणामा गोरसव्याप्तदधिदुग्धमधुराम्लपरिणामवत्पुद्गलद्रव्यव्याप्तत्वेन भवंतो ज्ञानावरणानि भवंति तानि तटस्थगोरसाध्यक्ष इव न नाम करोति ज्ञानी किंतु यथा स गोरसाध्यक्षस्तद्दर्शनमात्मव्याप्तत्वेन प्रभवद्व्याप्य पश्यत्येव तथा पुद्गलद्रव्यपरिणाम-

---

अथ वीतरागस्वसंवेदनज्ञानी ज्ञानस्यैव कर्ता न च परभावस्येति कथयति;—**जे पुग्गलदव्वाणं परिणामा होंति णाणआवरणा** ये कर्मवर्गणायोग्यपुद्गलपरिणामाः पर्याया ज्ञानावरणादिद्रव्यकर्मरूपा भवंति **ण करेदि ताणि आदा** तान् पर्यायान् व्याप्यव्यापकभावेन मृत्तिकाकलशमिवात्मा न करोति गोरसाध्यक्षवत् **जो जाणदि सो हवदि णाणी** इति यो जानाति मिथ्यात्वविषयकषायपरित्यागं कृत्वा निर्विकल्पसमाधौ स्थितः सन् स ज्ञानी भवति । न च परिज्ञानमात्रेण । इदमत्र तात्पर्यं । वीतरागस्वसंवेदनज्ञानी जीवः शुद्धनयेन शुद्धोपादानरूपेण शुद्धज्ञानस्यैव कर्ता ।

भावार्थ—आत्मा के योग उपयोग, घटादि तथा क्रोधादिक के निमित्त हैं, उनको तो उनका निमित्तकर्ता कहा जा सकता है परन्तु आत्मा को उनका कर्ता नहीं कहा जा सकता । तथा आत्मा को योग उपयोग का कर्ता संसार अवस्था में अज्ञान से कहते हैं । यहां तात्पर्य ऐसा है कि, द्रव्यदृष्टि से तो कोई द्रव्य अन्य किसी द्रव्य का कर्ता नहीं है परन्तु पर्यायदृष्टि से किसी द्रव्य का पर्याय किसी समय किसी अन्य द्रव्य के पर्याय को निमित्त होता है । इस अपेक्षा से अन्य के परिणाम अन्य के परिणाम के निमित्त कर्त्ता कहे जाते हैं परन्तु परमार्थ से द्रव्य अपने परिणाम का कर्ता है, अन्य के परिणाम का अन्य द्रव्य कर्ता नहीं है ॥ १०० ॥

आगे ऐसा कहते हैं कि ज्ञानी ज्ञान का ही कर्ता है;—**[ये]** जो **[ज्ञानावरणानि]** ज्ञानावरणादिक **[पुद्गलद्रव्याणां]** पुद्गल द्रव्यों के **[परिणामाः]** परिणाम **[भवंति]** हैं **[तानि]** उनको **[आत्मा]** आत्मा **[न करोति]** नहीं करता **[यः]** जो **[जानाति]** जानता है **[सः]** वह **[ज्ञानी]** ज्ञानी **[भवति]** है ।

टीका—जो निश्चयनय से ज्ञानावरण रूप परिणाम हैं वे जैसे गोरस में व्याप्त दही दूध मीठा खट्टा परिणाम है वैसे पुद्गल द्रव्य से व्याप्त होने से पुद्गल द्रव्य के ही परिणाम हैं । जैसे गोरस के निकट बैठा पुरुष उसके परिणाम को देखता है, जानता है, उसी प्रकार ज्ञानी आत्मा उन पुद्गल के

निमित्तं ज्ञानमात्मव्याप्यत्वेन प्रभवद्व्याप्य जानात्येव ज्ञानी ज्ञानस्यैव कर्ता स्यात् । एवमेव च ज्ञानावरणपदपरिवर्तनेन कर्मसूत्रस्य विभागेनोपन्यासाद्दर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रांतराय-सूत्रैः सप्तभिः सह मोहरागद्वेषक्रोधमानमायालोभनोकर्ममनोवचनकायश्रोत्रचक्षुर्घ्राणरसनस्पर्शन-सूत्राणि षोडश व्याख्येयानि । अनया दिशान्यान्यप्यूह्यानि ॥ १०१ ॥

किंवदिति चेत् । पीतत्वादिगुणानां सुवर्णवत् उष्णादिगुणानामग्निवत् अनंतज्ञानादिगुणानां सिद्धपरमेष्ठिवदिति । न च मिथ्यात्वरागादिरूपस्याज्ञानभावस्य कर्त्तेति शुद्धोपादानरूपेण शुद्धज्ञानादिभावानामशुद्धोपादानरूपेण मिथ्यात्वरागादि-भावानां च तद्रूपेण परिणमन्नेव कर्तृत्वं ज्ञातव्य भोक्तृत्वं च । न च हस्तव्यापारवदीहापूर्वक घटकुंभकारवदिति । एवमेव च ज्ञानावरणपदपरिवर्तनेन दर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रांतरायसंज्ञैः सप्तभि. कर्मभेदैः सह मोहरागद्वेषक्रोध-मानमायालोभनोकर्ममनोवचनकायश्रोत्रचक्षुर्घ्राणरसनस्पर्शनसूत्राणि षोडश व्याख्येयानि । अनेन प्रकारेण शुद्धात्मानुभूति-विलक्षणा असंख्येयलोकमात्रप्रमिता अन्येपि विभावपरिणामा ज्ञातव्या ॥ १०१ ॥ अथाज्ञानी चापि रागादिस्वरूपस्या-ज्ञानभावस्यैव कर्ता न च ज्ञानावरणादिपरद्रव्यस्येति निरूपयति,—**जं भावं सुहमसुहं करेदि आदा स तस्स खलु कत्ता** सातासातोदयावस्थाभ्यां तीव्रमंदस्वादाभ्यां सुखदुःखरूपाभ्यां वा चिदानंदैकस्वभावेनैकस्याप्यात्मनो द्विधा भेदं कुर्वाण. सन् यं भावं शुभमशुभं वा करोत्यात्मनः स्वतंत्ररूपेण व्यापकत्वात्स तस्य भावस्य खलु स्फुटं कर्ता भवति **तं तस्स होदि कम्मं** तदेव तस्य शुभाशुभरूपं भावकर्म भवति । तेनात्मना क्रियमाणत्वात् **सो तस्स दु वेदगो अप्पा** स आत्मा तस्य तु शुभाशुभरूपस्य भावकर्मणो वेदको भोक्ता भवति स्वतंत्ररूपेण भोक्तृत्वात्, न च द्रव्यकर्मणः । किं च विशेषः । अज्ञानी जीवोऽशुद्धनिश्चयनयेनाशुद्धोपादानरूपेण मिथ्यात्वरागादिभावानामेव कर्ता न च द्रव्यकर्मणः । स चाशु-द्धनिश्चयोयद्यपि द्रव्यकर्मकर्तृत्वमपासद्भूतव्यवहारापेक्षया निश्चयसंज्ञां लभते तथापि शुद्धनिश्चयापेक्षया व्यवहार एव । हे भगवन्, रागादीनामशुद्धोपादानरूपेण कर्तृत्वं भणितं तदुपादानं शुद्धाशुद्धभेदेन कथं द्विधा भवतीति । तत्कथ्यते । औपाधिकमुपादानमशुद्धं, तप्तायःपिंडवत्; निरुपाधिरूपमुपादानं शुद्धं, पीतत्वादिगुणाना सुवर्णवत्; अनंतज्ञानादिगुणानां सिद्धजीववत्, उष्णत्वादिगुणानामग्निवत् । इदं व्याख्यानमुपादानकारणव्याख्यानकाले शुद्धाशुद्धोपादानरूपेण सर्वत्र स्मर-णीयमिति भावार्थः ॥ १०२ ॥ अथ न च परभावः केनाप्युपादानरूपेण कर्तुं शक्यते;—**जो जह्मि गुणो दव्वे सो अण्ण दु ण संकमदि दव्वे** यो गुणश्चेतनस्तथैवाचेतनो वा यस्मिश्चेतनाचेतने द्रव्ये अनादिसंबंधेन स्वभावत एव स्वत एव प्रवृत्तः सोऽन्यद्रव्ये तु न संक्रमत्येव सोपि **सो अण्णमसंकंतो कह तं परिणामए दव्वं** स चेतनोऽचेतनो

परिणामों का ज्ञाता द्रष्टा है, कर्ता नहीं है । तो क्या है ? जैसे गोरस के निकट बैठा हुआ पुरुष उसको देखता है, उस देखने रूप अपने परिणाम से व्याप्त हुआ उसको व्याप्त कर देखता ही है, उसी प्रकार जिसको पुद्गल परिणाम निमित्त है ऐसे अपने ज्ञान को अपने व्याप्यत्व से हुआ उसको व्याप्यकर जानता ही है । इस प्रकार ज्ञानी ज्ञान का ही कर्ता होता है । इसी प्रकार ज्ञानावरण पद के स्थान में कर्म सूत्र के विभाग की स्थापना से दर्शनावरण, वेदनीय, मोहनीय, आयु, नाम, गोत्र और अन्तराय इनके सात सूत्रों से और उनके साथ मोह, राग, द्वेष, क्रोध, मान, माया, लोभ, नोकर्म, मन, वचन, काय, श्रोत्र, चक्षु, घ्राण, रसन और स्पर्शन ये सोलह सूत्र व्याख्यान रूप करना । तथा इसी रीति से अन्य भी विचार लेना ॥ १०१ ॥

अज्ञानी चापि परभावस्य न कर्ता स्यात् :—

जं भावं सुहमसुहं करेदि आदा स तस्स खलु कत्ता ।
तं तस्स होदि कम्मं सो तस्स दु वेदगो अप्पा ॥ १०२ ॥

यं भावं शुभमशुभं करोत्यात्मा स तस्य खलु कर्ता ।
तत्तस्य भवति कर्म स तस्य तु वेदक आत्मा ॥ १०२ ॥

इह खल्वनादेरज्ञानात्परात्मनोरेकत्वाध्यासेन पुद्गलकर्मविपाकदशाभ्यां मंदतीव्रस्वादाभ्यामचलितविज्ञानघनैकस्वादस्याप्यात्मनः स्वादं भिंदानः शुभमशुभं वा योयं भावमज्ञानरूपमात्मा करोति स आत्मा तदा तन्मयत्वेन तस्य भावस्य व्यापकत्वाद् भवति कर्ता स भावोऽपि च तदातन्मयत्वेनतस्यात्मनो व्याप्यत्वाद् भवति कर्म्म । स एव च आत्मा तदातन्मयत्वेन तस्य भावस्य भावकत्वाद्भवत्यनुभविता, स भावोपि च तदा तन्मयत्वेन तस्यात्मनो भाव्यत्वात् भवत्यनुभाव्यः । एवमज्ञानी चापि परभावस्य न कर्ता स्यात् ॥ १०२ ॥

वा गुणः कर्ता अन्यद्भिन्नं द्रव्यांतरमसंक्रांतः सन् कथं द्रव्यांतरं परिणामयेत्तत्कथं कुर्यादुपादानरूपेण न कथमपि ॥१०३॥ ततः स्थितं आत्मा पुद्गलकर्मणामकर्तेति **दव्वगुणस्य य आदा ण कुणदि पुग्गलमयह्मि कम्मह्मि** यथा कुंभकारः

आगे कहते हैं कि जो अज्ञानी है, यह भी परद्रव्य के भाव का कर्ता नहीं है:—**[आत्मा]** आत्मा **[यं]** जिस **[शुभं अशुभं]** शुभ अशुभ **[भावं]** अपने भाव को **[करोति]** करता है **[सः]** वह **[तस्य]** उस भाव का **[कर्ता]** कर्ता **[खलु]** निश्चय से होता है **[तत्]** वह भाव **[तस्य]** उसका **[कर्म]** कर्म **[भवति]** होता है **[स आत्मा तु]** वही आत्मा **[तस्य]** उस भावरूप कर्म का **[वेदकः]** भोक्ता होता है ।

टीका—इस लोक में आत्मा अनादिकाल से अज्ञान से परका और आत्मा के एकत्व का निश्चय कर तीव्र मंद स्वादरूप जो पुद्‌ल कर्म की दो दशायें, उनसे यद्यपि स्वयं अचलित विज्ञानघनरूप एक स्वादरूप है तो भी स्वाद को भेद रूप करता हुआ शुभ तथा अशुभ अज्ञान रूप भाव को करता है । वह आत्मा उस काल भाव से युक्त होने से उस भाव के व्यापकता के कारण उस भाव का कर्ता होता है । तथा वह भाव भी उस समय उस आत्मा की तन्मयता से उस आत्मा का व्याप्य होता है इसलिये उसका कर्म होता है । वही आत्मा उस समय उस भाव की तन्मयता से उस भाव का भावक होता है इसलिये उसका अनुभव करने वाला भोक्ता होता है । वह भाव भी उस समय उस आत्मा को तन्मयता से आत्मा के भावनेयोग्य होता है इस कारण अनुभवन योग्य (भोगने योग्य) होता है । इस प्रकार अज्ञानी भी परभाव का कर्ता नहीं है ।

भावार्थ—अज्ञानी भी अपने अज्ञानभावरूप शुभाशुभभावों का ही अज्ञान अवस्था में कर्ता है, परद्रव्य के भाव का कर्ता तो कभी नहीं है ॥ १०२ ॥

न च परभावः केनापि कर्तुं पार्येतः—

जो जह्मि गुणो दव्वे सो अण्णह्मि दु ण संकमदि दव्वे ।
सो अण्णमसंकंतो कह तं परिणामए दव्वं ॥ १०३ ॥

यो यस्मिन् गुणे द्रव्ये सोन्यस्मिंस्तु न संक्रामति द्रव्ये ।
सोन्यदसंक्रांतः कथं तत्परिणामयति द्रव्यं ॥ १०३ ॥

इह किल यो यावान् कश्चिद्वस्तुविशेषो यस्मिन् यावति कस्मिंश्चिच्चिदात्मन्यचिदात्मनि वा द्रव्ये गुणे च स्वरसत एवानादित एव वृत्तः स खल्वचलितस्य वस्तुस्थितिसीम्नो भेत्तुमशक्यत्वात्तस्मिन्नेव वर्तते न पुनः द्रव्यांतरं गुणान्तरं वा संक्रामेत । द्रव्यांतरं गुणान्तरं वाऽसंक्रामंश्च कथं त्वन्यं वस्तुविशेषं परिणामयेत् । अतः परभावः केनापि न कर्तुं पार्येत ॥ १०३ ॥

कर्ता मृण्मयकलशकर्मविषये मृत्तिकाद्रव्यस्य संबंधि जडस्वरूपं वर्णादिमृत्तिका गुणस्य वा संबंधिस्वरूपमृत्तिका कलशमिव तन्मयत्वेन न करोति तथात्मापि पुद्गलमयद्रव्यकर्मविषये पुद्गलद्रव्यकर्मसंबंधि जडस्वरूपं वर्णादिपुद्गलद्रव्यगुणसंबंधिस्वरूपं वा तन्मयत्वेन न करोति **तं उभयमकुव्वंतो तह्मि कहं तस्स सो कत्ता** तदुभयमपि पुद्गलद्रव्यकर्मस्वरूपं वर्णादि तद्गुणं वा तन्मयत्वेनाकुर्वाणः सन् तत्र पुद्गलकर्मविषये स जीव. कथं कर्ता भवति न कथमपि । चेतनाचेतनेन परस्वरूपेण न परिणमनीत्यर्थः । अनेन किमुक्तं भवति । यथा स्फटिको निर्मलोपि जपापुष्पादिपरोपाधिना परिणमति तथा कोपि सदाशिवनामा सदा मुक्तोप्यमूर्त्तोपि परोपाधिना परिणम्य जगत करोति । तन्निरस्तं । कस्मादिति चेत् ? मूर्तस्फटिकस्य मूर्त्तेन सहोपाधिसंबंधो घटते तस्य पुन. सदा मुक्तस्यामूर्त्तस्य कथं मूर्त्तोपाधिः ? न कथमपि

आगे कहते हैं कि परभावको कोई भी नहीं कर सकता ऐसा न्याय है,—[यः] जो द्रव्य [यस्मिन्] जिस अपने [द्रव्ये] द्रव्यस्वभाव में [गुणे] तथा अपने जिस गुण मे वर्तता है [सः] वह [अन्यस्मिन् तु] अन्य [द्रव्ये] द्रव्य में तथा गुण में [न संक्रामति] संक्रमण रूप नही होता—पलटकर अन्य मे नहीं मिल जाता [सः] वह [अन्यदसंक्रांतः] अन्य में नहीं मिलता हुआ [तत् द्रव्यं] उस अन्य द्रव्य को [कथं] कैसे [परिणामयति] परिणमा सकता है, कभी नहीं परिणमा सकता ।

टीका—इस लोक में जितने वस्तु विशेष हैं, वे अपने चेतन स्वरूप तथा अचेतन स्वरूप द्रव्य में तथा अपने गुण में अपने निजरस से ही अनादि से वर्तते हैं । सो निश्चय कर अचलित जो अपनी वस्तु स्थिति की मर्यादा उसके भेदने को असमर्थ हैं, इसलिये अपने स्वभाव में ही रहते हैं । द्रव्यांतर तथा गुणांतर से संक्रमणरूप नहीं होते अर्थात् नहीं पलटते । इस प्रकार आत्मा भी अन्य द्रव्य रूप नहीं होता, तो अन्य वस्तु विशेष को कैसे परिणमन करावे, कभी नहीं परिणमन करा सकता । इसीलिये परभाव को कोई भी नहीं परिणमा सकता ।

भावार्थ—जो द्रव्यस्वभाव है, उसे कोई भी नहीं पलट सकता, यह वस्तु की मर्यादा है ॥१०३॥

अतः स्थितः खल्वात्मा पुद्गलकर्मणामकर्ता:—

दव्वगुणस्स य आदा ण कुणदि पुग्गलमयह्मि कम्मह्मि ।
तं उभयमकुव्वंतो तह्मि कहं तस्स सो कत्ता ॥ १०४ ॥

द्रव्यगुणस्य चात्मा न करोति पुद्गलमये कर्मणि ।
तदुभयमकुर्वंस्तस्मिन्कथं तस्य स कर्ता ॥ १०४ ॥

यथा खलु मृण्मये कलशे कर्मणि मृद्द्रव्यमृद्गुणयोः स्वरसत एव वर्तमाने द्रव्यगुणांतर-संक्रमस्य वस्तुस्थित्यैव निषिद्धत्वादात्मानमात्मगुणं वा नाधत्ते स कलशकारः द्रव्यांतरसंक्रममंतरे-णान्यस्य वस्तुनः परिणामयितुमशक्यत्वात् तदुभयं तु तस्मिन्ननादधानो न तत्त्वतस्तस्य कर्ता प्रतिभाति । तथा पुद्गलमये ज्ञानावरणादौ कर्मणि पुद्गलद्रव्यपुद्गलगुणयोः स्वरसत एव वर्तमाने द्रव्यगुणांतरसंक्रमस्य विधातुमशक्यत्वादात्मद्रव्यमात्मगुणं वात्मा न खल्वाधत्ते । द्रव्यांतरसंक्रममंतरेणान्यस्य वस्तुनः परिणामयितुमशक्यत्वात्तदुभयं तु तस्मिन्ननादधानः कथं नु तत्त्वतस्तस्य कर्ता प्रतिभायात् । ततः स्थितः खल्वात्मा पुद्गलकर्मणामकर्ता ॥ १०४ ॥

सिद्धजीववत् । अनादिबद्धजीवस्य पुनः शक्तिरूपेण शुद्धनिश्चयेनामूर्तस्यापि व्यक्तिरूपेण व्यवहारेण मूर्तस्य मूर्तोपाधिदृष्टांतो घटत इति भावार्थः । एवं निश्चयनयमुख्यत्वेन गाथाचतुष्टयं गतं ॥ १०४ ॥ अतः कारणादात्मा

इस कारण आत्मा निश्चयतः पुद्गल कर्मों का अकर्ता है यह सिद्ध हुआ:—**[आत्मा]** आत्मा **[पुद्गलमये कर्मणि]** पुद्गलमय कर्म में **[द्रव्यगुणस्य च]** द्रव्य को तथा गुण को **[न करोति]** नहीं करता **[तस्मिन्]** उसमें **[तदुभयं]** उन दोनों को **[अकुर्वन्]** नहीं करता हुआ **[तस्य]** उसका **[स कर्ता]** वह कर्ता **[कथं]** कैसे हो सकता है ?

टीका—जैसे मृत्तिकामय कलश नाम कर्म, मृत्तिका नाम द्रव्य और मृत्तिका गुण इन दोनों में अपने निजरस के द्वारा ही वर्तमान है, उसमें कुम्हार अपने द्रव्यस्वरूप को तथा अपने गुण को नहीं मिलाता । क्योंकि अन्य द्रव्य का और अन्य गुण का अन्य द्रव्य गुण रूप परिवर्तन का निषेध वस्तु की मर्यादा से रहित है । अन्य द्रव्य रूप हुए विना अन्य वस्तु को अन्य की परिणमन कराने की असमर्थता से उन द्रव्यों को तथा गुणों को अन्य में नहीं धारता हुआ परमार्थ से उस मृत्तिकामय कलश नामक कर्म का निश्चय से कुम्भकार कर्ता नहीं प्रतिभासित होता । उसी प्रकार पुद्गलमय ज्ञानावरणादि कर्म पुद्गलद्रव्य और पुद्गल के गुणों में अपने रस से ही वर्तमान हैं, उनमें आत्मा अपने द्रव्यस्वभाव को और अपने गुण को निश्चय से नहीं धारण कर सकता । क्योंकि अन्य द्रव्य का अन्य द्रव्य में तथा अन्य द्रव्य का अन्य द्रव्य के गुणों में संक्रमण होने की असमर्थता है । इसी प्रकार अन्य द्रव्य का अन्य द्रव्य में संक्रमण के विना अन्य वस्तु को परिणमाने की असमर्थता होने से उन द्रव्य और गुण दोनों को उस अन्य में नहीं रखता हुआ आत्मा उस अन्य पुद्गल द्रव्य का कैसे कर्ता हो सकता है, कभी नहीं हो सकता । इसलिये यह निश्चय हुआ कि आत्मा पुद्गल कर्मों का अकर्ता है ॥ १०४ ॥

अतोन्यस्तूपचारः—

जीवह्मि हेदुभूदे बंधस्स दु पस्सिदूण परिणामं।
जीवेण कदं कम्मं भण्णदि उवयारमत्तेण ॥ १०५॥

जीवे हेतुभूते बंधस्य तु दृष्ट्वा परिणामं।
जीवेन कृतं कर्म भण्यते उपचारमात्रेण ॥ १०५॥

इह खलु पौद्गलिककर्मणः स्वभावादनिमित्तभूतेप्यात्मन्यनादेरज्ञानात्तन्निमित्तभूतेनाज्ञानभावेन परिणमनान्निमित्तीभूते सति संपद्यमानत्वात् पौद्गलिकं कर्मात्मना कृतमिति निर्विकल्पविज्ञानघनभ्रष्टानां विकल्पपराणां परेषामस्ति विकल्पः। स तूपचार एव न तु (पुनः) परमार्थः॥ १०५॥

द्रव्यकर्म करोतीति यदभिधीयते स उपचारः—**जीवम्हि हेदुभूदे बंधस्स दु पस्सिदूण परिणामं** परमोपेक्षासंयमभावनापरिणताभेदरत्नत्रयलक्षणस्य भेदज्ञानस्याभावे मिथ्यात्वरागादिपरिणतिनिमित्तहेतुभूते जीवे सति मेघाडंबरचंद्रार्कपरिवेषादियोग्यकाले निमित्तभूते सति मेघेन्द्रचापादिपरिणतपुद्गलानामिव कर्मवर्गणायोग्यपुद्गलानां ज्ञानावरणादिरूपेण द्रव्यकर्मबन्धस्य परिणामं पर्यायं दृष्ट्वा **जीवेण कदं कम्मं भण्णदि उवयारमत्तेण** जीवेन कृतं कर्मेति भण्यते उपचारमात्रेणेति ॥ १०५॥ अथ तदेवोपचारकर्मकर्तृत्वं दृष्टांतदार्ष्टांताभ्यां दृढयति;—**जोधेहि कदे जुद्धे राएण कदंति जंपदे लोगो** यथा योधैः युद्धे कृते सति राज्ञा युद्धं कृतमिति जल्पति लोकः। **तह ववहारेण कदं णाणावरणादि जीवेण** तथा व्यवहारनयेन कृतं भण्यते ज्ञानावरणादिकर्म जीवेनेति। ततः स्थितमेतत्। यद्यपि शुद्धनिश्चयनयेन शुद्धबुद्धैकस्वभावत्वान्नोत्पादयति न करोति न बध्नाति न परिणमयति न गृह्णाति च तथापि ॥ १०६॥ अनादिबंधपर्यायवशेन वीतरागस्वसंवेदनलक्षणभेदज्ञानाभावात् रागादि-

---

आगे कहते हैं कि इसके सिवाय अन्य निमित्त नैमित्तकादि भाव हैं उनको देख कुछ अन्य प्रकार से कहना वह उपचार है:—[**जीवे**] जीव को [**हेतुभूते**] निमित्तरूप होने से [**बंधस्य तु**] कर्मबंध का [**परिणामं**] परिणाम होता है उसे [**दृष्ट्वा**] देखकर [**जीवेन**] जीव ने [**कर्म कृतं**] कर्म किये हैं यह [**उपचारेण**] उपचारमात्र से [**भण्यते**] कहा जाता है।

टीका—इस लोक में आत्मा निश्चयतः स्वभाव से पुद्गलकर्म का निमित्तभूत नहीं है, तो भी अनादि अज्ञान से उसका निमित्त रूप हुआ जो अज्ञान भाव, उसके परिणमन करने से पुद्गलकर्म का निमित्त रूप होने पर उत्पन्न जो पुद्गलकर्म, उसको आत्मा ने किया, ऐसा विकल्प होता है, वह निर्विकल्प विज्ञानघनस्वभाव से भ्रष्ट और विकल्पों में तत्पर अज्ञानियों के होता है। यह आत्मा ने किया, ऐसा कहना उपचार है, परमार्थ नहीं है॥ १०५॥

कथं इति चेत्;—

जोधेहिं कदे जुद्धे राएण कदंति जंपदे लोगो ।
तह ववहारेण कदं णाणावरणादि जीवेण ।। १०६ ।।
योधैः कृते युद्धे राज्ञा कृतमिति जल्पते लोकः ।
तथा व्यवहारेण कृतं ज्ञानावरणादि जीवेन ।। १०६ ।।

यथा युद्धपरिणामेन स्वयं परिणममानैः योधैः कृते युद्धे युद्धपरिणामेन स्वयमपरिणममानस्य राज्ञो राज्ञा किल कृतं युद्धमित्युपचारो न तु परमार्थः। तथा ज्ञानावरणादिकर्मपरिणामेन स्वयं परिणममानेन पुद्गलद्रव्येण कृते ज्ञानवरणादिकर्मणि ज्ञानावरणादिकर्मपरिणामेन स्वयमपरिणममानस्यात्मनः किलात्मना कृतं ज्ञानावरणादिकर्मेत्युपचारो न परमार्थः ।। १०६ ।।

अत एतत्स्थितं;—

उप्पादेदि करेदि य बंधदि परिणामएदि गिरहदि य ।
आदा पुग्गलदव्वं ववहारणयस्स वत्तव्वं ।। १०७ ।।
उत्पादयति करोति च बध्नाति परिणामयति गृह्णाति च ।
आत्मा पुद्गलद्रव्यं व्यवहारनयस्य वक्तव्यं ।। १०७ ।।

परिणामस्निग्धः सन्नात्मा कर्मवर्गणायोग्यपुद्गलद्रव्यं कुंभकारो घटमिव द्रव्यकर्मरूपेणोत्पादयति प्रकृतिबंधं करोति बध्नाति

यह उपचार कैसे है सो दृष्टांत द्वारा कहते हैं;—[योधैः] जैसे योधाओं ने [युद्धे कृते] युद्ध किया उस जगह [लोकः] लोक [इति जल्पते] ऐसा कहते हैं कि [राज्ञा कृतं] राजा ने युद्ध किया सो यह [व्यवहारेण] व्यवहार से कहना है [तथा] उसी प्रकार [ज्ञानावरणादि] ज्ञानावरणादि कर्म [जीवेण कृतं] जीव ने किये हैं, ऐसा कहना व्यवहार से है ।

टीका—जैसे युद्ध परिणामों से स्वयं परिणमन करने वाले योद्धाओं द्वारा किए गए युद्ध को, युद्ध परिणामों से स्वयं नहीं परिणत हुए राजा को लोक कहते हैं कि युद्ध राजा ने किया। ऐसा उपचार परमार्थ नहीं है। उसी प्रकार ज्ञानावरणादि कर्मपरिणामों से स्वयं परिणमन करता जो पुद्गल द्रव्य उसके द्वारा किए गए ज्ञानावरणादि कर्म के होने पर ज्ञानावरणादि कर्म परिणामों से आप परिणमन करने वाले आत्मा के सम्बन्ध में कहते हैं कि ये ज्ञानावरणादि कर्म आत्मा ने किए हैं, ऐसा उपचार है, परमार्थ नहीं है।

भावार्थ—जैसे योद्धा युद्ध करे; वहां पर राजा ने युद्ध किया, यह उपचार से कहते हैं, वैसे ही पुद्गल कर्म जीव ने किए, ऐसा उपचार से कहा जाता है ।। १०६ ।।

इस हेतु से ऐसा निश्चय हुआ;—[आत्मा] आत्मा [पुद्गलद्रव्यं] पुद्गल द्रव्य को [उत्पा-

अयं खल्वात्मा न गृह्णाति न परिणामयति नोत्पादयति न करोति न बध्नाति व्याप्य-व्यापकभावाभावात् प्राप्यं विकार्यं निर्वर्त्यं च पुद्गलद्रव्यात्मकं कर्म। यत्तु व्याप्यव्यापकभा-वाभावेपि प्राप्यं विकार्यं निर्वर्त्यं च पुद्गलद्रव्यात्मकं कर्म गृह्णाति परिणामयत्युत्पादयति करोति बध्नाति चात्मेति विकल्पः स किलोपचारः ॥ १०७ ॥

कथमिति चेत्:—

जह राया ववहारा दोसगुणुप्पादगोत्ति आलविदो।
तह जीवो ववहारा दव्वगुणुप्पादगो भणिदो ॥ १०८ ॥

यथा राजा व्यवहाराद्दोषगुणोत्पादक इत्यालपितः।
तथा जीवो व्यवहाराद् द्रव्यगुणोत्पादको भणितः ॥ १०८ ॥

यथा लोकस्य व्याप्यव्यापकभावेन स्वभावत एवोत्पद्यमानेषु गुणदोषेषु व्याप्यव्यापक-

---

परिणमयति गृह्णातीति व्यवहारनयस्याभिप्रायेणवक्तव्यं व्याख्येयमिति। अथवा उत्पादयति प्रकृतिबंधं करोति स्थितिबंधं बध्नात्यनुभागबंधं परिणमयति प्रदेशबन्धं तप्तायः पिंडो जलवत्सर्वात्मप्रदेशैर्गृह्णाति चेत्यभिप्राय. ॥ १०७ ॥

दयति] उत्पन्न करता है **[च]** और **[करोति]** करता है **[बध्नाति]** बांधता है **[परिणामयति]** परिण-माता है **[च]** तथा **[गृह्णाति]** ग्रहण करता है ऐसा **[व्यवहारनयस्य]** व्यवहारनय का **[वक्तव्यं]** वचन है।

टीका—यह आत्मा निश्चय से पुद्गलद्रव्यस्वरूप कर्म को व्याप्य-व्यापकभाव के अभाव से प्राप्य, विकार्य और निर्वर्त्य इन तीन प्रकार के कर्मों को न ग्रहण करता, न परिणमाता है, न उपजाता है, न करता है और न बांधता है। व्याप्य-व्यापक भाव के अभाव होने पर भी प्राप्य, विकार्य और निर्वर्त्य ऐसे तीन प्रकार के पुद्गलद्रव्य स्वरूप कर्म को यह आत्मा ग्रहण करता है, उपजाता है, करता है और बांधता है। ऐसा विकल्प होता है, यह प्रकट उपचार है।

भावार्थ—व्याप्य-व्यापक भाव के बिना कर्म का कर्ता कहना वह उपचार है ॥ १०७ ॥

यहां प्रश्न होता है कि यह उपचार किस तरह से है, उसका उत्तर दृष्टांत के द्वारा देते हैं;— **[यथा]** जैसे **[राजा]** प्रजा में राजा **[दोषगुणोत्पादकः]** दोष और गुणों का उत्पन्न करने वाला है **[इति]** ऐसा **[व्यवहारात्]** व्यवहार से **[आलपितः]** कहा है **[तथा]** उसी प्रकार **[जीवः]** जीव को भी **[व्यवहारात्]** व्यवहार से **[द्रव्यगुणोत्पातकः]** पुद्गल द्रव्य में द्रव्य गुण का उत्पादक **[भणितः]** कहा गया है।

टीका—जैसे प्रजा के व्याप्यव्यापक भाव से स्वभाव से ही उत्पन्न जो गुण और दोष उन में राजा के व्याप्य व्यापक भाव का अभाव है तो भी लोक कहते हैं कि गुण दोष का उपजाने वाला राजा है,

भावाभावेऽपि तदुत्पादको राजेत्युपचारः । तथा पुद्गलद्रव्यस्य व्याप्यव्यापकभावेन स्वभावत एवोत्पद्यमानेषु गुणदोषेषु व्याप्यव्यापकभावाभावेपि तदुत्पादको जीव इत्युपचारः ॥ १०८ ॥

जीवः करोति यदि पुद्गलकर्म नैव, कस्तर्हि तत्कुरुत इत्यभिशंकयैव ।
एतर्हि तीव्ररयमोहनिवर्हणाय, संकीर्त्यते शृणुत पुद्गलकर्म कर्तृ ॥ ६३ ॥

सामण्णपच्चया खलु चउरो भण्णंति बंधकत्तारो ।
मिच्छत्तं अविरमणं कसायजोगा य बोद्धव्वा ॥ १०९ ॥
तेसिं पुणोवि य इमो भणिदो भेदो दु तेरसवियप्पो ।
मिच्छादिट्ठीआदी जाव सजोगिस्स चरमंतं ॥ ११० ॥
एदे अचेदणा खलु पुग्गलकम्मुदयसंभवा जह्मा ।
ते जदि करंति कम्मं णवि तेसिं वेदगो आदा ॥ १११ ॥
*१ गुणसण्णिदा दु एदे कम्मं कुव्वंति पच्चया जह्मा ।
तह्मा जीवोऽकत्ता गुणा य कुव्वंति कम्माणि ॥ ११२ ॥ (चतुष्कं)

अथैतदेव व्याख्यानं दृष्टांतदार्ष्टांताभ्यां समर्थयति;—**जह राया ववहारा दोसगुणुप्पादगोत्ति आलविदो** यथा राजा लोके व्यवहारेण सदोषिनिर्दोषिजनानां दोषगुणोत्पादको भणितः **तह जीवो ववहारा दव्वगुणुप्पादगो भणिदो** तथा जीवोपि व्यवहारेण पुद्गलद्रव्यस्य पुण्यपापगुणयोरुत्पादको भणितः । इति व्यवहारमुख्यत्वेन सूत्रचतुष्टयं गतं । एवं द्विक्रियावादिनिराकरणोपसंहारव्याख्यानमुख्यत्वेनैकादशगाथा गताः ॥ १०८ ॥ ननु

ऐसा उपचार (व्यवहार) है, उसी प्रकार पुद्गल द्रव्य के व्याप्य-व्यापक भाव से स्वभाव से ही उत्पन्न गुण, दोषों में जीव के व्याप्यव्यापक भाव का अभाव है तो भी उन गुण दोषों का उपजाने वाला जीव ऐसा उपचार है ।

भावार्थ—जैसे लोक में कहते हैं कि जैसा राजा हो, वैसी ही प्रजा होती है, ऐसा कह कर गुण दोष का कर्ता राजा को कहा जाता है, उसी प्रकार पुद्गल द्रव्य के गुण दोष का कर्ता जीव को कहते हैं । जब परमार्थ दृष्टि से विचारो तो यह उपचार है ॥१०८॥

आगे पूछते हैं कि पुद्गल कर्म का कर्ता यदि जीव नहीं है तो कौन है, ऐसे प्रश्न का काव्य कहते हैं—**जीवः**—इत्यादि । **अर्थ**—यदि पुद्गल कर्म को जीव नहीं करता तो उस पुद्गल कर्म को कौन करता है ? ऐसी आशंका करके इस कर्ता-कर्म को तीव्र वेग रूप मोह (अज्ञान) के दूर करने को पुद्गल कर्म का कर्ता कहते हैं । सो हे ज्ञान के इच्छुक पुरुषो; तुम सुनो ॥ ६३ ॥

सामान्यप्रत्ययाः खलु चत्वारो भण्यंते बंधकर्त्तारः ।
मिथ्यात्वमविरमणं कषाययोगौ च बोद्धव्याः ॥ १०९ ॥
तेषां पुनरपि चायं भणितो भेदस्तु त्रयोदशविकल्पः ।
मिथ्यादृष्ट्यादिर्यावत्सयोगिनश्चरमांतम् ॥ ११० ॥
एते अचेतनाः खलु पुद्गलकर्मोदयसंभवा यस्मात् ।
ते यदि कुर्वंति कर्म नापि तेषां वेदक आत्मा ॥ १११ ॥
गुणसंज्ञितास्तु एते कर्म कुर्वंति प्रत्यया यस्मात् ।
तस्माज्जीवोऽकर्त्ता गुणाश्च कुर्वंति कर्माणि ॥ ११२ ॥

पुद्गलकर्मणः किल पुद्गलद्रव्यमेवैकं कर्तृ, तद्विशेषाः मिथ्यात्वाविरतिकषाययोगा बंधस्य

निश्चयेन द्रव्यकर्म न करोत्यात्मा बहुधा व्याख्यातं तेनैव द्विक्रियावादिनिराकरणं सिद्धं पुनरपि किमर्थं पिष्टपेषणमिति । नैवं, हेतुहेतुमद्भावव्याख्यानज्ञापनार्थमिति नास्ति दोषः । तथाहि—यत एव हेतोर्निश्चयेन द्रव्यकर्म न करोति तत एव हेतोर्द्विक्रियावादिनिराकरणं सिद्ध्यतीति हेतुमद्भावव्याख्यानं ज्ञातव्यं । इति पुण्यपापादिसप्तपदार्थ-पीठिकारूपे महाधिकारमध्ये पूर्वोक्तप्रकारेण **जदि सो पुग्गलदव्वं करेज्ज** इत्यादिगाथाद्वयेन संक्षेपव्याख्यानं । ततः परं द्वादशगाथाभिस्तस्यैव विशेषव्याख्यानं ततोप्येकादशगाथाभिस्तस्यैवोपसंहाररूपेण पुनरपि विशेषविवरणमिति समुदायेन पंचविंशतिगाथाभिः द्विक्रियावादिनिषेधकनामा तृतीयोत्तराधिकारः समाप्तः । अथानतरं **सामण्णपच्चया** इत्यादिगाथामादिं कृत्वा पाठक्रमेण सप्तगाथापर्यंतं मूलप्रत्ययचतुष्टयस्य कर्मकर्तृत्वमुख्यत्वेन व्याख्यानं करोति । तत्र सप्तकमध्ये जैनमते शुद्धनिश्चयेन शुद्धोपादानरूपेण जीवः कर्म न करोति प्रत्यया एव कुर्वंतीति कथनरूपेण गाथाचतुष्टयं । अथवा शुद्धनिश्चयविवक्षां ये नेच्छंत्येकांतेन जीवो न करोतीति वदंति सांख्यमतानुसारिणः तान्प्रति दूषणं

अब इसके उत्तर की गाथा कहते हैं;—**[सामान्यप्रत्ययाः]** प्रत्यय अर्थात् कर्म-बंध के कारण जो आस्रव वे सामान्य से **[चत्वारः]** चार **[बंधकर्तारः]** बंध के कर्ता **[भणिताः]** कहे हैं वे **[मिथ्यात्वं]** मिथ्यात्व **[अविरमणं]** अविरमण **[च]** और **[कषाययोगौ]** कषाय योग **[बोद्धव्याः]** जाननेचाहिये **[तेषां च]** और उनका **[पुनरपि]** फिर **[अयं भेदः]** यह भेद **[त्रयोदशविकल्पः]** तेरह भेदरूप कहा गया है वह **[मिथ्यादृष्ट्यादि]** मिथ्यादृष्टि को आदि लेकर **[सयोगिचरमांतः यावत्]** संयोग केवली तक है, वे तेरह गुणस्थान जानने । **[एते]** ये **[खलु]** निश्चय दृष्टि से **[अचेतनाः]** अचेतन हैं **[यस्मात्]** क्योंकि **[पुद्गलकर्मोदयसंभवाः]** पुद्गल कर्म के उदय से हुए हैं **[यदि ते]** यदि वे **[कर्म]** कर्म को **[कुर्वन्ति]** करते हैं **[तेषां वेदकः]** उनका भोक्ता **[आत्मा नापि]** आत्मा नहीं होता **[एते तु]** ये **[प्रत्ययाः]** प्रत्यय **[गुणसंज्ञिताः]** गुण नाम वाले हैं **[यस्मात्]** क्योंकि **[कर्म कुर्वंति]** ये कर्म को करते हैं **[तस्मात्]** इस कारण **[जीवः]** जीव तो **[अकर्ता]** कर्म का कर्ता नहीं है **[च]** और **[गुणाः]** ये गुण ही **[कर्माणि]** कर्मों को **[कुर्वंति]** करते हैं ।

सामान्यहेतुतया चत्वारः कर्तारः, त एव विकल्प्यमाना मिथ्यादृष्ट्यादिसयोगकेवल्यंतास्त्रयोदश कर्तारः। अथैते पुद्गलकर्मविपाकविकल्पत्वादत्यंतमचेतनाः संतस्त्रयोदश कर्तारः केवला एव यदि व्याप्यव्यापकभावेन किंचनापि पुद्गलकर्म कुर्युस्तदा कुर्युरेव किं जीवस्यात्रापतितं। अथायं तर्कः। पुद्गलमयमिथ्यात्वादीन् वेदयमानो जीवः स्वयमेव मिथ्यादृष्टिर्भूत्वा पुद्गलकर्म करोति स किलाविवेको यतो न खल्वात्मा भाव्यभावकभावाभावात् पुद्गलद्रव्यमयमिथ्यात्वादिवेदकोपि

ददाति। कथमिति चेत्। यदि ते प्रत्यया एव कर्म कुर्वंति तर्हि जीवो न हि वेदकस्तेषां कर्मणामित्येकं दूषणं। अथवा तेषां मते जीव एकातेन कर्म न करोतीति द्वितीयं दूषणं। तदनंतरं शुद्धनिश्चयेन शुद्धोपादानरूपेण न च जीवप्रत्यययोरेकत्वं जैनमताभिप्रायेणेति गाथात्रयं। अथवा पूर्वोक्तप्रकारेण ये नयविभागं नेच्छंति तान्प्रति पुनरपि दूषणं। कथमिति चेत्। जीवप्रत्यययोरेकातेनैकत्वे सति जीवाभाव इत्येकं दूषणं। एकातेन भिन्नत्वे सति संसाराभाव इति द्वितीयं दूषणमिति चतुर्थांतराधिकारे समुदायपातनिका। तद्यथा—निश्चयेन मिथ्यात्वादिपौद्गलिकप्रत्यया एव कर्म कुर्वंतीति प्रतिपादयतिः— **सामण्णपच्चया खलु चउरो भणंति बंधकत्तारो** निश्चयनयेनाभेदविवक्षायां पुद्गल एक एव कर्ता भेदविवक्षायां तु सामान्यप्रत्यया मूलप्रत्यया खलु स्फुटं चत्वारो बंधस्य कर्तारो भण्यंते सर्वज्ञैः उत्तरप्रत्ययाश्च पुनर्बहवो भवंति। सामान्यं कोर्थः। विवक्षाया अभावः सामान्यमिति सामान्यशब्दस्यार्थः सर्वत्र सामान्यव्याख्यानकाले ज्ञातव्य इति। **मिच्छत्तं अविरमणं कसायजोगा य बोद्धव्वा** ते च मिथ्यात्वाविरतिकषाययोगा बोद्धव्याः। अथ—**तेसिं पुणो वि य इमो भणिदो भेदो दु तेरसवियप्पो** तेषां प्रत्ययानां गुणस्थानभेदेन पुनरिमो भणितो भेदस्त्रयोदशविकल्पः केन प्रकारेण **मिच्छादिट्ठीआदी जाव सजोगिस्स चरमंतं** मिथ्यादृष्टिगुणस्थानादिसयोगिभट्टारकस्य चरमसमयं यावदिति। अथ **एदे अचेदणा खलु पुग्गलकम्मुदयसंभवा जह्मा** एते मिथ्यात्वादिभावप्रत्ययाः शुद्धनिश्चयेनाचेतनाः खलु स्फुटं। कस्मात् पुद्गलकर्मोदयसंभवा यस्मादिति। यथा स्त्रीपुरुषाभ्यां समुत्पन्नः पुत्रो विवक्षावशेन देवदत्तायाः पुत्रोऽयं केचन वदंति, देवदत्तस्य पुत्रोऽयमिति केचन वदंति दोषो नास्ति। तथा जीवपुद्गलसंयोगेनोत्पन्नाः मित्यात्वरागादिभावप्रत्यया अशुद्धनिश्चयेनाशुद्धोपादानरूपेण चेतना जीवसंबद्धाः शुद्धनिश्चयेन शुद्धोपादानरूपेणाचेतनाः पौद्गलिकाः। परमार्थतः पुनरेकातेन न जीवरूपाः न च पुद्गलरूपाः सुधाहरिद्रयोः संयोगपरिणामवत्। वस्तुतस्तु सूक्ष्मशुद्धनिश्चयनयेन न संत्येवाज्ञानोद्भवाः कल्पिता इति। एतावता किमुक्तं भवति। ये केचन वदंत्येकातेन रागादयो जीवसंबंधिनः पुद्गलसंबंधिनो वा तदुभयमपि वचनं मिथ्या। कस्मादिति चेत्, पूर्वोक्तस्त्रीपुरुषदृष्टातेन संयोगोद्भवत्वात्। अथ मतं सूक्ष्मशुद्धनिश्चयनयेन कस्येति प्रच्छामो वयं सूक्ष्मशुद्धनिश्चयेनतेषामस्तित्वमेव नास्ति पूर्वमेव भणितं तिष्ठति कथमुत्तरं प्रयच्छामः इति। **ते जदि करंति कम्मं** ते प्रत्यया यदि चेत् कुर्वंति कर्म तदा कुर्युरेव जीवस्य किमायातं शुद्धनिश्चयेन सम्मतमेव 'सव्वे सुद्धा हु सुद्धणया'

टीका—निश्चय से पुद्गल कर्म का एक पुद्गल द्रव्य ही कर्ता है। उस पुद्गलद्रव्य के मिथ्यात्व, अविरति, कषाय और योग ये चार भेद सामान्यतः बंध के कर्ता हैं। वे ही मिथ्यादृष्टि को आदि लेकर सयोगकेवली तक भेदरूप हुए तेरह कर्ता हैं। ये पुद्गल कर्म विपाक के भेद हैं इसलिये अत्यंत अचेतन हैं, जड़ हैं। वे अचेतन ही केवल पुद्गलकर्म के कर्ता होकर व्याप्यव्यापकभाव से कुछ पुद्गल कर्म को करे तो करें, जीव का इस में क्या आया ? कुछ भी नहीं। अथवा यहां यह तर्क है कि पुद्गलमयी मिथ्यात्वादिका

कथं पुनः पुद्गलकर्मणः कर्ता नाम । अथैतदायातं यतः पुद्गलद्रव्यमयानां चतुर्णां सामान्यप्रत्ययानां विकल्पास्त्रयोदश विशेषप्रत्यया गुणशब्दवाच्याः केवला एव कुर्वंति कर्माणि । ततः पुद्गलकर्मणामकर्ता जीवो गुणा एव तत्कर्तारस्ते तु पुद्गलद्रव्यमेव । ततः स्थितं पुद्गलकर्मणः पुद्गलद्रव्यमेवैकं कर्तृ ॥१०९॥११०॥१११॥११२॥

इति वचनात् । अथ मतं । जीवो मिथ्यात्वोदयेन मिथ्यादृष्टिर्भूत्वा मिथ्यात्वरागादिभावकर्म भुंक्ते यतस्ततः कर्तापि भवतीति । नैवं । **णवि तेसिं वेदगो आदा** यतः शुद्धनिश्चयेन वेदकोपि न हि तेषां कर्मणा । यदा वेदको न भवति तदा कर्त्तापि कथंभविष्यति न कथमपि इति शुद्धनिश्चयेन सम्मतमेव । अथवा ये पुनरेकांतेनाकर्त्तेति वदंति तान्प्रति दूषणं । कथमिति चेत् । यदैकांतेनाकर्ता भवति तदा यथा शुद्धनिश्चयेनाकर्ता तथा व्यवहारेणाप्यकर्ता प्राप्नोति । ततश्च सर्वथैवाकर्तृत्वे सति संसाराभाव इत्येकं दूषणं । तेषां मते वेदकोपि न भवतीति द्वितीयं च दूषणं । अथ च वेदकमात्मानं मन्यंते सांख्यास्तेषां स्वमतव्याघातदूषणं प्राप्नोतीति । अथ—**गुणसण्णिदा दु एदे कम्मं कुव्वंति पच्चया जह्मा** ततः स्थितं गुणस्थानसंज्ञिताः प्रत्ययाः एते कर्म कुर्वंतीति यस्मादेवं पूर्वसूत्रेण भणितं । **तह्मा जीवो कत्ता गुणा य कुव्वंति कम्माणि** तस्मात् शुद्धनिश्चयेन तेषां कर्मणां जीव कर्ता न भवति । गुणस्थानसंज्ञिताः प्रत्यया एव कर्म कुर्वंतीति सम्मतमेव । एवं शुद्धनिश्चयेन प्रत्यया एव कर्म कुर्वंतीति व्याख्यानरूपेण गाथाचतुष्टयं गतं ॥ १०९ । ११० । १११ । ११२ ॥ अथ न च जीवप्रत्यययोरेकत्वमेकांतेनेति कथयति;—**जह जीवस्स अणण्णुवओगो** यथा जीवस्यानन्यस्तन्मयो ज्ञानदर्शनोपयोगः । कस्मात्, अनन्यवेद्यत्वात् अशक्यविवेचनत्वाच्चाग्नेरुष्णत्ववत् **कोहो वि तह जदि अणण्णो** तथा क्रोधोपि यद्यनन्यो भवत्येकांतेन । तदा किं दूषणं, **जीवस्साजीवस्स य एवमणण्णत्तमावण्णं** एवमभेदे सति सहजशुद्धाखंडैकज्ञानदर्शनोपयोगमयजीवस्याजीवस्य चैकत्वमापन्नमिति । अथ—**एवमिह जो दु जीवो सो चेव दु णियमदो तहाजीवो** एवं पूर्वोक्तसूत्रव्याख्यानक्रमेण य एव जीवः स एव तथैवाजीवः भवति नियमान्निश्चयात् । तथा सति जीवाभावाद् दूषणं

वेदन करता हुआ जीव स्वयं ही मिथ्यादृष्टि होकर पुद्गल कर्म को करता है ? उसका समाधान ऐसा है कि यह अज्ञान है क्योंकि आत्मा भाव्यभावक भाव के अभाव से मिथ्यात्वादि पुद्गल कर्मों का भोक्ता भी निश्चय से नहीं है तो पुद्गल कर्म का कर्ता कैसे हो सकता है । इसलिये यह सिद्ध हुआ कि पुद्गल द्रव्यमय सामान्य चार प्रत्यय, उनके विशेष भेद रूप तेरह प्रत्यय वे गुण शब्द से कहे हैं अर्थात् उनका नाम गुणस्थान है वे ही केवल कर्मों को करते हैं । इस कारण जीव पुद्गल कर्मों का अकर्ता है और वे गुण स्थान ही उनके कर्ता हैं क्योंकि वे गुण पुद्गल द्रव्यमय ही हैं । इससे पुद्गल कर्म का पुद्गल द्रव्य ही एक कर्ता है यह सिद्ध हुआ ।

भावार्थ—'अन्य द्रव्य का अन्य द्रव्य कर्ता नहीं होता' इस न्याय से आत्मद्रव्य पुद्गल द्रव्य कर्म का कर्ता नहीं है, बंध के कर्ता तो योगकषायादिक से उत्पन्न हुए गुणस्थान हैं । वे वास्तव में अचेतन पुद्गलमय हैं । इसलिए वे पुद्गल कर्म के कर्ता हैं, जीव को कर्ता मानना अज्ञान है ॥ १०९ । ११० । १११ । ११२ ॥

न च जीवप्रत्यययोरेकत्वं;—

जह जीवस्स अण्णणुवओगो कोहो वि तह जदि अण्णणो।
जीवस्साजीवस्स य एवमणण्णत्तमावण्णं ॥ ११३ ॥
एवमिह जो दु जीवो सो चेव दु णियमदो तहाजीवो।
अयमेयत्ते दोसो पच्चयणोकम्मकम्माणं ॥ ११४ ॥
अह दे अण्णो कोहो अण्णुवओगप्पगो हवदि चेदा।
जह कोहो तह पच्चय कम्मं णोकम्ममवि अण्णं ॥ ११५ ॥ (त्रिकलम्)

यथा जीवस्यानन्य उपयोगः क्रोधोपि तथा यद्यनन्यः।
जीवस्याजीवस्य चैवमनन्यत्वमापन्नं ॥ ११३ ॥
एवमिह यस्तु जीवः स चैव तु नियमतस्तथाजीवः।
अयमेकत्वे दोषः प्रत्ययनोकर्मकर्मणां ॥ ११४ ॥
अथ ते अन्यः क्रोधोऽन्यः उपयोगात्मको भवति चेतयिता।
यथा क्रोधस्तथा प्रत्ययाः कर्म नोकर्माप्यन्यत् ॥ ११५ ॥

यदि यथा जीवस्य तन्मयत्वाज्जीवादनन्य उपयोगस्तथा जडः क्रोधोप्यनन्य एवेति प्रति-

---

प्राप्नोति। **अयमेयत्ते दोसो पच्चयणोकम्मकम्माणं** अयमेव च दोषो जीवाभावरूपः। कस्मिन् सति। एकान्तेन निरंजननिजानंदैकलक्षणजीवेन सहैकत्वे सति। केषां। मिथ्यात्वादिप्रत्ययनोकर्मकर्मणामिति। अथ प्राकृतलक्षणबलेन

आगे कहते हैं कि जीव और उन प्रत्ययों का एकत्व भी नहीं है,—[**यथा**] जैसे [**जीवस्य**] जीव के [**अनन्य उपयोगः**] एक रूप उपयोग है [**तथा**] उसी प्रकार [**यदि**] जो [**क्रोधोपि**] क्रोध भी [**अनन्यः**] एक रूप हो जाय तो [**एवं**] इस तरह [**जीवस्य**] जीव [**च**] और [**अजीवस्य**] अजीव के [**अनन्यत्वं**] एकत्व [**आपन्नं**] प्राप्त हुआ [**एवं च इह**] ऐसा होने से इस लोक में [**यः तु**] जो [**जीवः**] जीव है [**स एव**] वही [**नियमतः**] नियम से [**तथा**] वैसा ही [**अजीवः**] अजीव हुआ [**एकत्वे**] ऐसे दोनों के एकत्व होने में [**अयं दोषः**] यह दोष प्राप्त हुआ। [**प्रत्ययनोकर्मकर्मणां**] इसी प्रकार प्रत्यय नोकर्म-कर्मइनमें भी यही दोष जानना। [**अथ**] अथवा इस दोष के भय से [**ते**] तेरे मत में [**क्रोधः**] क्रोध [**अन्यः**]अन्य है और [**उपयोगात्मकः**] उपयोग स्वरूप [**चेतयिता**] आत्मा [**अन्यः**] अन्य [**भवति**] है और [**यथा क्रोधः**] जैसे क्रोध है [**तथा**] उसी प्रकार [**प्रत्ययाः**] प्रत्यय [**कर्म**] कर्म [**नोकर्म अपि**] और नोकर्म ये भी [**अन्यत्**] आत्मा से अन्य ही हैं ॥

टीका—जैसे जीव के साथ तन्मयता से जीव से उपयोग अनन्य (एक रूप) है, उसी प्रकार

पत्तिस्तदा चिद्रूपजडयोरनन्यत्वाज्जीवस्योपयोगमयत्ववज्जडक्रोधमयत्वापत्तिः। तथा सति तु य एव जीवः स एवाजीव इति द्रव्यांतरलुप्तिः। एवं प्रत्ययनोकर्मकर्मणामपि जीवादनन्यत्वप्रतिपत्तावयमेव दोषः। अथैतद्दोषभयादन्य एवोपयोगात्मा जीवोऽन्य एव जडस्वभावः क्रोधः इत्यभ्युपगमः तर्हि यथोपयोगात्मनो जीवादन्यो जडस्वभावः क्रोधः तथा प्रत्ययनोकर्मकर्माण्यप्यन्यान्येव जडस्वभावत्वाविशेषान्नास्ति जीवप्रत्यययोरेकत्वं ॥ ११३।११४।११५ ॥

प्रत्ययशब्दस्य ह्रस्वत्वमिति। **अह पुण अण्णो कोहो अण्णुवओगप्पगो हवदि चेदा** अथ पुनरभिप्रायो भवतां पूर्वोक्तजीवाभावदूषणभयात् अन्यो भिन्नः क्रोधो जीवादन्यश्च विशुद्धज्ञानदर्शनमय आत्मा क्रोधात्सकाशात्। **जह कोहो तह पच्चय कम्मं णोकम्म मवि अण्णं** यथा जडः क्रोधो निर्मलचैतन्यस्वभावजीवाद्भिन्नस्तथा प्रत्ययकर्मनोकर्माण्यपि भिन्नानि शुद्धनिश्चयेन सम्मत एव। किं च, शुद्धनिश्चयनयेन जीवस्याकर्तृत्वमभोक्तृत्वं च क्रोधादिभ्यश्च भिन्नत्वं च भवतीति व्याख्याने कृते सति द्वितीयपक्षे व्यवहारेण कर्तृत्वं भोक्तृत्वं च क्रोधादिभ्यश्चाभिन्नत्वं च लभ्यते एव। कस्मात्। निश्चयव्यवहारयोः परस्परसापेक्षत्वात्। कथमिति चेत्। यथा दक्षिणेन चक्षुषा पश्यत्ययं देवदत्तः इत्युक्ते वामेन न पश्यतीत्यनुक्तसिद्धमिति। ये पुनरेवं परस्परसापेक्षनयविभागं न मन्यंते सांख्यसदाशिवमतानुसारिणस्तेषां मते यथा शुद्धनिश्चयनयेन कर्ता न भवति क्रोधादिभ्यश्च भिन्नो भवति तथा व्यवहारेणापि। ततश्च क्रोधादिपरिणमनाभावे सति सिद्धानामिव कर्मबंधाभावः। कर्मबंधाभावे संसाराभावः, संसाराभावे सर्वदा मुक्तत्वं प्राप्नोति। स च प्रत्यक्षविरोधः, संसारस्य प्रत्यक्षेण दृश्यमानत्वादिति। एवं प्रत्ययजीवयोरेकांतेनैकत्वनिराकरणरूपेण गाथात्रयं गतं। अत्राह शिष्यः। शुद्धनिश्चयेनाकर्ता व्यवहारेण कर्तेति बहुधा व्याख्यातं तत्रैवं सति यथा द्रव्यकर्मणां व्यवहारेण कर्तृत्वं तथा रागादिभावकर्मणां च द्वयोर्द्रव्यभावकर्मणोरेकत्वं प्राप्नोतीति। नैवं। रागादिभावकर्मणां योसौ व्यवहारस्तस्याशुद्धनिश्चयसंज्ञा भवति द्रव्यकर्मणां भावकर्मभिः सह तारतम्यज्ञापनार्थं। कथं तारतम्यमिति चेत्। द्रव्यकर्माण्यचेतनानि भावकर्माणि च चेतनानि तथापि शुद्धनिश्चयापेक्षया अचेतनान्येव। यतः कारणादशुद्धनिश्चयोपि शुद्धनिश्चयापेक्षया व्यवहार एव। अयमत्र भावार्थः। द्रव्यकर्मणां कर्तृत्वं भोक्तृत्वं चानुपचरितासद्भूतव्यवहारेण रागादिभावकर्मणां चाशुद्धनिश्चयेन। स च शुद्धनिश्चयापेक्षया व्यवहारएवेति। एवं पुण्यपापादिसप्तपदार्थानां पीठिकारूपे महाधिकारे सप्तगाथाभिः चतुर्थौतराधिकारः समाप्तः। अतः परं **जीवे ण सयं बद्धं** इत्यादि गाथामादिं कृत्वा गाथाष्टकपर्यंतं सांख्यमतानुसारि-

---

जड़ क्रोध भी अनन्य ही है, ऐसी प्रतीत हो जाय। तो चिद्रूप की और जड़ की अनन्यता से जीव के उपयोग होने की तरह जड़ क्रोधमय होने की भी प्राप्ति हुई। ऐसा होने पर जो जीव है, वही अजीव है, इस प्रकार भिन्न द्रव्य का लोप हो गया। इसी प्रकार प्रत्यय नोकर्म और कर्मों की भी जीव के साथ एकत्व की प्रतीति में यही दोष आता है। इस दोष के भय से ऐसा मानो कि उपयोग स्वरूप जीव तो अन्य है और जड़ स्वरूप क्रोध अन्य है। जैसे उपयोग स्वरूप जीव से जड़ स्वभाव क्रोध अन्य है, उसी प्रकार प्रत्यय नोकर्म और कर्म भी अन्य ही हैं, क्योंकि जैसा जड़ स्वभाव क्रोध है, उसी प्रकार प्रत्यय नोकर्म, कर्म ये भी जड़ हैं, इनमे विशेषता नहीं है। इस प्रकार जीव और प्रत्यय मे एकत्व नहीं है।

भावार्थ—मिथ्यात्वादि आस्रव तो जड़ स्वभाव हैं और जीव चेतन स्वभाव है। यदि जड़ और चेतन एक हो जायं तो बड़ा भारी दोष आवे, भिन्न द्रव्य का ही लोप हो जाय। इसलिये आस्रव और आत्मा में एकत्व नहीं है, यह निश्चयनय का सिद्धान्त है॥ ११३। ११४। ११५॥

अथ पुद्गलद्रव्यस्य परिणामस्वभावत्वं साधयति सांख्यमतानुयायिशिष्यं प्रति;—

जीवे ण सयं बद्धं ण सयं परिणमदि कम्मभावेण ।
जइ पुग्गलदव्वमिणं अप्परिणामी तदा होदि ॥ ११६ ॥
कम्मइयवग्गणासु य अपरिणमंतीसु कम्मभावेण ।
संसारस्स अभावो पसज्जदे संखसमओ वा ॥ ११७ ॥
जीवो परिणामयदे पुग्गलदव्वाणि कम्मभावेण ।
ते सयमपरिणमंते कहं णु परिणामयदि चेदा[1] ॥ ११८ ॥
अह सयमेव हि परिणमदि कम्मभावेण पुग्गलं दव्वं ।
जीवो परिणामयदे कम्मं कम्मत्तमिदि मिच्छा ॥ ११९ ॥
णियमा कम्मपरिणदं कम्मं चि य होदि पुग्गलं दव्वं ।
तह तं णाणावरणाइपरिणदं मुणसु तच्चेव ॥ १२० ॥ (पंचकम्)

जीवे न स्वयं बद्धं न स्वयं परिणमते कर्मभावेन ।
यदि पुद्गलद्रव्यमिदमपरिणामि तदा भवति ॥ ११६ ॥
कार्मणवर्गणासु चापरिणममानासु कर्मभावेन ।
संसारस्याभावः प्रसजति सांख्यसमयो वा ॥ ११७ ॥
जीवः परिणामयति पुद्गलद्रव्याणि कर्मभावेन ।
तानि स्वयमपरिणममानानि कथं नु परिणामयति चेतयिता ॥ ११८ ॥

शिष्यसंबोधनार्थं जीवपुद्गलयोरेकांतेनापरिणामित्वं निषेधयन् सन् कथंचित् परिणामित्वं स्थापयति। तत्र गाथाष्टकमध्ये पुद्गलपरिणामित्वव्याख्यानमुख्यत्वेन गाथात्रयं। तदनंतरं जीवपरिणामित्वमुख्यत्वेन गाथापंचकमिति पंचमस्थले समुदायपातनिका ॥ ११३।११४।११५ ॥ अथ सांख्यमतानुयायिशिष्यं प्रति पुद्गलस्य कथंचित्परिणामस्वभावत्वं साधयति;—**जीवे ण सयं बद्धं** जीवे अधिकरणभूते स्वयं स्वभावेन पुद्गलद्रव्यकर्मबद्धं नास्ति। कस्मात्, सर्वदा जीवस्य शुद्धत्वात्। **ण सयं परिणमदि कम्मभावेण** न च स्वयं स्वयमेव कर्मभावेन द्रव्यकर्मपर्यायेण परिणमति।

आगे सांख्यमत को मानने वाले शिष्य के प्रति पुद्गल द्रव्य में परिणाम स्वभाव होना सिद्ध करते हैं अर्थात् सांख्यमती प्रकृति पुरुष को अपरिणामी मानता उसे समझाते हैं;—**[पुद्गलद्रव्यं]** पुद्गल द्रव्य **[जीवे]** जीव में **[स्वयं]** आप **[न बद्धं]** न तो बंधा है **[न कर्मभावेन]** और न कर्म भाव से **[स्वयं]** स्वयं **[परिणमते]** परिणमन करता है **[यदि इदं तदा]** जो

१. णाणी इत्यपि पाठः।

अथ स्वयमेव हि परिणमते कर्मभावेन पुद्गलद्रव्यं ।
जीवः परिणामयति कर्म कर्मत्वमिति मिथ्या ॥ ११९ ॥
नियमात्कर्मपरिणतं कर्म चैव भवति पुद्गलद्रव्यं ।
तथा तद्ज्ञानावरणादिपरिणतं जानीत तच्चैव ॥ १२० ॥

यदि पुद्गलद्रव्यं जीवे स्वयमबद्धमत्कर्मभावेन स्वयमेव न परिणमेत तदा तदपरिणाम्येव स्यात् । तथा सति संसाराभावः । अथ जीवः पुद्गलद्रव्यं कर्मभावेन परिणामयति ततो न संसाराभावः इति तर्कः ? किं स्वयमपरिणममानं परिणममानं वा जीवः पुद्गलद्रव्यं कर्मभावेन

कस्मात्, सर्वथा नित्यत्वात् । **जदि पुग्गलदव्वमिणं** एवमित्थंभूतमिदं पुद्गलद्रव्यं यदि चेद्भवतां सांख्यमतानुसारिणां **अप्परिणामी तदा होदि** ततः कारणात्तत्पुद्गलद्रव्यमपरिणाम्येव भवति । ततश्चापरिणामित्वे सति किं दूषणं भवति । अथ—कार्मणवर्गणाभिरपरिणमंतीभि कर्मभावेन द्रव्यकर्मपर्यायेण तदा ससारस्याभावः प्रसजति प्राप्नोति हे शिष्य, सांख्यसमयवदिति । अथ मतं । **जीवो परिणामयदे पुग्गलदव्वाणि कम्मभावेण** जीवः कर्त्ता कर्मवर्गणायोग्यपुद्गलद्रव्याणि ज्ञानावरणादिकर्मभावेण द्रव्यकर्मपर्यायेण हठात्परिणामयति ततः कारणात्संसाराभावदूषणं न भवतीति चेत् **ते सयमपरिणमंतं कहं तु परिणामयदि णाणी** ज्ञानी जीवः स्वयमपरिणममानः सन् तत्पुद्गलद्रव्यं

ऐसा मानो तो यह पुद्गलद्रव्य **[अपरिणामी]** अपरिणामी **[भवति]** हो जायगा **[वा]** अथवा **[कार्मणवर्गणासु]** कर्मणवर्गणा आप **[कर्मभावेन]** कर्मभाव से **[अपरिणममानासु]** नही परिणमतीं ऐसा मानिये तो **[संसारस्य]** संसार का **[अभावः]** अभाव **[प्रसजति]** ठहरेगा **[वा]** अथवा **[सांख्यसमयः]** सांख्य मत का प्रसंग आयेगा । **[जीवः]** जीव ही **[पुद्गलद्रव्याणि]** पुद्गल द्रव्यों को **[कर्मभावेन]** कर्मभावों से **[परिणामयति]** परिणमन कराता है ऐसा माना जाय तो **[तानि]** वे पुद्गलद्रव्य **[स्वयं अपरिणममानानि]** आप ही परिणमन न करते उनको **[चेतयिता]** यह चेतन जीव **[कथं नु]** कैसे **[परिणमयति]** परिणमा सकता है, यह प्रश्न हो सकता है **[अथ]** अथवा **[पुद्गलद्रव्यं]** पुद्गलद्रव्य **[स्वयमेव हि]** आप ही **[कर्मभावेन]** कर्म भाव से **[परिणमते]** परिणमता है, ऐसा माना जाय तो **[जीवः]** जीव **[कर्मत्वं]** कर्म भाव से **[कर्म]** कर्मरूप पुद्गल को **[परिणमयति]** परिणमाता है **[इति]** ऐसा कहना **[मिथ्या]** झूठ हो जाय । इसलिये यह सिद्ध हुआ कि **[पुद्गलं द्रव्यं]** पुद्गल द्रव्य **[कर्मपरिणतं]** कर्मरूप परिणत हुआ **[नियमात् चैव]** नियम से ही **[कर्म]** कर्मरूप **[भवति]** होता है **[तथा]** ऐसा होने पर **[तच्चैव]** वह पुद्गल द्रव्य ही **[ज्ञानावरणादि परिणतं]** ज्ञानावरणादिरूप परिणत **[तत्]** कर्म (जानीत) जानो ।

टीका—यदि पुद्गलद्रव्य जीव में आप नहीं बंधा हुआ स्वयमेव कर्मभाव से नहीं परिणमन करता है तो पुद्गलद्रव्य अपरिणामी ही सिद्ध हो जायगा । ऐसा होने पर संसार का अभाव जायगा क्योंकि कर्मरूप हुए बिना जीव कर्मरहित ठहरता है तो संसार किसका ? और जो ऐसा तर्क करे कि

परिणामयेत् ? न तावत्तत्स्वयमपरिणममानं परेण परिणामयितुं पार्येत । न हि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यते । स्वयं परिणममानं तु न परं परिणमयितारमपेक्षेत । न हि वस्तुशक्तयः परमपेक्षन्ते । ततः पुद्गलद्रव्यं परिणामस्वभावं स्वयमेवास्तु । तथा सति कलशपरिणता मृत्तिका स्वयं कलश इव जडस्वभावंज्ञानावरणादिकर्मपरिणतं तदेव स्वयं ज्ञानावरणादिकर्म स्यात् । इति सिद्धं पुद्गलद्रव्यस्य परिणामस्वभावत्वं ॥११६॥११७॥११८॥११९॥१२०॥

स्थितेत्यविघ्ना खलु पुद्गलस्य स्वभावभूता परिणामशक्तिः ।
तस्यां स्थितायां स करोति भावं यमात्मनस्तस्य स एव कर्ता ॥ ६४ ॥

किं स्वयमपरिणममानं परिणममानं वा परिणामयेत् ? न तावदपरिणममानं परिणामयति न च स्वतोऽसती शक्तिः कर्तुमन्येन पार्यते । यथा जपापुष्पादिकं कर्तृ स्फटिके जनयत्युपाधि तथा काष्ठस्तंभादौ किं न जनयतीति । अथैकांतेन परिणममानं परिणामयति । तदपि न घटते । न हि वस्तुशक्तयः परमपेक्षंते तर्हि जीवो निमित्तकर्तारमंतरेणापि स्वयमेव कर्मरूपेण परिणमतु । तथा च सति किं दूषणं ? घटपटस्तंभादिपुद्गलानां ज्ञानावरणादिकर्मपरिणतिः स्यात् । स च प्रत्यक्षविरोधः । ततः स्थिता पुद्गलाना स्वभावभूता कथंचित्परिणामित्वशक्तिः तस्यां परिणामशक्तौ स्थितायां स पुद्गलः कर्ता । यं स्वस्य संबंधिनं ज्ञानावरणादिद्रव्यकर्मपरिणामं पर्यायं करोति तस्य स एवोपादानकारणं कलशस्य मृत्पिंडमिव । न च जीव., स तु निमित्तकारणमेव हेयतत्त्वमिदं । तस्मात्पुद्गलाद्व्यतिरिक्तशुद्धपरमात्मभावनापरिणताऽभेदरत्नत्रयलक्षणेन भेदज्ञानेन गम्यश्चिदानंदैकस्वभावो निजशुद्धात्मैव शुद्धनिश्चयेनोपादेयं भेदरत्नत्रयस्वरूपं तु उपादेयमभेदरत्नत्रयसाधकत्वाद्व्यवहारेणोपादेयमिति । एवं गाथात्रयशब्दार्थव्याख्यानेन शब्दार्थो ज्ञातव्यः । व्यवहारनिश्चयरूपेण नयार्थो ज्ञातव्यः । सांख्यं प्रति मतार्थो ज्ञातव्यः । आगमार्थस्तु प्रसिद्धः । हेयोपादानव्याख्यानरूपेण भावार्थोपि ज्ञातव्यः ।

जीव पुद्गल द्रव्य को कर्मभाव परिणमाता है, इसलिये संसार का अभाव नहीं हो सकता, उसका समाधान यह है कि पहले दो पक्ष लेकर पूछते हैं—यदि जीव पुद्गल को परिणमन कराता है वह स्वयं-अपरिणमित को परिणमित कराता है या स्वयं परिणमित को परिणमित कराता है ? यदि इनमें से पहला पक्ष लिया जाय तो स्वयं अपरिणमित को नहीं परिणमा सकता क्योंकि स्वयं अपरिणमित में परके परिणमाने की सामर्थ्य नहीं होती । स्वतः शक्ति जिसमें नहीं होती, वह परके द्वारा भी नही आ सकती। यदि स्वयं परिणमित पुद्गलद्रव्य को जीव कर्मभाव से परिणमाता है, ऐसा दूसरा पक्ष लिया जाय तो यह भी ठीक नहीं क्योंकि अपने आप परिणमित हुए को अन्य परिणमाने वाले की आवश्यकता ही नहीं, क्योंकि वस्तु की शक्ति परकी अपेक्षा नहीं करती । इसलिये पुद्गल द्रव्य परिणाम स्वभाव स्वयमेव होवे । ऐसा होने पर जैसे कलश रूप परिणत हुई मट्टी अपने आप कलश ही है, उसी भांति जड स्वभाव ज्ञानावरण आदि कर्मरूप परिणत हुआ पुद्गल द्रव्य ही आप ज्ञानावरण आदि कर्म ही है । इस प्रकार पुद्गल द्रव्य का परिणाम स्वभाव सिद्ध हुआ ॥११६।११७।११८।११९।१२०॥

अब इस अर्थ का कलशरूप काव्य कहते हैं । **स्थिते** इत्यादि । **अर्थ**—इस प्रकार उक्त प्रकार से पुद्गल द्रव्य की परिणमन शक्ति स्वभावभूत निर्विघ्न सिद्ध हुई । उसके सिद्ध होने पर पुद्गल द्रव्य जिस भाव को अपने करता है, उसका वह पुद्गल द्रव्य ही कर्ता है ।

जीवस्य परिणामित्वं साधयति—

ण सयं बद्धो कम्मे ण सयं परिणमदि कोहमादीहिं ।
जइ एस तुज्झ जीवो अप्परिणामी तदा होदी ॥ १२१ ॥
अपरिणमंतम्हि सयं जीवे कोहादिएहिं भावेहिं ।
संसारस्स अभावो पसज्जदे संखसमओ वा ॥ १२२ ॥
पुग्गलकम्मं कोहो जीवं परिणामएदि कोहत्तं ।
तं सयमपरिणमंतं कहं णु परिणामयदि कोहो ॥ १२३ ॥
अह सयमप्पा परिणमदि कोहभावेण एस दे बुद्धी ।
कोहो परिणामयदे जीवं कोहत्तमिदि मिच्छा ॥ १२४ ॥
कोहुवजुत्तो कोहो माणुवजुत्तो य माणमेवादा ।
माउवजुत्तो माया लोहुवजुत्तो हवदि लोहो ॥ १२५ ॥ (पंचकम्)

न स्वयं बद्धः कर्मणि न स्वयं परिणमते क्रोधादिभिः ।
यद्येषः तव जीवोऽपरिणामी तदा भवति ॥ १२१ ॥
अपरिणममाने स्वयं जीवे क्रोधादिभिः भावैः ।
संसारस्याभावः प्रसजति सांख्यसमयो वा ॥ १२२ ॥
पुद्गलकर्म क्रोधो जीवं परिणामयति क्रोधत्वं ।
तं स्वयमपरिणममानं कथं नु परिणामयति क्रोधः ॥ १२३ ॥

इति शब्दनयमतागमभावार्थाः व्याख्यानकाले यथासंभवं सर्वत्र ज्ञातव्याः । एवं पुद्गलपरिणामस्थापनार्थमुख्यत्वेन गाथात्रयं गतं ॥ ११६।११७।११८।११९।१२० ॥ सांख्यमतानुसारिशिष्यं प्रति जीवस्य कथंचित्परिणामस्वभावत्वं साधयति;—**ण सयं बद्धो कम्मे** स्वयं स्वभावेन कर्मण्यधिकरणभूते एकांतेन बद्धो नास्ति सदा मुक्तत्वात् । **ण सयं परिणमदि कोहमादीहिं** न च स्वयं स्वयमेव द्रव्यकर्मोदयनिरपेक्षो भावक्रोधादिभिः परिणमति । कस्मादेकांतेनापरिणामित्वात् । **जदि एस तुज्झ जीवो अप्परिणामी तदा होदि** यदि चेदेष जीवः प्रत्यक्षीभूतः तव मताभि-

---

भावार्थ—सब द्रव्यों का परिणाम स्वभावतः सिद्ध है, इसलिये अपने भाव का आप ही कर्ता है । अतः पुद्गल भी जिस भाव को अपने में करता है, उसका वही कर्ता है ॥ ६४ ॥

अब जीव द्रव्य की परिणामस्वभावता सिद्ध करते हैं:—सांख्य मतवाले शिष्य से आचार्य कहते हैं कि हे भाई **[तव]** तेरी बुद्धि में **[यदि]** यदि **[एष जीवः]** यह जीव **[कर्मणि]** कर्मों में **[स्वयं]**

अथ स्वयमात्मा परिणमते क्रोधभावेन एषा ते बुद्धिः ।
क्रोधः परिणामयति जीवं क्रोधत्वमिति मिथ्या ॥ १२४ ॥
क्रोधोपयुक्तः क्रोधो मानोपयुक्तश्च मान एवात्मा ।
मायोपयुक्तो माया लोभोपयुक्तो भवति लोभः ॥ १२५ ॥

यदि कर्मणि स्वयमबद्धः सन् जीवः क्रोधादिभावेन स्वयमेव न परिणमेत तदा स किला-

---

प्रायेणेत्थंभूतः स्यात्ततः कारणादपरिणाम्येव भवति । अपरिणामित्वे सति किं दूषणं ? अथ—अपरिणममाने सति तस्मिन् जीवे स्वयं स्वयमेव भावक्रोधादिपरिणामैः तदा संसारस्याभावः प्राप्नोति । ॓शिष्य सांख्यसमयवत् । अथ मतं **पुग्गलकम्मं कोहो जीवं परिणामएदि कोहत्तं** पुद्गलकर्मरूपो द्रव्यक्रोध उदयागतः कर्ता जीवं कर्मतापन्नं हठात्परिणामयति भावक्रोधत्वेनेति चेत् तं **सयमपरिणमंतं कह परिणामएदि कोहत्तं** अथ किं स्वयमपरिणममानं परिणममानं वा परिणामयेत् ? न तावत्स्वयमपरिणममानं परिणामयेत् । कस्मात् । न हि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यंते । न हि जपापुष्पादय कर्तारो यथा स्फटिकादिषु जनयत्युपाधि तथा काष्ठस्तंभादिष्वपि । अथैकांतेन परिणममानं वा तर्हि उदयागतद्रव्यक्रोधनिमित्तमंतरेणापि भावक्रोधादिभिः परिणमंतु । कस्मादिति चेत् । न हि वस्तुशक्तयः परमपेक्षंते । तथा च सति मुक्तात्मनामपि द्रव्यक्रोधादि कर्मोदयनिमित्ताभावेपि भावक्रोधादयः प्राप्नुवंति । न च तदिष्टमागमविरोधात् ।

आप तो [**बद्धः न**] बंधा नही है और [**क्रोधादिभिः**] क्रोधादि भावों से [**स्वयं**] आप [**परिणमति न**] परिणमन नहीं करता है [**तदा**] तो [**अपरिणामी**] अपरिणामी [**भवति**] वह अपरिणामी होगा ऐसा होने पर [**क्रोधादिभिः भावैः**] क्रोधादि भावों से [**जीवे**] जीव को [**स्वयं अपरिणममाने**] आप नही परिणत होने पर [**संसारस्य अभावः**] संसार का अभाव [**प्रसजति**] हो जायगा [**वा**] और [**सांख्यसमयः**] सांख्यमत का प्रसंग आवेगा । यदि कहेगा कि [**पुद्गलकर्म**] पुद्गलकर्म [**क्रोधः**] क्रोध है वह [**जीवं**] जीव को [**क्रोधत्वं**] क्रोध भावरूप [**परिणामयति**] परिणमाता है तो [**स्वयं अपरिणममानं**] आप स्वयं न परिणत हुए [**तं**] जीव को [**क्रोधः**] क्रोध [**कथं नु**] कैसे **परिणामयति**] परिणमा सकता है, ऐसा प्रश्न है । [**अथ**] अथवा [**ते एषा बुद्धिः**] तेरी ऐसी समझ है कि [**आत्मा**] आत्मा [**स्वयं**] अपने आप [**क्रोधभावेन**] क्रोध भाव से [**परिणमते**] परिणमन करता है तो [**क्रोधः**] क्रोध [**जीवं**] जीव को [**क्रोधत्वं**] क्रोधभावरूप [**परिणमयति**] परिणमाता है [**इति मिथ्या**] ऐसा कहना मिथ्या ठहरता है । इसलिये यह सिद्धांत है कि [**आत्मा**] आत्मा [**क्रोधोपयुक्तः**] क्रोध से उपयोग सहित होता है अर्थात् उपयोग क्रोधाकाररूप परिणमता है तब तो [**क्रोधः**] क्रोध ही है [**मानोपयुक्तः**] मान से उपयुक्त होता है तब [**मान एव**] मान ही है [**मायोपयुक्तः**] माया से उपयुक्त होता है तब [**माया**] माया ही है [**च**] और [**लोभोपयुक्तः**] लोभ से उपयुक्त होता तब है [**लोभः**] लोभ ही [**भवति**] है ।

टीका—जीव कर्म में स्वयं नहीं बंधा हुआ क्रोधादि भाव से आप नहीं परिणमता तो वह जीव

परिणाम्येव स्यात् । तथा सति संसाराभावः । अथ पुद्गलकर्मक्रोधादि जीवं क्रोधादिभावेन परिणमयति ततो न संसाराभाव इति तर्कः । किं स्वयमपरिणममानं परिणममानं वा पुद्गलकर्म क्रोधादि जीवं क्रोधादिभावेन परिणामयेत् ? न तावत्स्वयमपरिणममानः परेण परिणामयितुं पार्येत, न हि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यते । स्वयं परिणममानस्तु न परं परिणमयितारमपेक्षेत । न हि

अथ मत । **अह सयमप्पा परिणमदि कोहभावेण एस दे बुद्धी** अथ पूर्वदूषणभयात्स्वयमेवात्मा द्रव्यकर्मोदयनिरपेक्षो भावक्रोधरूपेण परिणमत्येषा तव बुद्धिः हे शिष्य, **कोहो परिणामयदे जीवं कोहत्तमिदि मिच्छा** तर्हि द्रव्यक्रोधः कर्ता जीवस्य भावक्रोधत्वं परिणामयति करोति यदुक्तं पूर्वगाथाया तद्वचनं मिथ्या प्राप्नोति । ततः स्थित — घटाकारपरिणता मृत्पिंडपुद्गलाः घट इव अग्निपरिणतोऽयःपिंडोऽग्निवत् तथात्मापि क्रोधोपयोगपरिणतः क्रोधो भवति मानोपयोगपरिणतो मानो भवति मायोपयोगपरिणतो माया भवति लोभोपयोगपरिणतो लोभो भवतीति स्थिता सिद्धा जीवस्य स्वभावभूता परिणामशक्तिः । तस्या परिणामशक्तौ स्थितायां स जीवः कर्ता य परिणाममात्मनः करोति तस्य स एवोपादानकर्ता द्रव्यकर्मोदयस्तु निमित्तमात्रमेव । तथैव च स एव जीवो निर्विकारचिच्चमत्कारशुद्धभावेन परिणतः सन् सिद्धात्मापि भवति । किं च विशेषः—**'जाव ण वेदि विसेसंतरं'** इत्याद्यज्ञानिज्ञानिजीवयो. संक्षेपव्याख्यानरूपेण गाथाषट्कं यदुक्तं पूर्वं पुण्यपापादिसप्तपदार्थजीवपुद्गलसंयोगपरिणामनिवृत्तास्ते च जीवपुद्गलयो कथंचित्परिणामित्वे सति घटंते । तस्यैव कथंचित्परिणामित्वस्य विशेषव्याख्यानमिदं । अथवा **'सामण्णपच्चया खलु चउरो'** इत्यादि गाथासप्तके यदुक्तं पूर्वं सामान्यप्रत्यया एव शुद्धनिश्चयेन कर्म कुर्वंतीति न जीव इति जैनमत । एकांतेनाकर्तृत्वे सति सांख्यानां संसाराभावदूषणं तस्यैव संसाराभावदूषणस्य विशेषदूषणमिदं । कथमिति चेत् । तत्रैकांतेन कर्तृत्वाभावे सति संसाराभावदूषणं अत्र पुनरेकांतेन परिणामित्वाभावे सति संसाराभावदूषणं । यत कारणाद्भावकर्मपरिणामित्वमेव कर्तृत्वं भोक्तृत्वं च भण्यते ॥ १२१।१२२।१२३।१२४।१२५॥ इति जीवपरिणामित्वे व्याख्यानमुख्यत्वेन गाथापंचकं गतं । एवं पुण्यपापादिसप्तपदार्थानां पीठिकारूपे महाधिकारे जीवपुद्गलपरिणामित्वव्याख्यानमुख्यत्वेनाष्टगाथाभि पंचमांतराधिकारः समाप्तः । **अथ—जाव ण वेदि विसेसंतरं तु आदासवाण दोण्हंपि । अण्णाणी तावदु** इत्यादि गाथाद्वये तावदज्ञानी जीवस्वरूपं पूर्वं भणितं स चाज्ञानी जीवो यदा **विसयकसायुग्गाढ** इत्याद्यशुभोपयोगेन परिणमति तदा पापास्रवबंधपदार्थानां त्रयाणां कर्ता भवति । यदा तु मिथ्यात्वकषायाणां मंदोदये सति भोगाकांक्षारूपनिदानबंधादिरूपेण दानपूजादिनापरिणमति तदा पुण्यपदार्थस्यापि कर्ता भवतीति पूर्वं संक्षेपेण सूचित **जइया इमेण जीवेण आदासवाण दोण्हंपि । णादं होदि विसेसंतरं तु** इत्यादिगाथाचतुष्टयेनज्ञानी जीवस्वरूप च संक्षेपेण सूचितं । स च

अपरिणामी ही होता है । ऐसा होनेपर संसार का अभाव आता है । अथवा कोई ऐसा कहे कि पुद्गल कर्म क्रोधादिक ही जीव को क्रोधादिक भाव से परिणमाते हैं इसलिये संसारका अभाव नहीं हो सकता । ऐसा कहने में दो पक्ष होते हैं कि पुद्गलकर्म क्रोधादिक जीव को अपने आप अपरिणमते को परिणमाते हैं या परिणमतेको परिणमाते हैं ? प्रथम तो जो आप नही परिणमता हो, उसमें परको परिणमन कराने की असमर्थताहै क्योंकि आप में शक्ति नही, तो परमें भी नही की जासकती । तथा जो स्वयं परिणमता हो, वह अन्य परिणमाने वाले की अपेक्षा नहीं करता क्योंकि वस्तु की शक्ति परकी अपेक्षा नही करती । अन्य में अन्य कोई नवीन शक्ति उत्पन्न नहीं कर सकता । इसलिये यह सिद्ध हुआ कि जीव स्वयमेव परिणमन स्वभाव है । ऐसा होने पर जैसे कोई मंत्रसाधक गरुड का ध्यान करता हुआ उस गरुड भावरूप

वस्तु शक्तयः परमपेक्षंते। ततो जीवः परिणामस्वभावः स्वयमेवास्तु तथा सति गरुडध्यानपरिणतः साधकः स्वयं गरुड इवाज्ञानस्वभावक्रोधादिपरिणतोपयोगः स एव स्वयं क्रोधादिः स्यादिति सिद्धं जीवस्य परिणामस्वभावत्वं ॥१२१॥१२२॥१२३॥१२४॥१२५॥

स्थितेति जीवस्य निरंतराया स्वभावभूतापरिणामशक्तिः।
तस्यां स्थितायां स करोति भावं यं स्वस्य तस्यैव भवेत्स कर्ता ॥६५॥

ज्ञानी जीवः शुद्धोपयोगभावपरिणतोऽभेदरत्नत्रयलक्षणेनाभेदज्ञानेन यदा परिणमति तदा निश्चयचारित्राविनाभाविवीतरागसम्यग्दृष्टिर्भूत्वा संवरनिर्जरामोक्षपदार्थानां त्रयाणां कर्ता भवतीत्यपि संक्षेपेण निरूपितं पूर्वं। निश्चयसम्यक्त्वस्याभावे यदा तु सरागसम्यक्त्वेन परिणमति तदा शुद्धात्मानमुपादेयं कृत्वा परंपरया निर्वाणकारणस्य तीर्थंकरप्रकृत्यादिपुण्यपदार्थस्यापि कर्ता भवतीत्यपि पूर्वं निरूपितं तत्सर्वं जीवपुद्गलयोः कथंचित्परिणामित्वे सति भवतीति तत्कथंचित्परिणामित्वमपि पुण्यपापादिसप्तपदार्थाना संक्षेपसूचनार्थं पूर्वमेव सक्षेपेण निरूपितं। पुनश्च जीवपुद्गलपरिणामित्वव्याख्यानकाले विशेषेण कथितं। तत्रैवं कथंचित्परिणामित्वे सिद्धे सति अज्ञानिज्ञानिजीवयोः गुणिनोः पुण्यपापादिसप्तपदार्थानां संक्षेपेणसूचनार्थं संक्षेपव्याख्यानं कृतं। इदानीं पुनरज्ञानमयगुणज्ञानमयगुणयोः मुख्यत्वेन व्याख्यानं क्रियते। न च जीवाजीवगुणिमुख्यत्वेनेति। किमर्थमिति चेत्? तेषामेव पुण्यपापादिसप्तपदार्थानां संक्षेपसूचनार्थमिति। तत्र **जो संगं तु मुइत्ता** इत्यादिगाथामादिं कृत्वा पाठक्रमेण गाथानवकपर्यंतं व्याख्यानं करोति। तत्रादौ गाथात्रयं ज्ञानभावमुख्यत्वेन तदनंतरं गाथाषट्कं ज्ञानिजीवस्य ज्ञानमयो भावो भवत्यज्ञानिजीवस्याज्ञानमयो भावो भवतीति मुख्यत्वेन कथ्यत इति षष्ठांतराधिकारे समुदायपातनिका। तद्यथा—कथंचित्परिणामित्वे सिद्धे सति ज्ञानी जीवो ज्ञानमयस्य भावस्य कर्ता भवतीत्यभिप्रायं मनसि संप्रधार्येदं सूत्रत्रयं प्रतिपादयति;—

जो संगं तु मुइत्ता जाणदि उवओगमप्पगं सुद्धं।
तं णिस्संगं साहुं परमट्ठवियाणया विंति॥

यः संगं तु मुक्त्वा जानाति उपयोगमयकं शुद्धं। तं निस्संगं साधुं परमार्थविज्ञायका विदंति॥ **जो संगं तु मुइत्ता जाणदि उवओग मप्पगं सुद्धं** यः परमसाधुर्बाह्याभ्यंतरपरिग्रहं मुक्त्वा वीतरागचारित्राविनाभूतभेदज्ञानेन जानात्यनुभवति। कं कर्मतापन्नं आत्मानं। कथंभूतं। विशुद्धज्ञानदर्शनोपयोगस्वभावत्वादुपयोगस्तमुपयोगं ज्ञानदर्शनोपयोगलक्षणं। पुनरपि कथंभूतं। शुद्धं भावकर्मद्रव्यकर्मनोकर्मरहितं। **तं णिस्संगं साहुं परमट्ठवियाणया विंति** तं साधुं

परिणत हुआ गरुड ही है; उसी भांति यह जीवात्मा अज्ञान स्वभाव क्रोधादिरूपपरिणत उपयोग रूप हुआ स्वयमेव क्रोधादिक ही होता है। इस प्रकार जीवका परिणमन स्वभाव होना सिद्ध हुआ।

भावार्थ—जीव परिणाम स्वभाव है। जब अपना उपयोग क्रोधादि रूप परिणमता है, तब आप क्रोधादि रूप ही होता है ॥१२१।१२२।१२३।१२४।१२५॥

अब इस अर्थ का कलश रूप काव्य कहते हैं **स्थितेति**—इत्यादि। **अर्थ**—जीव के अपने स्वभाव से ही हुई परिणमन शक्ति पूर्वकथित रीति से निर्विघ्न सिद्ध हुई। उसके सिद्ध होने से यह जीव जिस भाव को अपने करता है उसीका वह कर्ता होता है ॥६५॥

तथाहि—

जं कुणदि भावमादा कत्ता सो होदि तस्स कम्मस्स ।
णाणिस्स स णाणमओ अण्णाणमओ अणाणिस्स ॥१२६॥

यं करोति भावमात्मा कर्ता स भवति तस्य कर्मणः ।
ज्ञानिनः स ज्ञानमयोऽज्ञानमयोऽज्ञानिनः ॥१२६॥

एवमयमात्मा स्वयमेव परिणामस्वभावोपि यमेव भावमात्मनः करोति तस्यैव कर्मतामापद्यमानस्य कर्तृत्वमापद्येत । स तु ज्ञानिनः सम्यक्स्वपरविवेकेनात्यंतोदितविविक्तात्मख्यातित्वात् ज्ञानमय एव स्यात् । अज्ञानिनस्तु सम्यक्स्वपरविवेकाभावेनात्यंतप्रत्यस्तमितविविक्तात्मख्यातित्वादज्ञानमय एव स्यात् ॥ १२६ ॥

निस्संग सगरहितं विंदंति जानंति ब्रुवंति कथयंति वा । के ते, परमार्थविज्ञायका गणधरदेवादय इति ।

जो मोहं तु मुइत्ता णाणसहावाधियं मुणदि आदं ।
तं जिदमोहं साहुं परमट्ठवियाणया विंति ॥

यः मोहं तु मुक्त्वा ज्ञानस्वभावाधिकं मनुते आत्मानं । तं जितमोहं साधुं परमार्थविज्ञायका विदंति ॥ **जो मोहं तु मुइत्ता णाणसहावाधियं मुणदि आदं** यः परमसाधुः कर्ता समस्तचेतनाचेतनशुभाशुभपरद्रव्येषु मोहमुक्त्वात्मशुभाशुभमनोवचनकायव्यापाररूपयोगत्रयपरिहारपरिणताभेदरत्नत्रयलक्षणेन भेदज्ञानेन मनुते जानाति । कं कर्मतापन्नं, आत्मानं । किं विशिष्टं ? निर्विकारस्वसंवेदनज्ञानेनाधिकं परिणतं परिपूर्णं । **तं जिदमोहं साहुं परमट्ठवियाणया विंति** तं साधुं कर्मतापन्नं जितमोहं निर्मोहं विदंति जानंति । के ते ? परमार्थविज्ञायकास्तीर्थंकरपरमदेवादय इति । एवं मोहपदपरिवर्तनेन रागद्वेषक्रोधमानमायालोभकर्मनोकर्ममनोवचनकायबुद्ध्युदयशुभाशुभपरिणामश्रोत्रचक्षुर्घ्राणजिह्वास्पर्शनसंज्ञानि विंशतिसूत्राणि व्याख्येयानि । तेनैव प्रकारेण निर्मलपरमचिज्ज्योतिःपरिणतेर्विलक्षणा असंख्येयलोकमात्रविभावपरिणामा ज्ञातव्याः । अथ—

जो धम्मं तु मुइत्ता जाणदि उवओगमप्पगं सुद्धं ।
तं धम्मसंगमुक्कं परमट्ठवियाणया विंति ॥

यः धर्मं तु मुक्त्वा जानाति उपयोगमयकं शुद्धं । तं धर्मसंगमुक्तं परमार्थविज्ञायका विदंति ॥ **जो धम्मं तु मुइत्ता जाणदि उवओगमप्पगं सुद्धं** यः परमयोगींद्रः स्वसंवेदनज्ञाने स्थित्वा शुभोपयोगपरिणामरूपं धर्मं पुण्यसंगं

आगे इसी अर्थ को लेकर भावों का विशेषकर कर्ता कहते हैं;—**[आत्मा]** जो आत्मा **[यं भावं]** जिस भाव को **[करोति]** करता है **[सः]** वह **[तस्य कर्मणः]** उस भावरूप कर्म का **[कर्ता]** कर्ता **[भवति]** होता है । उस जगह **[ज्ञानिनः]** ज्ञानी के तो **[सः]** वह भाव **[ज्ञानमयः]** ज्ञानमय है और **[अज्ञानिनः]** अज्ञानी के **[अज्ञानमयः]** अज्ञानमय है ।

टीका—इस प्रकार पूर्वोक्तरीति से यह आत्मा स्वयमेव परिणमन स्वभाव है, तो भी

किं ज्ञानमयभावात्किमज्ञानमयाद्भवतीत्याह—

अण्णाणमत्रो भावो अणाणिणो कुणदि तेण कम्माणि ।
णाणमत्रो णाणिस्स दु ण कुणदि तह्मा दु कम्माणि ॥ १२७ ॥

अज्ञानमयो भावोऽज्ञानिनः करोति तेन कर्माणि ।
ज्ञानमयो ज्ञानिनस्तु न करोति तस्मात्तु कर्माणि ॥ १२७ ॥

अज्ञानिनो हि सम्यक्स्वपरविवेकाभावेनात्यंतप्रत्यस्तमितविविक्तात्मख्यातित्वाद्यस्मादज्ञानमय एव भावः स्यात् तस्मिंस्तु सति स्वपरयोरेकत्वाध्यासेन ज्ञानमात्रात्स्वस्मात्प्रभ्रष्टः पराभ्यां रागद्वेषाभ्यां सममेकीभूय प्रवर्तिताहंकारः स्वयं किलैषोहं रज्ये रुष्यामीति रज्यते रुष्यति च

त्यक्त्वा निजशुद्धात्मपरिणताभेदरत्नत्रयलक्षणेनाभेदज्ञानेन जानात्यनुभवति । क कर्मतापन्नं । आत्मानं । कथंभूतं, विशुद्धज्ञानदर्शनोपयोगपरिणत । पुनरपि कथभूतं । शुद्धं शुभाशुभसकल्पविकल्परहितं । **तं धम्मसंगमुक्कं परमट्ठवियाणया विंति** । त परमतपोधन निर्विकारस्वकीयशुद्धात्मोपलंभरूपनिश्चयधर्मविलक्षणभोगाकांक्षास्वरूपनिदानबंधादिपुण्यपरिग्रहरूपव्यवहारधर्मरहित विदति जानति । के ते ? परमार्थविज्ञायकाः प्रत्यक्षज्ञानिन इति । कि च, कथंचित्परिणामित्वे सति जीवः शुद्धोपयोगेन परिणमति पश्चान्मोक्षं साधयति परिणामित्वाभावे बद्धो बद्ध एव शुद्धोपयोगरूप परिणामांतरस्वरूपं न घटते ततश्च मोक्षाभाव इत्यभिप्राय । एवं शुद्धोपयोगरूपज्ञानमयपरिणामगुणव्याख्यानमुख्यत्वेन गाथात्रयं गतं ॥ तदनंतरं

जिस भाव को अपने करता है, वही भाव कर्म को प्राप्त होता है वह उसके आप कर्तृत्व होता है। वह भाव ज्ञानी का ज्ञानमय ही है क्योंकि उसको अच्छी प्रकार से स्वपर का भेद-ज्ञान हो गया है, उससे अत्यंत उदय को प्राप्त हुई सब पर-द्रव्य भावों से भिन्न आत्मा की ख्याति हो गई है। तथा वह भाव अज्ञानी के अज्ञानमय ही है, क्योंकि उसके भली भांति स्वपर के भेद ज्ञान का अभाव होने से भिन्न आत्मा की ख्याति अत्यंत अस्त हो गई है।

भावार्थ—ज्ञानी के तो अपना पर का भेदज्ञान हो गया है इसलिये अपने ज्ञानमय भाव का ही कर्तृत्व है और अज्ञानी के अपना परका भेदज्ञान नही है इस कारण अज्ञानमय भाव का ही कर्तृत्व है। ॥१२६॥

आगे कहते हैं कि ज्ञानमय भाव से क्या होता है और अज्ञानमय भाव से क्या होता है;—

[अज्ञानिनः] अज्ञानी का **[अज्ञानमयः]** अज्ञानमय **[भावः]** भाव है **[तेन]** इस कारण **[कर्माणि]** अज्ञानी कर्मों को **[करोति]** करता है **[तु]** और **[ज्ञानिनः]** ज्ञानी के **[ज्ञानमयः]** ज्ञानमय भाव होता है **[तस्मात्तु]** इसलिये वह ज्ञानी **[कर्माणि]** कर्मों को **[न]** नहीं **[करोति]** करता।

टीका—अज्ञानी के निश्चय से अच्छी प्रकार स्वपर का भेद ज्ञान नहीं है, इससे जिसके भिन्न आत्मा की ख्याति अत्यंत अस्त हो गई है उसके कारण अज्ञानमय ही भाव होता है। उस अज्ञानमय भाव के होने पर आत्मा के और परके एकत्व का अध्यास होने से ज्ञानमात्र अपने आत्मस्वरूप से भ्रष्ट हुआ

तस्मादज्ञानमयभावादज्ञानी परौ रागद्वेषावात्मानं कुर्वन् करोति कर्माणि। ज्ञानिनस्तु सम्यक्स्व-परविवेकेनात्यंतोदितविविक्तात्मख्यातित्वाद्यस्माद् ज्ञानमय एव भावः स्यात् तस्मिंस्तु सति स्वपर-योर्नानात्वविज्ञानेन ज्ञानमात्रे स्वस्मिन्सुनिविष्टः पराभ्यां रागद्वेषाभ्यां पृथग्भूततया स्वरसत एव निवृत्ताहंकारः स्वयं किल केवलं जानात्येव न रज्यते न च रुष्यति तस्माद् ज्ञानमयभावाद् ज्ञानी परौ रागद्वेषावात्मानमकुर्वन्न करोति कर्माणि॥ १२७॥

यथा ज्ञानमयाऽज्ञानमयभावद्वयस्य कर्ता भवति तथा कथयति—**जं कुणदि भावमादा कत्ता सो होदि तस्स भावस्स** यं भावं परिणामं करोत्यात्मा स तस्यैव भावस्यैव कर्ता भवति **णाणिस्स स णाणमओ** स च भावोऽनंतज्ञानादिचतुष्टयलक्षणकार्यसमयसारस्योत्पादकत्वेन निर्विकल्पसमाधिपरिणामपरिणतकारणसमयसारलक्षणेन भेदज्ञानेन सर्वारंभपरिणतत्वाज्ज्ञानिनो जीवस्य शुद्धात्मख्यातिप्रतीतिसंवित्त्युपलब्ध्यनुभूतिरूपेण ज्ञानमय एव भवति **अण्णाणमओ अणाणिस्स** अज्ञानिनस्तु पूर्वोक्तभेदज्ञानाभावात् शुद्धात्मानुभूतिस्वरूपाभावे सत्यज्ञानमय एव भवतीत्यर्थः॥ १२६॥ अथ किं ज्ञानमयभावात्फलं भवति किमज्ञानमयाद्भवतीति प्रश्ने प्रत्युत्तरमाह;—**अण्णाण-मओ भावो अणाणिणो कुणदि तेण कम्माणि** स्वोपलब्धिभावनाविलक्षणत्वेनाज्ञानमयभावो भण्यते। कस्मात्। यस्मात्तेन भावेन परिणामेन कर्माणि करोत्यज्ञानी जीवः। **णाणमओ णाणिस्स दु ण कुणदि तह्मा दु कम्माणि** ज्ञानिनस्तु निर्विकारचिच्चमत्कारभावनावशेन ज्ञानमयो भवति तस्माद् ज्ञानमयभावात् ज्ञानी जीवः कर्माणि न करोतीति। किं च, यथा स्तोकोप्यग्निः तृणकाष्ठराशिं महांतमपि क्षणमात्रेण दहति तथा त्रिगुप्तिसमाधि-लक्षणो भेदज्ञानाग्निरंतर्मुहूर्तेनापि बहुभवसंचितं कर्मराशिं दहतीति ज्ञात्वा सर्वतात्पर्येण तत्रैव परमसमाधौ भावना कर्तव्येति भावार्थः॥ १२७॥ अथ ज्ञानमय एव भावो भवति ज्ञानिनो जीवस्य न पुनरज्ञानमयस्तथैवाज्ञानमय एव

पर द्रव्य स्वरूप राग-द्वेष के साथ एक होकर अहंकार में प्रवृत्त हुआ अज्ञानी ऐसे मानता है कि 'मैं रागी हूँ, द्वेषी हूँ' इस प्रकार रागी द्वेषी होता है। उस रागादि स्वरूप अज्ञानमय भाव से अज्ञानी हुआ पर द्रव्य स्वरूप जो राग-द्वेष उन रूप अपने को करता हुआ कर्मों को करता है। और ज्ञानी के अच्छी तरह अपना पर का भेद ज्ञान हो गया है इसलिये जिसके भिन्न आत्मा की प्रकटता—'ख्याति' अत्यंत उदय हो गई है, उस भाव के कारण ज्ञानमय ही भाव होता है। उस भाव के होने से अपना-परका भेदज्ञान होने पर ज्ञानमात्र अपने आत्मस्वरूप में ठहरा हुआ वह ज्ञानी पर द्रव्य स्वरूप राग-द्वेष की पृथक्ता जिसके अपने रस से ही पर में अहंकार निवृत्त हो गया है, ऐसा हुआ निश्चय से केवल जानता ही है, राग-द्वेष रूप नहीं होता। इसलिये ज्ञानमय भाव से ज्ञानी हुआ पर द्रव्य स्वरूप जो राग-द्वेष उन रूप आत्मा को नहीं करता, कर्मों को नहीं करता है।

भावार्थ—इस आत्मा के जो क्रोधादिक मोह की प्रकृति का उदय आता है, उसका अपने उपयोग में रागद्वेष रूप मलिन स्वाद आता है, उसके भेदज्ञान के विना अज्ञानी हुआ ऐसा मानता है कि यह राग-द्वेष-मय मलिन उपयोग ही मेरा स्वरूप है, यही मैं हूँ, ऐसे अज्ञानरूप अहंकार से हुआ वह कर्मों को बांधता है। इस प्रकार अज्ञानमय भाव से कर्म बंध होता है। और जब ऐसा जानता है कि ज्ञान मात्र शुद्ध

ज्ञानमय एव भावः कुतो भवेद् ज्ञानिनो न पुनरन्यः ।
अज्ञानमयः सर्वः कुतोयमज्ञानिनो नान्यः ॥ ६६ ॥

णाणमया भावाओ णाणमओ चेव जायदे भावो ।
जम्हा तम्हा णाणिस्स सव्वे भावा हु णाणमया ॥ १२८ ॥
अणाणमया भावा अणाणो चेव जायए भावो ।
जम्हा तम्हा भावा अणाणमया अणाणिस्स ॥१२९॥ (युग्मम्)

ज्ञानमयाद्भावाद् ज्ञानमयश्चैव जायते भावः ।
यस्मात्तस्माज्ज्ञानिनः सर्वे भावाः खलु ज्ञानमयाः ॥ १२८ ॥
अज्ञानमयाद्भावादज्ञानश्चैव जायते भावः ।
यस्मात्तस्माद्भावादज्ञानमया अज्ञानिनः ॥ १२९ ॥

यतो ह्यज्ञानमयाद्भावाद्यः कश्चनापि भावो भवति स सर्वोप्यज्ञानमयत्वमनतिवर्तमानोऽ-

---

भवत्यज्ञानिजीवस्य न पुनर्ज्ञानमयः । किमर्थमिति चेत्:—णाणमया भावाओ णाणमओ चेव जायदे भावो जह्मा ज्ञानमयाद् भावाद् निश्चयरत्नत्रयात्मकजीवपदार्थाद् ज्ञानमय एव जायते भावः स्वशुद्धात्मावाप्तिलक्षणो मोक्ष-

---

उपयोग तो मेरा स्वरूप है, 'वह मैं हूं' ऐसा, तथा रागद्वेष हैं वे कर्म के रस हैं, मेरे स्वरूप नहीं हैं। ऐसा भेद ज्ञान होवे, तभी ज्ञानी होता है, तब अपने को रागद्वेष भावरूप नहीं करता, केवल ज्ञाता ही रहता है, तब कर्म को नहीं करता ॥१२७॥

आगे अगली गाथा के अर्थ की सूचना का काव्य कहते हैं—**ज्ञानमय** इत्यादि । **अर्थ**—यहां प्रश्न रूप वचन है कि ज्ञानी के तो ज्ञानमय ही भाव होते हैं अन्य नहीं होता यह क्यों ? और अज्ञानी के अज्ञानमय ही सब भाव होते हैं अन्य नहीं यह कैसे ? ॥ ६६ ॥

इसी प्रश्न की उत्तररूप गाथा कहते हैं:—**[यस्मात्]** जिस कारण **[ज्ञानमयात् भावात् च]** ज्ञानमय भाव से **[ज्ञानमय एव]** ज्ञानमय ही **[भावः]** भाव **[जायते]** उत्पन्न होता है। **[तस्मात्]** इस कारण **[ज्ञानिनः]** ज्ञानी के **[खलु]** निश्चय से **[सर्वे भावाः]** सब भाव **[ज्ञानमयाः]** ज्ञानमय हैं। और **[यस्मात्]** जिस कारण **[अज्ञानमयात् भावात् च]** अज्ञानमय भाव से **[अज्ञान एव]** अज्ञानमय ही **[भावः]** भाव **[जायते]** होता है **[तस्मात्]** इस कारण **[अज्ञानिनः]** अज्ञानी के **[अज्ञानमयाः]** अज्ञानमय ही **[भावाः]** भाव उत्पन्न होते हैं।

टीका—जिस कारण निश्चय से अज्ञानमय भाव से जो कुछ भाव होता है, वह सभी अज्ञान रूप को उल्लंघन नहीं करता अज्ञानमय ही होता है; इसलिए अज्ञानी के सभी भाव अज्ञानमय हैं। और

ज्ञानमय एव स्यात् ततः सर्वे एवाज्ञानमया अज्ञानिनो भावाः । यतश्च ज्ञानमयाद्भावाद्यः कश्चनापि भावो भवति स सर्वोऽपि ज्ञानमयत्वमनतिवर्तमानो ज्ञानमय एव स्यात् ततः सर्वे एव ज्ञानमया ज्ञानिनो भावाः ॥१२८॥१२९॥

ज्ञानिनो ज्ञाननिर्वृत्ताः सर्वे भावा भवंति हि ।
सर्वेऽप्यज्ञाननिर्वृत्ता भवंत्यज्ञानिनस्तु ते ॥ ६७ ॥

अथैतदेव दृष्टांतेन समर्थयते—

कणयमया भावादो जायंते कुंडलादयो भावा ।
अयमयया भावादो जह जायंते तु कडयादी ॥ १३० ॥
अण्णाणमया भावा अणाणिणो बहुविहा वि जायंते ।
णाणिस्स दु णाणमया सव्वे भावा तहा होंति ॥१३१॥(युग्मम्)

कनकमयाद्भावाज्जायंते कुंडलादयो भावाः ।
अयोमयकाद्भावाद्यथा जायंते तु कटकादयः ॥ १३० ॥
अज्ञानमयाद्भावादज्ञानिनो बहुविधा अपि जायंते ।
ज्ञानिनस्तु ज्ञानमया सर्वे भावास्तथा भवंति ॥ १३१ ॥

पर्यायो यस्मात्कारणात् **तह्मा णाणिस्स सव्वे भावा दु णाणमया** तस्मात्कारणात्स्वसंवेदनलक्षणभेदज्ञानिनो जीवस्य सर्वे भावाः परिणामा ज्ञानमया ज्ञानेन निर्वृत्ता भवति। तदपि कस्मात्, उपादानकारणसदृशं कार्यं भवतीति

जिस कारण ज्ञानमयभाव से जो कुछ भाव होता है, वह सभी ज्ञानमय रूप को नहीं उल्लघन करता हुआ ज्ञानमय ही होना है इसलिये ज्ञानी के सभी भाव ज्ञानमय है ॥ १२८ ॥ १२९ ॥

अब इसी अर्थ का कलशरूप काव्य कहते है—**ज्ञानिनो** इत्यादि । **अर्थ**—ज्ञानी के सभी भाव ज्ञान मे उत्पन्न होते हैं और अज्ञानी के सभी भाव अज्ञान से उत्पन्न होते है ॥ ६७ ॥

इस अर्थ को दृष्टांत से दृढ़ करते हैं:—**[यथा]** जैसे **[कनकमयात् भावात्]** सुवर्णमय भाव से **[कुंडलादयः भावाः]** सुवर्णमय कुंडलादिक भाव **[जायंते]** होते हैं **[तु]** और **[अयोमयात् भावात्]** लोहमय भाव से **[कटकादयः]** लोहमयी कड़े इत्यादिक भाव होते है **[तथा]** उसी प्रकार **[अज्ञानिनः]** अज्ञानी के **[अज्ञानमयात् भावात्]** अज्ञानमय भाव से **[बहुविधा अपि]** अनेक तरह के अज्ञानमय भाव **[जायंते]** होते हैं **[तु]** और **[ज्ञानिनः]** ज्ञानी के **[सर्वे]** सभी **[ज्ञानमयाः भावाः]** ज्ञानमय भाव होने से ज्ञानमयभाव **[भवंति]** होते हैं ।

यथा खलु पुद्गलस्य स्वयं परिणामस्वभावत्वे सत्यपि कारणानुविधायित्वात्कार्याणां जांबूनदमयाद्भावाज्जांबूनदजातिमनतिवर्तमानाज्जांबूनदकुंडलादय एव भावा भवेयुर्न पुनः कालायसवलयादयः। कालायसमयाद्भावाच्च कालायसजातिमनतिवर्तमानाः कालायसवलयादय एव भवेयुर्न पुनर्जांबूनदकुंडलादयः। तथा जीवस्य स्वयं परिणामस्वभावत्वे सत्यपि कारणानुविधायित्वादेव कार्याणां अज्ञानिनः स्वयमज्ञानमयाद्भावादज्ञानजातिमनतिवर्तमाना विविधा अप्यज्ञानमया एव भावा भवेयुर्न पुनर्ज्ञानमयाः, ज्ञानिनश्च स्वयं ज्ञानमयाद्भावाज्ज्ञानजातिमनतिवर्तमानाः सर्वे ज्ञानमया एव भावा भवेयुर्न पुनरज्ञानमयाः॥ १३० । १३१ ॥

वचनात्। न हि यवनालबीजे वपिते राजान्नशालिफलं भवतीति। तथैव च—**अण्णाणमया भावा अण्णाणो चेव जायए भावो** अज्ञानमयाद्भावाज्जीवपदार्थात् अज्ञानमय एव जायते भावः पर्यायो यस्मात्कारणात् **तह्मा सव्वे भावा अण्णाणमया अणाणिस्स** यतः एवं तस्मात्कारणात्सर्वे भावाः परिणामा अज्ञानमया मिथ्यात्वरागादिरूपा भवंति। कस्य, अज्ञानिनः शुद्धात्मोपलब्धिरहितस्य मिथ्यादृष्टेर्जीवस्येति ॥ १२८ ॥ १२९ ॥ अथ तदेव व्याख्यान दृष्टांतदार्ष्टांताभ्या समर्थयति.—कनकमयाद्भावात्पदार्थात् उपादानकारणसदृशं कार्यं भवतीति कृत्वा कुंडलादयो

टीका—जैसे निश्चय से पुद्गल द्रव्य स्वयं परिणाम स्वभावी होने पर भी जैसा कारण हो, उस स्वरूप कार्य होता है। अतः सुवर्णमय भाव के कारण सुवर्ण जाति का उल्लंघन न करने वाले सुवर्णमय ही कुंडल आदिक भाव होते हैं, सुवर्ण से लोहमयी कड़ाआदिक भाव नहीं होते। और लोहमय भाव से लोह की जाति को उल्लंघन न करने वाले लोहमय कड़े आदिक भाव होते हैं, लोह से सुवर्णमय कुंडल आदिक भाव नहीं होते, उसी प्रकार जीव के स्वयं परिणामभाव रूप होने पर भी 'जैसा कारण होता है वैसा ही कार्य होता है' इस न्याय से अज्ञानी के स्वयमेव अज्ञानमय भाव से अज्ञान की जाति को नहीं उल्लंघन करने वाले अनेक प्रकार के अज्ञानमय ही भाव होते हैं, ज्ञानमय भाव नही होते, और ज्ञानी के ज्ञान की जाति को नहीं उल्लघन करने वाले सब ज्ञानमय ही भाव होते हैं, अज्ञानमय नहीं होते।

भावार्थ—जैसा कारण हो, वैसा ही कार्य होता है, इस न्याय से जैसे सुवर्ण से सुवर्णमय आभूषण होते हैं, लोह से लोहमय होते हैं, उसी प्रकार अज्ञानी के अज्ञान से अज्ञानमय भाव होते हैं और ज्ञानी के ज्ञान से ज्ञानमय ही भाव होते हैं। यहां पर ऐसा आशय समझना कि अज्ञान भाव तो क्रोधादिक हैं और ज्ञान भाव क्षमा आदिक हैं। यद्यपि अविरत सम्यग्दृष्टि के चारित्र मोह के उदय से क्रोधादिक भी प्रवर्तते हैं तो भी उनमें आत्म बुद्धि नहीं है, वह इन्हें परके निमित्त से हुई उपाधि मानता है, वह उदय देकर खिर जाते हैं, आगामी ऐसा बंध नहीं करता कि जिससे संसार का भ्रमण बढ़े। और आप उद्यमी हो के उन रूप परिणमन भी नहीं करता है; उदय की जबरदस्ती से परिणमता है इसलिए वहां भी ज्ञान में ही अपना स्वामित्व मानने से उन क्रोधादिभावों का भी अन्य ज्ञेय के समान ज्ञाता ही है, कर्ता नहीं है। इस प्रकार वहां भी ज्ञानमय भाव से ज्ञान भाव ही हुआ जानना ॥१३०।१३१॥

अज्ञानमयभावानामज्ञानी व्याप्य भूमिकां।
द्रव्यकर्मनिमित्तानां भावानामेति हेतुतां ॥ ६८ ॥

अण्णाणस्स स उदओ जं जीवाणं अतच्चउवलद्धी।
मिच्छत्तस्स दु उदओ जीवस्स असद्दहाणत्तं ॥ १३२ ॥
उदओ असंजमस्स दु जं जीवाणं हवेइ अविरमणं।
जो दु कलुसोवओगो जीवाणं सो कसाउदओ ॥ १३३ ॥
तं जाण जोगउदयं जो जीवाणं तु चिट्ठउच्छाहो।
सोहणमसोहणं वा कायव्वो विरदिभावो वा ॥ १३४ ॥
एदेसु हेदुभूदेसु कम्मइयवग्गणागयं जं तु।
परिणमदे अट्ठविहं णाणावरणादिभावेहिं ॥ १३५ ॥
तं खलु जीवणिबद्धं कम्मइयवग्गणागयं जइया।
तइया दु होदि हेदू जीवो परिणामभावाणं ॥ १३६ ॥ (पंचकम्)

भावाः पर्याया. कनकमया एव भवंति। अयोमयाल्लोहमयाद्भावात्पदार्थाद् अयोमया एव भावाः पर्यायाः कटकादयो भवंति यथा येन प्रकारणेति दृष्टांतगाथा गता। अथ दार्ष्टांतमाह **अण्णाणेति** तथा पूर्वोक्तलोहदृष्टांतेनाज्ञानमयाद्भावाज्जीवपदार्थादज्ञानिनो भावाः पर्याया बहुविधा मिथ्यात्वरागादिरूपा अज्ञानमया जायते। तथैव च पूर्वोक्तजांबूनददृष्टांतेन ज्ञानिनो जीवस्य ज्ञानमयाः सर्वे भावाः पर्याया भवंति। किं च विस्तरः। वीतरागस्वसंवेदनभेदज्ञानी जीवः य शुद्धात्मभावनारूपं परिणामं करोति स परिणामः सर्वोपि ज्ञानमयो भवति। ततश्च येन ज्ञानमयपरिणामेन संसारस्थितिं छित्वा देवेंद्रलौकांतिकाविमहर्द्धिकदेवो भूत्वा घटिकाद्वयेन मतिश्रुतावधिरूपं ज्ञानमयभावं पर्यायं लभते। ततश्च विमानपरिवारादिविभूतिं जीर्णतृणमिव गणयन्पंचमहाविदेहे गत्वा पश्यति। किं पश्यतीति चेत्, तदिदं समवसरणं त एते वीतरागसर्वज्ञास्त एते भेदाभेदरत्नत्रयाराधनापरिणता गणधरदेवादयो ये पूर्वं श्रूयते परमागमे ते दृष्टाः प्रत्यक्षेणेति मत्वा, विशेषेण दृढधर्ममतिर्भूत्वा तु चतुर्थगुणस्थानयोग्यां शुद्धात्मभावनामपरित्यजन्निरंतरं धर्मध्यानेन देवलोके कालं गमयित्वा, पश्चान्मनुष्यभवे राजाधिराजमहाराजार्द्धमंडलीकमहामंडलीकबलदेवकामदेवचक्रवर्त्तितीर्थंकरपरमदेवाधिदेवपदे लब्धेपि पूर्वभववासनावासितशुद्धात्मरूप भेदभावनाबलेन मोहं न गच्छति रामपाडवादिवत्। ततश्च जिनदीक्षां गृहीत्वा सप्तर्द्धिचतुर्ज्ञानमयभावं पर्यायं लभते। तदनंतरं समस्तपुण्यपापपरिणामपरिहारपरिणताभेदरत्नत्रयलक्षणेन द्वितीयशुक्लध्यानरूपेण विशिष्टभेदभावनाबलेन स्वात्मभावनोत्थसुखामृतरसेन तृप्तो भूत्वा सर्वातिशयपरिपूर्णलोकत्रयाधिपाराध्यं परमाचिंत्यविभूतिविशेषं

आगे अगली गाथा की सूचना के अर्थ श्लोक कहते हैं—**अज्ञान** इत्यादि। अज्ञानी अज्ञानमय अपने भावों की भूमिका को व्याप्त कर आगामी द्रव्य कर्म के कारण अज्ञानादिक भाव की हेतुता को प्राप्त होता है ॥ ६८ ॥

अज्ञानस्य स उदयो या जीवानामतत्वोपलब्धिः ।
मिथ्यात्वस्य तूदयो जीवस्याश्रद्दधानत्वं ॥ १३२ ॥
उदयोऽसंयमस्य तु यज्जीवानां भवेदविरमणं ।
यस्तु कलुषोपयोगो जीवानां स कषायोदयः १३३ ॥
तं जानीहि योगोदयं यो जीवानां तु चेष्टोत्साहः ।
शोभनोऽशोभनो वा कर्तव्यो विरतिभावो वा ॥१३४॥
एतेषु हेतुभूतेषु कार्मणवर्गणागतं यत्तु ।
परिणमतेऽष्टविधं ज्ञानावरणादिभावैः ॥१३५॥
तत्खलु जीवनिबद्धं कार्मणवर्गणागतं यदा ।
तदा तु भवति हेतुर्जीवः परिणामभावानां ॥१३६॥

अतत्त्वोपलब्धिरूपेण ज्ञाने स्वदमानो अज्ञानोदयः । मिथ्यात्वासंयमकषाययोगोदयाः

केवलज्ञानरूपं भावं पर्यायं लभन इत्यभिप्रायः । अज्ञानिजीवस्तु मिथ्यात्वरागादिमयमज्ञानभावं कृत्वा नरनारकादिरूपं भावं पर्याय लभत इति भावार्थः ॥ १३० । १३१ ॥ एवं ज्ञानमयाज्ञानमयभावकथनमुख्यत्वेन गाथाषट्कं गतं । इति

यही अर्थ पांच गाथाओं द्वारा केहते हैं;—[या] जो [जीवानां] जो जीवों के [अतत्त्वोपलब्धिः] अन्यथा स्वरूप का जानना है [सः] वह [अज्ञानस्य] अज्ञान का [उदयः] उदय है [तु] और जो [जीवस्य] जीव के [अश्रद्दधानत्वं] अतत्त्वका श्रद्धान है वह [मिथ्यात्वस्य] मिथ्यात्व का [उदयः] उदय है [यत्तु] और जो [जीवानां] जीवों के [अविरमणं] अत्याग भाव [भवेत्] है [असंयमस्य] वह असंयम का [उदयः] उदय है [तु] और [यः] जो [जीवानां] जीवों के [कलुषोपयोगः] मलिन (जानपने की स्वच्छता से रहित) उपयोग है [सः] वह [कषायोदयः] कषायका उदय है [तु यः] और जो [जीवानां] जीवों के [शोभनः] शुभरूप [वा] अथवा [अशोभनः] अशुभ रूप [चेष्टोत्साहः] मनवचन काय की चेष्टा के उत्साह का [कर्तव्यः] करने योग्य [वा] अथवा [विरतिभावः] न करने योग्य व्यापार है [तं] उसे [योगोदयं] योग का उदय [जानीहि] जानो। [एतेषु] इनको [हेतुभूतेषु] हेतुभूत होनेपर [यत्तु] जो [कर्मवर्गणागतं] कार्मणवर्गणा रूप आकर प्राप्त हुआ [ज्ञानावरणादिभावैः अष्टविधं] ज्ञानावरण आदि भावों से आठ प्रकार [परिणमते] परिणमन करता है [तत् खलु] वह निश्चय से [यदा] जब [कार्मणवर्गणा गतं] कार्मणवर्गणारूप आया हुआ [जीवनिबद्धं] जीव में बंधता है [तदा तु] उस समय [परिणामभावानां] उन अज्ञानादिक परिणाम भावों का [हेतुः] कारण [जीवः] जीव [भवति] होता है।

टीका—अयथार्थ वस्तुस्वरूप की उपलब्धि से ज्ञान में जो स्वादरूप हो वह अज्ञान का उदय है।

कर्महेतवस्तन्मयाश्चत्वारो भावाः। तत्वाश्रद्धानरूपेण ज्ञाने स्वदमानो मिथ्यात्वोदयः अविरमण रूपेण ज्ञाने स्वदमानोऽसंयमोदयः कलुषोपयोगरूपेण ज्ञाने स्वदमानः कषायोदयः शुभाशुभ प्रवृत्तिनिवृत्तिव्यापाररूपेण ज्ञाने स्वदमानो योगोदयः। अथैतेषु पौद्गलिकेषु मिथ्यात्वाद्युदयेषु हेतु-

---

पूर्वोक्तप्रकारेण पुण्यपापादिसप्तपदार्थानां पीठिकारूपेण महाधिकारे कथंचित्परिणामित्वे सति ज्ञानिजीवो ज्ञानमय-भावस्य कर्ता तथैव चाज्ञानिजीवोऽज्ञानमयस्य भावस्य कर्ता भवतीति, व्याख्यानमुख्यतया गाथानवकेन षष्ठोन्तराधिकारः समाप्तः। अथ पूर्वोक्त एवाज्ञानमयभावो द्रव्यभावगतपंचप्रत्ययरूपेण पंचविधो भवति स चाज्ञानिजीवस्य शुद्धात्मैवोपादेय इत्यरोचमानस्य तमेव शुद्धात्मानं स्वसंवेदनज्ञानेनाजानतस्तमेव परमसमाधिरूपेणाभावयतश्च बंधकारणं भवतीति सप्तमांतराधिकारे समुदायपातनिका;—**मिच्छत्तस्स दु उदयं जं जीवाणं अतच्चसद्दहणं** मिथ्यात्वस्योदयो भवति जीवानामनंतज्ञानादिचतुष्टयरूपं शुद्धात्मतत्त्वमुपादेयं विहायान्यत्र यच्छ्रद्धानं रुचिरुपादेयबुद्धिः **असंजमस्स दु उदओ जं जीवाणं अविरदत्तं** असंयमस्य च स उदयो भवति जीवानामात्मसुखसंवित्त्यभावे सति विषयकषायेभ्यो यदनिवर्त्तनमिति। अथ—**अण्णाणस्स दु उदओ जं जीवाणं अतच्चउवलद्धी** अज्ञानस्योदयो भवति यत्किं भेदज्ञानं विहाय जीवानां विपरीतरूपेण परद्रव्यैकत्वेनोपलब्धिः प्रतीतिः **जो दु कसाउवओगो सो जीवाणं कसाउदओ** स जीवानां कषायोदयो भवति यः शांतात्मोपलब्धिलक्षणं शुद्धोपयोगं विहाय क्रोधादिकषायरूप उपयोगः परिणाम इति। अथ—**तं जाण जोगउदयं जं जीवाणं तु चिट्ठउच्छाहो** तं योगोदयं जानीहि त्वं हे शिष्य जीवानां मनोवचनकायवर्गणाधारेण वीर्यांतरायक्षयोपशमजनितः कर्मादानहेतुरात्मप्रदेशपरिस्पंदलक्षणः प्रयत्नरूपेण यस्तु चेष्टोत्साहो व्यापारोत्साहः **सोहणमसोहणं वा कायव्वो विरदिभावो वा** स च शुभाशुभरूपेण द्विधा भवति। तत्र व्रतादिकर्तव्यरूपः शोभनः पश्चादव्रतादिरूपो वर्जनीयः स चाशोभनः इति। अथ—**एदेसु हेदुभूदेसु कम्मइयवग्गणागयं जं तु** एतेषु पूर्वोक्तेषु उदयागतेषु हेतुभूतेषु यत् मिथ्यात्वादिपंचप्रत्ययेषु कार्मणवर्गणागतं परिणतं यदभिनवं नवतरं पुद्गलद्रव्यं **परिणमदे अट्ठविहं णाणावरणादिभावेहिं** जीवस्यसम्यग्दर्शनज्ञानचारित्रैकपरिणतिरूपपरमसामयिकाभावे सति ज्ञानावरणादिद्रव्यकर्मरूपेणाष्टविधं परिणमतीति। अथ—**तं खलु जीवणिबद्धं कम्मइयवग्गणागयं जइया** तत्पूर्वोक्तसूत्रोदितं कर्मवर्गणायोग्यमभिनवं पुद्गलद्रव्यं जीवनिबद्धं जीवसंबद्धं योगवशेनागतं यदा भवति खलु स्फुटं **तइया दु होदि हेदु जीवो परिणामभावाणं** तदा काले पूर्वोक्तेषूदयागतेषु द्रव्यप्रत्ययेषु निमित्तभूतेषु सत्सु स्वकीयगुणस्थानानुसारेण जीवो हेतुः कारणं भवति केषां परिणामरूपाणां भावानां प्रत्ययानामिति। किंच, उदयागतद्रव्यप्रत्ययनिमित्तेन मिथ्यात्वरागादि भावप्रत्ययरूपेण परिणम्य जीवो नवतरकर्मबंधस्य कारणं भवतीति तात्पर्यं। अयमत्र भावार्थः;

उसके मिथ्यात्व, असंयम, कषाय, योगादिक अज्ञानमय चार भाव हैं। जो कि ज्ञानावरणादि कर्म के कारण हैं। उनमें से जो तत्त्व के अश्रद्धान रूप से ज्ञान में आस्वाद का आना वह तो मिथ्यात्व का उदय है; जो अत्याग भाव से ज्ञान में आस्वाद रूप आये वह असंयमका उदय है, जो मलिन उपयोग से ज्ञान में आस्वाद रूप आये, वह कषाय का उदय है, और जो शुभाशुभप्रवृत्तिनिवृत्तिरूप व्यापार से ज्ञान में स्वाद रूप होता है, यह योगका उदय है। ये मिथ्यात्वादि के उदय स्वरूप चारों भाव पुद्गल के हैं, वे आगामी कर्मबंध के कारण होते हैं। उनके कारण रूप होनेपर पुद्गलद्रव्य कर्मवर्गणारूप आया

भूतेषु यत्पुद्गलद्रव्यं कर्मवर्गणागतं ज्ञानावरणादिभावैरष्टधा स्वयमेव परिणमते तत्खलु कर्मवर्गणागतं जीवनिबद्धं यदा स्यात्तदा जीवः स्वयमेवाज्ञानात्परात्मनोरेकत्वाध्यासेनाज्ञानमयानां तत्वाश्रद्धानादीनां स्वस्य परिणामभावानां हेतुर्भवति ॥ १३२।१३३।१३४।१३५।१३६ ॥

पुद्गलद्रव्यात्पृथग्भूत एव जीवस्य परिणामः;—

जीवस्स दु कम्मेण य सह परिणामा होंति रागादी ।
एवं जीवो कम्मं च दोवि रागादिमावण्णा ॥ १३७ ॥
एकस्स दु परिणामो जायदि जीवस्स रागमादीहिं ।
ता कम्मोदयहेदूहिं विणा जीवस्स परिणामो ॥ १३८ ॥ (युग्मम्)

जीवस्य तु कर्मणा च सह परिणामाः खलु भवंति रागादयः ।
एवं जीवः कर्म च द्वे अपि रागादित्वमापन्ने ॥ १३७ ॥
एकस्य तु परिणामो जायते जीवस्य रागादिभिः ।
तत्कर्मोदयहेतुभिर्विना जीवस्य परिणामः ॥ १३८ ॥

उदयागतेषु द्रव्यप्रत्ययेषु यदि जीवः स्वस्वभावं मुक्त्वा रागादिरूपेण भावप्रत्ययेन परिणमतीति तदा बंधो भवतीति नैवोदयमात्रेण घोरोपसर्गेपि पांडवादिवत्, यदि पुनरुदयमात्रेण बंधो भवति तदा सर्वदैव संसारएव । कस्मादिति चेत्, संसारिणां सर्वदैव कर्मोदयस्य विद्यमानत्वात् । इति पुण्यपापादिसप्तपदार्थानां पीठिकारूपे महाधिकारेऽज्ञानिभावः पंचप्रत्ययरूपेण शुद्धात्मस्वरूपच्युतानां जीवानां बंधकारणं भवतीति व्याख्यानमुख्यत्वेन पंचगाथाभिः सप्तमोन्तराधिकारः समाप्तः ॥ १३२।१३३।१३४।१३५।१३६ ॥ अतः परं जीवपुद्गलयोः परस्परोपादानकारणनिषेधमुख्यत्वेन गाथात्रयमित्यष्टमांतराधिकारे समुदायपातनिका । अथ निश्चयेन कर्मपुद्गलात्पृथग्भूत एव जीवस्य परिणाम इति प्रतिपादयति;—

हुआ ज्ञानावरण आदि भावों से अष्टप्रकार स्वयमेव परिणमता है । यह ज्ञानावरणादिक रूप कर्मवर्गणा रूप प्राप्त हुआ जब जीव में निबद्ध होता है, तब जीव स्वयमेव अपने अज्ञान भाव से पर और आत्मा के एकत्व का निश्चय कर अज्ञानमय अतत्व श्रद्धानादिक अपने परिणामस्वरूप भावों का कारण होता है ।

भावार्थ—अज्ञानभाव के भेदरूप जो मिथ्यात्व, अविरत, कषाय, योग रूप परिणाम हैं, वे पुद्गल के परिणाम हैं । वे ज्ञानावरणादि आगामी कर्मबंध के कारण हैं । और जीव उन मिथ्यात्वादिभावों के उदय होने से अपने अज्ञानभाव से अतत्वश्रद्धानादि भावों के रूप में परिणमन करता है, और उन अपने अज्ञान रूप भावों का कारण होता है ॥ १३२।१३३।१३४।१३५।१३६ ॥

इसी प्रकार जीव का परिणाम भी पुद्गल द्रव्य से पृथक् ही है—यदि ऐसा माना जाय कि **[जीवस्य]** जीव के **[परिणामाः]** परिणाम **[रागादयः]** रागादिक हैं वे **[खलु]** निश्चय से

यदि जीवस्य तन्निमित्तभूतविपच्यमानपुद्गलकर्मणा सहैव रागाद्यज्ञानपरिणामो भवतीति वितर्कः तदा जीवपुद्गलकर्मणोः सहभूतसुधाहरिद्रयोरिव द्वयोरपि रागाद्यज्ञानपरिणामापत्तिः। अथ चैकस्यैव जीवस्य भवति रागाद्यज्ञानपरिणामः ततः पुद्गलकर्मविपाकाद्धेतोः पृथग्भूतो जीवस्य परिणामः ॥ १३७।१३८ ॥

जीवस्स दु कम्मेण य सह परिणामा दु होंति रागादी यदि जीवस्योपादानकारणभूतस्य कर्मोदयेनोपादानभूतेन सह रागादिपरिणामा भवंति। **एवं जीवो कम्मं च दोवि रागादिमावण्णा** एवं द्वयोर्जीवपुद्गलयोः रागादिपरिणामानामुपादानकारणत्वे सति सुधाहरिद्रयोरिव द्वयोरागित्वं प्राप्नोति। तथा सति पुद्गलस्य चेतनत्वं प्राप्नोति स च प्रत्यक्षविरोध इति। अथ—**एकस्स दु परिणामो जायदि जीवस्स रागमादीहिं** अथाभिप्रायो भवतां पूर्वदूषणभयादेकस्य जीवस्यैकातेनोपादानकारणस्य रागादिपरिणामो जायते **ता कम्मोदयहेदूहिं विणा जीवस्स परिणामो** तस्मादिदं दूषणं कर्मोदयहेतुभिर्विनापि शुद्धजीवस्य रागादिपरिणामो जायते स च प्रत्यक्षविरोध आगमविरोधश्च। अथवा द्वितीयव्याख्यानं एकस्य जीवस्योपादानकारणभूतस्य कर्मोदयोपादानहेतुभिर्विना रागादिपरिणामो यदि भवति तदा सम्मतमेव। किं च द्रव्यकर्मणामनुपचरितासद्भूतव्यवहारेण कर्ता जीवः रागादिभावकर्मणामशुद्धनिश्चयेन। स चाशुद्धनिश्चयः यद्यपि द्रव्यकर्मकर्तृत्वविषयभूतस्यानुपचरितासद्भूतव्यवहारस्यापेक्षया निश्चयसंज्ञां लभते, तथापि शुद्धात्मद्रव्यविषयभूतस्य शुद्धनिश्चयस्यापेक्षया वस्तुवृत्त्या व्यवहार एवेति भावार्थः ॥ १३७।१३८ ॥

अथ निश्चयेन जीवात्पृथग्भूत एव पुद्गलकर्मणः परिणाम इति निरूपयति,—**एकस्स परिणामो पुग्गलदव्वस्स**

[कर्मणा च सह] कर्म के साथ होते हैं **[एवं तु]** इस प्रकार तो **[जीवःच कर्म]** जीव और कर्म **[द्वे अपि]** ये दोनों ही **[रागादित्वं आपन्ने]** रागादि परिणाम को प्राप्त हो जांय। अतः यह सिद्ध हुआ कि **[रागादिभिः]** इन रागादिकों से **[एकस्य जीवस्य तु]** एक जीव का ही **[परिणामः]** परिणाम **[जायते]** उत्पन्न होता है **[तत्]** वह **[कर्मोदय हेतुंविना]** कर्म के उदय रूप निमित्त कारण से पृथक् **[जीवस्य परिणामः]** एक जीव का ही परिणाम है।

टीका—यदि जीव का रागादि अज्ञान परिणाम अपने निमित्तभूत उदय में आये पुद्गल कर्म के साथ ही होता है, यह तर्क किया जाय तो जीव और पुद्गल कर्म दोनो के ही हल्दी और फिटकिरी की भांति (जैसे रंग मे हल्दी और फिटकिरी साथ डालने से उन दोनों का एक रंग स्वरूप परिणाम होता है वैसे) रागादि अज्ञान परिणाम का प्रसग आ जायगा (किन्तु ऐसा इष्ट नही है)। यदि यही माना जाय कि रागादि अज्ञान परिणाम की प्राप्ति एक जीव के ही होती है तो इस हेतु से ऐसा आया कि पुद्गल कर्म का उदय जीव के रागादि अज्ञान परिणामों का कारण है, अतः उससे पृथग्भूत ही जीव का परिणाम है।

भावार्थ—पुद्गलकर्म के उदय के साथ ही जीव का परिणाम माना जाय तो जीव और कर्म इन दोनों के रागादिक की प्राप्ति आ जाय। किन्तु ऐसा नहीं है। इसलिये पुद्गलकर्म का उदय जीव के अज्ञान रूप रागादि परिणामों को निमित्त है। उस निमित्त से भिन्न ही जीव का परिणाम है ॥ १३७।१३८ ॥

जीवात्पृथग्भूत एव पुद्गलद्रव्यस्य परिणामः

जइ जीवेण सहच्चिय पुग्गलदव्वस्स कम्मपरिणामो ।
एवं पुग्गलजीवा हु दोवि कम्मत्तमावण्णा ॥१३९॥
एकस्स दु परिणामो पुग्गलदव्वस्स कम्मभावेण ॥
ता जीवभावहेदूहिं विणा कम्मस्स परिणामो ॥१४०॥ युग्मम्

यदि जीवेन सह चैव पुद्गलद्रव्यस्य कर्मपरिणामः ।
एवं पुद्गलजीवौ खलु द्वावपि कर्मत्वमापन्नौ ॥१३९॥
एकस्य तु परिणामः पुद्गलद्रव्यस्य कर्मभावेन ।
तज्जीवभावहेतुभिर्विना कर्मणः परिणामः ॥१४०॥

यदि पुद्गलद्रव्यस्य तन्निमित्तभूतरागाद्यज्ञानपरिणामपरिणतजीवेन सहैव कर्मपरिणामो भवतीति वितर्कः तदा पुद्गलद्रव्यजीवयोः सहभूतहरिद्रासुधयोरिव द्वयोरपि कर्मपरिणामापत्तिः ।

कम्मभावेण एकस्योपादानभूतस्य कर्मवर्गणायोग्यपुद्गलद्रव्यस्य द्रव्यकर्मरूपेण परिणामः यत एवं **ता जीवभावहेदूहिं विणा कम्मस्स परिणामो** तस्मात्कारणाज्जीवगतमिथ्यात्वरागादिपरिणामोपादानहेतुभिर्विनापि द्रव्यकर्मणः परिणामः

आगे कहते हैं कि पुद्गलद्रव्य का परिणाम जीव से पृथक् ही है:—**[यदि]** यदि **[जीवेन सह चैव]** जीव के साथ ही **[पुद्गलद्रव्यस्य]** पुद्गलद्रव्य का **[कर्मपरिणामः]** कर्मरूप परिणाम होता है, ऐसा माना जाय तो **[एवं]** इस प्रकार **[पुद्गलजीवौ द्वौ अपि]** पुद्गल और जीव दोनों **[खलु]** ही **[कर्मत्वं आपन्नौ]** कर्मत्व को प्राप्त हो जायें **[तु]** तथा **[एकस्य]** एक **[पुद्गलद्रव्यस्य]** पुद्गलद्रव्य का **[कर्मभावेन]** कर्मरूप से **[परिणामः]** परिणाम होता है **[तत्]** इस लिये **[जीवभावहेतुभिः विना]** जीवभाव निमित्तकारण से पृथक् **[कर्मणः]** कर्म का **[परिणामः]** परिणाम है ।

टीका—पुद्गलद्रव्य का कर्मपरिणाम उसके निमित्तभूत रागादि अज्ञान परिणाम रूप परिणत जीव के साथ ही होता है, यदि यह तर्क किया जाय तो जैसे हल्दी और फिटकरी दोनों का साथ ही रंग का परिणाम होता है, उसी प्रकार पुद्गलद्रव्य और जीव दोनों के ही कर्म परिणाम की प्राप्ति का प्रसंग आ जाय । किन्तु यह बात नहीं है । अतः यह सिद्ध होता है कि कर्म परिणाम पुद्गलद्रव्य का ही है । इस कारण जीव के रागादि स्वरूप अज्ञान परिणाम कर्म के निमित्त कारण हैं । उनसे पृथक् ही पुद्गल कर्म का परिणाम है ।

भावार्थ—यदि पुद्गलद्रव्य का कर्म परिणाम होना जीव के साथ ही माना जाय तो दोनों के ही कर्मपरिणाम का प्रसंग आ जाय । अतः जीव का अज्ञान रूप रागादि परिणाम कर्म का निमित्त है । इस कारण पुद्गलकर्म परिणाम जीव से पृथक् ही है ॥१३९॥१४०॥

अथ चैकस्यैव पुद्गलद्रव्यस्य भवति कर्मत्वपरिणामः ततो रागादिजीवाज्ञानपरिणामाद्धेतोः पृथग्भूत एव पुद्गलकर्मणः परिणामः ॥१३९॥१४०॥

ततःकिमात्मनि बद्धस्पृष्टं किमबद्धस्पृष्टं कर्मेति नयविभागेनाह—

जीवे कम्मं बद्धं पुट्ठं चेदि ववहारणयभणिदं ।
सुद्धणयस्स दु जीवे अबद्धपुट्ठं हवइ कम्मं ॥१४१॥

जीवे कर्म बद्धं स्पृष्टं चेति व्यवहारनयभणितं ।
शुद्धनयस्य तु जीवे अबद्धस्पृष्टं भवति कर्म ॥१४१॥

जीवपुद्गलकर्मणोरेकबंधपर्यायत्वेन तदात्वेव्यतिरेकाभावाज्जीवे बद्धस्पृष्टं कर्मेति व्यवहारनयपक्षः । जीवपुद्गलकर्मणोरनेकद्रव्यत्वेनात्यंतव्यतिरेकाज्जीवेऽबद्धस्पृष्टं कर्मेति निश्चयनयपक्षः ॥१४१॥

स्यात् ॥१३९।१४०॥ इति पुण्यपापादिसप्तपदार्थाना पीठिकारूपे महाधिकारे जीवकर्मपुद्गलपरस्परोपादानकारणनिषेधमुख्यतया गाथात्रयेणाष्टमोन्तराधिकारः समाप्तः । अथानंतरं व्यवहारेण बद्धो निश्चयेनाबद्धो जीव इत्यादिविकल्परूपेण नयपक्षपातेन स्वीकारेण रहितं शुद्धपारिणामिकपरमभावग्राहकेन शुद्धद्रव्यार्थिकनयेन पुण्यपापादिपदार्थेभ्यो भिन्नं शुद्धसमयसारं गाथाचतुष्टयेन कथयतीति नवमेंतराधिकारे समुदायपातनिका । तद्यथा । अथ किमात्मनि बद्धस्पृष्टं किमबद्धस्पृष्टं कर्मेति प्रश्ने सति नयविभागेन परिहारमाह;—**जीवे कम्मं बद्धं पुट्ठं चेदि ववहारणयभणिदं** जीवेऽधिकरणभूते बद्धसंश्लेषरूपेण क्षीरनीरवत्सबद्धं स्पृष्टं योगमात्रेण लग्नं च कर्मेति व्यवहारनयपक्षो व्यवहारनयाभिप्रायः । **सुद्धणयस्स दु जीवे अबद्धपुट्ठं हवइ कम्मं** शुद्धनयस्याभिप्रायेण पुनर्जीवेधिकरणभूते अबद्धं स्पृष्टं कर्म इति निश्चयव्यवहारनयद्वयविकल्परूपं शुद्धात्मस्वरूपं न भवतीति भावार्थः ॥१४१॥ अथ यस्माद्बद्धाबद्धादिविकल्परूपं नयस्वरूपमुक्तं तस्माच्छुद्धपारिणामिकपरमभावग्राहकेण शुद्धद्रव्यार्थिकनयेन बद्धाबद्धादिनयविकल्परूपो जीवो न भवतीति प्रतिपादयति;—**कम्मं बद्धमबद्धं जीवे एवं तु जाण णयपक्खं** जीवेधिकरणभूते कर्म बद्धमबद्धं चेति योऽसौ विकल्पः स उभयोपि नय-

---

आगे पूछते है कि आत्मा मे कर्म बद्धस्पृष्ट है कि अबद्धस्पृष्ट ? उसका उत्तर नयविभाग से कहते है;—**[जीवे]** जीव मे **[कर्म]** कर्म **[बद्धं]** बद्ध है अर्थात् जीव के प्रदेशों से बंधा हुआ है **[च]** तथा **[स्पृष्टः]** स्पर्शता है **[इति]** ऐसा **[व्यवहारनयभणितं]** व्यवहारनय का वचन है **[तु]** और **[जीवे]** जीव में **[कर्म]** कर्म **[अबद्धस्पृष्टं]** अबद्धस्पृष्ट **[भवति]** है अर्थात् न बँधता है न स्पर्शता है ऐसा **[शुद्धनयस्य]** शुद्धनयका वचन है ।

टीका—जीव और पुद्गल कर्म के एक बंध पर्यायरूप से देखा जाय तो उस समय भिन्नता का अभाव है, वहां जीव में कर्म बंधते भी है, स्पर्शते भी है ऐसा कहना तो व्यवहारनय का पक्ष है और जीव तथा पुद्गल कर्म के अनेक द्रव्यत्वरूप से देखा जाय तो अत्यंत भिन्नता है, इसलिये जीव में कर्म बद्धस्पृष्ट नहीं है ऐसा कहना निश्चयनय का पक्ष है ॥१४१॥

ततः किं—

कम्मं बद्धमबद्धं जीवे एवं तु जाण णयपक्खं ।
पक्खातिक्कंतो पुण भण्णदि जो सो समयसारो ।। १४२ ।।

कर्म बद्धमबद्धं जीवे एवं तु जानीहि नयपक्षं ।
पक्षातिक्रांतः पुनर्भण्यते यः स समयसारः ।। १४२ ।।

यः किल जीवे बद्धं कर्मेति यश्च जीवेऽबद्धं कर्मेति विकल्पः स द्वितयोपि हि नयपक्षः । य एवैनमतिक्रामति स एव सकलविकल्पातिक्रांतः स्वयं निर्विकल्पैकविज्ञानघनस्वभावो भूत्वा साक्षात्समयसारः संभवति । तत्र यस्तावज्जीवे बद्धं कर्मेति विकल्पयति स जीवेऽबद्धं कर्मेति एकं पक्षमतिक्रामन्नपि न विकल्पमतिक्रामति । यस्तु जीवेऽबद्धं कर्मेति विकल्पयति सोपि जीवे बद्धं कर्मेत्येकं पक्षमतिक्रामन्नपि न विकल्पमतिक्रामति । यः पुनर्जीवे बद्धमबद्धं च कर्मेति विकल्पयति

पक्षपातः स्वीकार इत्यर्थः **पक्खातिक्कंतो पुण भण्णदि जो सो समयसारो** नयपक्षातिक्रांतो भण्यते यः स समयसारः शुद्धात्मा । तद्यथा—व्यवहारेण बद्धो जीव इति नयविकल्पः शुद्धजीवस्वरूपं न भवति निश्चयेनाबद्धो जीव

आगे कहते हैं कि ये दोनों नयपक्ष हैं उनसे क्या होता है ?— **[जीवे]** जीव में **[कर्म]** कर्म **[बद्धं]** बंधे हुए हैं अथवा **[अबद्धं]** नहीं बंधे हुए हैं **[एवं तु]** इस प्रकार तो **[नयपक्षं]** नयपक्ष **[जानीहि]** जानो **[पुनः यः]** और जो **[पक्षातिक्रांतः]** पक्ष से दूरवर्ती **[भण्यते]** कहा जाता है **[सः समयसारः]** यह समयसार है, निर्विकल्प शुद्ध आत्मतत्त्व है ।

टीका—जो निश्चयकर जीव में कर्म बंधे हुए हैं ऐसा कहना तथा जीव में कर्म नहीं बंधे हुए हैं ऐसा कहना ये दोनों ही विकल्प नयपक्ष हैं । जो इस नयपक्ष के विकल्प को लांघ कर वर्तता है अर्थात् छोड़ता है, वही समस्त विकल्पों से दूर रहता है । वही आप निर्विकल्प एक विज्ञानघनस्वभावरूप होकर साक्षात् समयसार हो जाता है । प्रथम तो जो जीव में कर्म बंधा है ऐसा विकल्प करता है वह 'जीव में कर्म नहीं बंधा है' ऐसा एक पक्षको छोड़ता हुआ भी विकल्प को नहीं छोड़ता । और जो जीव में कर्म नहीं बंधा है ऐसा विकल्प करता है वह 'जीव में कर्म बंधा है' ऐसे विकल्प रूप एक पक्ष को छोड़ता हुआ भी विकल्प को नहीं छोड़ता, और जो जीव में कर्म बंधा भी है तथा नहीं भी बंधा है ऐसा विकल्प करता है वह उन दोनों ही नयपक्षों को नहीं छोड़ता हुआ विकल्प को नहीं छोड़ता । इसलिये जो सभी नयपक्षों को छोड़ता है, वही समस्त विकल्पों को छोड़ता है तथा वही समयसार का अनुभव करता है ।

भावार्थ—जीव कर्मों से बंधा हुआ भी है तथा नहीं बंधा भी है, ये दोनों नयपक्ष हैं । उनमें से किसी ने तो बंध पक्ष को पकड़ा, उसने भी विकल्प ही ग्रहण किया; किसी ने अबंधपक्ष स्वीकार किया,

स तु तं द्वितयमपि पक्षमनतिक्रामन्न विकल्पमतिक्रामति। ततो य एव समस्तनयपक्षमतिक्रामति स एव समस्तं विकल्पमतिक्रामति। य एव समस्तं विकल्पमतिक्रामति स एव समयसारं विंदति। यद्येवं तर्हि को हि नाम नयपक्षसंन्यासभावनां न नाटयति ॥ १४२॥

य एव मुक्त्वा नयपक्षपातं स्वरूपगुप्ता निवसंति नित्यं।
विकल्पजालच्युतशांतचित्तास्त एव साक्षादमृतं पिबंति॥ ६९ ॥
एकस्य बद्धो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव॥ ७० ॥

इति च नयविकल्पः शुद्धजीवस्वरूपं न भवति निश्चयव्यवहाराभ्या बद्धाबद्धजीव इति वचनविकल्पः शुद्धजीवस्वरूपं न भवति। कस्मादिति चेत्? श्रुतविकल्पा नया इति वचनात्। श्रुतज्ञानं च क्षायोपशमिकं क्षायोपशमस्तु ज्ञानावरणीयक्षयोपशमजनितत्वात्। यद्यपि व्यवहारनयेन छद्मस्थापेक्षया जीवस्वरूपं भण्यते तथापि केवलज्ञानापेक्षयाशुद्धजीव-

---

उसने भी विकल्प ही लिया और किसी ने दोनों पक्ष लिए, उसने भी पक्ष का ही विकल्प ग्रहण किया। परंतु ऐसे विकल्पों को छोड़ जो किसी भी पक्ष को नहीं पकड़ता, वही शुद्ध पदार्थ का स्वरूप जान, उस रूप समयसार शुद्ध आत्मा को पाता है। नयों का पक्ष पकड़ना राग है, सो सब नय पक्षों को छोड़ वीतराग समयसार हो जाता है॥ १४२॥

प्रश्न—यदि ऐसा है तो नयपक्ष के त्याग की भावना को कौन नृत्य कराता है? उसका उत्तर रूप काव्य कहते हैं—**य एव** इत्यादि। **अर्थ**—जो पुरुष नय के पक्षपात को छोड़कर अपने स्वरूप में गुप्त होकर निरंतर स्थिर होते हैं, वे ही पुरुष विकल्प के जाल से रहित शांतचित्त हुए साक्षात् अमृत को पीते हैं।

भावार्थ—जब तक कुछ पक्षपात रहता है, तब तक चित्त का क्षोभ नहीं मिटता। जब सब नयों का पक्षपात मिट जाय, तब वीतराग दशा होकर स्वरूप की श्रद्धा निर्विकल्प होती है और स्वरूप में प्रवृत्ति होती है॥ ६९॥

अब नयपक्ष को प्रकट कर कहते हैं कि जो उसको छोड़ता है, वह तत्वज्ञानी होकर स्वरूप को पाता है, ऐसे अर्थ के कलशरूप बीस काव्य कहते हैं—**एकस्य** इत्यादि। **अर्थ**—एक नय का तो ऐसा पक्ष है कि यह चिन्मात्र जीव कर्म से बंधा हुआ है और दूसरे नयका पक्ष ऐसा है कि कर्म से नहीं बंधा। इस तरह दो नयों के दो पक्ष हैं। इस तरह दोनों नयों का जिसके पक्षपात है, वह तत्त्ववेदी नहीं है और जो तत्त्ववेदी है, वह पक्षपात से रहित है, उस पुरुष का चिन्मात्र आत्मा चिन्मात्र ही है, उसमें पक्षपात से कल्पना नहीं करता है।

भावार्थ—यहां शुद्धनय को प्रधान कर कथन है। वहां जीवनाम पदार्थ को शुद्ध, नित्य अभेद, चैतन्य मात्र स्थापन कर कहते हैं कि जो इस शुद्ध नयका भी पक्षपात करेगा, वह भी उस स्वरूप के स्वाद को नहीं पावेगा। अशुद्ध पक्ष की तो क्या बात है, शुद्ध नयका भी पक्षपात करेगा तो पक्ष का

एकस्य मूढो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ७१ ॥
एकस्य रक्तो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ७२ ॥
एकस्य दुष्टो (द्विष्टो) न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ७३ ॥
एकस्य कर्ता न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ७४ ॥
एकस्य भोक्ता न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥७५॥
एकस्य जीवो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥७६॥

स्वरूपं न भवति। तर्हि कथंभूतं जीवस्वरूपमिति चेत्? योसौ नयपक्षपातरहितस्वसंवेदनज्ञानी तस्याभिप्रायेण बद्धाबद्धमूढामूढादिनयविकल्परहितं चिदानंदैकस्वभावं जीवस्वरूपं भवतीति। तथा चोक्तं—

य एवमुक्त्वा नयपक्षपातं स्वरूपगुप्ता निवसंति नित्यं। विकल्पजालच्युतशांतचित्तास्त एव साक्षादमृतं पिबंति ॥६६॥

राग नहीं मिटेगा, तब वीतरागता नहीं होगी। इसलिये पक्षपात को छोड़ चिन्मात्रस्वरूप में लीन होने पर ही समयसार को पा सकता है। चैतन्य के परिणाम परनिमित्त से अनेक होते हैं, उन सबको गौण कर कहा गया है। इसलिये सब पक्षको छोड़ शुद्धस्वरूप का श्रद्धान कर स्वरूप में प्रवृत्तिरूप चारित्र होने से वीतराग दशा करनी योग्य है ॥७०॥

जैसे बद्ध अबद्ध पक्ष छुड़ाई थी उसी तरह अन्य पक्ष को प्रकट कहकर छुड़ाते हैं। **एकस्य** इत्यादि **अर्थ**—एक नयका यह पक्ष है कि जीव मोही है और दूसरी नयका यह पक्ष है कि मोही नहीं है। इस तरह ये दोनों ही चैतन्य में पक्षपात हैं। जो तत्त्ववेदी है, वह पक्षपात रहित है, उसके चित् चित् ही है, मोही अमोही नहीं है ॥७१॥

एकस्य—इत्यादि। **अर्थ**—एक नयका तो ऐसा पक्ष है कि यह जीव रागी है और दूसरे नयका ऐसा पक्षपात है कि रागी नहीं है। ये दोनों ही चैतन्य में नय के पक्षपात हैं। जो तत्त्ववेदी है, वह पक्षपातरहित है, जो चित् है, वह चित् ही है ॥७२॥

एकस्य दुष्टो इत्यादि १७ काव्यों का **अर्थ**—एक नय के तो द्वेषी है ऐसा पक्ष है और दूसरे नय के द्वेषी नहीं है। ऐसे ये चैतन्य में दोनों नयों के दो पक्षपात हैं। एक नयके कर्ता है, दूसरे नय के कर्ता नहीं है, ऐसे ये चैतन्य में दोनों नयों के दो पक्षपात हैं। एक नयके भोक्ता है, दूसरे नय के भोक्ता नहीं है। ये चैतन्य में दो नयों के दो पक्षपात हैं। एक नय के जीव है, दूसरे नय के जीव नहीं है।

एकस्य सूक्ष्मो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥७७॥
एकस्य हेतुर्न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥७८॥
एकस्य कार्यं न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥७९॥
एकस्य भावो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥८०॥
एकस्य चैको न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥८१॥
एकस्य [1]सांतो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥८२॥
एकस्य नित्यो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥८३॥
एकस्य वाच्यो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥८४॥
एकस्य नाना न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥८५॥
एकस्य चेत्यो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥८६॥

एकस्य बद्धो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ । यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥७०॥

ये चैतन्य में दोनों नयों के दो पक्षपात हैं। एक नयके सूक्ष्म है, दूसरे नयके सूक्ष्म नहीं है, ऐसे ये चैतन्य में दोनों नयों के दो पक्षपात हैं। एक नयके हेतु है, दूसरे नयके हेतु नहीं है, ये चैतन्य में० ॥ एक नयके कार्य है, दूसरे नयके कार्य नहीं है ये चैतन्य में० ॥ एक नयके भावरूप है दूसरे नयके अभाव रूप है ये चैतन्य में० ॥ एक नयके एक है, दूसरे नयके अनेक है ये चैतन्य में० ॥ एक नयके सांत है, दूसरे नयके अंत सहित नहीं है ये चैतन्य में० ॥ एक नयके नित्य है दूसरे नयके अनित्य है ये चैतन्य में० ॥ एक नयके वाच्य है, दूसरे नयके वचनगोचर नहीं है ये चैतन्य में० ॥ एक नयके नाना रूप है, दूसरे नयके नाना रूप नहीं है ये चैतन्य में० ॥ एक नयकेचेत्य अर्थात् जानने योग्य है, दूसरे नयके चेतने योग्य नहीं है ये चैतन्यमें० ॥

१. "शांतो" इत्यपि पाठः ।

एकस्य दृश्यो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ८७ ॥
एकस्य वेद्यो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ८८ ॥
एकस्य भातो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ८६ ॥
स्वेच्छासमुच्छलदनल्पविकल्पजालामेवं व्यतीत्य महतीं नयपक्षकक्षां ।
अंतर्बहिः समरसैकरसस्वभावं स्वं भावमेकमुपयात्यनुभूतिमात्रं ॥ ६० ॥
इंद्रजालमिदमेवमुच्छलत्पुष्कलोच्चलविकल्पवीचिभिः ।
यस्य विस्फुरणमेव तत्क्षणं कृत्स्नमस्यति तदस्मि चिन्महः ॥ ६१ ॥

समयाख्यानकाले या बुद्धिर्नयद्वयात्मिका। वर्तते बुद्धतत्त्वस्य सा स्वस्थस्यनिवर्तते। हेयोपादेयतत्त्वे तु विनिश्चित्य नयद्वयात् । त्यक्त्वा हेयमुपादेयेऽवस्थानं साधुसम्मतं ॥ १४२ ॥ अथ नयपक्षातिक्रांतस्य शुद्धजीवस्य किंस्वरूपमिति पृष्टे

एक नयके दृश्य है दूसरे के देखने में नहीं आता ये चैतन्य में० ॥ एक नयके वेद्य (वेदने योग्य) है दूसरे के वेदने में नहीं आता, ये चैतन्य में० ॥ एक नयके वर्तमान प्रत्यक्ष है, दूसरे के नहीं, ये दोनों नयो के चैतन्य में दो पक्षपात हैं। इस प्रकार चैतन्य सामान्य में ये सब पक्षपात हैं। जो तत्त्ववेदी है, वह स्वरूप को यथार्थ अनुभव करने वाला है, उसका चिन्मात्र भाव है, वह चिन्मात्र ही है, पक्षपात से रहित है।

भावार्थ—जीव के परनिमित्त से अनेक परिणाम होते हैं और इसमें साधारण अनेक धर्म हैं तो भी असाधारण धर्म चित्स्वभाव है। वही सामान्य भाव से शुद्धनय का विषय है, उसी को प्रधान कर कथन है। सो इसके साक्षात् अनुभव के लिये ऐसा कहा है कि इसमें नयों के अनेक पक्षपात उत्पन्न होते हैं। बद्ध-अबद्ध, मूढ़-अमूढ़, रागी-विरागी, द्वेषी-अद्वेषी, कर्ता-अकर्ता, भोक्ता-अभोक्ता, जीव-अजीव, सूक्ष्म-स्थूल, कारण-अकारण, कार्य-अकार्य, भाव-अभाव, एक-अनेक, शांत-अशांत, नित्य-अनित्य, वाच्य-अवाच्य, नाना-अनाना, चेत्य-अचेत्य, दृश्य-अदृश्य, वेद्य-अवेद्य, भात-अभात इत्यादि नयों के पक्षपात हैं। सो तत्त्व का अनुभव करने वाला पक्षपात नहीं करता, नयों को यथायोग्य विवक्षा से साधता है और चैतन्य को चेतनमात्र ही अनुभव करता है ॥ ७३ से ८६ ॥

इसी अर्थ को संक्षेप कर काव्य कहते हैं—**स्वेच्छा** इत्यादि। **अर्थ**—जो तत्त्व का जानने वाला पुरुष है, वह पूर्व कही हुई रीति से जिसमें बहुत विकल्पों के जाल अपने आप उठते हैं ऐसा जो बड़ा नय-पक्षरूप वन, उसको लांघ कर जिसमें वीतरागभाव ही एक रस है, ऐसे स्वभाव वाले अनुभूतिमात्र आत्मा के भावरूप अपने स्वरूप को प्राप्त होता है ॥ ६० ॥

फिर कहते हैं—**इंद्रजाल** इत्यादि। **अर्थ**—तत्त्ववेदी ऐसा अनुभव करता है कि मैं चिन्मात्र महातेज का पुंज हूं, जिसका स्फुरायमान होना ही, बहुत बड़ी पुष्ट उठती चंचल विकल्परूप जो लहरें उनसे

पक्षातिक्रांतस्य किंस्वरूपमिति चेत्—

दोण्हवि णयाण भणियं जाणइ णवरिं तु समयपडिबद्धो ।
ण दु णयपक्खं गिण्हदि किंचिवि णयपक्खपरिहीणो ॥ १४३ ॥

द्वयोरपि नययोर्भणितं जानाति केवलं तु समयप्रतिबद्धः ।
न तु नयपक्षं गृह्णाति किंचिदपि नयपक्षपरिहीनः ॥ १४३ ॥

यथा खलु भगवान्केवली श्रुतज्ञानावयवभूतयोर्व्यवहारनिश्चयनयपक्षयोः विश्वसाक्षितया केवलं स्वरूपमेव जानाति न तु सततमुल्लसितसहजविमलसकलकेवलज्ञानतया नित्यं स्वयमेव विज्ञानघनभूतत्वाच्छ्रुतज्ञानभूमिकातिक्रांततया समस्तनयपक्षपरिग्रहदूरीभूतत्वात्कंचनापि नयपक्षं परिगृह्णाति । तथा किल यः श्रुतज्ञानावयवभूतयोर्व्यवहारनिश्चयनयपक्षयोः क्षयोपशमविजृम्भित-श्रुतज्ञानात्मकविकल्पप्रत्युद्गमनेपि [1]परपरिग्रहप्रतिनिवृत्तौत्सुक्यतया स्वरूपमेव केवलं जानाति न तु

सति पुनर्विशेषेण कथयति;—योसौ नयपक्षपातरहितः स्वसंवेदनज्ञानी तस्याभिप्रायेण बद्धाबद्धमूढामूढादिनयविकल्परहितं चिदानंदैकस्वभावं । **दोण्हवि णयाण भणियं जाणइ** यथा भगवान् केवली निश्चयव्यवहाराभ्यां द्वाभ्यां भणितमर्थं द्रव्यपर्यायरूपं जानाति । **णवरं तु समयपरिबद्धो** तथापि नवरि केवल सहजपरमानंदैकस्वभावस्य समयस्य प्रतिबद्ध

उछलता हुआ इन नयों के प्रवर्तनरूप इन्द्रजाल, उस सब को तत्काल ही दूर करता है ।

भावार्थ—चैतन्य का अनुभव ऐसा है कि इसके होने से समस्त नयों का विकल्परूप इन्द्रजाल उसी समय विलय हो जाता है ॥ ६१ ॥

आगे पूछते हैं कि जो पक्ष से दूरवर्ती है उसका क्या स्वरूप है ? उसका उत्तर रूप गाथा कहते हैं,—जो पुरुष **[समयप्रतिबद्धः]** अपने शुद्धात्मा से प्रतिबद्ध है आत्मा को जानता है वह **[द्वयोरपि]** दोनों ही **[नययोः]** नयों के **[भणितं]** कथन को **[केवलं]** केवल **[जानाति तु]** जानता ही है **[तु]** परंतु **[नयपक्षं]** नयपक्ष को **[किंचिदपि]** कुछ भी **[न गृह्णाति]** नहीं गहण करता क्योंकि वह **[नयपक्षपरिहीनः]** नयके पक्ष से रहित है ।

टीका—जैसे केवली भगवान सर्वज्ञ वीतराग समस्त वस्तुओं के साक्षीभूत है, ज्ञाता द्रष्टा हैं । सो श्रुतज्ञान के अवयवभूत जो व्यवहार निश्चय नयके पक्षरूप दो नय उनके केवल स्वरूप को जानते ही हैं परंतु किसी भी नयके पक्ष को नहीं ग्रहण करते । क्योंकि केवली भगवान निरंतर उदय रूप स्वाभाविक निर्मल केवल ज्ञान स्वभाव है इसलिये नित्य ही स्वयमेव विज्ञान घन स्वरूप हैं । इसीलिये श्रुतज्ञान की भूमिका से अतिक्रांत होने के कारण समस्त नयपक्षों के परिग्रह से दूरवर्ती हैं । उसी प्रकार जो मति श्रुतज्ञानी है, वह भी श्रुतज्ञान के अवयवभूत व्यवहार निश्चय रूप दोनों नयों के पक्ष के स्वरूप को केवल जानता है क्योंकि इसके क्षायोपशमिक ज्ञान है, उससे उत्पन्न श्रुतज्ञान स्वरूप विकल्पों की पुनः

---

१. पर परिग्रहं प्रति, पर परिग्रह परि, इत्यपि पाठौ ।

खरतरदृष्टिगृहीतसुनिस्तुषनित्योदितचिन्मयसमयप्रतिबद्धतया तदात्वे स्वयमेव विज्ञानघनभूतत्वात् श्रुतज्ञानात्मकसमस्तांतर्बहिर्जल्परूपविकल्पभूमिकातिक्रांततया समस्तनयपक्षपरिग्रहदूरीभूतत्वात्कंचनापि नयपक्षं परिगृह्णाति स खलु निखिलविकल्पेभ्यः परतरः परमात्मा ज्ञानात्मा प्रत्यग्ज्योतिरात्मख्यातिरूपोनुभूतिमात्रः समयसारः ॥ १४३ ॥

चित्स्वभावभर[1]भावितभावाऽभावभावपरमार्थतयैकं ।
बंधपद्धतिमपास्य समस्तां चेतये समयसारमपारं ॥ ९२ ॥

आधीनः सन् **णयपक्खपरिहीणो** सततसमुल्लसन् केवलज्ञानरूपतया श्रुताज्ञानावरणीयक्षयोपशमजनितविकल्पजालरूपान्नयद्वयपक्षपाताद्दूरीभूतत्वात् **ण दु णयपक्खं गिण्हदि किंचिवि** न तु नयपक्षं विकल्पं किमप्यात्मरूपतया गृह्णाति तथाप गणधरदेवादिछद्मस्थजनोपि नयद्वयोक्तं वस्तुस्वरूप जानाति तथापि नवरि केवलं चिदानंदैक-

---

उत्पत्ति होने पर भी ज्ञेयों के ग्रहण करने में उत्सुकता की निवृत्ति है। इस कारण नयों के स्वरूप का ज्ञाता ही है, वह किसी भी नय पक्ष को नहीं ग्रहण करता क्योंकि तीक्ष्ण ज्ञान दृष्टि से ग्रहण किया जिसका निर्मल नित्य उदय ऐसा चैतन्य स्वरूप अपना शुद्धात्मा उससे इसके प्रतिबद्धता है, उससे उस स्वरूप का अनुभव करने के समय स्वयमेव केवली की तरह विज्ञानघन रूप हुआ है। इसी से श्रुतज्ञान स्वरूप जो समस्त अंतरंग और बाह्य अक्षर स्वरूप विकल्प, उसकी भूमिका से अतिक्रांत होने से केवली की तरह समस्त नय पक्ष के ग्रहण से दूरीभूत है। ऐसा मतिश्रुतज्ञानी भी निश्चय से समस्त विकल्पों से दूरवर्ती परमात्मा, ज्ञानात्मा, प्रत्यग्ज्योति, आत्मख्यातिरूप अनुभूति मात्र समयसार है।

भावार्थ—जैसे केवली भगवान् सदा नय पक्षों के ज्ञाता और द्रष्टा हैं, वैसे श्रुतज्ञानी भी जिस समय समस्त नय पक्षों से रहित होकर शुद्ध चैतन्यमात्र भाव का अनुभव करता है, तब नय पक्ष का ज्ञाता ही है। एक नय का सर्वथा पक्ष ग्रहण करे तो मिथ्यात्व से मिला हुआ पक्ष का राग हो। तथा प्रयोजन के वश से एक नय को प्रधान कर ग्रहण करे तो मिथ्यात्व के विना चारित्र मोह के पक्ष से राग रहे और जब नय पक्ष को छोड़ वस्तु स्वरूप को केवल जानता ही हो, तब उस काल श्रुतज्ञानी भी केवली की तरह वीतराग के समान ही होता है॥ १४३॥

इस अर्थ को मन में धारण कर तत्त्व वेदी ऐसा अनुभव करता है, ऐसे अर्थ रूप कहते हैं— **चित्स्वभाव** इत्यादि। **अर्थ**—मैं तत्व का जानने वाला परमात्मा का अनुभव करता हूं। जो समयसाररूप परमात्मा, चैतन्य स्वभाव के पुंज से भावित भाव अभावस्वरूप एक भाव रूप परमार्थ रूप से एक है, परमार्थ से विधि प्रतिषेध का विकल्प जिसमें नहीं है। पहले क्या करके अनुभव करता हूं? समस्त बंध की परिपाटी को दूर करके।

भावार्थ—परद्रव्य के कर्ताकर्मभाव से बंध की परिपाटी चल रही थी, उसको पहले दूरकर समयसार का अनुभव करता हूं, जो कि अपार है अर्थात् जिसके केवल ज्ञानादि गुण का पार नहीं है॥९२॥

---

१. "भर" स्थाने "पर" इत्यपि पाठः।

पक्षातिक्रांत एव समयसार इत्यवतिष्ठते;—

सम्मद्दंसणणाणं एदं लहदित्ति णवरि ववदेसं।
सव्वणयपक्खरहिदो भणिदो जो सो समयसारो ॥ १४४ ॥

सम्यग्दर्शनज्ञानमेतल्लभत इति केवलं व्यपदेशं।
सर्वनयपक्षरहितो भणितो यः स समयसारः ॥ १४४ ॥

अयमेक एव केवलं सम्यग्दर्शनज्ञानव्यपदेशं किल लभते[1]। यः खल्वखिलनयपक्षाक्षुण्णतया विश्रांतसमस्तविकल्पव्यापारः स समयसारः। यतः प्रथमतः श्रुतज्ञानावष्टंभेन ज्ञानस्वभावमात्मानं निश्चित्य ततः खल्वात्मख्यातये परख्यातिहेतूनखिला एवेंद्रियानिन्द्रियबुद्धीरवधीर्य आत्माभिमुखीकृतमतिज्ञानतत्त्वः, तथा नानाविधनयपक्षालंबनेनानेकविकल्पैराकुलयंतीः श्रुतज्ञान-

स्वभावस्य समयस्य प्रतिबद्ध आधीनः सन् श्रुतज्ञानावरणीयक्षयोपशमजनितविकल्पजालरूपान्नयद्वयपक्षपातात् शुद्धनिश्चयेन दूरीभूतत्वान्नयपक्षपातरूपं स्वीकारं विकल्पं निर्विकल्पसमाधिकाले शुद्धात्मस्वरूपतया न गृह्णाति ॥ १४३ ॥ अथ शुद्धपारिणामिकपरमभावग्राहकेण शुद्धद्रव्यार्थिकनयेन नयविकल्पस्वरूपसमस्तपक्षपातेनातिक्रांत एव समयसार इत्येव तिष्ठति **सव्वणयपक्खरहिदो भणिदो जो सो समयसारो** इन्द्रियानिंद्रियजनितबहिर्विषयसमस्तमतिज्ञानविकल्परहितः सन् बद्धाबद्धादिविकल्परूपनयपक्षपातरहितः[2] समयसारमनुभवन्नेव निर्विकल्पसमाधिस्थैः पुरुषैर्दृश्यते ज्ञायते च यत आत्मा ततः कारणात् **सम्मद्दंसणणाणं एदं लहदित्ति णवरि ववदेसं** नवरि केवलं सकलविमलकेवलदर्शनज्ञानरूपव्यपदेशं संज्ञां लभते। न च बद्धाबद्धादिव्यपदेशाविति। एवं निश्चयव्यवहारनयद्वयपक्षपातरहितशुद्धसमयसारव्याख्यानमुख्यतया गाथाचतुष्टयेन नवमोंतराधिकारः समाप्तः। इत्यनेन प्रकारेण **जाव ण वेदि विसेसं** इत्यादिगाथामादिं कृत्वा

यहां अब ऐसा नियम से सिद्ध करते हैं कि पक्ष से दूरवर्ती ही समयसार है,—**[यः]** जो **[सर्वनयपक्षरहितः]** सब नय पक्षों से रहित है **[सः]** वही **[समयसारः]** समयसार ऐसा **[भणितः]** कहा है। **[एषः]** यह समयसार ही **[केवलं]** केवल **[सम्यग्दर्शनज्ञानं]** सम्यग्दर्शन ज्ञान **[इति]** ऐसे **[व्यपदेशं]** नाम को **[लभते]** पाता है। (उसी के नाम हैं, वस्तु दो नहीं हैं)।

टीका—जो निश्चय से समस्त नय पक्ष से भेदरूप न किया जाय, ऐसे चिन्मात्र भाव से जिसमें समस्त विकल्पों के व्यापार विलय हो गए हैं ऐसा समयसार शुद्ध स्वरूप है सो यही एक केवल सम्यग्दर्शन, सम्यग्ज्ञान ऐसे नाम को पाता है। ये परमार्थ से एक ही हैं, क्योंकि आत्मा, प्रथम तो श्रुतज्ञान के अवलम्बन से ज्ञान स्वभाव आत्मा का निश्चय कर, पीछे निश्चय से आत्मा की प्रकट प्रसिद्धि होने के लिए आत्मा से पर पदार्थ के प्रकट होने का कारण जो इन्द्रिय और मन के द्वारा प्रवृत्ति रूप बुद्धि उसको गौण कर जिसने मतिज्ञान का स्वरूप आत्मा के सन्मुख किया है ऐसा होता है। और उसी प्रकार नाना प्रकार के नयों के पक्षों को अवलम्बन कर अनेक विकल्पों से आकुलता उत्पन्न कराने वाली श्रुतज्ञान की बुद्धि को भी गौण कर तथा श्रुतज्ञान को भी आत्म तत्व के स्वरूप में सन्मुख करता हुआ अत्यन्त

१. लभेत—इत्यपि पाठः। २. रहितं—इत्यपि पाठः।

बुद्धीरप्यवधीर्य श्रुतज्ञानतत्त्वमप्यात्माभिमुखीकुर्वन्नत्यंतमविकल्पो भूत्वा झगित्येव स्वरसत एव व्यक्तीभवंतमादिमध्यांतविमुक्तमनाकुलमेकं केवलमखिलस्यापि विश्वस्योपरि तरंतमिवाखंडप्रतिभासमयमनंतं विज्ञानघनं परमात्मानं समयसारं विंदन्नेवात्मा सम्यग्दृश्यते ज्ञायते च ततः सम्यग्दर्शनं ज्ञानं च समयसार एव ।। १४४ ।।

आक्रामन्नविकल्पभावमचलं पक्षैर्नयानां विना,
सारो यः समयस्य भाति निभृतैरास्वाद्यमानः स्वयं ।
विज्ञानैकरसः स एष भगवान्पुण्यः पुराणः पुमान्,
ज्ञानं दर्शनमप्ययं किमथवा यत्किंचनैकोप्ययं ।। ९३ ।।
दूरं भूरिविकल्पजालगहने भ्राम्यन्निजौघाच्च्युतो,
दूरादेव विवेकनिम्नगमनान्नीतो निजौघं बलात् ।

पाठक्रमेणाज्ञानिसज्ञानिजीवयो सक्षेपसूचनार्थं गाथाषट्क । तदनतरमज्ञानिसज्ञानिजीवयोर्विशेषव्याख्यानरूपेणैकादश गाथा । ततश्चेतनाचेतनकार्ययोरेकोपादानकर्तृत्वलक्षणद्विक्रियावादिनिराकरणमुख्यत्वेन गाथापचविंशति । तदनतरं

निर्विकल्परूप होकर तत्काल अपने निज रस से ही प्रकट हुआ आदि, मध्य और अन्त के भेद से रहित अनाकुल एक (केवल) समस्त पदार्थ समूहरूप लोक के ऊपर तैरता जैसा हो, उस तरह अखड प्रतिभासमय, अविनाशी, अनतविज्ञान घनस्वरूप, परमात्मारूप समयसार का ही अनुभव करता सम्यक् प्रकार देखा जाता है, श्रद्धान किया जाता है, सम्यक् प्रकार जाना जाता है । इसलिये यही सम्यग्दर्शन है, यही सम्यग्ज्ञान है, ऐसा यही समयसार है ।

भावार्थ—आत्मा को पहले आगम ज्ञान से ज्ञान स्वरूप निश्चय कर पीछे इन्द्रियबुद्धिरूप मतिज्ञान को भी ज्ञानमात्र मे ही मिलाके श्रुतज्ञान रूप नयो के विकल्प मेट श्रुत ज्ञान को भी निर्विकल्प कर एक ज्ञानमात्र अखड प्रतिभास का अनुभव करना यही सम्यग्दर्शन, सम्यग्ज्ञान नाम पाता है, कुछ पृथक् नही है ।। १४४ ।।

अब इसी अर्थ का कलशरूप काव्य कहते हैं—**आक्रामन्** इत्यादि । **अर्थ**—जो नयो के पक्ष विना निर्विकल्प भाव को प्राप्त हुआ निश्चय जैसा हो उस प्रकार समय (आगम, आत्मा) का सार सुशोभित होता है, जो निश्चित पुरुषो द्वारा स्वय आस्वाद्यमान है अर्थात् उन्होने अनुभव से जान लिया है वही यह भगवान्, जिसका विज्ञान ही एक रस है ऐसा पवित्र पुराण पुरुष है । इसको ज्ञान कहो अथवा दर्शन कहो अथवा कुछ अन्य नाम से कहो, जो कुछ है सो यह एक ही है, अनेक नामो से कहा जाता है ।।९३।।

अब कहते हैं कि यह आत्मा ज्ञान से च्युत हुआ था सो ज्ञान से ही आ मिलता है—**दूरं** इत्यादि । **अर्थ**—यह आत्मा अपने विज्ञानघन स्वभाव से च्युत हुआ बहुत विकल्पो के जाल के गहन वन में अत्यत

विज्ञानैकरसस्तदेकरसिनामात्मानमात्मा हरन्,
आत्मन्येव सदा गतानुगततामायात्ययं तोयवत् ।। ९४ ।।
विकल्पकः परं कर्ता विकल्पः कर्म केवलं ।
न जातु कर्तृकर्मत्वं सविकल्पस्य नश्यति ।। ९५ ।।
यः करोति स करोति केवलं यस्तु वेत्ति स तु वेत्ति केवलं ।
यः करोति न हि वेत्ति स क्वचित् यस्तु वेत्ति न करोति स क्वचित् ।। ९६ ।।
ज्ञप्तिः करोतौ न हि भासतेऽन्तः ज्ञप्तौ करोतिश्च न भासतेऽतः ।
ज्ञप्तिः करोतिश्च ततो विभिन्ने ज्ञाता न कर्तेति ततः स्थितं च ।।९७।।

प्रत्यया एव कर्म कुर्वंतीति समर्थनद्वारेण सूत्रसप्तकं । ततश्च जीवपुद्गलकथंचित्परिणामित्वस्थापनमुख्यत्वेन सूत्राष्टकं । ततः परं ज्ञानमयाज्ञानमयपरिणामकथनमुख्यतया गाथानवकं । तदनंतरमज्ञानमयभावस्य मिथ्यात्वादिपंचप्रत्ययभेद-

---

भ्रमण करता था, उस भ्रमते हुए को विवेकरूप नीचे मार्ग में गमनकर जल की भांति अपने आप अपने विज्ञानघन स्वभाव से दूर से आ मिला । कैसा है वह ? जो विज्ञान के रस के ही रसीले है उनको एक विज्ञान रूप स्वरूप ही है । ऐसा आत्मा अपने आत्मस्वभाव को अपने में ही समेटता जैसे बाह्य गया था उसी तरह अपने स्वभाव में आकर प्राप्त होता है ।

भावार्थ—जैसे जल, जल के निवास में से किसी मार्ग से बाहर निकले तो वह वन में अनेक जगह भ्रमता है, फिर कोई नीचे मार्ग से जैसा का तैसा अपने जल के निवास मे आ मिलता है । उसी प्रकार आत्मा भी अनेक विकल्पों के मार्ग द्वारा स्वभाव मे च्युत हुआ भ्रमण करता कोई भेद ज्ञान रूप (विवेक) नीचे मार्ग से अपने आप अपने को खींचता हुआ अपने स्वभाव रूप विज्ञानघन में आ मिलता है ।। ९४ ।।

अब कर्ता कर्म अधिकार को पूर्ण करते हैं सो कर्ता कर्म के संक्षेप अर्थ के कलश रूप श्लोक कहते है—**विकल्पकः** इत्यादि । **अर्थ**—विकल्प करने वाला ही केवल कर्ता है और विकल्प केवल कर्म है, अन्य कुछ कर्ता कर्म नहीं है । इस कारण जो विकल्प सहित है, उसका कर्ता कर्मत्व कभी नष्ट नही होता ।

भावार्थ—जहां तक विकल्प भाव है, वहां तक कर्ता कर्मभाव है । जिस समय विकल्प का अभाव होता है उस समय कर्ता कर्मभाव का भी अभाव हो जाता है ।। ९५ ।।

अब कहते हैं कि जो करता है वह करता ही है, जो जानता है वह जानता ही है—**यः करोति**—इत्यादि । **अर्थ**—जो करता है वह केवल करता ही है और जो जानता है वह केवल जानता ही है । जो करता है, वह कुछ जानता ही नहीं है और जो जानता है, वह कुछ भी नहीं करता है ।। ९६ ।।

इसी प्रकार करने रूप क्रिया और जानने रूप क्रिया ये दोनों भिन्न हैं—**ज्ञप्तिः** इत्यादि । **अर्थ**—जानने रूप क्रिया करने रूप क्रिया के अन्दर नही प्रतिभासित होती और करने रूप क्रिया जानने रूप

कर्ता कर्मणि नास्ति नास्ति नियतं कर्मापि तत्कर्तरि,
द्वंद्वं विप्रतिषिध्यते यदि तदा का कर्तृकर्मस्थितिः ।
ज्ञाता ज्ञातरि कर्म कर्मणि सदा व्यक्तेति वस्तुस्थिति,
नेंपथ्ये बत नानटीति रभसा मोहस्तथाप्येष किं ॥९८॥

प्रतिपादनरूपेण गाथापंचकं । ततश्च जीवपुद्गलयो. परस्परोपादानकर्तृत्वनिषेधमुख्यत्वेन गाथात्रयं । तत परं नयपक्षपातरहितशुद्धसमयसारकथनरूपेण गाथाचतुष्टयं चेति समुदायेनाष्टाधिकसप्ततिगाथाभिर्नवभिरंतराधिकारै. ॥ १४४ ॥

क्रिया के अंतरंग में नहीं प्रतिभासित होती इसलिये ज्ञप्ति क्रिया और करोति क्रिया दोनों भिन्न हैं। इस कारण यह सिद्ध हुआ कि जो ज्ञाता है, वह कर्ता नहीं है।

भावार्थ—जिस समय ऐसा परिणमन करता है कि मैं परद्रव्य को करता हूं, उस समय तो उस परिणमन क्रिया का कर्ता ही है तथा जिस समय ऐसा परिणमन करता है कि मैं परद्रव्य को जानता हूं उस समय उस जानने क्रिया रूप ज्ञाता ही है। यहां कोई पूछे कि अविरत सम्यग्दृष्टि आदि के जब तक चारित्र मोह का उदय है तब तक कषायरूप परिणमन होता है, वहां कर्ता कहें या नही ? उसका समाधान—जो अविरतसम्यग्दृष्टि आदि के श्रद्धान ज्ञानमय परद्रव्य के स्वामित्वरूप कर्तृत्वका अभिप्राय नहीं है परंतु उदय की जबरदस्ती से कषाय रूप परिणमन है, उसका यह ज्ञाता है इसलिये अज्ञान सम्बन्धी कर्तृत्व इसके नहीं है परन्तु निमित्त की जबरदस्ती के परिणमन का फल कुछ होता है वह संसार का कारण नही है। जैसे वृक्ष जड़ कटने के बाद किंचित् समय तक रहता है या नही भी रहता उसी प्रकार यहां भी जानना।

अब इसी को पुष्ट करते हैं—**कर्ता** इत्यादि। **अर्थ**—कर्ता तो कर्म में निश्चय से नही है और कर्म भी कर्ता में निश्चय से नही है। इस प्रकार दोनों का ही परस्पर विशेष से निषेध किया जाय तब कर्ता कर्म की क्या स्थिति हो सकती है ? नहीं हो सकती। तब वस्तु की मर्यादा व्यक्त रूप यह सिद्ध हुई कि ज्ञाता तो सदा ज्ञान में ही है और कर्म है वह सदा कर्म में ही है। तो भी यह मोह (अज्ञान) नेपथ्य में क्यों नाचता है ? यह बड़ा खेद है। नेपथ्य अर्थात् शांत ललित उदात्त धीर इन चार आचरणों सहित जो यह तत्त्वों का नृत्य उसमें यह मोह कैसे नाचता है ? कर्ता कर्म भाव तो नेपथ्यस्वरूप नृत्य का आभूषण नहीं है इस प्रकार खेदसहित वचन आचार्य ने कहा है।

भावार्थ— कर्म तो पुद्गल है, उसका कर्ता जीव को कहा जाय तो उन दोनों में तो बड़ा भेद है, जीव तो पुद्गल में नहीं है और पुद्गल जीव में नहीं है, तब इन दोनों के कर्ता-कर्म भाव कैसे बन सकता है ? इससे जीव तो ज्ञाता है सो ज्ञाता ही है, पुद्गल का कर्ता नहीं है। और पुद्गलकर्म है, वह कर्म ही है। वहां आचार्य ने खेद के साथ कहा है कि ऐसे प्रकट भिन्न द्रव्य हैं तो भी अज्ञानी का यह मोह कैसे नाचता है ? कि 'मैं तो कर्ता हूं और यह पुद्गल मेरा कर्म है' यह बड़ा अज्ञान है ॥९८॥

अथवा नानट्यतां तथापि ।

कर्ता कर्ता भवति न यथा कर्म कर्मापि नैव ज्ञानं ज्ञानं भवति च यथा पुद्गलः पुद्गलोपि ।
ज्ञानज्योतिर्ज्वलितमचलं व्यक्तमंतस्तथोच्चैश्चिच्छक्तीनां निकरभरतोऽत्यंतगंभीरमेतत् ॥९९॥

इति जीवाजीवौ कर्तृकर्मवेषविमुक्तौ निष्क्रांतौ ॥

इति श्रीमदमृतचंद्रसूरिविरचितायां समयसारव्याख्यायामात्मख्यातौ
कर्तृकर्मप्ररूपको द्वितीयोऽकः ॥२॥

इति श्री**जयसेनाचार्य**कृतायां समयसारव्याख्याया शुद्धात्मानुभूतिलक्षणायां तात्पर्यवृत्तौ
पुण्यपापादिसप्तपदार्थानां संबंधी पीठिकारूपस्तृतीयो महाधिकारः समाप्तः ॥२॥

फिर भी कहते हैं कि इस तरह मोह नाचे तो नाचो परंतु वस्तु का स्वरूप तो जैसा है वैसा ही रहता है—**कर्ता कर्ता** इत्यादि । **अर्थ**—यह ज्ञानज्योति अंतरंग में अतिशय से अपनी चैतन्यशक्ति के समूह के भार से अत्यंत गंभीर, जिसका थाह नहीं, इस प्रकार निश्चल व्यक्तरूप (प्रकट) हुआ तब पहले जैसे अज्ञान में आत्मा कर्ता था उस प्रकार अब कर्ता नहीं होता और इसके अज्ञान से जो पुद्गल कर्मरूप होता था, वह भी अब कर्मरूप नही होता किंतु ज्ञान तो ज्ञानरूप ही हुआ और पुद्गल पुद्गलरूप रहा, ऐसे प्रकट हुआ ।

भावार्थ—जब आत्मा ज्ञानी होता है तब ज्ञान तो ज्ञानरूप ही परिणमन करता है, पुद्गल कर्म का कर्ता नही बनता और पुद्गल पुद्गलरूप ही रहता है, कर्मरूप नहीं परिणमन करता । इस प्रकार आत्मा के यथार्थ ज्ञान होने से दोनों द्रव्यों के परिणामों में निमित्तनैमित्तक भाव नहीं होता, ऐसा सम्यग्दृष्टि के ज्ञान होता है ॥ ९९ ॥

इस प्रकार जीव और अजीव दोनों ने कर्ता कर्म के वेष मे एक होकर नृत्य के अखाड़े में प्रवेश किया था सो यथार्थ देखने वाले सम्यग्दृष्टि के ज्ञान ने दोनों पृथक् पृथक् लक्षण से दो जान लिये तब वे वेश दूरकर रंग भूमि से बाहर निकल गये । क्योंकि बहुरूपिया के वेशकी यही प्रवृत्ति है कि देखने वाला जब तक नही पहचानता तब तक चेष्टा करता रहता है और जब यथार्थ पहचान ले तब वह निजरूप प्रगट कर चेष्टा नहीं करता, वैसा ही रहता है उसी भांति यहां भी जानना ।

सवैया—जीव अनादि अज्ञान वसाय विकार उपाय वणै करता सो, ताकरि बंधन आन तणूं फल ले सुख दुःख भवाश्रमवासो । ज्ञान भये करता न वने तब बंधन होय खुलै पर पासो, आतममांहि सदा सुविलास करै सिव पाय रहे निति थासो ॥१॥" इस अधिकार की ७६ गाथा और कलसा ५५ तथा पहले अधिकार की गाथा ६८ और कलसा ४५ सब मिलकर गाथा १४४ और कलसा ९९ हुए ॥

इस प्रकार **पं० जयचंद्रजीकृत** इस समयसार ग्रंथ की आत्मख्याति नामा टीका की भाषा टीका में **कर्ता कर्म** नामा **दूसरा अधिकार पूर्ण** हुआ ॥२॥

अथ पुण्यपापाधिकारः ॥ ३ ॥

अथैकमेव कर्म द्विपात्रीभूय पुण्यपापरूपेण प्रविशति—

तदथ कर्म शुभाशुभभेदतो, द्वितयतां गतमैक्यमुपानयन्।
ग्लपितनिर्भरमोहरजा अयं, स्वयमुदेत्यवबोधसुधाप्लवः ॥ १०० ॥

एको दूरात्त्यजति मदिरां ब्राह्मणत्वाभिमानादन्यः शूद्रः स्वयमहमिति स्नाति नित्यं तयैव।
द्वावप्येतौ युगपदुदरान्निर्गतौ शूद्रिकायाः शूद्रौ साक्षादथ[1] च चरतो जातिभेदभ्रमेण॥ १०१ ॥

तत्रैवं सति जीवाजीवाधिकाररंगभूमौ नृत्यानंतरं शृङ्गारपात्रयोः परस्परपृथग्भाववत् शुद्धनिश्चयेन जीवाजीवौ

दोहा—पुण्यपाप दोऊ करम, बंधरूप दुर मानि।
शुद्ध आतमा जिन लह्यो, नमूं चरन हित जानि॥

अब टीकाकार के वचन कहते हैं—कर्म एक प्रकार ही है वह पुण्य पाप दो रूपों से प्रवेश करता है। जैसे नृत्य के अखाड़े में एक ही पुरुष अपने दो रूप दिखला कर नाच करे, उसको यथार्थज्ञानी पहचाने तब एक ही जानता है उसी प्रकार सम्यग्दृष्टि का ज्ञान यथार्थ है। यद्यपि कर्म एक ही है वही पुण्यपाप भेद से दो भेदरूप नाचता है, उसको ज्ञान एक रूप पहचान लेता है उसी ज्ञान की महिमा रूप इस अधिकार के आदि में काव्य कहते हैं—**तदथ** इत्यादि। **अर्थ**—कर्ता कर्म अधिकार के बाद यह प्रत्यक्ष अनुभव गोचर सम्यग्ज्ञान रूप चन्द्रमा स्वयं उदय को प्राप्त होता है। वह ज्ञान, शुभ अशुभ के भेद से द्विरूपता को प्राप्त हुए कर्म के एकत्व को प्राप्त करता हुआ उदय होता है।

भावार्थ—अज्ञान से कर्म एक भी दो प्रकार से दीखता था, उसे ज्ञान ने एक प्रकार दिखला दिया। जिस ज्ञान ने अतिशय मोहमयी रज दूर कर दी है अर्थात् ज्ञान में मोहरूपी रज लगी हुई थी, वह दूर कर दी तब यथार्थ ज्ञान हुआ। जैसे चन्द्रमा के सामने बादल अथवा पाले का समूह आ जाय तब यथार्थ प्रकाश नही होता, आवरण दूर होनेपर यथार्थ प्रकाश होता है, उसी भांति यहां भी जानना॥१००॥

आगे पुण्यपाप के स्वरूप का दृष्टांत रूप काव्य कहते हैं—**एको दूरात्** इत्यादि। **अर्थ**—किसी शूद्री स्त्री के उदर से एक ही समय दो पुत्र पैदा हुए। उनमें से एक तो ब्राह्मण के घर पला, उसके ब्राह्मणत्व का अभिमान हुआ कि मै ब्राह्मण हूं, उस अभिमान से मद्य को दूर से ही छोड़ देता है, छूता भी नहीं है। तथा दूसरा पुत्र उस शूद्र के घर ही रहा इसलिये 'मै शूद्र हूं' ऐसा मान कर उस मदिरा से नित्य स्नान करता है, उसे शुद्ध मानता है। जब इसका परमार्थ विचारा जाय तब दोनों ही शूद्री के पुत्र हैं क्योंकि दोनों ही शूद्री के उदर से जन्मे हैं, इस कारण साक्षात् शूद्र हैं। वे जातिभेद के भ्रम से आचरण करते हैं। इसी प्रकार पुण्य पाप कर्म जानना। विभाव परिणति से उत्पन्न हुए हैं इसलिये दोनों ही बंधरूप हैं, प्रवृत्ति के भेद से दो दीखते हैं परमार्थ दृष्टि कर्म को एक ही जानती है॥ १०१॥

१. 'साक्षादपि' इत्यपि पाठः।

कम्ममसुहं कुसीलं सुहकम्मं चावि जाणह सुसीलं ।
कह तं होदि सुसीलं जं संसारं पवेसेदि ॥ १४५ ॥

कर्माशुभं कुशीलं शुभकर्म चापि जानीत सुशीलं ।
कथं तद् भवति सुशीलं यत्संसारं प्रवेशयति ॥ १४५ ॥

शुभाशुभजीवपरिणामनिमित्तत्वे सति कारणभेदात् शुभाशुभपुद्गलपरिणाममयत्वे सति स्वभावभेदात् शुभाशुभफलपाकत्वे सत्यनुभवभेदात् शुभाशुभमोक्षबंधमार्गाश्रितत्वे सत्याश्रयभेदात् चैकमपि कर्म किंचिच्छुभं किंचिदशुभमिति केषांचित्किल पक्षः, स तु सप्रतिपक्षः । तथाहि—

कर्तृकर्मवेषविमुक्तौ निष्क्रान्ताविति । अथानंतरं निश्चयेनैकमपि पुद्गलकर्म व्यवहारेण द्विपदीभूतपुण्यपापरूपेण प्रविशति । **कम्ममसुहं कुसीलं** इत्यादि गाथामादिं कृत्वा क्रमेणैकोनविंशतिसूत्रपर्यंत पुण्यपापव्याख्यान करोति । तत्र यद्यपि पुण्यपापयोर्व्यवहारेण भेदोऽस्ति तथापि निश्चयेन नास्ति इति व्याख्यानमुख्यत्वेन सूत्रपट्कं तदनतरमध्यात्मभाषया शुद्धात्मभावनां विना आगमभाषया तु वीतरागसम्यक्त्वं विना व्रतदानादिक पुण्यबधकारणमेव न च मुक्तिकारणं । सम्यक्त्वसहितं पुनः परंपरया मुक्तिकारणं च भवति इति मुख्यतया **परमट्ठो खलु,** इत्यादिसूत्रचतुष्टयं । ततः परं निश्चयव्यवहारमोक्षमार्गमुख्यत्वेन **जीवादीसद्दहणं,** इत्यादिगाथानवम कथयतीति पुण्यपापपदार्थाधिकारसमुदाय-पातनिका । तद्यथा—ब्राह्मण्याः पुत्रद्वयं जातं तत्रैक उपनयनवशाद्ब्राह्मणो जातः द्वितीय. पुनरुपनयनाभावाच्छूद्र इति । तथैकमपि निश्चयनयेन पुद्गलकर्म शुभाशुभजीवपरिणामनिमित्तेन व्यवहारेण द्विधा भवतीति कथयतिः—**कम्ममसुहं कुसीलं सुहकम्मं चावि जाणह सुसीलं** कर्माशुभं कुत्सितं कुशीलं हेयमिति । शुभकर्म सुशीलं शोभनमुपादेयमिति केषांचिद् व्यवहारिणा पक्ष· सन् निश्चयरूपेण पक्षांतरेण बाध्यते । **किह तं होदि सुसीलं जं संसारं पवेसेदि** निश्चयवादी ब्रूते कथं तत्पुण्यकर्म सुशीलं शोभनं भवति ? यज्जीवं संसारे प्रवेशयति । हेतुस्वभावानुभवबंधरूपाश्रयाणां निश्चयेनाभेदान् कर्मभेदो नास्तीति । तथाहि हेतुस्तावत्कथ्यते, शुभाशुभपरिणामो हेतु. । स च शुद्धनिश्चयेनाशुभत्वं प्रति

आगे शुभाशुभ कर्म के स्वभाव का वर्णन करते हैं:—**[अशुभं कर्म]** अशुभ कर्म तो **[कुशीलं]** पाप स्वभाव है **[अपि च]** और **[शुभकर्म]** शुभकर्म **[सुशीलं]** पुण्य स्वभाव है ऐसा जगत् **[जानाति]** जानता है । परन्तु परमार्थदृष्टि से कहते हैं कि **[यत्]** जो **[संसारं]** प्राणी को संसार में ही **[प्रवेशयति]** प्रवेश कराता है **[तत्]** वह कर्म **[सुशीलं]** शुभ अच्छा **[कथं]** कैसे **[भवति]** हो सकता है ?

टीका—कितने एक लोकों का ऐसा पक्ष है कि कर्म एक तो है परंतु शुभ-अशुभ के भेद से दो भेद रूप है क्योंकि शुभ और अशुभ जो जीव के परिणाम है, वे उसको निमित्त है, उस रूप से कारण के भेद से भेद है, शुभ और अशुभ पुद्गल परिणाममय होने से स्वभाव के भेद से भेद है, अथवा कर्म का जो शुभ-अशुभ फल, उसके रसास्वाद के भेद से भेद है, तथा शुभ-अशुभ मोक्ष तथा बंध के मार्ग की आश्रितता होने पर आश्रय के भेद से भेद है । इस प्रकार इन चारों हेतुओं से कोई कर्म शुभ है, कोई कर्म अशुभ है, ऐसा किसी का पक्ष है । उसका निषेध करनेवाला दूसरा पक्ष है । यही कहते हैं—जो

शुभोऽशुभो वा जीवपरिणामः केवलाज्ञानमयत्वादेकस्तदेकत्वे सति कारणाभेदात् एकं कर्म। शुभोऽशुभो वा पुद्गलपरिणामः केवलपुद्गलमयत्वादेकस्तदेकत्वे सति स्वभावाभेदादेकं कर्म। शुभोऽशुभो वा फलपाकः केवलपुद्गलमयत्वादेकस्तदेकत्वे सत्यनुभवाभेदादेकं कर्म। शुभाशुभौ मोक्षबंधमार्गौ तु प्रत्येकं केवलजीवपुद्गलमयत्वादनेकौ तदनेकत्वे सत्यपि केवलपुद्गलमयबंधमार्गाश्रितत्वेनाश्रयाभेदादेकं कर्म॥ १४५ ॥

एक एव द्रव्यं पुण्यपापरूपं पुद्गलद्रव्यस्वभावः। सोऽपि निश्चयेन पुद्गलद्रव्यं प्रति, एक एव तत्फलं सुखदुःखरूपं स च फलरूपानुभवः। सोप्यात्मोत्थनिर्विकारसुखानंदापेक्षया दुःखरूपेणैक एव आश्रयस्तु शुभाशुभबंधरूपः। सोऽपिबंधं प्रत्येक एव इति हेतुस्वभावानुभवाश्रयाणां सदाप्यभेदात्। यद्यपि व्यवहारेण भेदोऽस्ति तथापि निश्चयेन शुभाशुभकर्मभेदो

शुभ अथवा अशुभ जीवका परिणाम है, वह केवल अज्ञान से एक ही है, उसके एक होने पर कारण का अभेद है इसलिये कर्म एक ही है। तथा शुभ अथवा अशुभ पुद्गल का परिणाम केवल पुद्गलमय है, इसलिये एक ही है। उसके एक होनेपर स्वभाव के अभेद से भी कर्म एक ही है। शुभ अथवा अशुभ कर्म के फल का रस केवल पुद्गलमय ही है, उसके एक होने पर आस्वाद के अभेद से भी कर्म एक ही है। शुभ अथवा अशुभ मोक्ष का और बंध का मार्ग ये दोनों पृथक् हैं, केवल जीवमय तो मोक्ष का मार्ग है और केवल पुद्गलमय बंधका मार्ग है। वे अनेक हैं, एक नहीं हैं, उनके एक न होने पर भी केवल पुद्गलमय बंधमार्ग की आश्रितता के कारण आश्रय के अभेद से कर्म एक ही है।

भावार्थ—कर्म में शुभ-अशुभ के भेद का पक्ष चार हेतुओं से कहा है, उसमें शुभका हेतु तो जीव का शुभ परिणाम है, वह अरहंतादि में भक्ति का अनुराग, जीवों में अनुकंपा परिणाम, और मंदकषाय से चित्त की उज्जवलता इत्यादि हैं। तथा अशुभ का हेतु जीव के अशुभ परिणाम; तीव्र क्रोधादिक, अशुभ लेश्या, निर्दयता, विषयासक्तता, देव गुरु आदि पूज्य पुरुषों में अविनय रूप प्रवृत्ति इत्यादिक है। इसलिये इन हेतुओं के भेद से कर्म शुभाशुभ रूप दो प्रकार के हैं। और शुभ अशुभ पुद्गल के परिणाम के भेद से स्वभाव का भेद है, शुभ द्रव्य कर्म तो सातावेदनीय, शुभ आयु, शुभ नाम, शुभ गोत्र हैं तथा अशुभ चार घातियाकर्म, असातावेदनीय, अशुभ आयु, अशुभ नाम, अशुभ गोत्र ये हैं। इनके उदय से प्राणी को इष्ट-अनिष्ट सामग्री मिलती है, ये पुद्गल के स्वभाव हैं। इनके भेद से कर्म में स्वभाव का भेद है। शुभ अशुभ अनुभव के भेद से भेद है—शुभ का अनुभव तो सुखरूप स्वाद है और अशुभ का दुःखरूप स्वाद है। शुभाशुभ आश्रय के भेद से भेद है—शुभ का तो आश्रय मोक्षमार्ग है और अशुभ का आश्रय बंधमार्ग है। ऐसा तो भेद पक्ष है। अब इस भेद का निषेधपक्ष कहते हैं—शुभ और अशुभ दोनों जीव के परिणाम अज्ञानमय हैं इसलिये दोनों का एक अज्ञान ही कारण है इसलिये हेतु के भेद से कर्म में भेद नहीं है। शुभ-अशुभ ये दोनों पुद्गल के परिणाम हैं इसलिये पुद्गल परिणामरूप स्वभाव भी दोनों का एक ही है, इस कारण स्वभाव के अभेद से भी कर्म एक ही है। शुभाशुभ फल सुखदुःखरूप स्वाद भी पुद्गलमय ही है इसलिये स्वाद के अभेद से भी कर्म एक ही है। शुभ-अशुभ मोक्ष-बंधमार्ग कहे हैं वहां भी मोक्ष-मार्ग तो केवल जीव का ही परिणाम है और बंधमार्ग केवल एक पुद्गल का ही परि-

हेतुस्वभावानुभवाश्रयाणां सदाप्यभेदान्न हि कर्मभेदः ।
तद्बंधमार्गाश्रितमेकमिष्टं स्वयं समस्तं खलु बंधहेतुः ।।१०२।।

अथोभयं कर्माविशेषेण बंधहेतुं साधयति—

सोवणियं पि णियलं बंधदि कालायसं पि जह पुरिसं ।
बंधदि एवं जीवं सुहमसुहं वा कदं कम्मं ।।१४६।।

सौवर्णिकमपि निगलं बध्नाति कालायसमपि च यथा पुरुषं ।
बध्नात्येवं जीवं शुभमशुभं वा कृतं कर्म ।।१४६।।

शुभमशुभं च कर्माविशेषेणैव पुरुषं बध्नाति बंधत्वाविशेषात् कांचनकालायसनिगलवत् ।। १४६ ।।

नास्ति इति व्यवहारवादिना पक्षो बाध्यत एव ।।१४५।। अथोभय कर्म, अविशेषेण बंधकारण साधयति,—यथा सुवर्णनिगल लोहनिगलं च अविशेषेण पुरुषं बध्नाति तथा शुभमशुभं वा कृतं कर्म अविशेषेण जीवं बध्नातीति । किंच । भोगाकांक्षानिदानरूपेण रूपलावण्यसौभाग्यकामदेवेन्द्राहमिंद्रख्यातिपूजालाभादिनिमित्त यो व्रततपश्चरणदानपूजादिकं करोति, स पुरुषः तक्रनिमित्त रत्नविक्रयवत्, भस्मनिमित्तं रत्नराशिदहनवत्, सूत्रनिमित्तं हारचूर्णवत्, कोद्रवक्षेत्रवृत्तिनिमित्तमगुरुवनच्छेदनवत् । वृथैव व्रतादिकं नाशयति । यस्तु शुद्धात्मभावनासाधनार्थं बहिरंगव्रततपश्चरणदानपूजादिकं करोति स परंपरया मोक्षं लभते इति भावार्थः ।। १४६ ।। अथोभयकर्माविशेषेण मोक्षमार्गविषये निषेधयति;—**तम्हादु कुसीलेहि य रायं मा काहि मा व संसग्गं** तस्मात् कारणात् कुशीलैः कुत्सितैः शुभाशुभकर्मभिः सह चित्त-

णाम है, आश्रय भिन्न भिन्न हैं इसलिये बंधमार्ग के आश्रय से भी कर्म एक ही है । इस प्रकार यहां कर्म के शुभाशुभ भेद के पक्ष को गौणकर निषेध किया क्योंकि यहां अभेद पक्ष प्रधान है, अतः अभेद पक्ष से देखा जाय तो कर्म एक ही है, दो नहीं है ।।१४५।। अब इसी अर्थ को लेकर कलशरूप काव्य कहते है—**हेतु** इत्यादि । **अर्थ**—हेतु, स्वभाव, अनुभव और आश्रय इन चारों के सदा काल ही अभेद से कर्म में भेद नहीं है, इसलिये बंध के मार्ग को आश्रयकर कर्म एक ही माना है क्योंकि शुभ रूप तथा अशुभरूप दोनों ही स्वयं निश्चय से बंध के ही कारण है ।।१०२।।

आगे शुभअशुभ दोनों कर्मों को ही अभेद द्वारा बंध के कारण साधते है—**[यथा]** जैसे **[कालायसं निगलं]** लोहे की बेडी **[पुरुषं बध्नाति]** पुरुष को बांधती है **[अपि]** और **[सौवर्णिकं]** सुवर्ण की **[अपि]** भी बांधती हैं **[एवं]** इसी प्रकार **[शुभं वा अशुभं]** शुभ तथा अशुभ **[कृतं कर्म]** किया हुआ कर्म **[जीवं]** जीव को **[बध्नाति]** बांधता ही है ।

टीका—शुभ और अशुभ कर्म अभेद रूप से आत्मा को बांधते ही है क्योंकि दोनों ही बंधरूप से विशेष रहित हैं । जैसे सुवर्ण की बेड़ी और लोहे की बेडी में बंध की अपेक्षा भेद नहीं है, उसी प्रकार कर्म में भी बंध अपेक्षा भेद नही है ।। १४६ ।।

अथोभयं कर्म प्रतिषेधयति—

तह्मा दु कुसीलेहिय रायं मा कुणह मा व संसग्गं ।
साधीणो हि विणासो कुसीलसंसग्गरायेण ।। १४७ ।।

तस्मात्तु कुशीलाभ्यां रागं मा कुरुत मा वा संसर्गं ।
स्वाधीनो हि विनाशः कुशीलसंसर्गरागेण ।। १४७ ।।

कुशीलशुभाशुभकर्मभ्यां सह रागसंसर्गौ प्रतिषिद्धौ बंधहेतुत्वात् कुशीलमनोरमामनोरम-करेणुकुट्टिनीरागसंसर्गवत् ।। १४७ ।।

अथोभयं कर्म प्रतिषेध्यं स्वयं दृष्टांतेन समर्थयते—

जह णाम कोवि पुरिसो कुच्छियसीलं जणं वियाणित्ता ।
वज्जेदि तेण समयं संसग्गं रायकरणं च[1] ।। १४८ ।।
एमेव कम्मपयडी सीलसहावं च कुच्छिदं णाउं ।
वज्जंति परिहरंति य तस्संसग्गं सहावरया ।। १४९ ।। (युग्मम्)

यथा नाम कोऽपि पुरुषः कुत्सितशीलं जनं विज्ञाय ।
वर्जयति तेन समकं संसर्गं रागकरणं च ।। १४८ ।।
एवमेव कर्मप्रकृतिशीलस्वभावं च कुत्सितं ज्ञात्वा ।
वर्जयंति परिहरंति च तत्संसर्गं स्वभावरताः ।। १४९ ।।

गतरागं मा कुरु । बहिरंगवचनकायगतसंसर्गं च मा कुरु । कस्मात् ? इति चेत् । **साधीणो हि विणासो कुसीलसंसग्गरायेण** कुशीलसंसर्गरागाभ्यां स्वाधीनो नियमेन विनाशः निर्विकल्पसमाधिविघातरूपः स्वार्थभ्रंशो हि स्फुटं भवति अथवा स्वाधीनस्यात्मसुखस्य विनाश इति ।। १४७ ।। अथोभयकर्म प्रति निषेधं स्वयमेव श्रीकुन्दकुन्दाचार्यदेवा दृष्टांतदार्ष्टांताभ्यां समर्थयंति;—यथा नाम स्फुटमहो वा कश्चित्पुरुषः कुत्सितशीलं जनं ज्ञात्वा **वज्जेदि तेण समयं संसग्गं रायकरणं च** तेनसमकं सह बहिरंगवचनकायगतं संसर्गं मनोगतं रागं च वर्जयतीति दृष्टांतः । **एमेव कम्मपयडी सीलसहावं हि कुच्छिदं णादुं** एवमेव पूर्वोक्तदृष्टान्त-

---

आगे शुभ अशुभ दोनों ही कर्मों का निषेध करते हैं;—**[तस्मात्]** इसलिये **[कुशीलाभ्यां]** उन दोनों कुशीलों से **[रागं]** प्रीति **[मा कुरुत]** मत करो **[वा]** अथवा **[संसर्गं च]** संबंध भी **[मा]** मत करो **[हि]** क्योंकि **[कुशीलसंसर्गरागेण]** कुशील के संसर्ग से और राग से **[स्वाधीनो विनाशः]** अपनी स्वाधीनता का विनाश होता है ।

१, 'वा' इत्यपि पाठः ।

यथा खलु कुशलः कश्चिद्वनहस्ती स्वस्य बंधाय उपसर्प्पन्तीं चटुलमुखीं मनोरमाममनोरमां वा करेणुकुट्टिनीं तत्त्वतः कुत्सितशीलां विज्ञाय तया सह रागसंसर्गौ प्रतिषेधयति। तथा किलात्माऽरागो ज्ञानी स्वस्य बंधाय उपसर्प्पंतीं मनोरमाममनोरमां वा सर्वामपि कर्मप्रकृतिं तत्त्वतः कुत्सितशीलां विज्ञाय तया सह रागसंसर्गौ प्रतिषेधयति ॥ १४८ । १४६ ॥

न्यायेन कर्मणः प्रकृतिर्शीलं स्वभावं कुत्सितं हेय ज्ञात्वा **वज्जंति परिहरंति य तं संसग्गं सहावरदा** इह जगति वर्जयन्ति तत्संसर्गं वचनकायाभ्या परिहरन्ति मनसा रागं च तस्य कर्मणः। के ते ? समस्तद्रव्यभावगतपुण्य-पापपरिणामपरिहारपरिणताभेदरत्नत्रयलक्षणनिर्विकल्पसमाधिस्वभावरता. साधव इति दाष्टांतः ॥ १४८ । १४६ ॥ अथोभयं कर्म शुद्धनिश्चयेन केवलं बंधहेतु न केवलं बंधहेतु प्रतिषेध्यं चागमेन साधयति;—**रत्तो बंधदि कम्मं मुंचदि जीवो विरागसंपण्णो** यस्मात् कारणात् रक्तः सन् कर्माणि बध्नाति। मुच्यते जीवः कर्मजनितभावेषु विराग-

---

टीका—कुशील जो शुभ-अशुभ कर्म उनके साथ राग और संगति दोनों का निषेध किया है, क्योंकि ये दोनों ही कर्म बंध के कारण हैं। जैसे कुशील जो मन को रमाने वाली अथवा नहीं रमाने वाली हथिनीरूप कुट्टनी के साथ राग और संगति करने वाले हाथी की स्वाधीनता का विनाश हो जाता है ॥ १४७ ॥

आगे दोनों कर्मों के निषेध को आप दृष्टांत से दृढ़ करते हैं,—**[यथा नाम]** जैसे **[कोपि]** कोई **[पुरुषः]** पुरुष **[कुत्सितशीलं]** निंदितस्वभाव वाले **[जनं]** किसी पुरुष को **[विज्ञाय]** जान कर **[तेन समकं]** उसके साथ **[संसर्गं]** संगति **[च रागकरणं]** और राग करना **[वर्जयति]** छोड़ देता है **[एवमेव च]** इसी तरह ज्ञानी जीव **[कर्मप्रकृतिशीलस्वभावं]** कर्म प्रकृतियों के शील स्वभाव को **[कुत्सितं ज्ञात्वा]** निन्दनीय जानकर **[वर्जयंति]** उससे राग छोड़ देते हैं **[च]** और **[तत्संसर्गं]** उसकी संगति भी **[परिहरंति]** छोड देते है पश्चात् **[स्वभावरताः]** अपने स्वभाव मे लीन हो जाते हैं।

टीका—जैसे कोई चतुर वन का हाथी अपने बंधन के लिये समीप आने वाली, चंचल मुख को लीला रूप करती मन को रमाने वाली, सुदर अथवा असुदर हथिनी रूपी कुट्टिनी को बुरी समझ उसके साथ राग तथा संसर्ग दोनों ही नहीं करता, उसी प्रकार आत्मा भी राग रहित ज्ञानी हुआ अपने बंध के कारण समीप उदय आतीं शुभरूप अथवा अशुभरूप सभी कर्म प्रकृतियों को परमार्थ से बुरी जानकर उनके साथ राग और संसर्ग नही करता।

भावार्थ—जैसे हाथी के पकड़ने को कोई हथिनी दिखलावे, तब हाथी कामांध हुआ उससे राग तथा संसर्ग कर गड्ढे में पड़ पराधीन होकर दुःख भोगता है, किन्तु (चतुर) हाथी उससे राग, संसर्ग नहीं करता, उसी प्रकार कर्म प्रकृतियों को अच्छी समझ अज्ञानी जन उनसे राग तथा संसर्ग करता है, तब बंध में पड़ संसार के दुःख भोगता है और ज्ञानी तो उनसे संसर्ग तथा राग कभी नहीं करता ॥ १४८ ॥ १४६ ॥

अथोभयं कर्मबंधहेतुं प्रतिषेध्यं चागमेन साधयति—

रत्तो बंधदि कम्मं मुंचदि जीवो विरागसंपत्तो ।
एसो जिणोवदेसो तह्मा कम्मेसु मा रज्ज ॥ १५० ॥

रक्तो बध्नाति कर्म मुच्यते जीवो विरागसम्प्राप्तः ।
एष जिनोपदेशः तस्मात् कर्मसु मा रज्यस्व ॥ १५० ॥

यः खलु रक्तोऽवश्यमेव कर्म बध्नीयात् विरक्त एव मुच्येतेत्ययमागमः स सामान्येन रक्तत्वनिमित्तत्वाच्छुभमशुभमुभयंकर्माविशेषेण बंधहेतुं साधयति तदुभयमपि कर्म प्रतिषेधयति च ॥१५० ॥

कर्म सर्वमपि सर्वविदो यद्बंधसाधनमुशन्त्यविशेषात् ।
तेन सर्वमपि तत्प्रतिषिद्धं ज्ञानमेव विहितं शिवहेतुः ॥ १०३ ॥

निषिद्धे सर्वस्मिन् सुकृतदुरिते कर्मणि किल, प्रवृत्ते नैष्कर्म्ये न खलु मुनयः संत्यशरणाः ।
तदा ज्ञाने ज्ञानं प्रतिचरितमेषां हि शरणं, स्वयं विन्दन्त्येते परममृतं तत्र निरताः ॥१०४॥

सम्पन्नः **एसो जिणोवदेसो तह्मा कम्मेसु मा रज्ज** एष प्रत्यक्षीभूतो जिनोपदेशः कर्ता, किं करोति ? उभयं कर्म बंधहेतुं न केवलं बंधहेतुं प्रतिषेध्यं हेयं च कथयति तस्मात्कारणात् शुभाशुभसंकल्पविकल्परहितत्वेन स्वकीयशुद्धात्मभावनोत्पन्ननिर्विकारसुखामृतरसस्वादेन तृप्तो भूत्वा शुभाशुभकर्मणि मा रज्यस्व रागं मा कुर्विति । एवं यद्यप्यनुपचरिता-

---

आगे शुभ तथा अशुभ दोनों ही कर्म बंध के कारण हैं और निषेध करने योग्य हैं यह बात आगम से साधते हैं;—**[रक्तः]** रागी **[जीवः]** जीव तो **[कर्म]** कर्मों को **[बध्नाति]** बांधता है **[विरागसंप्राप्तः]** तथा वैराग्य को प्राप्त हुआ जीव **[मुच्यते]** कर्म से छूट जाता है **[एषः]** यह **[जिनोपदेशः]** जिन भगवान का उपदेश है **[तस्मात्]** इस कारण भो भव्य जीवो तुम, **[कर्मसु]** कर्मों में **[मा रज्यस्व]** प्रीति मत करो, रागी मत होओ ।

टीका—जो रागी है, वह अवश्य कर्मों को बांधता ही है और जो विरक्त है, वही कर्मों से छूटता है, ऐसा यह आगम का वचन है । वह सामान्यतः राग के निमित्त से कर्म शुभ अशुभ ये दोनों हैं उनको अविशेष कर बंध का कारण साधा है इसलिए उन दोनों ही कर्मों का निषेध करते हैं ।।१५०।।

इसी अर्थ का कलश रूप काव्य कहते हैं—**कर्म** इत्यादि । **अर्थ**—सर्वज्ञ देव सभी शुभ तथा अशुभ कर्मों को सामान्य से बंध का कारण कहते हैं इसीलिए सभी कर्मों का निषेध किया है । मोक्ष का कारण एक ज्ञान ही कहा है ।। १०३ ।।

अब कहते हैं कि सभी कर्म का निषेध किया है तो मुनि किसके आश्रय मुनि पद पाल सकेंगे ? उसके निर्वाह का काव्य कहते हैं—**निषिद्धे** इत्यादि । **अर्थ**—शुभ तथा अशुभ आचरण रूप सभी कर्म का निषेध करते हुए, कर्म रहित निवृत्ति अवस्था में प्रवृत्ति करते हुए मुनि अशरण नहीं हैं । यहां पर यह

अथ ज्ञानं मोक्षहेतुं साधयति—

परमट्ठो खलु समग्रो सुद्धो जो केवली मुणी णाणी।
तह्मि ट्ठिदा सहावे मुणिणो पावंति णिव्वाणं ॥ १५१ ॥

परमार्थः खलु समयः शुद्धो यः केवली मुनिर्ज्ञानी।
तस्मिन् स्थिताः स्वभावे मुनयः प्राप्नुवंति निर्वाणं ॥ १५१ ॥

ज्ञानं हि मोक्षहेतुः, ज्ञानस्य[1] शुभाशुभकर्मणोरबंधहेतुत्वे सति मोक्षहेतुत्वस्य तथोपपत्तेः। तत्तु सकलकर्मादिजात्यंतरविविक्तचिज्जातिमात्रः[2] परमार्थ आत्मेति यावत्, स तु युगपदेकीभावप्रवृत्तज्ञानगमनमयतया[3] समयः। सकलनयपक्षासंकीर्णैकज्ञानतया शुद्धः। केवलचिन्मात्र-

---

सद्भूतव्यवहारेण द्रव्यपुण्यपापयोर्भेदोऽस्ति अशुद्धनिश्चयेन पुनस्तद्द्वयजनितेंद्रियसुखदुःखयोर्भेदोऽस्ति तथापि शुद्धनिश्चयनयेन नास्ति इति व्याख्यानमुख्यत्वेन गाथाषट्कं गतं ॥ १५० ॥ अथ विशुद्धज्ञानशब्दवाच्यं परमात्मानं मोक्षकारणं कथयति;— **परमट्ठो खलु समग्रो** उत्कृष्टार्थः परमार्थः स कः ? परमात्मा अथवा धर्मार्थकाममोक्षलक्षणेषु परमार्थेषु परम उत्कृष्टो मोक्षलक्षणोर्थः परमार्थः सोऽपि स एव। अथवा मतिश्रुतावधिमनःपर्ययकेवलज्ञानभेदरहितत्वेन निश्चयेनैकः परमार्थः सोऽपि परमात्मैव खलु स्फुटं **समग्रो** सम्यगयति गच्छति शुद्धगुणपर्यायान् परिणमतीति समयः। अथवा सम्यगयः

शंका करना ठीक नहीं कि वे मुनि पद किसके आश्रय पालेंगे। निवृत्ति अवस्था होनेपर इन मुनियों के ज्ञान में ज्ञान को ही आचरण करना शरण है। वे मुनि उस ज्ञान में लीन हुए परम अमृत को भोगते हैं।

भावार्थ—सब कर्म का त्याग होने से ज्ञान का बड़ा शरण है, उस ज्ञान में लीन होने से सब आकुलताओं से रहित परमानन्द का भोगना होता है। इसका स्वाद ज्ञानी ही जानता है, अज्ञानी कषायी जीव कर्म को ही सर्वस्व जान उसमे लीन होता है, वह ज्ञानानन्द का स्वाद नहीं जानता ॥ १५० ॥

आगे ज्ञान को मोक्ष का कारण सिद्ध करते हैं;—**[खलु]** निश्चय से **[परमार्थः समयः]** परमार्थ रूप जीव नाम पदार्थ का स्वरूप यह है कि **[यः]** जो **[शुद्धः]** शुद्ध है **[केवली]** केवली है **[मुनिः]** मुनि है **[ज्ञानी]** ज्ञानी है ये जिसके नाम हैं **[तस्मिन् स्वभावे]** उस स्वभाव में **[स्थिताः]** स्थित **[मुनयः]** मुनि **[निर्वाणं]** मोक्ष को **[प्राप्नुवंति]** प्राप्त होते हैं।

टीका—ज्ञान ही मोक्ष का कारण है क्योंकि अज्ञान शुभ अशुभ कर्म रूप है, वह बंध का कारण है अतः उसकी मोक्ष की हेतुता असिद्ध है। मोक्ष की हेतुता ज्ञान से ही बनती है, यह ज्ञान ही परमार्थ है, आत्मा है, क्योंकि समस्त कर्मों को आदि लेकर अन्य पदार्थों से भिन्न जात्यंतर चिज्जाति मात्र है वही परमार्थस्वरूप आत्मा है, जड़जाति से भिन्न है इसी को समय कहते हैं। समय शब्द का अर्थ पहले भी कह चुके हैं-सम् ऐसा तो उपसर्ग है। उसका अर्थ एक काल एक रूप प्रवर्तन है तथा अय ऐसे शब्द का अर्थ ज्ञान भी है, और गमन भी। दोनों क्रिया रूप एक काल से प्रवृत्त हों उसको समय कहते हैं,

---

१. "अज्ञानस्य शुभाशुभ कर्मणोः बंधहेतुत्वे सति"—इत्यपि पाठः। २. चिज्ज्योतिर्मात्रः" इति पाठोऽपि। ३. ज्ञानमयतया" इत्यपि पाठः।

वस्तुतया केवली। मननमात्रभावमात्रतया मुनिः। स्वयमेव ज्ञानतया ज्ञानी। स्वस्य ज्ञानस्य भाव मात्रतया स्वभावः स्वतश्चितो भवनमात्रतया सद्भावो वेति शब्दभेदेऽपि न च वस्तुभेदः ॥१५१॥

अथ ज्ञानं विधापयति—

परमट्ठम्हि दु अठिदो जो कुणदि तवं वदं च धारेई।
तं सव्वं बालतवं बालवदं विंति सव्वण्हू ॥१५२॥

परमार्थे त्वस्थितः यः करोति तपो व्रतं च धारयति।
तत्सर्वं बालतपो बालव्रतं वदन्ति सर्वज्ञाः ॥१५२॥

ज्ञानमेव मोक्षस्य कारणं विहितं परमार्थभूतज्ञानशून्यस्याज्ञानकृतयोर्व्रततपःकर्मणोः बंधहेतुत्वाद्बालव्यपदेशेन प्रतिषिद्धत्वे सति तस्यैव मोक्षहेतुत्वात् ॥१५२॥

संशयादिरहितो बोधो ज्ञानं यस्य भवति स समयः। अथवा समित्येकत्वेन परमसमरसीभावेन स्वकीयशुद्धस्वरूपे अयनं गमनं परिणमनं समयः सोऽपि स एव शुद्धो रागादिभावकर्मरहितो यः सोऽपि स एव **केवली** परद्रव्यरहितत्वेनासहायः

ऐसा प्रवर्तन जीव नाम पदार्थ का है, वही आत्मा है, उसी का शुद्ध ऐसा नाम है क्योंकि समस्त धर्म तथा धर्मी के ग्रहण करने वाले नयों के पक्षों से न मिलने वाला पृथक् ही ज्ञानत्व रूप असाधारण धर्म है, वह अन्य धर्मों से भिन्न प्रकाश रूप है, वह अन्य से नहीं मिलता। उस एक को ही शुद्ध कहते हैं, इसी को केवली कहते हैं क्योंकि एक चैतन्यमात्र वस्तुत्व इसके है; केवल शब्दका अर्थ एक है। इसी को मुनि कहते हैं क्योंकि मननमात्र अर्थात् ज्ञानमात्र भावरूप यह है, उस रूप से मुनि भी यही है और स्वयमेव ज्ञानी है ही, अतः इसको ज्ञानी भी कहते हैं। अपने ज्ञानस्वरूप के सत्तारूप प्रवर्तन के कारण स्वभाव भी इसको कहते हैं तथा अपनी चेतना का सत्ता रूप होने से सद्भाव ऐसा भी नाम है। ऐसे शब्दों के भेद से नामभेद होने पर भी वस्तुभेद नहीं है।

भावार्थ—मोक्ष का उपादान कारण आत्मा ही है सो आत्मा का परमार्थ से ज्ञान स्वभाव है। ज्ञान है वह आत्मा ही है, आत्मा है वह ज्ञान ही है, इसलिये ज्ञान को ही मोक्ष का कारण कहना युक्त है ॥१५१॥

जो यह मानता है कि बाह्य तपश्चरणादि करना ही ज्ञान है, उसको ज्ञान की विधि बतलाते हैं;— **[यः]** जो **[परमार्थे तु]** ज्ञानस्वरूप आत्मा में तो **[अस्थितः]** स्थिर नहीं है **[तपः करोति]** किन्तु तप करता है **[च]** तथा **[व्रतं धारयति]** व्रतों को धारण करता है **[तत्सर्वं]** उस सब तप व्रत को **[सर्वज्ञाः]** सर्वज्ञ देव **[बालतपः]** अज्ञान तप **[बालव्रतं]** अज्ञान व्रत **[विंदंति]** कहते हैं।

टीका—मोक्ष का कारण ज्ञान ही है यह विधि है क्योंकि परमार्थ भूत ज्ञान से शून्य अज्ञान से किये तप और व्रत रूप कर्म ये दोनों बंध के कारण हैं। इसलिये बाल तप, बालव्रत ऐसा नाम कहकर सर्वज्ञदेव ने इसका प्रतिषेध किया है। इस कारण पूर्वकथित ज्ञान ही मोक्ष का कारण है ॥१५२॥

अथ ज्ञानाज्ञाने मोक्षबंधहेतू नियमयति—

वदणियमाणि धरंता सीलाणि तहा तवं च कुव्वंता ।
परमट्ठ'वाहिरा जे णिव्वाणं ते ण विंदंति ॥१५३॥

व्रतनियमान् धारयंतः शीलानि तथा तपश्च कुर्वंतः ।
परमार्थबाह्या ये निर्वाणं ते न विंदंति ॥ १५३ ॥

ज्ञानमेव मोक्षहेतुस्तदभावे स्वयमज्ञानभूतानामज्ञानिनामन्तर्व्रतनियमशीलतपः प्रभृतिशुभकर्मसद्भावेऽपि मोक्षाभावात् । अज्ञानमेव बंधहेतुः, तदभावे स्वयं ज्ञानभूतानां ज्ञानिनां बहिर्व्रतनियमशीलतपः प्रभृतिशुभकर्मासद्भावेऽपि मोक्षसद्भावात् ॥ १५३ ॥

केवली सोऽपि स एव **मुणी** मुनिः स एव **णाणी** विशुद्धज्ञानमस्यास्तीति ज्ञानी सोऽपि प्रत्यक्षज्ञानी सोऽपि परमार्थैव । **तह्मि ट्ठिदा सहावे मुणिणो पावंति णिव्वाणं ।** तस्मिन् परमात्मस्वभावे स्थिता वीतरागस्वसंवेदनज्ञानरता मुनयस्तपोधना निर्वाणं प्राप्नुवंति लभत इत्यर्थः ॥१५१॥ अथ तस्मिन्नेव परमात्मनि स्वसंवेदनज्ञानरहितानां व्रततपश्चरणादिकं पुण्यबंधकारणमेवेति प्रतिपादयति,—**परमट्ठम्मि य अठिदो जो कुणदि तवं वदं च धारयदि** तस्मिन्नेव पूर्वसूत्रोक्तपरमार्थलक्षणे परमात्मस्वरूपे अस्थितो रहितो यस्तपश्चरणं करोति व्रतादिक च धारयति **तं सव्वं वालतवं वालवदं विंति सव्वह्णू**—तत्सर्वं वालतपश्चरणं वालव्रतं ब्रुवंति कथयंति । के ते ? सर्वज्ञाः ।

अब ज्ञान तो नियम से मोक्ष का हेतु है और अज्ञान बंध का हेतु है, ऐसा कहते हैं:—**[ये]** जो कोई **[व्रतनियमान्]** व्रत और नियमों को **[धारयंतः]** धारण करते हैं **[तथा]** उसी प्रकार **[शीलानि च तपः कुर्वंतः]** शील और तप को करते हैं परन्तु **[परमार्थबाह्याः]** परमार्थ भूत ज्ञान स्वरूप आत्मा से बाह्य हैं अर्थात् उसके स्वरूप का ज्ञान, श्रद्धान जिनके नहीं है **[ते]** वे **[निर्वाणं]** मोक्ष को **[न]** नहीं **[विंदंति]** पाते ।

टीका—ज्ञान ही मोक्ष का हेतु है क्योंकि ज्ञान का अभाव होने से स्वयं अज्ञानरूप हुए अज्ञानियों के अंतरंग में व्रत, नियम, शील, तपोरूप शुभकर्म का सद्भाव होने पर भी मोक्ष का अभाव है । अज्ञान ही बंध का हेतु है । अज्ञान का अभाव होने पर स्वयं ज्ञानरूप हुए ज्ञानियों के बाह्य व्रत, नियम, शील, तप आदि शुभ कर्म का असद्भाव होने पर भी मोक्ष का सद्भाव है ।

भावार्थ—ज्ञान होने पर ज्ञानी के व्रत नियम शील तपोरूप शुभकर्म बाह्य में न होने पर भी मोक्ष होता है । यहां ऐसा जानना कि व्रत आदि की प्रवृत्ति शुभ कर्म है । उस प्रवृत्ति का अभाव और निवृत्ति अवस्था होने पर भी व्रत, नियम, शील, तप स्वरूप बाह्य प्रवृत्ति का अभाव है तो भी मोक्ष होता है यह नियम है ॥ १५३ ॥

---

१. तात्पर्यवृत्तौ ' तु ण तेख ते होंति अण्णाणी' इत्यपि पाठः ।

यदेतद् ज्ञानात्मा ध्रुवमचलमाभाति भवनं,
शिवस्यायं हेतुः स्वयमपि यतस्तच्छिव इति ।
अतोऽन्यद्बंधस्य स्वयमपि यतो बंध इति तत्,
ततो ज्ञानात्मत्वं भवनमनुभूतिर्हि विहितं ॥ १०५ ॥

अथ पुनरपि पुण्यकर्मपक्षपातिनः प्रतिबोधनायोपक्षिपति—

परमट्ठबाहिरा जे ते अण्णाणेण पुण्णमिच्छंति ।
संसारगमणहेदुं वि मोक्खहेउं अजाणंता ॥ १५४ ॥

परमार्थबाह्या ये ते अज्ञानेन पुण्यमिच्छंति ।
संसारगमनहेतुं अपि मोक्षहेतुमजानंतः ॥ १५४ ॥

कस्मात् ? इति चेत, पुण्यपापोदयजनितसमस्तेंद्रियसुखदुःखाधिकारपरिहारपरिणताभेदरत्नत्रयलक्षणेन विशिष्टभेदज्ञानेन रहितत्वात् इति ॥१५२॥ अथ स्वसंवेदनज्ञानं तथैवाज्ञानं चेति यथाक्रमेण मोक्षबंधहेतू दर्शयति;—**वदणियमाणि धरंता सीलाणि तहा तवंच कुव्वंता** त्रिगुप्तसमाधिलक्षणाद्भेदज्ञानाद् बाह्या ये ते व्रतनियमान् धारयंतः, शीलानि तपश्चरणं च कुर्वाणा अपि मोक्षं न लभंते । कस्मादिति चेत्, **परमट्ठबाहिरा जेण तेण ते होंति अण्णाणी** येन कारणेन पूर्वोक्तभेदज्ञानाभावात् परमार्थबाह्यास्तेन कारणेन ते भवंत्यज्ञानिनः । अज्ञानिनां तु कथं मोक्षः ? ये तु परमसमाधिलक्षणभेदज्ञानसहितास्ते तु व्रतनियमानधारयन्तोऽपि शीलानि तपश्चरणं बाह्यद्रव्यरूपमकुर्वाणा अपि मोक्षं लभंते । तदपि कस्मात्, येन कारणेन पूर्वोक्तभेदज्ञानसद्भावात् परमार्थाबाह्यास्तेन कारणेन ते च ज्ञानिनो भवंति । ज्ञानिनां तु मोक्षो भवत्येवेति । किंच विस्तरः । व्रतनियमशीलबहिरंगतपश्चरणादिकं विनापि यदि मोक्षो भवति इति तर्हि संकल्पविकल्परहितानां विषयव्यापारेऽपि पापं नास्ति, तपश्चरणाभावेऽपि मोक्षो भवतीति सांख्यशैवमतानुसारिणो वदन्तीति तेषामेव मतं सिद्धमिति । नैवं, निर्विकल्पत्रिगुप्तिसमाधिलक्षणभेदज्ञानसहितानां मोक्षो भवतीति विशेषेण बहुधा भणितं तिष्ठति । एवंभूतभेदज्ञानकाले शुभरूपा ये मनोवचनकायव्यापाराः परंपरया मुक्तिकारणभूतास्तेऽपि न संति । ये पुनरशुभविषयकषायव्यापाररूपास्ते विशेषेण न संति । न हि चित्तस्थे रागभावे विनष्टे सति बहिरंगविषयव्यापारो दृश्यते । तंदुलस्याभ्यंतरे तुषे गते सति बहिरंगतुष इव । तदपि कस्मात् ? इति चेत् निर्विकल्पसमाधिलक्षणभेदज्ञानविषयकषायव्यापारयोर्द्वयोः परस्परं विरुद्धत्वात् शीतोष्णवदिति ॥ १५३ ॥ अथ वीतरागसम्यक्त्वरूपां शुद्धात्मभावनां

इसी अर्थ का कलश रूप काव्य कहते हैं—**यदेत** इत्यादि । **अर्थ**—जो यह ज्ञान स्वरूप आत्मा ध्रुव है सो जब निश्चल अपने ज्ञान स्वरूप हुआ शोभायमान होता है, तब ही यह मोक्ष का कारण है क्योंकि आप स्वयमेव मोक्ष स्वरूप है और इसके सिवाय जो अन्य है वह बंध का कारण है क्योंकि आप स्वयमेव बंधस्वरूप है । इसलिये ज्ञान स्वरूप अपना होना ही अनुभूति है इस प्रकार निश्चय से बंधमोक्ष के हेतु का विधान किया है ॥ १०५ ॥

यदि आगे फिर भी कोई पुण्यकर्म का पक्षपात करे तो उसके समझाने के लिए गाथा कहते हैं:— **[ये]** जो जीव **[परमार्थबाह्या]** परमार्थ से बाह्य हैं परमार्थ भूत ज्ञान स्वरूप आत्मा का अनुभव नहीं करते **[ते]** वे जीव **[अज्ञानेन]** अज्ञान से **[पुण्यं]** पुण्य **[इच्छंति]** चाहते हैं वह पुण्य **[संसारगमनहेतुं अपि]**

इह खलु केचिन्निखिलकर्मपक्षक्षयसंभावितात्मलाभं मोक्षमभिलषंतोऽपि तद्धेतुभूतं सम्यग्दर्शनज्ञानचारित्रस्वभावपरमार्थभूतज्ञानभवन[1]मात्रमैकाग्र्यलक्षणं समयसारभूतं सामायिकं प्रतिज्ञायापि दुरंतकर्मचक्रोत्तरणक्लीबतया परमार्थभूतज्ञानानुभवनमात्रसामायिकमात्मस्वभावमलभमानाः प्रतिनिवृत्तस्थूलतमसंक्लेशपरिणामकर्मतया प्रवर्तमानस्थूलतमविशुद्धपरिणामकर्माणः कर्मानुभवगुरुलाघवप्रतिपत्तिमात्रसंतुष्टचेतसः स्थूललक्ष्यतया सकलं कर्मकांडमनुन्मूलयंतः स्वयमज्ञानादशुभकर्म केवलं बंधहेतुमध्यास्य च व्रतनियमशीलतपःप्रभृतिशुभकर्मबंधहेतुमप्यजानंतो मोक्षहेतुमभ्युपगच्छंति ॥ १५४ ॥

विहाय तेन पुण्यमेवैकातेन मुक्तिकारणं ये वदंति तेषां प्रतिबोधनार्थं पुनरपि दूषणं ददाति—इह हि केचन सकलकर्मक्षयमोक्षमिच्छंतोऽपि निजपरमात्मभावनापरिणताभेदरत्नत्रयलक्षणं परमसामायिकं पूर्वं दीक्षाकाले प्रतिज्ञायापि चिदानंदैकस्वभावशुद्धात्मसम्यक्श्रद्धानपरिज्ञानानुष्ठानसामर्थ्याभावात्पूर्वोक्तं परमसामायिकमलभमानाः परमार्थबाह्याः संतः संसारगमनहेतुत्वेन बंधकारणमप्यज्ञानभावेन कृत्वा पुण्यमिच्छंति । किं कुर्वंतः ? अभेदरत्नत्रयात्मकं मोक्षकारणमजानंतः । अथवा द्वितीयव्याख्यानं, बंधहेतुमपि पुण्यं मोक्षहेतुमिच्छंति । किं कुर्वन्तः ? पूर्वोक्तमभेदरत्नत्रयात्मकं परमसामायिकंमोक्षकारण-

---

संसार के गमन का कारण है तो भी वे जीव [मोक्षहेतुं] मोक्ष का कारण ज्ञानस्वरूप आत्मा को [अजानंतः] नहीं जानते । पुण्य को ही मोक्ष का कारण मानते हैं ।

टीका—इस लोक में निश्चय से कई एक जीव ऐसे हैं जो समस्त कर्म के पक्ष का नाश कर जिसमें निज स्वरूप का लाभ उत्पन्न हुआ है ऐसे मोक्ष को चाहते हैं तो भी उस मोक्ष के कारणभूत सम्यग्दर्शन, ज्ञान और चारित्र स्वभाव परमार्थभूत ज्ञान के होनेमात्र एकाग्रतालक्षण समयसारभूत सामायिक चारित्र की प्रतिज्ञा लेकर भी दुरंत कर्म के समूह के पार होने की असामर्थ्य से परमार्थभूत ज्ञान के होने मात्र जो सामायिक चारित्र स्वरूप आत्मा का स्वभाव उसको न पाते हुए अतिशय स्थूल संक्लेश परिणाम स्वरूप कर्म से तो निवृत्त हुए हैं और अतिशय मोटे विशुद्ध परिणामरूप कर्म के द्वारा प्रवृत्ति करते हैं, वे कर्म के अनुभव की गुरुता और लघुता की प्राप्ति मात्र से ही संतुष्ट चित्त वाले हुए स्थूल लक्ष्यतारूप स्थूल अनुभव गोचर संक्लेशरूप कर्मकांड को तो छोड़ते हैं परंतु समस्त कर्मकांड को मूल से नहीं उखाड़ते । वे स्वयं अपने अज्ञान से केवल अशुभ कर्म को बंध का कारण मान व्रत, नियम, शील, तप आदिक शुभकर्म बंध के कारण को बंध का कारण नहीं जानते, उसको मोक्ष का कारण मानते हैं अंगीकार करते हैं ।

भावार्थ—कितने ही जीव अति संक्लेशपरिणामरूप कर्म को तो बंध का कारण जानकर छोड़ देते हैं और अतिविशुद्धता परिणाम रूप कर्म सहित बर्तते हैं । वे कर्म की अत्यल्पता को ही बंध-मोक्ष का कारण जानते हैं तथा सकल कर्मों से रहित अपने स्वरूप को मोक्ष का कारण नहीं जानते । वे अशुभ कर्म को छोड़ व्रत, नियम, शीलतपरूप शुभकर्म को ही मोक्ष का कारण मान अंगीकार करते हैं । वे व्रत आदि को पालते हुए भी अज्ञानी ही हैं, और परमार्थ को नहीं जानते ॥ १५४ ॥

---

१. 'ज्ञानभवन मात्रतया' इत्यपि पाठः ।

अथ परमार्थमोक्षहेतुं तेषां दर्शयति—

जीवादीसद्दहणं सम्मत्तं तेसिमधिगमो णाणं ।
रायादीपरिहरणं चरणं एसो दु मोक्खपहो ॥ १५५ ॥

जीवादिश्रद्धानं सम्यक्त्वं तेषामधिगमो ज्ञानं ।
रागादिपरिहरणं चरणं एष तु मोक्षपथः ॥ १५५ ॥

मोक्षहेतुः किल सम्यग्दर्शनज्ञानचारित्राणि । तत्र सम्यग्दर्शनं तु जीवादिश्रद्धानस्वभावेन ज्ञानस्य भवनं । जीवादिज्ञानस्वभावेन ज्ञानस्य भवनं ज्ञानं । रागादिपरिहरणस्वभावेन ज्ञानस्य भवनं चारित्रं । तदेवं सम्यग्दर्शनज्ञानचारित्राण्येकमेव ज्ञानस्य भवनमायातम् । ततो ज्ञानमेव परमार्थमोक्षहेतुः ॥ १५५ ॥

मजानंतः संत इति । किं च निर्विकल्पसमाधिकाले व्रताव्रतस्य स्वयमेव प्रस्तावो नास्ति । अथवा निश्चयव्रतं तदेवेत्यभिप्रायः । इति वीतरागसम्यक्त्वरूपां शुद्धात्मोपादेयभावना विना व्रततपश्चरणादिकं पुण्यकारणमेव भवति तद्भावनासहितं पुनर्बहिरंगसाधकत्वेन परम्परया मुक्तिकारणं चेति व्याख्यानमुख्यत्वेन गाथाचतुष्टयं गतं ॥ १५४ ॥ एवं गाथादशकेन पुण्याधिकारः समाप्तः । अथ सविकल्पत्वात्पराश्रितत्वाच्च निश्चयेन पापव्याख्यानमुख्यत्वेन, अथवा निश्चयव्यवहारमोक्षमार्गमुख्यत्वेन **जीवादीसद्दहण** मित्यादिसूत्रद्वयं । तदनंतरं मोक्षहेतुभूतो योऽसौ सम्यक्त्वादिजीवगुणस्तत्प्रच्छादनमुख्यत्वेन **वत्थस्स सेदभावो** इत्यादि गाथात्रयं । ततः परं पापं पुण्यं च बंधकारणमेवेतिमुख्यतया **सो सव्वणाण** इत्यादि सूत्रमेकं । ततश्च मोक्षहेतुभूतो योसौ जीवो गुणी तत्प्रच्छादनमुख्यतया **सम्मत्त** इत्यादि गाथात्रयमिति समुदायेन सूत्रनवकपर्यंतं तृतीयस्थले व्याख्यानं करोति । तद्यथा । अथ तेषामज्ञानिनां निश्चयमोक्षहेतुं दर्शयति;—**जीवा-**

यहा ऐसे जीवों को परमार्थ स्वरूप मोक्ष का कारण दिखलाते हैं;—**[जीवादिश्रद्धानं]** जीवादिक पदार्थों का श्रद्धान तो **[सम्यक्त्वं]** सम्यक्त्व है और **[तेषां अधिमगः]** उन जीवादि पदार्थों का **[अधिगमः]** अधिगम वह **[ज्ञानं]** ज्ञान है तथा **[रागादिपरिहरणं]** रागादिक का त्याग **[चरणं]** वह चारित्र है **[एष तु]** यही **[मोक्षपथः]** मोक्ष का मार्ग है ।

टीका—मोक्ष के कारण निश्चय से सम्यग्दर्शन, ज्ञान और चारित्र हैं । जीवादिपदार्थों के यथार्थ श्रद्धान स्वभाव से ज्ञान का परिणमन तो सम्यग्दर्शन है; जीवादिपदार्थों के ज्ञानस्वभाव से ज्ञान का होना सम्यग्ज्ञान है; तथा रागादि के त्याग स्वभाव से ज्ञान का होना सम्यक् चारित्र है । इस कारण ज्ञान ही परमार्थ रूप से मोक्ष का कारण है ।

भावार्थ—आत्मा का असाधारण स्वरूप ज्ञान ही है और इस प्रकरण में ज्ञान का ही प्रधानतः व्याख्यान है । इसलिये सम्यग्दर्शन, ज्ञान और चारित्र ये तीनों ज्ञान के ही परिणमन हैं । इस भांति कह कर ज्ञान को ही मोक्ष का कारण कहा है । ज्ञान अभेदविवक्षा से आत्मा ही है । ऐसा कहने में कुछ विरोध नहीं है ॥ १५५ ॥

अथ परमार्थमोक्षहेतोरन्यत् कर्म प्रतिषेधयति—

मोत्तूण णिच्छयट्ठं ववहारेण विदुसा पवट्टंति ।
परमट्ठमस्सिदाण दु जदीण कम्मक्खओ विहिओ ।। १५६ ।।

मुक्त्वा निश्चयार्थं व्यवहारेण विद्वांसः प्रवर्तंते ।
परमार्थमाश्रितानां तु यतीनां कर्मक्षयो विहितः ।। १५६ ।।

यः खलु परमार्थमोक्षहेतोरतिरिक्तो व्रततपःप्रभृतिशुभकर्मात्मा केषांचिन्मोक्षहेतुः स सर्वोऽपि प्रतिषिद्धस्तस्य द्रव्यान्तरस्वभावत्वात् तत्स्वभावेन ज्ञानभवनस्याभवनात् । परमार्थमोक्षहेतोरेवैकद्रव्यस्वभावत्वात् तत्स्वभावेन ज्ञानभवनस्य भवनात् ।। १५६ ।।

दीसद्दहणं सम्मत्तं जीवादिनवपदार्थाना विपरीताभिनिवेशरहितत्वेन श्रद्धानं सम्यग्दर्शनं **तेसिमधिगमो णाणं** तेषामेव संशयविमोहविभ्रमरहितत्वेनाधिगमो निश्चयः परिज्ञानं सम्यग्ज्ञानं **रागादीपरिहरणं चरणं** तेषामेव संबंधित्वेन रागादिपरिहारश्चारित्रं **एसो दु मोक्खपहो** इत्येव व्यवहारमोक्षमार्गः । अथवा तेषामेव भूतार्थेनाधिगतानां पदार्थानां शुद्धात्मनः सकाशात् भिन्नत्वेन सम्यगवलोकनं निश्चयसम्यक्त्वं । तेषामेव सम्यक्परिच्छित्तिरूपेण शुद्धात्मनो भिन्नत्वेन निश्चय. सम्यग्ज्ञानं । तेषामेव शुद्धात्मनो भिन्नत्वेन निश्चयं कृत्वा रागादिविकल्परहितत्वेन स्वशुद्धा-

---

आगे परमार्थरूप मोक्ष के कारण से भिन्न कर्म का निषेध करते हैं;—**[विद्वांसः]** पंडित जन **[निश्चयार्थं]** निश्चयनय के विषय को **[मुक्त्वा]** छोड़ **[व्यवहारेण]** व्यवहार से **[प्रवर्तंते]** प्रवृति करते हैं **[तु]** परंतु **[परमार्थं]** परमार्थभूत-आत्मस्वरूप के **[आश्रितानां]** आश्रित **[यतीनां]** यतीश्वरों के ही **[कर्मक्षयः]** कर्म का नाश **[विहितः]** कहा गया है । व्यवहार में प्रवृत्ति करने वाले का कर्मक्षय नहीं होता ।

टीका—कितनों ही ने तो ऐसा मोक्ष का कारण माना है कि परमार्थ भूत मोक्ष के कारण से रहित और व्रत तप आदिक शुभ कर्म स्वरूप से ही मोक्ष है । ऐसा मोक्ष का हेतु मानना सभी निषेध किया गया है क्योंकि ऐसा मोक्ष का कारण अन्य द्रव्य स्वभाव है । उस स्वभाव से ज्ञान का परिणमन नहीं होता । ज्ञान का परिणमन परमार्थ से शुभ अशुभ रूप नहीं है अतः परमार्थ भूत मोक्ष का कारण ही एक द्रव्य स्वभाव है; उस स्वभाव से ही ज्ञान का परिणमन का होता है ।

भावार्थ—मोक्ष आत्मा के होता है, उसका कारण भी आत्मा का स्वभाव ही होना चाहिए । जो अन्य द्रव्य का स्वभाव हो, तो उस से आत्मा के मोक्ष कैसे हो ? यह निश्चय नय का मत है । इसलिए शुभ कर्म पुद्गल द्रव्य का स्वभाव है वह आत्मा के मोक्ष का कारण नहीं है । ज्ञान आत्मा का स्वभाव है, वही आत्मा के परमार्थ भूत मोक्ष का कारण है ।। १५६ ।।

वृत्तं **ज्ञानस्वभावेन ज्ञानस्य भवनं सदा ।**
एकद्रव्यस्वभावत्वान्मोक्षहेतुस्तदेव तत् ॥ १०६ ॥
वृत्तं कर्मस्वभावेन ज्ञानस्य भवनं न हि ।
द्रव्यांतरस्वभावत्वान्मोक्षहेतुर्न कर्म तत् ॥ १०७ ॥
मोक्षहेतुतिरोधानाद्बंधत्वात्स्वयमेव च ।
मोक्षहेतुतिरोधायिभावत्वात्तन्निषिध्यते ॥ १०८ ॥

अथ कर्मणो मोक्षहेतुतिरोधानकरणं साधयति—

वत्थस्स सेदभावो जह णासेदि मलमेलणासत्तो ।
मिच्छत्तमलोच्छण्णं तह सम्मत्तं खु णायव्वं ॥ १५७ ॥
वत्थस्स सेदभावो जह णासेदि मलमेलणासत्तो ।
अण्णाणमलोच्छण्णं तह णाणं होदि णायव्वं ॥ १५८ ॥

त्मन्यवस्थानं निश्चयचारित्रमिति निश्चयमोक्षमार्गः ॥ १५५ ॥ अथ निश्चयमोक्षमार्गहेतोः शुद्धात्मस्वरूपाद् यदन्यच्छुभाशुभमनोवचनकायव्यापाररूपं कर्म तन्मोक्षमार्गो न भवति इति प्रतिपादयति;—**मोत्तूण णिच्छयट्ठं ववहारे** निश्चयार्थं मुक्त्वा व्यवहारविषये **ण विदुसा पवट्टंति** विद्वांसो ज्ञानिनो न प्रवर्तंते। कस्मात् ? **परमट्ठमासिदाण दु जदीण कम्मक्खओ होदि** सम्यग्दर्शनज्ञानचारित्रैकाग्र्यपरिणतिलक्षणं निजशुद्धात्मभावनारूपं परमार्थमाश्रितानां तु यतीना कर्मक्षयो भवतीति यतः कारणादिति । एवं मोक्षमार्गकथनरूपेण गाथाद्वयं गतं ॥ १५६ ॥ अथमोक्षहेतुभूतानां सम्यग्दर्शनज्ञानचारित्राणांजीवगुणानां वस्त्रस्य मलेनेव मिथ्यात्वादिकर्मणा प्रतिपक्षभूतेन प्रच्छादन दर्शयति वस्त्रस्य श्वेतभावो यथा नश्यति मलविमेलना, मलस्य विशेषेण मेलना सम्बन्धस्तेनाच्छन्नः। तथैव मिथ्यात्वमलेनाच्छन्नो मोक्षहेतुभूतो

अब इसी अर्थ के कलश रूप दो श्लोक कहते हैं—**वृत्तं** इत्यादि । **अर्थ**—ज्ञान स्वभाव से बर्तना ही ज्ञान का होना है और वही मोक्ष का कारण है क्योंकि ज्ञान ही एक आत्मद्रव्यस्वभाव है। और कर्म स्वभाव से बर्तना ज्ञान का होना नहीं है, वह (कर्म का बर्तना) मोक्ष का कारण नहीं है क्योंकि कर्म अन्य द्रव्य स्वभाव है ।

भावार्थ—मोक्ष आत्मा के होता है इसलिए आत्मा का स्वभाव ही मोक्ष का कारण हो सकता है और क्योंकि ज्ञान आत्मा का स्वभाव है, अतः वही मोक्ष का कारण है । तथा कर्म अन्य (पुद्गल) द्रव्य का स्वभाव है इसलिए वह आत्मा के मोक्ष का कारण नहीं होता, यह निश्चय है ॥१०६।१०७॥

आगे अगले कथन का सूचक श्लोक कहते हैं—**मोक्षहेतु** इत्यादि—कर्म मोक्ष का कारण नहीं है; स्वयं बंध स्वरूप है; तथा मोक्ष के कारणों का आच्छादक है, अतः इन तीन हेतुओं से कर्म का निषेध किया गया है ॥ १०८ ॥

वत्थस्स सेदभावो जह णासेदि मलमेलणासत्तो ।
कसायमलोच्छरणं तह चारित्तं पि णादव्वं ॥ १५९ ॥ (त्रिकलम्)

वस्त्रस्य श्वेतभावो यथा नश्यति मलमेलनासक्तः ।
मिथ्यात्वमलावच्छन्नं तथा सम्यक्त्वं खलु ज्ञातव्यं ॥ १५७ ॥
वस्त्रस्य श्वेतभावो यथा नश्यति मलमेलनासक्तः ।
अज्ञानमलावच्छन्नं तथा ज्ञानं भवति ज्ञातव्यं ॥ १५८ ॥
वस्त्रस्य श्वेतभावो यथा नश्यति मलमेलनासक्तः ।
कषायमलावच्छन्नं तथा चारित्रमपि ज्ञातव्यं ॥ १५९ ॥

ज्ञानस्य सम्यक्त्वं मोक्षहेतुः स्वभावः, परभावेन मिथ्यात्वनाम्ना कर्ममलेनावच्छन्नत्वात् तिरोधीयते परभावभूतमलावच्छन्नश्वेतवस्त्रस्वभाव भूतश्वेतस्वभाववत् । ज्ञानस्य ज्ञानं मोक्षहेतुः

जीवस्य सम्यक्त्वगुणो नश्यतीति ज्ञातव्यं । वस्त्रस्य श्वेतभावो यथा नश्यति मलविमेलना, मलस्य विशेषेण मेलना संबंधस्तेनच्छन्नः । तथैवाज्ञानमलेनोच्छन्नो मोक्षहेतुभूतो जीवस्य ज्ञानगुणो नश्यतीति ज्ञातव्यं । वस्त्रस्य श्वेतभावो यथा नश्यति मलविमेलना, मलस्य विशेषेण मेलना संबंधस्तेन च्छन्नः । तथा कषायकर्ममलेनोच्छन्नो मोक्षहेतुभूतो जीवस्य चारित्रगुणो नश्यतीति ज्ञातव्यं । इति मोक्षहेतुभूतानां सम्यक्त्वादिगुणाना मिथ्यात्वाज्ञानकषायप्रतिपक्षैः प्रच्छादनकथन-रूपेण गाथात्रयं गतं ॥१५७।१५८।१५९॥ अथ कर्म स्वयमेव बंधरूपं कथ मोक्षकारण भवतीति कथयति;—

कर्म, मोक्ष के कारण दर्शन, ज्ञान और चारित्र का आच्छादक हैं यह बताते हैं;—**[यथा]** जैसे **[वस्त्रस्य]** वस्त्र की **[श्वेतभावः]** सफेदी **[मलमेलनासक्तः]** मल के मिलने से लिप्त हुई **[नश्यति]** नष्ट हो जाती है **[तथा]** उसी भांति **[मिथ्यात्वमलावच्छन्नं]** मिथ्यात्वमल से व्याप्त हुआ **[सम्यक्त्वं]** आत्मा का सम्यक्त्वगुण **[खलु]** निश्चय से **[ज्ञातव्यं]** आच्छादित हो रहा है ऐसा जानना चाहिए। **[यथा]** जैसे **[वस्त्रस्य श्वेतभावः]** वस्त्र की सफ़ेदी **[मलमेलनासक्तः]** मल के मेल से लिप्त हुई **[नश्यति]** नष्ट हो जाती है **[तथा]** उसी प्रकार **[अज्ञानमलावच्छन्नं]** अज्ञानमल से व्याप्त हुआ **[ज्ञानं]** आत्मा का ज्ञान भाव **[ज्ञातव्यं भवति]** आच्छादित होता है ऐसा जानना चाहिये। तथा **[यथा]** जैसे **[वस्त्रस्य श्वेतभावः]** कपड़े की सफेदी **[मलमेलनासक्तः]** मल के मिलने से व्याप्त हुई **[नश्यति]** नष्ट हो जाती है **[तथा]** उसी तरह **[कषायमलावच्छन्नं]** कषायमल से व्याप्त हुआ **[चारित्रं अपि]** आत्मा का चारित्र भाव भी **[ज्ञातव्यं]** आच्छादित हो जाता है ऐसा जानना चाहिये।

टीका—ज्ञान का सम्यक्त्व मोक्ष का कारण रूप स्वभाव है। यह सम्यक्त्व परभाव स्वरूप मिथ्यात्व कर्म मैल से व्याप्त होने से आच्छादित हो जाता है। जैसे परभावभूत मैल (रंग) सहित होने पर सफेद वस्त्र का स्वभावभूत सफेद स्वभाव आच्छादित हो जाता है, उसी प्रकार ज्ञान का ज्ञान मोक्ष का

स्वभावः, परभावेनाज्ञाननाम्ना कर्ममलेनावच्छन्नत्वात्तिरोधीयते परभावभूतमलावच्छन्नश्वेतवस्त्र-स्वभावभूतश्वेतस्वभाववत् । ज्ञानस्य चारित्रं मोक्षहेतुः स्वभावः, परभावेन कषायनाम्ना कर्ममलेनावच्छन्नत्वात्तिरोधीयते परभावभूतमलावच्छन्नश्वेतवस्त्रस्वभावभूतश्वेतस्वभाववत् । अतो मोक्षहेतुतिरोधानकरणात् कर्म प्रतिसिद्धं ॥१५७।१५८।१५९॥

अथ कर्मणः स्वयं बंधत्वं साधयति—

सो सव्वणाणदरिसी कम्मरएण णियेणवच्छण्णो ।
संसारसमावण्णो ण विजाणदि सव्वदो सव्वं ॥१६०॥

स सर्वज्ञानदर्शी कर्मरजसा निजेनावच्छन्नः ।
संसारसमापन्नो न विजानाति सर्वतः सर्वं ॥१६०॥

यतः स्वयमेव ज्ञानतया विश्वसामान्यविशेषज्ञानशीलमपि ज्ञानमनादिस्वपुरुषापराधप्रवर्त-

---

सो सव्वणाणदरिसी कम्मरयेण णियेण उच्छण्णो—स शुद्धात्मा निश्चयेन समस्तपरिपूर्णज्ञानदर्शनस्वभावोऽपि निजकर्मरजसोच्छन्नो झंपितः सन् । **संसारसमावण्णो णवि जाणदि सव्वदो सव्वं** । संसारसमापन्नः, संसारे पतितः सन् नैव जानाति सर्वं वस्तु, सर्वतः सर्वप्रकारेण । ततो ज्ञायते कर्म कर्तृ जीवस्य स्वयमेव बंधरूपं कथं मोक्षकारणं भवतीति । एवं पापवत्पुण्यं बंधकारणमेवेति कथनरूपेण गाथा गता ॥१६०॥ अथ पूर्वं मोक्षहेतुभूताना

कारण रूप स्वभाव है । वह परभाव रूप अज्ञाननामक कर्म रूपी मल से व्याप्त होने से आच्छादित किया जाता है । जैसे परभावरूप मैल (रंग) से व्याप्त हुआ श्वेत वस्त्र का स्वभावभूत सफेदपन आच्छादित होता है । ज्ञान का चरित्र भी मोक्ष का कारण रूप स्वभाव है । वह परभाव स्वरूप कषायनाम कर्मरूपी मैल से व्याप्त होने से आच्छादित किया जाता है । जैसे परभाव स्वरूप मैल (रंग) से व्याप्त हुआ सफेद कपड़े का स्वभावभूत सफेदपन आच्छादित किया जाता है । इसलिये मोक्ष के कारण जो सम्यग्दर्शन ज्ञान और चारित्र हैं, उनका आच्छादन करने से कर्म का निषेध किया गया है ।

भावार्थ—सम्यग्दर्शन ज्ञान चारित्र रूप ज्ञान के परिणमन स्वरूप मोक्ष मार्ग के प्रतिबंधक (रोकने वाले) मिथ्यात्व अज्ञान कषायरूपी कर्म हैं । ये कर्म उस मोक्ष के कारण भावों को आच्छादित करते हैं इसलिये कर्म का निषेध है ।।१५७।१५८।१५९।।

अब कर्म स्वयमेव बंध हैं, यह सिद्ध करते हैं;—**[सः]** वह आत्मा स्वभाव से **[सर्वज्ञानदर्शी]** सबका जानने वाला और देखने वाला है तो भी **[निजेनकर्मरजसा]** अपने कर्मरूपी रज से **[अवच्छन्नः]** आच्छादित हुआ **[संसारसमापन्नः]** संसार को प्राप्त होता हुआ **[सर्वतः]** सब प्रकार से **[सर्वं]** सब वस्तु को **[न विजानाति]** नहीं जानता ।

टीका—जिस कारण यह ज्ञान रूप आत्मा स्वयमेव ज्ञान रूप होने से सब पदार्थों को सामान्य विशेषता से जानने के स्वभाव वाला है, तो भी अनादि काल से अपने पुरुषार्थ से किये हुए अपराध से

मानकर्ममलावच्छन्नत्वादेव बंधावस्थायां सर्वतः सर्वमप्यात्मानमविजानदज्ञानभावेनैवेदमेवमवतिष्ठते। ततो नियतं स्वयमेव कर्मैव बंधः। अतः स्वयं बंधत्वात्कर्म प्रतिषिद्धं ॥१६०॥

अथ कर्मणो मोक्षहेतुतिरोधायिभावत्वं दर्शयति—

सम्मत्तपडिणिबद्धं मिच्छत्तं जिणवरेहि परिकहियं।
तस्सोदयेण जीवो मिच्छादिट्ठित्ति णायव्वो ॥ १६१ ॥
णाणस्स पडिणिबद्धं अण्णाणं जिणवरेहि परिकहियं।
तस्सोदयेण जीवो अण्णाणी होदि णायव्वो ॥ १६२ ॥
चारित्तपडिणिबद्धं कसायं जिणवरेहि परिकहियं।
तस्सोदयेण जीवो अचरित्तो होदि णायव्वो ॥१६३॥ (त्रिकलम्)

सम्यक्त्वप्रतिनिबद्धं मिथ्यात्वं जिनवरैः परिकथितं।
तस्योदयेन जीवोमिथ्यादृष्टिरिति ज्ञातव्यः ॥ १६१ ॥
ज्ञानस्य प्रतिनिबद्धं अज्ञानं जिनवरैः परिकथितं।
तस्योदयेन जीवोऽज्ञानी भवति ज्ञातव्यः ॥ १६२ ॥
चारित्रप्रतिनिबद्धः कषायो जिनवरैः परिकथितः।
तस्योदयेन जीवोऽचारित्रो भवति ज्ञातव्यः ॥ १६३ ॥

सम्यक्त्वादिजीवगुणानां मिथ्यात्वादिकर्मणा प्रच्छादनं भवतीति कथितं इदानी तद्गुणाधारभूतो गुणी जीवो मिथ्यात्वादिकर्मणा प्रच्छाद्यते इति प्रकटीकरोति;—सम्यक्त्वप्रतिनिबद्धं प्रतिकूलं मिथ्यात्वं भवतीति जिनवरैः परिकथितं तस्योदयेन

प्रवर्तमान कर्मरूप मल से आच्छादित (व्याप्त-मलिन) है। उस मलिन भाव से बंधावस्था में सब प्रकार के सब ज्ञेयाकार रूप अपने स्वरूप को नहीं जानता है और अज्ञान भाव से ही यह आप स्थित है। इस कारण यह निश्चय हुआ कि कर्म आप ही बंधस्वरूप है। इसीलिये आप बंध रूप होने से कर्म का प्रतिषेध किया गया है।

भावार्थ—यहां ज्ञान शब्द से आत्मा का ही ग्रहण किया गया है। सो यह ज्ञान स्वभाव से तो सबको देखने और जानने वाला है परंतु अनादि से आप अपराधी है, इसलिये बांधे हुए कर्मों से आच्छादित है। अतः अपने सपूर्ण रूप को नही जानता हुआ, अज्ञानरूप हुआ आप स्थित है, उसके कर्म अपने आप ही बधने है। कर्मों को आप लेकर नही बाधता, आप तो अपने अज्ञानभावरूप परिणमन करता है। तब कर्म स्वयमेव बंध रूप हो जाते हैं इसीलिए कर्मका प्रतिषेध है ॥१६०॥

आगे कर्म मोक्ष के कारण सम्यग्दर्शन ज्ञानचारित्र के आच्छादक हैं, यह दिखलाते हैं— **[सम्यक्त्वप्रतिनिबद्धं]** सम्यक्त्व का रोकने वाला **[मिथ्यात्वं]** मिथ्यात्वकर्म है ऐसा **[जिनवरैः]** जिन-

सम्यक्त्वस्य मोक्षहेतोः स्वभावस्य प्रतिबंधकं किल मिथ्यात्वं, तत्तु स्वयं कर्मैव तदुदयादेव ज्ञानस्य मिथ्यादृष्टित्वं। ज्ञानस्य मोक्षहेतोः स्वभावस्य प्रतिबंधकं किलाज्ञानं, तत्तु स्वयं कर्मैव तदुदयादेव ज्ञानस्याज्ञानत्वं। चारित्रस्य मोक्षहेतोः स्वभावस्य प्रतिबंधकः[1] किल कषायः, स तु स्वयं कर्मैव तदुदयादेव ज्ञानस्याचारित्रत्वं। अतः स्वयं मोक्षहेतुतिरोधायिभावत्वात्कर्म प्रतिषिद्धं ॥१६१।१६२।१६३॥

जीवो मिथ्यादृष्टिर्भवतीति ज्ञातव्यः। ज्ञानस्य प्रतिनिबद्धं प्रतिकूलमज्ञानं भवतीति जिनवरैः परिकथितं तस्योदयेन जीवश्चाज्ञानी भवतीति ज्ञातव्यः। चारित्रस्य प्रतिनिबद्धः प्रतिकूलः क्रोधादिकषायो भवतीति जिनवरैः परिकथितः तस्योदयेन जीवोऽचरित्रो भवतीति ज्ञातव्यः। एवं मोक्षहेतुभूतो योऽसौ जीवो गुणी तत्प्रच्छादनकथनमुख्यत्वेन गाथात्रयं गतं। इति सम्यक्त्वादिजीवगुणा मुक्तिकारणं तद्गुणपरिणतो जीवो वा मुक्तिकारणं भवति तस्माच्छुद्धजीवाद्भिन्नं शुभाशुभमनोवचनकायव्यापाररूपं, तद्व्यापारेणोपार्जितं वा शुभाशुभकर्म मोक्षकारणं न भवतीति मत्वा हेयं त्याज्यमिति

वरदेव ने **[परिकथितं]** कहा है **[तस्योदयेन]** उस मिथ्यात्व के उदय से **[जीवः]** यह जीव **[मिथ्यादृष्टिः]** मिथ्यादृष्टि हो जाता है **[इति ज्ञातव्यः]** ऐसा जानना चाहिये। **[ज्ञानस्य प्रतिनिबद्धं]** ज्ञान का रोकने वाला **[अज्ञानं]** अज्ञान है ऐसा **[जिनवरैः परिकथितं]** जिनवर ने कहा है **[तस्योदयेन]** उसके उदय से **[जीवः]** यह जीव **[अज्ञानी]** अज्ञानी **[भवति]** होता है **[ज्ञातव्यः]** ऐसा जानना चाहिए। **[चारित्रप्रतिनिबद्धः]** चारित्र का प्रतिबंधक **[कषायः]** कषाय है ऐसा **[जिनवरैः]** जिनेन्द्रदेव ने **[परिकथितः]** कहा है **[तस्य उदयेन]** उसके उदय से **[जीवः]** यह जीव **[अचारित्रः]** अचारित्री **[भवति]** हो जाता है **[ज्ञातव्यः]** ऐसा जानना चाहिये।

टीका—सम्यक्त्वमोक्ष का कारण है। उसके स्वभाव का रोकनेवाला मिथ्यात्व है, वह स्वयं कर्म ही है, उसके उदय से ही ज्ञान को मिथ्यादृष्टित्व है; ज्ञान भी मोक्ष का कारण है, उसके स्वभाव का रोकने वाला प्रकट अज्ञान है, वह स्वयं कर्म ही है, उसके उदय से ज्ञान को अज्ञान है; और चारित्र मोक्ष का कारण है, उसके स्वभाव का प्रतिबन्धक प्रकट कषाय है, वह स्वयं कर्म ही है, उसके उदय से ही ज्ञान के अचारित्र्य हैं। क्योंकि कर्म के, स्वयमेव मोक्ष के कारण सम्यग्दर्शन ज्ञान चारित्र का तिरोधायित्व है, इसी कारण कर्म का प्रतिषेध किया गया है।

भावार्थ—ज्ञान के मोक्ष का कारण रूप स्वभाव सम्यग्दर्शन ज्ञान चारित्र हैं। इन तीनों के प्रतिपक्षी कर्म मिथ्यात्व, अज्ञान और कषाय ये तीन हैं इसलिये उन तीनों को प्रकट नहीं होने देते। इस कारण कर्म में मोक्ष के कारणों का तिरोधायीभाव है इसीलिये कर्म का प्रतिषेध है। अशुभ कर्म से मोक्ष की हेतुता तो क्या है, बाधकता ही प्रसिद्ध है, परन्तु शुभकर्म भी बंधरूप ही है। इस कारण यह भी कर्म सामान्य में प्रतिषेध रूप ही जानना ॥ १६१।१६२।१६३ ॥

---

१. 'प्रतिनिबंधक' इत्यपि पाठः।

संन्यस्तव्यमिदं समस्तमपि तत्कर्मैव मोक्षार्थिना,
संन्यस्ते सति तत्र का किल कथा पुण्यस्य पापस्य वा ।
सम्यक्त्वादिनिजस्वभावभवनान्मोक्षस्य हेतुर्भव-
न्नैष्कर्म्यप्रतिबद्धमुद्धतरसं ज्ञानं स्वयं धावति ॥ १०९ ॥
यावत्पाकमुपैति कर्मविरतिर्ज्ञानस्य सम्यङ्‌ न सा,
कर्मज्ञानसमुच्चयोऽपि विहितस्तावन्न काचित्क्षतिः ।
किंत्वत्रापि समुल्लसत्यवशतो यत्कर्म बंधाय तं-
मोक्षाय स्थितमेकमेव परमं ज्ञानं विमुक्तं स्वतः॥ ११० ॥

व्याख्यानमुख्यत्वेन गाथानवकं गत ॥१६१।१६२।१६३॥ द्वितीय पातनिकाभिप्रायेण पापाधिकारव्याख्यानमुख्यत्वेन गतं । अत्राह शिष्यः । **जीवादीसद्दहण**मित्यादि व्यवहाररत्नत्रयव्याख्यानं कृतं तिष्ठति कथं पापाधिकार इति । तत्र परि-

---

आगे इसी अर्थ का कलशरूप काव्य कहते हैं—**संन्यस्त** इत्यादि । **अर्थ**—मोक्ष के चाहने वालों को यह समस्त कर्म ही त्यागने योग्य है । इस तरह इस समस्त ही कर्म को छोड़ने से पुण्य पाप की तो क्या बात है, कर्म सामान्य मे दोनों ही आ जाते हैं । इस प्रकार समस्त कर्मों का त्याग होने पर ज्ञान सम्यक्त्व आदिक अपने स्वभाव रूप होने से मोक्ष का कारण हुआ कर्मरहित अवस्था से जिसका रस प्रतिबद्ध (उद्धत) है ऐसा अपने आप दौड़ आता है ।

भावार्थ—कर्म को दूर करके ज्ञान, अपने आप अपने मोक्ष के कारण स्वभावरूप हुआ प्रगट होता है, फिर उसे कौन रोक सकता है ? कोई नही ॥१०९॥

यहां आशंका उत्पन्न होती है कि अविरत सम्यग्दृष्टि आदि के जब तक कर्म का उदय रहता है, तब तक ज्ञान मोक्ष का कारण कैसे हो सकता है तथा कर्म और ज्ञान दोनों साथ किस तरह रहते हैं ? उसके समाधान का काव्य कहते हैं—**यावत्** इत्यादि । **अर्थ**—जब तक कर्म का उदय है और ज्ञान की सम्यक् कर्म विरति नही है, तब तक कर्म और ज्ञान दोनों का समुच्चय (एकत्रीकरण) भी कहा गया है तब तक इसमें कुछ हानि भी नही । यहां पर यह विशेषता है कि इस आत्मा में कर्म के उदय की जबर्दस्ती से आत्मा के वश के विना कर्म उदय होता है वह तो बंध के ही लिये है और मोक्ष के लिये तो एक परम ज्ञान ही है । वह ज्ञान, कर्म से आप ही रहित है, कर्म के करने में अपने स्वामित्वरूप कर्तृत्व का भाव नहीं है ।

भावार्थ—जबतक कर्म का उदय है, तब तक कर्म तो अपना कार्य करता ही है और वहीं पर ज्ञान है, वह भी अपना कार्य करता है । एक ही आत्मा में ज्ञान और कर्म दोनों के इकट्ठे रहने में भी विरोध नहीं आता । जैसे मिथ्याज्ञान और सम्यग्ज्ञान का परस्पर विरोध है, उस प्रकार कर्मसामान्य के और ज्ञान के विरोध नहीं है ॥ ११० ॥

मग्नाः कर्मनयावलम्बनपरा ज्ञानं न जानंति ये,
मग्ना ज्ञाननयैषिणोऽपि यदतिस्वच्छंदमंदोद्यमाः ।
विश्वस्योपरि ते तरंति सततं ज्ञानं भवंतः स्वयं,
ये कुर्वंति न कर्म जातु न वशं यांति प्रमादस्य च ॥ १११ ॥
भेदोन्मादभ्रमरसभरान्नाटयत्पीतमोहं,
मूलोन्मूलं सकलमपि तत्कर्म कृत्वा बलेन ।

हार:—यद्यपि व्यवहारमोक्षमार्गो निश्चयरत्नत्रयस्योपादेयभूतस्य कारणभूतत्वादुपादेयः परंपरया जीवस्य पवित्रताकारणत्वात् पवित्रस्तथापि बहिर्द्रव्यालंबनत्वेन पराधीनत्वात्पतति नश्यतीत्येकं कारणं । निर्विकल्पसमाधिरतानां व्यवहारविकल्पालंबनेन स्वरूपात्पतितं भवतीति द्वितीयं कारणं । इति निश्चयनयापेक्षया पापं । अथवा सम्यक्त्वादिविपक्षभूताना मिथ्यात्वा-

---

आगे कर्म और ज्ञान का नयविभाग दिखलाते हैं—**मग्नाः** इत्यादि । **अर्थ**—जो कोई कर्म नय के अवलम्बन में तत्पर हैं, उसके पक्षपाती हैं, वे भी डूब जाते हैं । जो ज्ञान को तो जानते नहीं और ज्ञाननय के पक्षपाती हैं वे भी डूबते है । जो क्रियाकांड को छोड़ स्वच्छन्द हो प्रमादी हुए स्वरूप में मन्द उद्यमी हैं, वे भी डूबते हैं । किन्तु जो आप निरन्तर ज्ञानरूप हुए कर्म को तो करते नहीं तथा प्रमाद के वश भी नहीं होते स्वरूप में उत्साहवान हैं, वे सब लोक के ऊपर तैरते हैं ।

भावार्थ—यहां सर्वथा एकान्त अभिप्राय का निषेध किया गया है क्योंकि सर्वथा एकान्त का अभिप्राय होना ही मिथ्यादृष्टि है । जो परमार्थभूत ज्ञानस्वरूप आत्मा को तो जानता नहीं है और व्यवहार दर्शन, ज्ञान और चारित्ररूप क्रियाकांड के आडम्बर को ही मोक्ष का कारण जान उसमें ही तत्पर रहता है, उसी का पक्षपात करता है, यह कर्मनय है । इसके पक्षपाती, ज्ञान को तो जानते नहीं हैं और इस कर्मनय में ही खेदखिन्न हैं वे संसार समुद्र में डूबते हैं । और जो परमार्थभूत आत्मस्वरूप को यथार्थ तो जानते नहीं हैं तथा मिथ्यादृष्टि सर्वथा एकांतियों के उपदेश से अथवा स्वयमेव कुछ अंतरंग में ज्ञान का स्वरूप मिथ्या कल्पना करके उसमें पक्षपात करते हैं और व्यवहारदर्शन, ज्ञान और चारित्र के क्रियाकांड को निरर्थक जान छोड़ देते हैं, ज्ञाननय के पक्षपाती भी हैं वे भी संसार समुद्र में डूबते हैं, क्योंकि बाह्य-क्रियाकांड को छोड़ स्वेच्छाचारी रहते हैं, स्वरूप में मंद उद्यमी रहते हैं । इसलिये जो पक्षपात का अभिप्राय छोड़ निरंतर ज्ञानरूप हुए कर्मकांड को छोड़ते हैं और निरंतर ज्ञानस्वरूप में 'जबतक न थंभा जाय तबतक' अशुभकर्म को छोड़ स्वरूप के साधनरूप शुभ कर्मकांड में प्रवर्तते हैं, वे कर्म का नाश कर संसार से निवृत्त होते हैं , वे ही सब लोको के ऊपर रहते हैं ॥१११॥

आगे इस पुण्यपापाधिकार को सम्पूर्ण कर ज्ञान की महिमा बताते हैं—**भेदोन्माद** इत्यादि । **अर्थ**—ज्ञानज्योति अतिशय से उदय को प्राप्त हुई सब जगह फैलती है । उस ज्योति ने लीलामात्र में उघड़ी अपनी परमकला केवल ज्ञान के साथ क्रीड़ा आरम्भ की है । यहां ऐसा अभिप्राय समझना कि जब तक सम्यग्दृष्टि छद्मस्थ है, तब तक तो वह अपनी ज्ञान परमकला-केवल ज्ञान के साथ शुद्धनय के बल से

हेलोन्मीलत्परमकलया सार्धमारब्धकेलि,
ज्ञानज्योतिः कवलिततमः प्रोज्जजृम्भे भरेण ॥ ११२ ॥
इति पुण्यपापरूपेण द्विपात्रीभूतमेकपात्रीभूय कर्म निष्क्रांतम् ।

इति श्रीमदमृतचंद्रसूरिविरचितायां समयसारव्याख्यायामात्मख्यातौ
पुण्यपापप्ररूपकः तृतीयोऽकः ॥३॥

दीनां व्याख्यानं कृतिमिति वा पापाधिकारः । तत्रैवं सति व्यवहारनयेन पुण्यपापरूपेण द्विभेदमपि कर्म निश्चयेन भृङ्गार-रहितपात्रवत्पुद्गलरूपेणैकीभूय निष्क्रांतं ।

इति श्री**जयसेनाचार्य**कृतायां समयसारव्याख्यायां शुद्धात्मानुभूतिलक्षणायां **तात्पर्यवृत्तौ**
स्थलत्रयसमुदायेनैकोनविंशतिगाथाभिश्चतुर्थः पुण्यपापाधिकारः समाप्तः ॥३॥

परोक्ष क्रीड़ा करता है और जब केवल ज्ञान उत्पन्न हो जाता है तब साक्षात् क्रीड़ा करता है; उस ज्योति ने अज्ञानरूपी अन्धकार को दूर कर दिया है, ऐसी ज्ञानज्योति पूर्वोक्त शुभअशुभरूप समस्त कर्मों को अपनी शक्ति से मूल से उखाड़ करके प्रकट हुई है। उस कर्म ने मोह पी लिया है इसीलिये भ्रम के रस के भार से शुभ अशुभ के भेद रूप उन्माद को उत्पन्न करता है।

भावार्थ—ज्ञानज्योति, अपने प्रतिबंधक कर्म को जो कि भेद रूप होकर नृत्य करता था, ज्ञान को भुला देता था उस कर्म को अपनी शक्ति से नष्ट करके आप अपने सम्पूर्ण रूप सहित प्रकाशरूप हुई। यहा अभिप्राय ऐसा जानना कि कर्म सामान्य रूप से एक ही है तो भी शुभ-अशुभ दो भेदरूप स्वाग बनाकर रंगभूमि में उसने प्रवेश किया था। जब उसे ज्ञान ने यथार्थ एक जान लिया तब कर्म रंग-भूमि से निकल गया। उसके बाद ज्ञान अपनी शक्ति से यथार्थ प्रकाशरूप हुआ। इस प्रकार कर्म नृत्य के अखाड़े में पुण्यपाप रूप कर दो नृत्यकारिणी बनकर नाचता था, उसे ज्ञान ने यथार्थ जान लिया कि कर्म एक ही है, तब एकरूप होकर निकल गया ॥११२॥

सवैया—आश्रयकारणरूप सवादसु भेद विचारि गिने दोउ न्यारे,
पुण्यरु पाप शुभाशुभभावनि बधभये सुखदु.ख करारे।
ज्ञान भये दोऊ एक लखै बुध आश्रय आदि समान विचारे,
बध के कारण हैं दोऊ रूप इन्हें तजि जिनमुनि मोक्ष पधारे ॥१॥

इति श्री **पं० जयचंद्रजी** कृत इस समयसार ग्रथ की आत्मख्याति नाम टीका की भाषा-वचनिका में तीसरा **पुण्यपाप** नामक अधिकार पूर्ण हुआ ॥३॥

अथ आस्रवाधिकारः ॥ ४ ॥

अथप्रविशत्यास्रवः ।

अथ महामदनिर्भरमंथरं समररंगपरागतमास्रवं ।
अयमुदारगभीरमहोदयो जयति दुर्जयबोधधनुर्धरः ॥ ११३ ॥

अथ प्रविशत्यास्रवः । यत्र सम्यग्भेदभावनापरिणत. कारणसमयसाररूपः संवरो नास्ति तत्रास्रवो भवतीति संवरविपक्षद्वारेण सप्तदशगाथापर्यंतमास्रवव्याख्यानं करोति । तत्र प्रथमतस्तावत्, वीतरागसम्यग्दृष्टेर्जीवस्य रागद्वेषमोहरूपा आस्रवा न संतीति संक्षेपेण संवरव्याख्यानरूपेण **मिच्छत्तं अविरमणं'** इत्यादि गाथात्रयं । तदनंतरं रागद्वेषमोहास्रवाणां पुनरपि विशेषविवरणमुख्यत्वेन **'भावो रागादिजुदो'** इत्यादि स्वतंत्रगाथात्रयं । तत. परं केवलज्ञानादिव्यक्तिरूपकार्यसमयसारकारणभूतनिश्चयरत्नत्रयपरिणतस्य संज्ञानिजीवस्य रागादिभावप्रत्ययनिषेधमुख्यत्वेन **चउविह** इत्यादि गाथात्रयं । अतःपरं तस्यैव ज्ञानिनो जीवस्य मिथ्यात्वादिद्रव्यप्रत्ययास्तित्वेऽपि वीतरागचारित्रभावनाबलेन रागादिभावप्रत्ययनिषेधमुख्यतया **सव्वे पुव्वणिबद्धा** इत्यादि सूत्रचतुष्टयं । तदनंतरं नवतरद्रव्यकर्मास्रवस्योदयागतद्रव्यप्रत्ययाः कारणं भवंति, तेषा च द्रव्यप्रत्ययानां जीवगतरागादिभावप्रत्ययाः कारणमिति कारणव्याख्यानमुख्यत्वेन **रागो दोसो** इत्यादि सूत्रचतुष्टयं कथयति, इति समुदायेन सप्तदशगाथाभिः पंचस्थलैः आस्रवाधिकारसमुदायपातनिका । अथ द्रव्यभावास्रवस्वरूपं कथयति, -**मिच्छत्तं अविरमणं कसायजोगा य सण्णसण्णा दु** सण्णसण्णा इत्यत्र प्राकृत-

---

अब आस्रव का अधिकार है ।

दोहा—द्रव्यास्रवतैं भिन्न ह्वै, भावास्रव करि नास ।
भये सिद्ध परमातमा, नमूं तिनहिं सुख आस ।।

अब यहां आश्रव प्रवेश करता है । जैसा नृत्य के अखाड़े में नाचने वाला स्वांग कर प्रवेश करता है, उसी प्रकार यहां आस्रव का स्वांग है । वहां इस स्वांग को यथार्थ जानने वाला जो सम्यग्ज्ञान है, उसकी महिमारूप मंगल करते हैं—**अथ** इत्यादि । **अर्थ**—'अथ' शब्द मंगल तथा प्रारंभवाची है सो यहां से आगे कहते हैं—जो किसी से नहीं जीता जा सके ऐसा यह अनुभव गोचर धनुषधारी ज्ञानरूपी सुभट आस्रव को जीतता है । यह ज्ञानरूप सुभट अमर्याद है इसकी थाह छद्मस्थ (अल्पज्ञानी) नहीं पा सकता और महान उदय वाला है । तथा आस्रव महान् मद से उन्मत्त है तथा संग्राम की भूमि में आ गया है ।

भावार्थ—यहां नृत्य के अखाड़े में आस्रव ने प्रवेश किया है । नृत्य में अनेक रसों का वर्णन होता है इसलिये रसवत् अलंकार से शांत रस में वीररस की प्रधानता से वर्णन किया है कि ज्ञान रूप धनुषधारी आस्रव को जीतता है । वह आस्रव सब जगत को जीत मदोन्मत्त हुआ संग्राम की रंगभूमि में आकर खड़ा हो गया, तब इससे भी बलवान सुभट ज्ञान उसी समय उस आस्रव को जीत लेता है अर्थात् अन्तर्मुहूर्त में कर्म का नाश करके केवल ज्ञान उत्पन्न कर देता है । ऐसी ज्ञान की सामर्थ्य है ।।११३।।

तत्रास्रवस्वरूपमभिदधाति—

मिच्छत्तं अविरमणं कसायजोगा य सण्णसण्णा दु ।
बहुविहभेया जीवे तस्सेव अणण्णपरिणामा ॥ १६४ ॥
णाणावरणादीयस्स ते दु कम्मस्स कारणं होंति ।
तेसिंपि होदि जीवो य रागदोसादिभावकरो ॥१६५ ॥ (युगलम्)

मिथ्यात्वमविरमणं कषाययोगौ च संज्ञासंज्ञास्तु ।
बहुविधभेदा जीवे तस्यैवानन्यपरिणामाः ॥ १६४ ॥
ज्ञानावरणाद्यस्य ते तु कर्मणः कारणं भवंति ।
तेषामपि भवति जीवः च रागद्वेषादिभावकरः ॥ १६५ ॥

रागद्वेषमोहा आस्रवाः इह हि जीवे स्वपरिणामनिमित्ताः, अजडत्वे सति चिदाभासाः,

---

लक्षणबलात् अकारलोपो द्रष्टव्यः। मिथ्यात्वाविरतिप्रमादकषाययोगाः, कथंभूताः, भावप्रत्ययद्रव्यप्रत्ययरूपेण संज्ञाऽसंज्ञाश्चेतनाचेतनाः। अथवा संज्ञाः, आहारभयमैथुनपरिग्रहरूपाः, असंज्ञा. ईषत्संज्ञाः, इहलोकाकांक्षापरलोकाकांक्षाकुधर्माकांक्षारूपास्तिस्रः। कथंभूताः, एते **बहुविहभेदा जीवे** । उत्तरप्रत्ययभेदेन बहुधा विविधाः, क्व ? जीवे, अधिकरणभूते। पुनरपि कथंभूताः। **तस्सेव अणण्णपरिणामा** अनन्यपरिणामाः, अभिन्नपरिणामाः तस्यैव जीवस्याशुद्धनिश्चयनयेनेति । **णाणावरणादीयस्स ते दु कम्मस्स कारणं होंति** ते च पूर्वोक्तद्रव्यप्रत्ययाः उदयागताः संतः निश्चयचारित्राविनाभूतवीतरागसम्यक्त्वाभावे सति शुद्धात्मस्वरूपच्युतानां जीवानां ज्ञानावरणाद्यष्टविधस्य द्रव्यकर्मास्रवस्य कारणभूता भवंति। **तेसिंपि होदि जीवो रागदोसादिभावकरो** तेषां च द्रव्यप्रत्ययानां जीवः कारणं भवति। कथंभूतः ? रागद्वेषादिभावकर रागद्वेषादिभावपरिणतः। अयमत्र भावार्थः—द्रव्यप्रत्ययोदये सति शुद्धात्मस्वरूपभावनां त्यक्त्वा यदा रागादिभावेन परिण-

---

आगे आस्रव का स्वरूप कहते हैं;—**[मिथ्यात्वं अविरमणं]** मिथ्यात्व अविरति **[कषाययोगौ च]** और कषाय योग **[संज्ञासंज्ञाः तु]** ये चार आस्रव के भेद चेतना के और जड़–पुद्गल के विकार ऐसे दो दो भेद भिन्न भिन्न हैं। उनमें से जो चेतन के विकार हैं वे **[जीवे]** जीव में **[बहुविधभेदाः]** बहुत भेद लिये हुए हैं वे **[तस्यैव अनन्यपरिणामाः]** उस जीव के ही अभेदरूप परिणाम हैं और जो मिथ्यात्व आदि पुद्गल के विकार हैं **[ते तु]** वे तो **[ज्ञानावरणाद्यस्य]** ज्ञानावरण आदि **[कर्मणः]** कर्मों के बंधने के **[कारणं]** कारण **[भवंति]** हैं **[च]** और **[तेषामपि]** उन मिथ्यात्व आदि भावों को भी **[रागद्वेषादिभावकरः]** रागद्वेष आदि भावों का करने वाला **[जीवः]** जीव **[भवति]** कारण होता है।

टीका—इस जीव में रागद्वेष मोह ही आस्रव हैं। उनको अपना परिणाम निमित्त है इसीलिये वे जड़ भी नहीं हैं। ऐसा होने पर वे चिदाभास हैं, जिनमें चैतन्य का आभास है; क्योंकि मिथ्यात्व, अविरति, कषाय और योग पुद्गल के परिणाम हैं, वे ज्ञानावरण आदि पुद्गलों के आने के निमित्त हैं,

मिथ्यात्वाविरतिकषाययोगाः पुद्गलपरिणामाः, ज्ञानावरणादिपुद्गलकर्मास्रवणनिमित्तत्वात्किलास्रवाः। तेषां तु तदास्रवणनिमित्तत्वनिमित्तम् अज्ञानमया आत्मपरिणामा रागद्वेषमोहाः। तत आस्रवणनिमित्तत्वनिमित्तत्वाद्रागद्वेषमोहा एवास्रवाः, ते चाज्ञानिन एव भवंतीति अर्थादेवापद्यते ॥१६४॥१६५॥

अथ ज्ञानिनस्तदभावं दर्शयति—

णत्थि दु आसवबंधो सम्मादिट्ठिस्स आसवणिरोहो ।
संते पुव्वणिबद्धे जाणदि सो ते अबंधंतो ॥१६६॥

नास्ति त्वास्रवबंधः सम्यग्दृष्टेरास्रवनिरोधः ।
संति पूर्वनिबद्धानि जानाति स तान्यबध्नन् ॥१६६॥

मति तदा बंधो भवति नैवोदयमात्रेण। यदि उदयमात्रेण बंधो भवति ? तदा सर्वदा संसार एव। कस्मात् ? इति चेत् संसारिणां सर्वदेव कर्मोदयस्य विद्यमानत्वात्। तर्हि कर्मोदयो बंधकारणं न भवति, ? इति चेत् तन्न निर्विकल्पसमाधिभ्रष्टानां मोहसहितकर्मोदयो व्यवहारेण निमित्तं भवति। निश्चयेन पुनः अशुद्धोपादानकारणं स्वकीयरागाद्यज्ञानभाव एव भवति ॥१६४।१६५॥ अथ वीतरागस्वसंवेदनज्ञानिनो जीवस्य रागद्वेषमोहरूपभावास्रवाणामभावं दर्शयति;—णत्थि

उस रूप से वे प्रकट आस्रव हैं। तथा उन मिथ्यात्वादिकों को ज्ञानावरणादि कर्मों के आगमन की निमित्तता होने के कारण आत्मा के अज्ञानमय राग, द्वेष, मोह परिणाम हैं इसलिये मिथ्यात्व आदि के कर्म के आस्रव की निमित्तता की हेतुता से राग द्वेष मोह ही आस्रव हैं वे अज्ञानी के ही होते हैं ऐसा तात्पर्य से अर्थ निकलता है।

भावार्थ—ज्ञानावरणादि कर्मों के आने का कारण तो मिथ्यात्वादि कर्म के उदय रूप पुद्गल के परिणाम हैं और उन कर्मों के आने का निमित्त जीव के राग द्वेष मोह रूप परिणाम हैं, उनको चिद्विकार भी कहते हैं, वे जीव के अज्ञान अवस्था में होते हैं। सम्यग्दृष्टि के अज्ञान अवस्था होती नहीं क्योंकि मिथ्यात्व सहित ज्ञान को अज्ञान कहते हैं। सम्यग्दृष्टि ज्ञानी हो गया है इसलिये वे ज्ञान अवस्था में नहीं हैं। तथा अविरत सम्यग्दृष्टि आदि के चारित्रमोह के उदय से जो रागादिक होते हैं, उनका यह स्वामी नहीं है, उदयकी जबरदस्ती है, उनको वह रोग के समान समझ मेटना चाहता है। इस अपेक्षा से इन से राग नहीं है। इसलिये मिथ्यात्वसहित जो रागादिक होते हैं, वे ही अज्ञानमय राग द्वेष मोह हैं, वे सम्यग्दृष्टि के नहीं हैं ॥१६४।१६५॥

आगे ज्ञानी के उन आस्रवों का अभाव दिखलाते हैं;—**[सम्यग्दृष्टेः]** सम्यग्दृष्टि के **[आस्रवबंधः]** आस्रव बंध **[नास्ति]** नहीं है **[तु]** किंतु **[आस्रवनिरोधः]** आस्रव का निरोध है **[पूर्वनिबद्धानि]** और जो पहले के बांधे हुए **[संति]** सत्ता में मौजूद हैं **[तानि]** उनको **[अबध्नन्]** आगामी नहीं बांधता हुआ **[सः]** वह **[जानाति]** जानता ही है।

यतो हि ज्ञानिनोज्ञानमयैर्भावैरज्ञानमया भावाः परस्परविरोधिनो अवश्यमेव निरुध्यंते। ततो ऽज्ञानमयानां भावानां रागद्वेषमोहानां आस्रवभूतानां निरोधात् ज्ञानिनो भवत्येव आस्रव निरोधः। अतो ज्ञानी नास्रवनिमित्तानि पुद्गलकर्माणि बध्नाति, नित्यमेवाकर्तृत्वात्तानिनवानि न बध्नन् सदवस्थानि पूर्वबद्धानि ज्ञानस्वभावत्वात्केवलमेव जानाति ॥ १६६ ॥

इत्यादि पदखंडनारूपेण व्याख्यानं क्रियते। **णत्थि दु आसवबंधो सम्मादिट्ठिस्स आसवणिरोहो** न भवतः, न विद्येते। कौ ? तौ आस्रवबंधौ। गाथायां पुनः समाहारद्वन्द्वसमासापेक्षया द्विवचनमप्येकवचनं कृतं। कस्यास्रवबंधौ न स्तः ? सम्यग्दृष्टेर्जीवस्य। तर्हि किमस्ति ? आस्रवनिरोधलक्षणसंवरोऽस्ति **सो** स सम्यग्दृष्टिः **संते** संति विद्यमानानि **ते** तानि **पुव्वणिबद्धे** पूर्वनिबद्धानि ज्ञानावरणादि कर्माणि। अथवा प्रत्ययापेक्षया पूर्वनिबद्धान् मिथ्यात्वादिप्रत्ययान् **जाणदि** जानाति वस्तुस्वरूपेण जानाति। कि कुर्वन् सन् ? **अबंधंतो** विशिष्टभेदज्ञानबलान्नवतराण्यभिनवान्यबध्नन्—अनुपार्जयन् इति। अयमत्र भावार्थः। सरागवीतरागभेदेन द्विधा सम्यग्दृष्टिर्भवति। तत्र योऽसौ सरागसम्यग्दृष्टिः,

सोलसपणवीसणभ दसचउछक्केक्क बंधवोछिण्णा।
दुगतीसचदुरपुव्वे पणसोलसजोगिणो इक्को ॥ गो० कर्म० ९४ ॥

इत्यादि बंधत्रिभंगकथितबंधविच्छेदक्रमेण मिथ्यादृष्ट्यपेक्षया त्रिचत्वारिंशत्प्रकृतीनामबधकः। सप्ताधिकसप्ततिप्रकृतीनामल्पस्थित्यनुभागरूपाणां बधकोऽपि सन् संसारस्थितिच्छेदको भवति। तेन कारणेनाबंधक इति। तथैवा-

---

टीका—जिस कारण निश्चय से ज्ञानी के अज्ञानमय भाव हैं वे अवश्य निरोध रूप (अभाव रूप)होते है, ज्ञानमय भावों से अज्ञानमय भाव रुक जाते है और जिस कारण वे परस्पर विरोधी हैं, विरोधियों का एक जगह रहना होता नही है, इस कारण राग द्वेष मोह भाव हैं वे अज्ञानमय हैं, आस्रव स्वरूप हैं, उनके निरोध से ज्ञानी के आस्रव का निरोघ होता ही है। इसलिये ज्ञानी, आस्रव निमित्तवाले ज्ञानावरण आदि पुद्गल कर्मों को नहीं बांधता। जिस कारण सदा उन कर्मों का अकर्ता है, इस कारण कर्मों को नवीन नहीं बांधता जो पहले बंधे हुए थे वे सत्तारूप अवस्थित है, उनको केवल जानता ही है क्योंकि ज्ञानी का ज्ञान ही स्वभाव है कर्ता स्वभाव नहीं है, कर्ता होवे तो बांधे।

भावार्थ—ज्ञानी हुए वाद अज्ञान रूप राग-द्वेष मोह भावों का निरोध है, राग-द्वेष मोह का निरोध होने पर मिथ्यात्व आदि आस्रव भावों का निरोध होता है और आस्रव के निरोध से नवीन बंध का निरोध होता है। तथा जो पूर्व बंधे हुए सत्ता मे स्थित है, उनका ज्ञाता ही रहता है कर्ता नहीं होता और जब कर्ता नही हुआ तब ज्ञानी का ज्ञान ही स्वभाव है। यद्यपि अविरत सम्यग्दृष्टि आदि के चारित्र-मोह का उदय है, उसको ऐसा जानना कि यह उदय की बलवत्ता है, वह अपनी शक्ति के अनुसार उन को रोग रूप जानकर काटता ही है इसलिये हुए भी अनहुए सरीखे कहे जाते हैं, वे आगामी सामान्यसंसार के बंधरूप नही है। जो अल्पस्थिति अनुभागरूप बंध करते हैं, वे अज्ञान के पक्ष में नहीं गिने। अज्ञान के पक्ष में तो मिथ्यात्व अनंतानुबंधी के निमित्त से बंधता है, वह गिना जाता है इस प्रकार ज्ञानी के आस्रव का बंध नही गिना ॥ १६६ ॥

अथ रागद्वेषमोहानामास्रवत्वं नियमयति—

भावो रागादिजुदो जीवेण कदो दु बंधगो भणिदो।
रायादिविप्पमुक्को अबंधगो जाणगो णवरिं ॥ १६७ ॥

भावो रागादियुतः जीवेन कृतस्तु बंधको भणितः।
रागादिविप्रमुक्तोऽबंधको ज्ञायको नवरि ॥ १६७ ॥

इह खलु रागद्वेषमोहसंपर्कजोऽज्ञानमय एव भावः, अयस्कांतोपलसंपर्कज इव कालायसमूचीं कर्म कर्तुमात्मानं चोदयति। तद्विवेकजस्तु ज्ञानमयः, अयस्कांतोपलविवेकज इव कालायससूचीमकर्मकरणौत्सुकमात्मानं स्वभावेनैव स्थापयति। ततो रागादिसंकीर्णोऽज्ञानमय एव कर्तृत्वे चोदकत्वाद्बंधकः। तदसंकीर्णस्तु स्वभावोद्भासकत्वात्केवलं ज्ञायक एव, न मनागपि बंधकः ॥ १६७ ॥

विरतिसम्यग्दृष्टेर्गुणस्थानादुपरि यथासंभवं सरागसम्यक्त्वपर्यंतं, अधस्तनगुणस्थानापेक्षया तारतम्येनाबंधकः। उपरिमगुणस्थानापेक्षया पुनर्बंधकः। ततश्च वीतरागसम्यक्त्वे जाते साक्षादबंधको भवति, इति मत्वा वयं सम्यग्दृष्टयः सर्वथा बंधो नास्तीति न वक्तव्यं। इति आस्रवविपक्षद्वारेण संवरस्य संक्षेपसूचनव्याख्यानमुख्यत्वेन गाथात्रयं गतं ॥ १६६ ॥ अथ रागद्वेषमोहरूपभावानामास्रवत्वं निश्चिनोति;—**भावो रागादिजुदो जीवेण कदो दु बंधगो होदि** यथा अयस्कांतोपलसंपर्कजो भावः परिणतिविशेषः, कालायससूचिं प्रेरयति तथा जीवेन कृतो रागाद्यज्ञानजो भावः परिणतिविशेषः

आगे राग द्वेष मोह इनके ही आस्रवत्व का नियम करते हैं;—**[रागादियुक्तो भावः]** जो रागादि से युक्त भाव **[जीवेन कृतः]** जीव के द्वारा किया गया हो **[तु]** वही **[बंधको भणितः]** नवीन कर्म का बंध करने वाला कहा गया है और जो **[रागादिविप्रमुक्तः]** रागादिक भावों से रहित है वह **[अबंधकः]** बंध करने वाला नहीं है **[केवलं]** केवल **[ज्ञायकः]** जानने वाला ही है।

टीका—इस आत्मा में निश्चय से जो राग द्वेष मोह के मिलाप से उत्पन्न हुआ भाव है वह अज्ञानमय ही है। जैसे चुंबक पत्थर के संबंध से उत्पन्न हुआ भाव लोहे की सुई को चलाता है, उसी प्रकार वह अज्ञान भाव आत्मा को कर्म करने के लिये प्रेरणा करता है तथा उन रागादिकों के भेद ज्ञान से उत्पन्न हुआ जो भाव है, वह ज्ञानमय है। जैसे चुंबक पाषाण के संसर्ग बिना सुई का स्वभाव चलने रूप नहीं है उसी प्रकार आत्मा को कर्म करने में अनुत्साह रूप स्वभाव से स्थापित करता है। इसलिये रागादिकों से मिला हुआ अज्ञानमय भाव ही कर्म के कर्तृत्व में प्रेरक है इस कारण नवीन बंध का करने वाला है तथा रागादिक से न मिला हुआ भाव ही अपने स्वभाव का प्रगट करने वाला है। वह केवल जानने वाला ही है, वह नवीन कर्म का किंचिन्मात्र भी बंध करने वाला नहीं है।

भावार्थ—रागादिक के मिलाप से हुआ अज्ञानमय भाव ही बंध करने वाला है और रागादिक से नहीं मिला ज्ञानमय भाव बंध का करने वाला नहीं है, यह नियम है ॥१६७॥

अथ रागाद्यसंकीर्णभावसंभवं दर्शयति—

पक्के फलह्मि पडिए जह ण फलं बज्झए पुणो विंटे।
जीवस्स कम्मभावे पडिए ण पुणोदयमुवेई ॥ १६८ ॥

पक्वे फले पतिते यथा न फलं बध्यते पुनर्वृंते।
जीवस्य कर्मभावे पतिते न पुनरुदयमुपैति ॥ १६८ ॥

यथा खलु पक्वं फलं वृंतात्सकृद्विश्लिष्टं सन्न पुनर्वृंतसंबंधमुपैति तथा कर्मोदयजो भावो जीवभावात्सकृद्विश्लिष्टः सन्, न पुनर्जीवभावमुपैति। एवं ज्ञानमयो रागाद्यसंकीर्णो भावः संभवति ॥ १६८ ॥

कर्ता, शुद्धस्वभावेन सानंदमव्ययमनादिमनंतशक्तिमुद्योतिनं निरुपलेपगुणमपि जीवं शुद्धस्वभावात्प्रच्युतं कृत्वा कर्मबंधं कर्तुं प्रेरयति। **रागादिविप्पमुक्को अबंधगो जाणगो णवरि** यथा चायस्कांतोपलसंपर्करहितो भावः परिणतिविशेषः कालायससूचिं न प्रेरयति तथा रागाद्यज्ञानविप्रमुक्तो भावस्त्वबंधकः सन् नवरि किंतु जीवं कर्मबंधं कर्तुं न प्रेरयति। तर्हि किं करोति ? पूर्वोक्तशुद्धस्वभावेनैव स्थापयति। ततो ज्ञायते निरुपरागचैतन्यचिच्चमत्कारमात्रपरमात्मपदार्थाद्भिन्ना रागद्वेषमोहा एव बंधकारणमिति ॥ १६७ ॥ अथ रागादिरहितशुद्धभावस्य संभवं दर्शयति;—

आगे रागादिक से न मिले ज्ञानमय भाव की संभावना दिखलाते हैं;—**[यथा]** जैसे **[फले]** वृक्ष तथा वेलि का फल **[पक्वे पतिते]** पककर गिर जाय वह **[पुनः]** फिर **[वृंते]** गुच्छे में **[न बध्यते]** नहीं बंधता, उसी तरह **[जीवस्य]** जीव में **[कर्मभावे]** पुद्गल कर्मभाव रूप **[पतिते]** पक कर झड़ जाय अर्थात् निर्जरा हो गई हो वह कर्म **[पुनः]** फिर **[उदयं]** उदय **[न उपैति]** नहीं होता।

टीका—जैसे यह प्रकट है कि पका हुआ फल गुच्छे से एक बार गिर जाय तो वह फल फिर गुच्छे से सम्बन्धित नहीं होता, उसी प्रकार कर्म के उदय से उत्पन्न हुआ जीव का भाव एक बार भी जीव से पृथक् हो जाय तो फिर जीव भाव को प्राप्त नही होता। इस प्रकार रागादिक से मिला हुआ ही ज्ञानभाव संभव है।

भावार्थ—कर्म की निर्जरा होने के बाद वह कर्म फिर उदय में नहीं आता, तब ज्ञानमय ही भाव रह जाता है। इस प्रकार जब जीव का मिथ्यात्व कर्म अनंतानुबंधी सहित सत्ता में से क्षय हो जाता है तब फिर उदय में नहीं आता, तब ज्ञानी हुआ वह फिर कर्म का कर्ता नहीं होता। मिथ्यात्व के साथ रहने वाली प्रकृतियां तो बंधतीं नहीं और अन्य प्रकृति सामान्य संसार का कारण नहीं हैं। मूल से कटे हुए वृक्ष के हरे पत्ते के समान हैं, वे शीघ्र ही सूखने योग्य हैं। इस प्रकार ज्ञानी का रागादिक से न मिला हुआ ज्ञानमय भाव संभव होता है, चारित्र मोह के उदय का राग अज्ञानमय नहीं गिना जाता क्योंकि सम्यग्दृष्टि के उसका स्वामित्व नहीं है ॥१६८॥

भावो[1] रागद्वेषमोहैर्विना यो जीवस्य स्याद् ज्ञाननिर्वृत्त एव ।
रुंधन् सर्वान् [2]द्रव्यकर्मास्रवौघान् एषोऽभावः सर्वभावास्रवाणां ॥ ११४ ॥

अथ ज्ञानिनो द्रव्यास्रवाभावं दर्शयति;—

पुढवीपिंडसमाणा पुव्वणिबद्धा दु पच्चया तस्स ।
कम्मसरीरेण दु ते बद्धा सव्वेपि णाणिस्स ॥ १६१ ॥

पृथ्वीपिंडसमानाः पूर्वनिबद्धास्तु प्रत्ययास्तस्य ।
कर्मशरीरेण तु ते बद्धाः सर्वेऽपि ज्ञानिनः ॥ १६६ ॥

ये खलु पूर्वमज्ञानेनैव बद्धा मिथ्यात्वाविरतिकषाययोगा द्रव्यास्रवभूताः प्रत्ययाः, ते ज्ञानिनो द्रव्यांतरभूता अचेतनपुद्गलपरिणामत्वात् पृथ्वीपिंडसमानाः । ते तु सर्वेऽपि

पक्के फलम्मिपडिदे जह ण फलं वज्झदे पुणो विंटे यथा पक्वे फले पतिते सति पुनरपि तदेव फलं वृंते न बध्यते । **जीवस्स कम्मभावे पडिदे ण पुणोदयमुवेहि** तथा तत्त्वज्ञानिनो जीवस्य सातासातोदयजनितसुखदुःखरूपकर्मभावे कर्मपर्याये पतिते गलिते निर्जीर्णे सति रागद्वेषमोहाभावात् पुनरपि तत्कर्म बंधं नायाति, नैवोदयं च । ततो

अब इस अर्थ का कलश रूप काव्य कहते हैं—**भावो** इत्यादि । **अर्थ**—जो जीव का रागद्वेष मोह के बिना भाव होता है, वह भाव ज्ञान के द्वारा ही रचा हुआ है, यह भाव सब द्रव्यास्रवों को रोकने वाला है इसलिए सभी भावास्रवों का अभाव कहना चाहिए ।

भावार्थ—यहां सब भावास्रवों का अभाव कहा है । वह इस कारण कि संसार का कारण मिथ्यात्व ही है उस सम्बन्धी रागादिक का अभाव हुआ तो सभी भावास्रवों का अभाव हो गया समझना ॥ ११४ ॥

आगे ज्ञानी के द्रव्यास्रव का अभाव दिखलाते हैं;—**[तस्य ज्ञानिनः]** उस पूर्वोक्त ज्ञानी के **[पूर्वनिबद्धाः]** पहले अज्ञान अवस्था में बंधे हुए **[सर्वेपि]** सभी **[प्रत्ययाः]** कर्म **[पृथिवीपिंडसमानाः]** जीव के रागादि भावों के हुए बिना पृथ्वी के पिंड समान हैं जैसे मिट्टी आदि अन्य पुद्गलस्कंध हैं उसी तरह वे भी हैं **[तु]** और वे **[कर्मशरीरेण बद्धाः]** कार्मण शरीर के साथ बंधे हुए हैं ।

टीका—जो पहले अज्ञान से बांधे मिथ्यात्व, अविरति, कषाय, योग रूप द्रव्यास्रवभूत प्रत्यय हैं वे ज्ञानी के अन्य द्रव्य रूप अचेतन पुद्गल द्रव्य के परिणाम होने से पृथिवी के पिंड समान हैं । वे सभी अपने पुद्गल स्वभाव से कार्मण शरीर से ही एक होकर बंधे हैं परन्तु जीव से नहीं बंधे हैं । इस कारण ज्ञानी के द्रव्यास्रव का अभाव स्वभाव से ही सिद्ध है ।

भावार्थ—जब से आत्मा ज्ञानी हुआ, तब से ज्ञानी के भावास्रव का तो अभाव हुआ ही और द्रव्यास्रव हैं वह मिथ्यात्वादि पुद्गल द्रव्य के परिणाम हैं वे कार्मण शरीर से स्वयमेव बंध रहे हैं, जैसे

---

१. सम्यक्त्वपूर्वः शुद्धस्वरूपानुभवः परिणामः । २. द्रव्य कर्मणां ज्ञानावरणादीनामास्रवः प्रतिसमयं धाराप्रवाहरूपतया आत्मप्रदेशैः सहान्योन्यानुगमः तस्यौघान् ।

स्वभावत एव कार्मणशरीरेणैव संबद्धा न तु जीवेन, अतः स्वभावसिद्ध एव द्रव्यास्रवाभावो-ज्ञानिनः ॥१६९॥

भावास्रवाभावमयं प्रपन्नो द्रव्यास्रवेभ्यः स्वत एव भिन्नः।
ज्ञानी सदा ज्ञानमयैकभावो निरास्रवो ज्ञायक एक एव ॥११५॥

कथं ज्ञानी निरास्रवः ? इति चेत्—

चहुविह अणेयभेयं बंधंते णाणदंसणगुणेहिं।
समये समये जह्मा तेण अबंधोत्ति णाणी दु ॥१७०॥

चतुर्विधा अनेकभेदं बध्नंति ज्ञानदर्शनगुणाभ्यां।
समये समये यस्मात् तेनाबंध इति ज्ञानी तु ॥१७०॥

ज्ञानी हि तावदास्रवभावभावनाभिप्रायाभावान्निरास्रव एव। यत्तु[1] तस्यापि द्रव्यप्रत्ययाः प्रतिसमयमनेकप्रकारं पुद्गलकर्म प्रतिबध्नंति तत्र ज्ञानगुणपरिणाम एव हेतुः ॥१७०॥

रागाद्यभावात् शुद्धभावः संभवति। तत एव च सम्यग्दृष्टेर्जीवस्य निर्विकारस्वसंवित्तिबलेन संवरपूर्विका निर्जरा भवतीत्यर्थः ॥ १६८ ॥ अथ ज्ञानिनो नवतरद्रव्यास्रवाभावं दर्शयति;—पुढवीपिंडसमाणा पुव्वणिबद्धा दु पच्चया तस्स

अन्य मृत्तिका के पिंड हैं, वैसे वे भी है। भावास्रव के बिना वे आगामी कर्मबंध के कारण नहीं हैं और पुद्गलमय हैं इस कारण अमूर्तीक चैतन्यस्वरूप जीव से स्वयमेव ही भिन्न हैं, ऐसा ज्ञानी जानता है।१६९।

अब इस अर्थ का कलशरूप काव्य कहते है—**भावा** इत्यादि। **अर्थ**—यह ज्ञानी भावास्रव के अभाव को प्राप्त हुआ है इसलिये द्रव्यास्रव से तो स्वयमेव ही भिन्न है, क्योंकि ज्ञानी तो सदा ज्ञानमय ही (एक) भाववाला है, इस कारण निरास्रव ही है, एक ज्ञायक ही है।

भावार्थ—भावास्रव जो राग द्वेष मोह उनका तो ज्ञानी के अभाव हो गया है और द्रव्यास्रव हैं वे पुद्गल परिणाम हैं, उनसे सदा ही स्वयमेव भिन्न है, इसलिये ज्ञानी निरास्रव ही है ॥११५॥

आगे पूछते हैं कि ज्ञानी निरास्रव किस तरह है ? उसके उत्तर की गाथा कहते हैं:—**[यस्मात्]** जिस कारण **[चतुर्विधाः]** चार प्रकार के जो पूर्व कहे गये मिथ्यात्व, अविरमण, कषाय, योग आस्रव हैं वे **[ज्ञानदर्शनगुणाभ्यां]** दर्शन ज्ञान गुणों द्वारा **[समये समये]** समय समय **[अनेकभेदं]** अनेक भेद लिये **[बध्नंति]** कर्मों को बांधते हैं **[तेन]** इस कारण **[ज्ञानी तु]** ज्ञानी तो **[अबंध इति]** अबंधरूप ही है।

टीका—प्रथम ही ज्ञानी तो आस्रवभाव की भावना के अभिप्राय के अभाव से निरास्रव ही है और उस ज्ञानी के द्रव्यास्रव भी प्रति समय अनेक प्रकार के पुद्गल कर्मों को बांधता है, उसमें ज्ञानगुण का परिणमन कारण है ॥१७०॥

---

१. "ये तु" इत्यपि पाठः।

कथं ज्ञानगुणपरिणामो बंधहेतुरिति चेत्—

जह्मा दु जहराणादो णाणगुणादो पुणोवि परिणमदि ।
अरणत्तं णाणगुणो तेण दु सो बंधगो भणिदो ॥१७१॥

यस्मात्तु जघन्यात् ज्ञानगुणात् पुनरपि परिणमते ।
अन्यत्वं ज्ञानगुणः तेन तु स बंधको भणितः ॥१७१॥

ज्ञानगुणस्य हि यावज्जघन्यो भावः, तावत् तस्यांतर्मुहूर्तविपरिणामित्वात् पुनः पुनरन्यतयास्ति परिणामः । स तु यथाख्यातचारित्रावस्थाया अधस्तादवश्यंभाविरागसद्भावात् बंधहेतुरेव स्यात् ॥१७१॥

पृथ्वीपिंडसमानाः अकिंचित्करा भवंति । के ते ? पूर्वनिबद्धाः मिथ्यात्वादिद्रव्यप्रत्ययाः । कस्य ? तस्य वीतरागसम्यग्दृष्टेर्जीवस्य । यतो रागाद्यजनकत्वादकिंचित्करास्ततः कारणात्, नवतरद्रव्यकर्मबंधो न भवति । तर्हि पृथ्वीपिंडसमानाः संतः केन रूपेण तिष्ठंति ? **कम्मसरीरेण दु ते बद्धा सव्वेपि णाणिस्स** कार्मणशरीररूपेणैव ते सर्वे बद्धास्तिष्ठंति, न च रागादिभावपरिणतजीवरूपेण । कस्य ? निर्मलात्मानुभूतिलक्षणभेदविज्ञानिनो जीवस्येति । किंच यद्यपि द्रव्यप्रत्ययाः कार्मणशरीररूपेण मुष्टिबद्धविषवत्तिष्ठंति तथापि उदयाभावे सुखदुःखविकृतिरूपा बाधां न कुर्वंति । तेन कारणेन ज्ञानिनो जीवस्य, नवतरकर्मास्रवाभाव इति भावार्थः । एवं रागद्वेषमोहरूपास्रवाणां विशेषविवरणरूपेण स्वतंत्रगाथात्रयं गत ॥१६६॥ अथ कथं ज्ञानी निरास्रवः ? इति पृच्छतिः—**चहुविह अणेयभेयं बंधंते णाणदंसणगुणेहिं** चहुविह इति बहुवचने प्राकृतलक्षणबलेन ह्रस्वत्व । चतुर्विधा मूलप्रत्ययाः कर्तारः ज्ञानावरणादिभेदभिन्नमनेकविध कर्म कुर्वंति । काभ्या कृत्वा ? ज्ञानदर्शनगुणाभ्यां दर्शनज्ञानगुणौ कथं बंधकारणभूतौ भवतः ? इति चेत्—अयमत्र भावः, द्रव्यप्रत्यया उदयमागताः सतः जीवस्य ज्ञानदर्शनगुणद्वयं रागाद्यज्ञानभावेन परिणमयंति, तदा रागाद्यज्ञानभावपरिणतं

आगे फिर पूछते हैं कि ज्ञानगुण का परिणाम बंध का कारण कैसे है, उसके उत्तर की गाथा कहते हैं:—**[यस्मात् तु]** जिस कारण **[ज्ञानगुणः]** ज्ञानगुण **[पुनरपि]** फिर भी **[जघन्यात् ज्ञानगुणात्]** जघन्य ज्ञानगुण से **[अन्यत्वं]** अन्य रूपसे **[परणमते]** परिणमन करता है **[तेन तु]** इसी कारण **[सः]** वह ज्ञानगुण **[बंधको भणितः]** कर्म का बंध करने वाला कहा गया है ।

टीका—जब तक ज्ञानगुण का जघन्य भाव है—क्षयोपशमरूप भाव है, तब तक अंतमुहूर्त विपरिणामी है, ज्ञानभावरूप अन्तर्मुहूर्त ही रहता है, उसके बाद अन्य प्रकार परिणमन करता है । वह यथाख्यात चारित्र अवस्था के नीचे अवश्यंभावी राग परिणाम का सद्भाव होने से बंध का कारण ही है ।

भावार्थ—क्षयोपशमज्ञान का एक ज्ञेयके ऊपर ठहरना अंतर्मुहूर्त ही होता है, पीछे अवश्य अन्य ज्ञेयको अवलंबन करता है । इस कारण स्वरूप में भी अंतमुहूर्त ही ठहरना हो सकता है । इसलिये ऐसा अनुमान है कि यथाख्यात चारित्र अवस्था के नीचे अवश्य राग परिणाम का सद्भाव है, उस राग के सद्भाव से बंध भी होता है । इसकारण ज्ञान गुणका जघन्य भाव बंधका कारण कहा गया है ॥१७१॥

एवं सति कथं ज्ञानी निरास्रवः इति चेत्—

दंसणणाणचरित्तं जं परिणमदे जहण्णभावेण ।
णाणी तेण दु बज्झदि पुग्गलकम्मेण विविहेण ॥१७२॥

दर्शनज्ञानचारित्रं यत्परिणमते जघन्यभावेन ।
ज्ञानी तेन तु बध्यते पुद्गलकर्मणा विविधेन ॥१७२॥

यो हि ज्ञानी स 'बुद्धिपूर्वकरागद्वेषमोहरूपास्रवभावाभावात् निरास्रव एव, किंतु सोऽपि यावज्ज्ञानं सर्वोत्कृष्टभावेन द्रष्टुं ज्ञातुमनचरितुं वाऽशक्तः सन् जघन्यभावेनैव ज्ञानं पश्यति जाना-

---

ज्ञानदर्शनगुणद्वयं बंधकारणं भवति । वस्तुतस्तु रागाद्यज्ञानभावेपरिणत ज्ञानदर्शनगुणद्वयं अज्ञानमेव भण्यते । तत्एव **'अणाणदंसणगुणेहि'** इति पाठान्तरं केचन पठंति । **समए समए जह्मा तेण अबंधुत्ति णाणी दु** समये समये यस्मात् प्रत्ययाः कर्तार । ज्ञानदर्शनगुणं रागाद्यज्ञानभावपरिणतं कृत्वा नवतरं कर्म कुर्वंति । तेन कारणेन भेदज्ञानी बंधको न भवति । किं तु ज्ञानदर्शनरंजकत्वेन प्रत्यया एव बंधका, इति ज्ञानिनो निरास्रवत्वं सिद्धं ॥१७०॥ अथ कथं ज्ञानगुणपरिणामो बंधहेतुरिति पुनरपि पृच्छति:—**जह्मा दु जहण्णादो णाणगुणादो पुणोवि परिणमदि अण्णत्तं णाणगुणो** यस्मात् यथाख्यातचारित्रात्पूर्वं जघन्यो हीनः सकषायो ज्ञानगुणो भवति । तस्मात्—जघन्यत्वादेव ज्ञानगुणात् सकाशात्, अंतर्मुहूर्तानंतरं निर्विकल्पसमाधौ स्थातु न शक्नोति जीवः । ततः कारणात् अन्यत्वं सविकल्पक-पर्यायांतरं परिणमति । स कः ? कर्ता । ज्ञानगुणः । **तेण दु सो बंधगो भणिदो** तेन सविकल्पेन कषायभावेन स ज्ञानगुणो बंधको भणितः । अथवा द्वितीयव्याख्यानं । जघन्यात् कोऽर्थः, जघन्यात् मिथ्यादृष्टिज्ञानगुणात् । काललब्धि-वशेन सम्यक्त्वे प्राप्ते सति ज्ञानगुणः कर्ता मिथ्यापर्यायं त्यक्त्वा अन्यत्वं सम्यग्ज्ञानित्वं परिणमति । **तेण दु सो बंधगो**

आगे फिर पूछते हैं कि यदि ज्ञान गुण का जघन्यभाव अन्यत्व रूप परिणाम बंध का कारण है तो ज्ञानी निरास्रव है, ऐसा किस तरह से कहा ? उसके उत्तर की गाथा कहते हैं;—**[दर्शनज्ञानचारित्रं]** दर्शनज्ञानचारित्र **[यत्]** जिस कारण **[जघन्यभावेन]** जघन्य भाव से **[परिणमते]** परिणमन करते हैं **[तेन तु]** इस कारण से **[ज्ञानी]** ज्ञानी **[विविधेन]** अनेक प्रकार के **[पुद्गलकर्मणा]** पुद्गल कर्मों से **[बध्यते]** बंधता है ।

टीका—निश्चय से जो ज्ञानी है वह बुद्धि पूर्वक राग द्वेष मोहरूप आस्रव भाव के अभाव से निरास्रव ही है । वहां यह विशेषता है कि वही ज्ञानी जब तक ज्ञान को सर्वोत्कृष्ट भाव से देखने को, जानने को, आचरण करने को असमर्थ है तथा जघन्य भाव से ही ज्ञान को देखता है, जानता है, आचरण करता है तब तक उस ज्ञानी के भी ज्ञान के जघन्य भाव की अन्यथा अप्राप्ति से अनुमान रूप

---

१. बुद्धिपूर्वकास्ते परिणामा ये मनोद्वारा बाह्यविषयानालंब्य प्रवर्तंते, प्रवर्तमानाश्च स्वानुभवगम्याः अनुमानेन परस्यापि गम्या भवंति । अबुद्धि-पूर्वकास्तु परिणामा इन्द्रियमनोव्यापारमंतरेण केवल मोहोदयनिमित्तास्ते तु स्वानुभवगोचरत्वादबुद्धिपूर्वका इति विशेषः ।

त्यनुचरति च तावत्तस्यापि जघन्यभावान्यथानुपपत्त्याऽनुमीयमानाबुद्धिपूर्वक[1]कलंकविपाकसद्भावात् पुद्गलकर्मबंधः स्यात् । अतस्तावज्ज्ञानं द्रष्टव्यं ज्ञातव्यमनुचरितव्यं च यावज्ज्ञानस्य यावान् पूर्णो भावस्तावान् दृष्टो ज्ञातोऽनुचरितश्च सम्यग्भवति । ततः साक्षात् ज्ञानीभतः सर्वथा निरास्रव एव स्यात् ॥१७२॥

भणिदो तेन कारणेन स ज्ञानगुणो ज्ञानगुणपरिणतजीवो वा अबंधको भणित इत्यभिप्रायः ॥ १७१ ॥ अथ यथाख्यातचारित्राधस्तादंतर्मुहूर्तानंतरं निर्विकल्पसमाधौ स्थातु न शक्यत इति भणितं पूर्वं । एवं सति कथं ज्ञानी निरास्रव इति चेत्;—**दंसणणाणचरित्तं जं परिणमदे जहण्णभावेण** ज्ञानी तावदीहापूर्वरागादिविकल्पकरणाभावान्निरास्रव एव । किं तु सोऽपि यावत्कालं परमसमाधेरनुष्ठानाभावे सति शुद्धात्मस्वरूपं द्रष्टुं ज्ञातुमनुचरितुं वासमर्थः तावत्कालं तस्यापि सबंधि यद्दर्शनं ज्ञानं चारित्रं तज्जघन्यभावेन सकषायभावेन अनीहितवृत्त्या परिणमति । **णाणी तेण दु बज्झदि पुग्गलकम्मेण विविहेण** तेन करणेन स तु भेदज्ञानी स्वकीयगुणस्थानानुसारेण परंपरया मुक्तिकारणभूतेन तीर्थंकरनामकर्मप्रकृत्यादिपुद्गलरूपेण विविधपुण्यकर्मणा बध्यते । इति ज्ञात्वा ख्यातिपूजालाभभोगाकांक्षारूपनिदानबंधादिविभावपरिणामपरिहारेण निर्विकल्पसमाधौ स्थित्वा तावत्पर्यंतं शुद्धात्मस्वरूपं द्रष्टव्यं ज्ञातव्यमनुचरितव्यं च । यावत्तस्य शुद्धात्मस्वरूपस्य परिपूर्णः केवलज्ञानरूपो भावो दृष्टो ज्ञातोऽनुचरितश्च भवतीति भावार्थः । एवं ज्ञानिनो भावास्रवस्वरूपनिषेधमुख्यत्वेन गाथात्रयं गतं ॥ १७२ ॥ अथ द्रव्यप्रत्ययेषु विद्यमानेषु कथं ज्ञानी निरास्रवः ? इति

किया गया अबुद्धिपूर्वक कर्ममलकलंक का सद्भाव है । इसलिये पुद्गल कर्म का बंध होता है इस कारण यह उपदेश है कि तभी तक ज्ञान को देखना, जानना और आचरण करना, जब तक ज्ञान का जितना पूर्ण भाव है उतना देखा, जाना, आचरण करना अच्छी तरह न हो जाय । उसके बाद साक्षात् ज्ञानी हुआ सर्वथा निरास्रव ही होता है ।

भावार्थ—ज्ञानी को निरास्रव इस तरह कहा है कि जब तक इसके क्षयोशमज्ञान है, तब तक तो बुद्धि पूर्वक अज्ञानमय राग द्वेष मोह का अभाव है इसलिये निरास्रव है और जब तक क्षयोपशमज्ञान है, तब तक दर्शन ज्ञान चारित्र जघन्य भाव से परिणमते हैं, तब तक संपूर्ण ज्ञान का देखना, जानना, आचरण होना नहीं होता । सो इस जघन्यभाव से ही ऐसा जानते हैं कि इसके अबुद्धि पूर्वक कर्म कलंक विद्यमान है, उसी से बंध भी होता है वह चारित्र मोह के उदय से है, अज्ञानमय भाव नहीं है । इसलिये ऐसा उपदेश है कि जब तक ज्ञान संपूर्ण न हो—केवल ज्ञान न प्रकट हो तब तक ज्ञान का ही ध्यान निरंतर करना, ज्ञान को ही देखना, ज्ञान को ही जानना, ज्ञान को ही आचरना । इसी मार्ग से ही चारित्र मोह का नाश होता है और केवल ज्ञान प्रकट होता है तब सब तरह से साक्षात् निरास्रव होता है । यह विवक्षा की विचित्रता है । बुद्धिपूर्वक रागादिक के अभाव की अपेक्षा तो अबुद्धिपूर्वक रागादिक होने पर भी निरास्रव कहा है और अबुद्धिपूर्वक का अभाव होने के बाद तो केवल ज्ञान ही उत्पन्न होगा, तब साक्षात् निरास्रव होगा ही ॥१७२॥

---

१. कर्म कलंक इत्यर्थः ।

संन्यस्यन्निजबुद्धिपूर्वमनिशं रागं समग्रं स्वयं,
वारंवारमबुद्धिपूर्वमपि तं जेतुं स्वशक्तिं स्पृशन्।
उच्छिदन् परिवृत्तिमेव[1] सकलां ज्ञानस्य पूर्णोभवन्-
नात्मानित्यनिरास्रवो भवति हि ज्ञानी यदा स्यात्तदा॥ ११६॥
सर्वस्यामेव जीवंत्यां द्रव्यप्रत्ययसंततौ।
कुतो निरास्रवो ज्ञानी नित्यमेवेति चेन्मतिः॥ ११७॥

सव्वे पुव्वणिबद्धा दु पच्चया संति सम्मदिट्ठिस्स।
उवओगप्पाओगं बंधंते कम्मभावेण॥ १७३॥
संति दु णिरुवभोज्जा बाला इत्थी जहेव पुरिसस्स।
बंधदि ते उवभोज्जे तरुणी इत्थी जह णरस्स॥ १७४॥
होदूण णिरुवभोज्जा तह बंधदि जह हवंति उवभोज्जा।
सत्तट्ठविहा भूदा णाणावरणादिभावेहिं॥ १७५॥

चेत्;—**सव्वे पुव्वणिबद्धा दु पच्चया संति सम्मदिट्ठिस्स** सर्वे पूर्वनिबद्धा द्रव्यप्रत्ययाः सति तावत्सम्यग्दृष्टेः। **उवओगप्पाओगं बंधंते कम्मभावेण** यद्यपि विद्यंते तथाप्युपयोगेन प्रायोग्यं तत्कालोदयप्रायोग्यकर्मतापन्नं कर्मं

अब इसी अर्थ का कलश रूप काव्य कहते है,—**संन्य** इत्यादि। **अर्थ**—यह आत्मा जब ज्ञानी होता है तब अपने बुद्धि पूर्वक सभी राग को आप निरतर दूर करता है और अबुद्धिपूर्वक राग को भी जीतने के लिये वारंवार अपनी ज्ञानानुभवन रूप शक्ति का स्पर्श करता हुआ प्रवृत्त होता है तथा ज्ञान के समस्त पलटने को दूर करता हुआ ज्ञान को स्वरूप में ठहराना पूर्ण हुआ प्रवृत्त होता है। जब ऐसा ज्ञानी होता है तब शाश्वत निरास्रव होता है।

भावार्थ—जब सब राग को हेय जाना तब उसके मेटने के लिए उद्यमी होता है अतः सदा निरास्रव ही कहना चाहिए, क्योंकि इसके आस्रव भावों की भावना के अभिप्राय का अभाव है। यहां बुद्धिपूर्वक और अबुद्धिपूर्वक की दो सूचनाये हैं। एक तो वह कि आप तो करना नही चाहता किन्तु पर निमित्त से जबरदस्ती से हो, उसको आप जानता है तो भी उसको बुद्धि पूर्वक कहना चाहिए। और दूसरा वह कि अपने ज्ञान गोचर ही नही प्रत्यक्ष ज्ञानी जिसे जानते हैं तथा उसके अविनाभावी चिन्ह के अनुमान से उसे जानते हैं उसे अबुद्धि पूर्वक जानना॥ १२६॥

आगे पूछते हैं कि सभी द्रव्यास्रव की संतति को जीवित रखने से ज्ञानी निरास्रव किस प्रकार है? ऐसे प्रश्न का श्लोक कहते हैं—**सर्वस्या** इत्यादि। **अर्थ**—ज्ञानी के सभी द्रव्यास्रव की संतति के जीने

---

१. परिवृत्ति—इत्यपि पाठः।

एदेण कारणेण दु सम्मादिट्ठी अबंधगो होदि (भणिदो) ।
आसवभावाभावे ण पच्चया बंधगा भणिदा ॥ १७६ ॥ (चतुष्कं)

सर्वे पूर्वनिबद्धास्तु प्रत्ययाः संति सम्यग्दृष्टेः ।
उपयोगप्रायोग्यं बध्नंति कर्मभावेन ॥ १७३ ॥
संति तु निरुपभोग्यानि बाला स्त्री यथेह पुरुषस्य ।
बध्नाति तानि उपभोग्यानि तरुणी स्त्री यथा नरस्य ॥ १७४ ॥
भूत्वा निरुपभोग्यानि तथा बध्नाति यथा भवंत्युपभोग्यानि ।
सप्ताष्टविधानि भूतानि ज्ञानावरणादिभावैः ॥ १७५ ॥
एतेन कारणेन तु सम्यग्दृष्टिरबंधको भणितः ।
आस्रवभावाभावे न प्रत्यया बंधका भणिताः ॥ १७६ ॥

बध्नंति । केन कृत्वा ? भावेन रागादिपरिणामेन, नचास्तित्वमात्रेण बंधकारणं भवंतीति । **संतावि णिरुवभोज्जा बाला इत्थी जहेव पुरिसस्स** संत्यपि विद्यमानान्यपि कर्माणि क्वचित्प्राकृते लिंगव्यभिचारोऽपि. इति वचनान्नपुंसक

मे ज्ञानी नित्य ही निरास्रव है ऐसा क्यो कहा ? ऐसी शिष्य की आशंका रूप बुद्धि है उसके उत्तर मे गाथा कहते है,—**[सम्यग्दृष्टेः]** सम्यग्दृष्टि के **[सर्वे]** सभी **[पूर्वनिबद्धाः तु]** पूर्व अज्ञान अवस्था मे बांधे **[प्रत्ययाः]** मिथ्यात्वादि आस्रव **[संति]** सत्ता रूप मौजूद है वे **[उपयोगप्रायोग्यं]** उपयोग के प्रयोग करने रूप जैसे हो वैसे **[कर्मभावेन]** उसके अनुसार कर्म भाव से **[बध्नंति]** आगामी बंध को प्राप्त होते है **[निरुपभोग्यानि]** और जो पूर्व बंधे प्रत्यय उदय विना आये भोगने के अयोग्य **[भूत्वा]** होकर स्थित है वे फिर **[तथा बध्नंति]** आगामी उस तरह बंधते है **[यथा]** जैसे **[ज्ञानावरणादि भावैः]** ज्ञानावरणादि भावों के द्वारा **[सप्ताष्टविधानि]** सात आठ प्रकार फिर **[उपभोग्यानि]** भोगने योग्य **[भवंति]** हो जायं **[तु]** और **[निरुपभोग्यानि संति]** वे पूर्व बंधे प्रत्यय सत्ता में ऐसे है **[यथा]** जैसे **[इह]** इस लोक में **[पुरुषस्य]** पुरुष के **[बालास्त्री]** बालिका स्त्री भोगने योग्य नहीं होती **[तानि]** और वे ही **[उपभोग्यानि]** भोगने योग्य होते हैं तब **[बध्नाति]** पुरुष को बांधते है **[यथा]** जैसे **[तरुणी स्त्री]** वही बाला स्त्री जवान हो जाय तब **[नरस्य]** पुरुष को बांध लेती है अर्थात् पुरुष उसके आधीन हो जाता है यही बंधना है । **[एतेन तु कारणेन]** इसी कारण से **[सम्यग्दृष्टिः]** सम्यग्दृष्टि **[अबंधकः]** अबंधक **[भणितः]** कहा गया है क्योंकि **[आस्रवभावाभावे]** आस्रवभाव जो राग-द्वेष-मोह उनका अभाव होने से **[प्रत्ययाः]** मिथ्यात्व आदि प्रत्यय सत्ता में होने पर भी **[बंधकाः]** आगामी कर्म बंध के करने वाले **[न]** नहीं **[भणिताः]** कहे गये हैं ।

यतः सदवस्थायां तदात्वपरिणीतबालस्त्रीवत् पूर्वमनुपभोग्यत्वेऽपि विपाकावस्थायां प्राप्तयौवनपूर्वपरिणीतस्त्रीवत् उपभोग्यत्वात्[1] उपयोगप्रायोग्यं पुद्गलकर्मद्रव्यप्रत्ययाः संतोऽपि कर्मोदयकार्यजीवभावसद्भावादेव बध्नंति ततो ज्ञानिनो यदि द्रव्यप्रत्ययाः पूर्वबद्धाः संति । संतु, तथापि स तु निरास्रव एव कर्मोदयकार्यस्य रागद्वेषमोहरूपस्यास्रवभावस्याभावे द्रव्यप्रत्ययानामबंधहेतुत्वात् ॥१७३।१७४।१७५।१७६॥

लिंगे पुल्लिगनिर्देशः । पुल्लिगेऽपि नपुसकलिंगनिर्देशः । कारके कारकांतरनिर्देशो भवति, इति । तानि कर्माणि उदयात्पूर्वं निरुपभोग्यानि भवंति । केन दृष्टांतेन ? बाला स्त्री यथा पुरुषस्य । **बंधदि ते उवभोज्जे तरुणी इत्थी जह णरस्स** तानि कर्माणि उदयकाले उपभोग्यानि भवंति । रागादिभावेन नवतराणि च बध्नंति । कथं ? यथा तरुणी स्त्री नरस्येति ।

टीका—जैसे तत्काल की विवाहित बाल स्त्री पहले बालक अवस्था मे पुरुष के भोगने योग्य नही होती, फिर वही स्त्री जब तरुणी हो जाय, तब यौवन अवस्था मे भोगने योग्य होती है तब पुरुष भी उसके आधीन हो जाता है। उसी प्रकार पहले बांधे कर्म जब तक सत्ता अवस्था में है तब तक भोगने योग्य नही होते, फिर वे ही कर्म जब विपाक अवस्था को प्राप्त हो जाते है तब उस उदय अवस्था में भोगने योग्य हो जाते है तब जैसा आत्मा का उपयोग विकार सहित हो उसी योग्यता के अनुसार पुद्गल कर्म रूप द्रव्य प्रत्यय सत्ता रूप होने पर भी कर्म के उदयानुसार जीव के भावों के सद्भाव से ही बंध को प्राप्त होते हैं। इस कारण ज्ञानी के द्रव्यकर्मरूप प्रत्यय (आस्रव) सत्ता में मौजूद हैं तो भी वह ज्ञानी तो निरास्रव ही है, क्योंकि कर्म के उदय का कार्य जो जीव का भाव राग द्वेष मोह रूप आस्रवभाव उसके अभाव होने पर द्रव्यास्रव बंध के कारण नही है।

भावार्थ—सत्ता में मिथ्यात्वादि द्रव्यास्रव विद्यमान है तो भी वे आगामी कर्म बंध के करने वाले नही हैं। क्योंकि बंध के करने वाले तो जीव के राग द्वेष मोह रूप भाव होते है अतः मिथ्यात्वादि द्रव्यास्रव के उदय के और जीव के भावों के कार्य कारण भाव निमित्त नैमित्तिक रूप है। जब मिथ्यात्वादि का उदय आता है, तब जीव का राग द्वेष मोहरूप जैसा भाव हो, उस भाव के अनुसार आगामी बंध होता है। और जब सम्यग्दृष्टि हो जाता है, तब मिथ्यात्व सत्ता मे से नाश हो जाता है उस समय उसके साथ अनंतानुबंधी कषाय तथा उस संबधी अविरति, योग भाव ये भी नष्ट हो जाते है तब उस संबंधी जीव के राग-द्वेष-मोह भाव भी नहीं होते और उस मिथ्यात्व अनतानुबंधी का बंध भी आगामी नही होता। तथा मिथ्यात्व का उपशम होता है, वह सत्ता में ही रहता है तब सत्ता का द्रव्य उदय के विना बंध का कारण ही नहीं है। और जब तक अविरत सम्यग्दृष्टि आदिक गुणस्थानों की परिपाटी में चारित्र मोह के उदय संबंधी बध कहा गया है, वह यहां संसार सामान्य की अपेक्षा तो बंध में गिना नहीं है क्योंकि ज्ञानी अज्ञानी का भेद है। जब तक कर्म के उदय में कर्म का स्वामित्व रखकर परिणमन करता है तब तक ही कर्म का कर्ता कहा गया है, जब पर के निमित्त से परिणमन करे तब उसका

---

१. उपभोग इत्यपि पाठः।

विजहति नहि सत्तां प्रत्ययाः पूर्वबद्धाः समयमनुसरंतो यद्यपि द्रव्यरूपाः ।
तदपि सकलरागद्वेषमोहव्युदासादवतरति न जातु ज्ञानिनः कर्मबंधः ॥११८॥
रागद्वेषविमोहानां ज्ञानिनो यदसंभवः । तत एव न बंधोऽस्य, ते हि बंधस्य कारणं॥११९॥

अथ तमेवार्थं दृढयति । उदयात्पूर्वं निरुपभोग्यानि भूत्वा कर्माणि स्वकीयस्वकीयगुणस्थानानुसारेण, उदयकालं प्राप्य यथा यथा भोग्यानि भवंति, तथा तथा रागादिभावेन परिणामेन आयुष्कबंधकाले अष्टविधभूतानि शेषकाले सप्तविधानि ज्ञानावरणादिद्रव्यकर्मभावेन पर्यायेण नवतराणि बध्नंति, नवास्तित्वमात्रेणेति । रागादिभावास्रवस्याभावे द्रव्यप्रत्यया अस्तित्वमात्रेण बंधकारणं न भवंति । एतेन कारणेन सम्यग्दृष्टिरबंधको भणित इति । किं च विस्तरः, मिथ्यादृष्ट्यपेक्षया चतुर्थगुणस्थाने सरागसम्यग्दृष्टिः, त्रिचत्वारिंशत्प्रकृतीनामबंधकः । सप्ताधिकसप्ततिप्रकृतीनामल्पस्थित्यनुभागरूपाणां बंधकोऽपि संसारस्थितिच्छेदं करोति । तथा चोक्तं सिद्धांते "द्वादशांगावगमस्तत्तीव्रभक्तिरनिवृत्तिपरिणामः केवलिसमुद्घातश्चेति संसारस्थितिघातकरणानि भवंति" तद्यथा, तत्र द्वादशांगश्रुतविषये अवगमो ज्ञानं व्यवहारेण बहिर्विषयः । निश्चयेन तु वीतरागस्वसंवेदनलक्षणं चेति । भक्तिः पुन. सम्यक्त्वं भण्यते व्यवहारेण सरागसम्यग्दृष्टीनांपंचपरमेष्ठ्याराधनारूपा । निश्चयेन वीतरागसम्यग्दृष्टीना शुद्धात्मतत्त्वभावनारूपा चेति । न निवृत्तिरनिवृत्तिः शुद्धात्मस्वरूपादचलनं एकाग्रपरिणतिरिति । तत्रैवं सति द्वादशांगावगमो निश्चयव्यवहारज्ञानं जातं । भक्तिस्तु निश्चयव्यवहारसम्यक्त्वं जातं । अनिवृत्तिपरिणामस्तु सरागचारित्रानंतरं वीतरागचारित्रं जातमिति सम्यग्दर्शनज्ञानचारित्राणि भेदाभेदरत्नत्रयरूपेण संसारविच्छित्तिकारणानि भवंति । केषां ? छद्मस्थानामिति । केवलिनां तु भगवतां दंडकपाटप्रतरलोकपूरणरूपः केवलिसमुद्घातः संसारविच्छित्तिकारणमिति भावार्थः । एवं द्रव्यप्रत्यया विद्यमाना अपि रागादिभावास्रवाभावे सति बंधकारणं न भवंतीति व्याख्यानमुख्यत्वेन गाथाचतुष्टयं गतं ॥१७३।१७४।१७५।१७६॥ अथ यतएव कर्मबंधहेतुभूता रागद्वेषमोहा

ज्ञाता द्रष्टा हो ज्ञानी ही है, कर्ता नहीं है । इस तरह अपेक्षा से सम्यग्दृष्टि हुए बाद चारित्रमोह का उदयरूप परिणाम होने पर भी ज्ञानी ही कहा गया है । जब तक मिथ्यात्व का उदय है, तब तक उस संबंधी राग द्वेष मोह भाव रूप परिणमन से अज्ञानी कहा जाता है । ऐसे ज्ञानी अज्ञानी कहने का भेद जानना । इस प्रकार बंध अबंध का विशेष है । और शुद्धस्वरूप में लीन रहने के अभ्यास से साक्षात् संपूर्ण ज्ञानी केवल ज्ञान प्रकट होने से होता है तब सर्वथा निरास्रव हो जाता है ॥१७३।१७४।१७५।१७६॥

अब इस अर्थ का कलश रूप काव्य कहते हैं—**विजहति** इत्यादि । **अर्थ**—यद्यपि पहले अज्ञान अवस्था में बंध रूप जो हुए थे वे द्रव्यरूप प्रत्यय (द्रव्यास्रव) सत्ता में विद्यमान हैं क्योंकि उनका उदय अपनी स्थिति के अनुसार है इसलिये जब तक उदय का समय नहीं आता तब तक सत्ता में ही द्रव्यास्रव रहते हैं वे अपनी सत्ता को नहीं छोड़ते तोभी ज्ञानी के समस्त रागद्वेष मोह के अभाव से नवीन कर्म का बंध कभी अवतार नहीं रखता ।

भावार्थ—राग द्वेष मोह भावों के विना सत्ता का द्रव्यास्रव बंध का कारण नहीं है । यहां सकल राग द्वेष मोह का अभाव बुद्धिपूर्वक जानना ॥११८॥

इसी अर्थ के दृढ़ करने के लिए गाथा की उत्थानिका में श्लोक कहते हैं;—**राग** इत्यादि ।**अर्थ**—जब ज्ञानी के राग-द्वेष-मोह का होना असंभव है तब ज्ञानी के बंध नहीं है क्योंकि रागद्वेषमोह ही बंध के कारण हैं ॥११९॥

रागो दोसो मोहो य आसवा णत्थि सम्मदिट्ठिस्स ।
तह्मा आसवभावेण विणा हेदू ण पच्चया होंति ॥ १७७ ॥
हेदू चदुव्वियप्पो अट्ठवियप्पस्स कारणं भणिदं ।
तेसिं पि य रागादी तेसिमभावे ण वज्झंति ॥ १७८ ॥ (युग्मम्)

रागो द्वेषो मोहश्च आस्रवा न संति सम्यग्दृष्टेः ।
तस्मादास्रवभावेन विना हेतवो न प्रत्यया भवंति ॥ १७७ ॥
हेतुश्चतुर्विकल्पः अष्टविकल्पस्य कारणं भणितं ।
तेषामपि च रागादयस्तेषामभावे न बध्यंते ॥ १७८ ॥

रागद्वेषमोहा न संति सम्यग्दृष्टेः सम्यग्दृष्टित्वान्यथानुपपत्तेः । तदभावे न तस्य द्रव्यप्रत्ययाः पुद्गलकर्महेतुत्वं बिभ्रति द्रव्यप्रत्ययानां पुद्गलकर्महेतुत्वस्य रागादिहेतुत्वात् । ततो 'हेतुहेत्वभावे हेतुमदभावस्य प्रसिद्धत्वात् ज्ञानिनो नास्ति बंधः ॥ १७७ ॥ १७८ ॥

ज्ञानिनो न संति, ततएव तस्य कर्मबंधो नास्तीति कथयति—**रागो दोसो मोहो य आसवा णत्थि सम्मदिट्ठिस्स** रागद्वेषमोहाः सम्यग्दृष्टेर्न भवंति, सम्यग्दृष्टित्वान्यथानुपपत्तेरिति हेतुः । तथाहि, अनंतानुबंधिक्रोधमानमायालोभमिथ्यात्वोदयजनिता रागद्वेषमोहाः सम्यग्दृष्टेर्न संतीति पक्षः । कस्मात् ? इति चेत्, केवलज्ञानाद्यनंतगुणसहितपरमात्मोपादेयत्वे सति वीतरागसर्वज्ञप्रणीतषट्द्रव्यपंचास्तिकायसप्ततत्त्वनवपदार्थरुचिरूपस्य मूढत्रयादिपंचविंशतिदोषरहितस्य—"संवेओ णिव्वेओ णिंदा गरुहा य उवसमो भत्ती । वच्छल्लं अणुकंपा गुणट्ठ सम्मत्तजुत्तस्स ।" इति गाथाकथितलक्षणस्य

आगे इसी अर्थ के समर्थन की गाथा कहते हैं:—**[रागः]** राग **[द्वेषः]** द्वेष **[च मोहः]** और मोह **[आस्रवाः]** ये आस्रव **[सम्यग्दृष्टेः]** सम्यग्दृष्टि के **[न संति]** नहीं है **[तस्मात्]** इसलिये **[आस्रवभावेन विना]** आस्रवभाव के विना **[प्रत्ययाः]** द्रव्यप्रत्यय **[हेतवः]** कर्मबंध का कारण **[न भवंति]** नहीं हैं **[चतुर्विकल्पः]** मिथ्यात्व आदि चार प्रकार का **[हेतुः]** हेतु **[अष्टविकल्पस्य]** आठ प्रकार के कर्म के बंधने का **[कारणं भणितं]** कारण कहा गया है **[च]** और **[तेषामपि]** उन चार प्रकार के हेतुओं को भी **[रागादयः]** जीव के रागादिक भाव कारण है सो सम्यग्दृष्टि के **[तेषां अभावे]** उन रागादिक भावों का अभाव होने से **[न बध्यंते]** कर्मबंध नहीं है ।

टीका—सम्यग्दृष्टि के राग द्वेष मोह नहीं है; क्योंकि राग द्वेष मोह के अभाव के विना सम्यग्दृष्टित्व नहीं बन सकता । रागद्वेषमोह के अभाव से उस सम्यग्दृष्टि के द्रव्यास्रव पुद्गल कर्म के बंधने का कारण नहीं बनते । क्योंकि द्रव्यास्रव के पुद्गल कर्म बंधने का कारणपने का कारणपना रागादिक ही है इसलिये कारण के कारण का अभाव होने से कार्य का अभाव अच्छी तरह प्रसिद्ध है । इस कारण ज्ञानी के बंध नहीं है ।

१. हेतुहेतुत्वाभावे, इत्यपि पाठः ।

अध्यास्य शुद्धनयमुद्धतबोधचिह्नमैकाग्र्यमेव कलयंति सदैव ये ते।
रागादिमुक्तमनसः सततं भवंतः पश्यंति बंधविधुरं समयस्य सारं ॥ १२० ॥

चतुर्थगुणस्थानवर्तिसरागसम्यक्त्वस्यान्यथानुपपत्तेरिति हेतुः। अथवा, अनतानुबंध्यप्रत्याख्यानावरणसंज्ञाः क्रोधमानमायालोभोदयजनिता रागद्वेषमोहाः सम्यग्दृष्टेर्न संतीति पक्षः। कस्मात् ? इति चेत्; निर्विकारपरमानंदैकसुखलक्षणपरमात्मोपादेयत्वे सति षट्द्रव्यपंचास्तिकायसप्ततत्त्वनवपदार्थरुचिरूपस्य मूढत्रयादिपचविंशतिदोषरहितस्य तदनुसारि—प्रशमसवेगानुकम्पादेवधर्मादिविषयास्तिक्याभिव्यक्तिलक्षणस्य पंचमगुणस्थानयोग्यदेशचारित्राविनाभाविसरागसम्यक्त्वस्यान्यथानुपपत्तेरिति हेतु। अथवा अनतानुबंध्यप्रत्याख्यानप्रत्याख्यानावरणक्रोधमानमायालोभोदयजनितरागद्वेषमोहाः सम्यग्दृष्टेर्न संतीति पक्षः। कस्मादिति चेत्, चिदानंदैकस्वभावशुद्धात्मोपादेयत्वे सति षट्द्रव्यपंचास्तिकायसप्ततत्त्वनवपदार्थरुचिरूपस्य-मूढत्रयादिपचविंशतिदोषरहितस्य तदनुसारिप्रशमसवेगानुकंपादेवधर्मादिविपयास्तिक्याभिव्यक्तिलक्षणस्य षष्ठगुणस्थानरूपसरागचारित्राविनाभाविसरागसम्यक्त्वस्यान्यथानुपपत्तेरिति हेतुः। अथवा अनंतानुबंध्यप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनक्रोधमानमायालोभतीव्रोदयजनिताः प्रमादोत्पादकाः रागद्वेषमोहाः सम्यग्दृष्टेर्न सतीति पक्षः। कस्मात् ? इति चेत्—शुद्धबुद्धैकस्वभावपरमात्मोपादेयत्वे सति तद्योग्यस्वकीयशुद्धात्मसमाधिसंजातसहजानंदैकस्वलक्षणसुखानुभूतिमात्रस्वरूपाऽप्रमत्तादिगुणस्थानवर्तिवीतरागचारित्राविनाभूतवीतरागसम्यक्त्वस्यान्यथानुपपत्तेरिति हेतुः। तथाचोक्तं—'आद्या

भावार्थ—सम्यग्दृष्टि, रागद्वेषमोह के अभाव विना नहीं होता—ऐसा अविनाभाव नियम कहा है सो यहां मिथ्यात्वसम्बन्धी रागादिको का अभाव जानना उन्ही को रागादि माना गया है। सम्यग्दृष्टि होने के बाद कुछ चारित्रमोह सम्बन्धी राग रहता है सो यहां पर नही गिना वह गौण है इसलिये उन भावास्रवों के विना द्रव्यास्रव बंध के कारण नहीं हैं, कारण का कारण न हो तभी कार्य का भी अभाव हो जाता है यह प्रसिद्धि है। इसलिये सम्यग्दृष्टि ज्ञानी ही है इसके बध नही है। यहां सम्यग्दृष्टि को ज्ञानी कहने की अपेक्षा ऐसा जानना कि प्रथम तो जिसके ज्ञान हो वही ज्ञानी कहलाता है सो सामान्य ज्ञान की अपेक्षा तो सभी जीव ज्ञानी है और सम्यग्ज्ञान मिथ्याज्ञान की अपेक्षा ली जाय तो सम्यग्दृष्टि के सम्यग्ज्ञान है उसकी अपेक्षा ज्ञानी है तथा मिथ्यादृष्टि अज्ञानी है। यदि सम्पूर्ण ज्ञान की अपेक्षा ज्ञानी कहा जाय तो केवली भगवान् ज्ञानी हैं क्योंकि जब तक सर्वज्ञ न हो तव तक पांच भावों के कथन में अज्ञानभाव बारवें गुणस्थान तक सिद्धान्त में कहा है। इस तरह अनेकांत से विधिनिषेध सब अपेक्षा से निर्बाध सिद्ध होते हैं सर्वथा एकांत से कुछ भी नहीं सधता। इस तरह ज्ञानी होके बंध नहीं करता ॥१७७॥१७८॥

यह शुद्धनयका माहात्म्य है, इसलिये शुद्धनयकी महिमा कहते हैं—**अध्यास्य** इत्यादि। **अर्थ**—जो पुरुष शुद्धनयको अंगीकार कर निरन्तर एकाग्रपने का अभ्यास करते हैं वे पुरुष रागादिरहित चित्त वाले हुए बंध से रहित अपने शुद्ध आत्मस्वरूप को अवलोकन करते हैं। कैसा है शुद्धनय ? कि जिसका चिह्न उज्ज्वल ज्ञान है जो कि किसी का छिपाया नहीं छिपता।

भावार्थ—यहां शुद्धनय से एकाग्र होना कहा है। सो साक्षात् शुद्धनय का होना तो केवल ज्ञान होने पर होता है और शुद्धनय, श्रुतज्ञान का अंश है इसके द्वारा शुद्धस्वरूप का श्रद्धान करना तथा ध्यान कर एकाग्र होना है। सो यह परोक्ष अनुभव है। एक देश शुद्ध की अपेक्षा व्यवहार से प्रत्यक्ष भी कहते है ॥१२०॥

प्रच्युत्य शुद्धनयतः पुनरेव ये तु रागादियोगमुपयांति विमुक्तबोधाः ।
ते कर्मबंधमिह बिभ्रति पूर्वबद्धद्रव्यास्रवैः कृतविचित्रविकल्पजालं ॥ १२१ ॥

सम्यक्त्वचारित्रे द्वितीया घ्नन्त्यणुव्रतं । तृतीयाः संयमं तुर्या यथाख्यातं क्रुधादयः ॥' इति गाथापूर्वार्द्धे व्याख्यानं गतं । **तह्मा आसवभावेण विणा हेदू ण पच्चया होंति**—यस्माद्गाथायाः पूर्वार्धकथितक्रमेण रागद्वेषमोहा न संति तस्मात्कारणात् रागादिरूपभावास्रवेण विना अस्तित्वमात्रेण, उदयमात्रेण वा द्रव्यप्रत्ययाः सम्यग्दृष्टेर्बंधहेतवो न भवंतीति । **हेदू चदुवियप्पो अट्ठवियप्पस्स कारणं होदि** मिथ्यात्वाविरतिप्रमादकषाययोगरूपचतुर्विधो हेतुः ज्ञानावरणादिरूपस्याष्टविधस्य नवतरद्रव्यकर्मणः कारणं भवति । **तेसिं पि य रागादी** तेषामपि मिथ्यात्वादिद्रव्यप्रत्ययानां उदयागताना जीवगतरागादिभावप्रत्ययाः कारणं भवंति । कस्मात् ? इति चेत् **तेसिमभावे ण बज्झंति** तेषां जीवगतरागादिभावप्रत्ययानामभावे सति द्रव्यप्रत्ययेष्वुदयागतेष्वपि वीतरागपरमसामायिकभावनापरिणताभेदरत्नत्रयलक्षणभेदज्ञानस्य सद्भावे सति कर्मणा जीवा न बध्यंते यतः कारणादिति । ततः स्थितं नवतरद्रव्यकर्मास्रवस्योदयागतद्रव्यप्रत्ययाः कारणं, तेषां च जीवगता रागादिभावप्रत्ययाः कारणमिति कारणकारणव्याख्यानं ज्ञातव्यं ॥ १७७ । १७८ ॥ अथ यदुक्तं पूर्वं रागादिविकल्पोपाधिरहितं परमचैतन्यचमत्कारलक्षणनिजपरमात्मपदार्थभावनारहिताना बहिर्मुखजीवाना पूर्वबद्धप्रत्ययाः नवतरकर्म बध्नंति तमेवार्थं दृष्टांताभ्यां दृढयति,—**जह पुरिसेणाहारो गहिदो परिणमदि सो अणेयविहं** यथा पुरुषेण गृहीताहारः स परिणमति अनेकविधं बहुप्रकार । किं ? **मंसवसारुहिरादी भावे उदरग्गिसंजुत्तो** मांसवसारुधिरादीन् पर्यायान् कर्मतापन्नान् परिणमति । कथंभूतः सन् ? उदराग्निसंयुक्तः इति दृष्टांतो गतः । **तह णाणिस्स दु पुव्वं जे बद्धा पच्चया बहुवियप्पं बज्झंते कम्मं ते**—तथैव च पूर्वोक्तोदराग्निसयुक्ताहारदृष्टांतेन अज्ञानिनश्चैतन्यलक्षणजीवस्य, न च विवेकिनः । पूर्वं ये बद्धाः, मिथ्यात्वादिद्रव्यप्रत्ययाः, जीवगतरागादिपरिणाममुदराग्निस्थानीयं लब्ध्वा ते बहुविकल्पं कर्म बध्नंति । **णयपरिहीणा दु ते जीवा** येषा जीवानां संबंधिनः

अब फिर कहते हैं कि जो इससे चिग जाते हैं वे कर्मों को बांधते है—**प्रच्युत्य** इत्यादि । **अर्थ**—जो पुरुष शुद्धनय से छूट फिर रागादिक के सम्बन्ध को प्राप्त होते हैं वे ज्ञान को छोड़ कर्मबंध को धारण करते हैं, जिस कर्मबंध ने पूर्वबंधे द्रव्यास्रवों से अनेक प्रकार विकल्पो का जाल कर रक्खा है ।

भावार्थ—फिर शुद्ध नय से चिग जाय तो रागादिक के सम्बन्ध से द्रव्यास्रव के अनुसार अनेक भेदों को लिए कर्मों को बांधता है । नय से चिगने पर जो फिर मिथ्यात्व का उदय आ जाय तब बंध होने लगता है क्योंकि यहां मिथ्यात्व संबंधी रागादिक से बंध होने की प्रधानता की है और उपयोग की अपेक्षा गौण है । शुद्धोपयोग रूप रहने का काल थोड़ा है इसलिए उसके छूटने की अपेक्षा यहां नहीं है । ज्ञान अन्य ज्ञेयो से उपयुक्त होवे तो भी मिथ्यात्व के विना राग का अंश है वह ज्ञानी के अभिप्राय पूर्वक नहीं है इसलिए अल्पबंध संसार का कारण नहीं है । अथवा उपयोग की अपेक्षा ली जाय तो शुद्ध स्वरूप से चिगे और सम्यक्त्व से नहीं छूटे तब चारित्र मोह के राग से कुछ बंध होता है वह अज्ञान के पक्ष में नहीं गिना परन्तु बंध तो अवश्य है उसी के मेंटने को शुद्धनय से न छूटने का और शुद्धोपयोग में लीन होने का सम्यग्दृष्टि ज्ञानी को उपदेश है ऐसे जानना ॥ १२१ ॥

जह पुरिसेणाहारो गहिओ परिणमइ सो अणेयविहं ।
मंसवसारुहिरादी भावे उयरग्गिसंजुत्तो ॥ १७९ ॥
तह णाणिस्स दु पुव्वं जे बद्धा पच्चया बहुवियप्पं ।
बज्झंते कम्मं ते णयपरिहीणा उ ते जीवा ॥ १८० ॥ (युगलम्)

यथा पुरुषेणाहारो गृहीतः परिणमति सोऽनेकविधं ।
मांसवसारुधिरादीन् भावान् उदराग्निसंयुक्तः ॥ १७९ ॥
तथा ज्ञानिनस्तु पूर्वं बद्धा ये प्रत्यया बहुविकल्पं ।
बध्नंति कर्म ते नयपरिहीनास्तु ते जीवाः ॥ १८० ॥

यदा तु शुद्धनयात् परिहीणो भवति ज्ञानी तदा तस्य रागादिसद्भावात् पूर्वबद्धाः द्रव्यप्रत्ययाः स्वस्य [1]हेतुत्वहेतुसद्भावे हेतुमद्भावस्यानिवार्यत्वात् ज्ञानावरणादिभावैः पुद्गलकर्मबंधं परिणामयंति । न चैतदप्रसिद्धं पुरुषगृहीताहारस्योदराग्निना रसरुधिरमांसादिभावैः परिणामकरणस्य दर्शनात् ॥ १७९।१८० ॥

प्रत्ययाः कर्म बध्नंति ते जीवाः । कथ भूता ? परमसमाधिलक्षणभेदज्ञानरूपात् शुद्धनयाद् भ्रष्टाः च्युताः । अथवा

आगे इसी अर्थ के समर्थन करने को दृष्टांत दिखलाते हैं;—**[यथा]** जैसे **[पुरुषेण]** पुरुष के द्वारा **[गृहीतः]** ग्रहण किया गया **[आहारः]** आहार **[स उदराग्निसंयुक्तः]** वह उदराग्नि से युक्त हुआ **[अनेकविधं]** अनेक प्रकार **[मांसवसारुधिरादीन्]** मांस वसा रुधिर आदि **[भावान्]** भावों रूप **[परिणमति]** परिणमता है **[तथा तु ज्ञानिनः]** उसी तरह ज्ञानी के **[पूर्वं बद्धाः]** पूर्व बंधे **[ये]** जो **[प्रत्ययाः]** द्रव्यास्रव **[ते]** वे **[बहुविकल्पं]** बहुत भेदों को लिये **[कर्म]** कर्मों को **[बध्नंति]** बांधते है । **[ते]** वे **[जीवाः]** जीव **[तु नयपरिहीनाः]** शुद्धनय से छूट गये हैं ।

टीका—जिस समय ज्ञानी शुद्धनय से छूट जाता है उस समय उसके रागादि भावों के सद्भाव से पूर्व बंधे हुए द्रव्यास्रव, वे अपने हेतुत्व के हेतु का सद्भाव होने से कार्य भाव का होना अनिवार्य है अर्थात् अवश्य होते हैं इस कारण ज्ञानावरणादि भावों से पुद्गलकर्म को बंध रूप परिणमाते हैं । यह दृष्टांत से प्रसिद्ध है । जैसे पुरुष से ग्रहण किया गया आहार उदराग्नि से रस, रुधिर, मांस आदि भावों से परिणाम करने का प्रत्यक्ष दर्शन है अर्थात् देखने में आता है उस तरह दृष्टांत में भी जानना ।

भावार्थ—ज्ञानी शुद्धनय से छूटे तब रागादिभावों का सद्भाव होता है तभी रागादिरूप हुआ कर्मों को बांधता है । क्योंकि रागादिभाव द्रव्यास्रव के निमित्त होते हैं तब वे आस्रव अवश्य कर्म-बन्ध के कारण होते हैं ।

१. रागादिसद्भावे ।

इदमेवात्र तात्पर्यं हेयः शुद्धनयो नहि ।
नास्ति बंधस्तदत्यागात् तत्त्यागाद्बंध एव हि ॥ १२२ ॥
धीरोदारमहिम्न्यनादिनिधने बोधे निबध्नन् धृतिं,
त्याज्यः [1]शुद्धनयो न जातु कृतिभिः सर्वंकषः कर्मणां ।
तत्रस्थाः [2]स्वमरीचिचक्रमचिरात्संहृत्य [3]निर्यद्बहिः,
पूर्णं ज्ञानघनौघमेकमचलं पश्यंति शांतं महः ॥ १२३ ॥
रागादीनां झगिति विगमात् सर्वतोप्यास्रवाणां,
नित्योद्योतं किमपि परमं वस्तु संपश्यतोऽतः ।

द्वितीयव्याख्यानं, ते प्रत्यया अशुद्धनयेन जीवात् सकाशात् परिहीणा भिन्ना न च भवंति । इदमत्र तात्पर्यं, निजशुद्धात्मध्ये-

---

यहां इसी अर्थ का तात्पर्य रूप श्लोक कहते हैं—**इद** इत्यादि । **अर्थ**—यहां पहले कथन का यह तात्पर्य है कि शुद्धनय त्यागने योग्य नही है क्योंकि उस शुद्धनय के ग्रहण से तो कर्म का बंध नहीं होता और उसके त्याग से कर्म का बंध होता ही है ॥ १२२ ॥ फिर उस शुद्धनय के ही ग्रहण को दृढ़ करते हुए काव्य कहते हैं—**धीरो** इत्यादि । **अर्थ**—पुण्यवान् महान पुरुषों को शुद्धनय कभी छोड़ने योग्य नहीं है । वह ज्ञान में स्थिरता को अतिशय से बांधता है । वह ज्ञान चलाचलपने से रहित और सर्व पदार्थों में विस्तार युक्त महिमा वाला है, अनादि निधन है अर्थात् जिसका आदि-अंत नहीं है । वह शुद्धनय कर्मों को मूल से नाश करने वाला है । ऐसा शुद्धनय में जो स्थित हैं वे पुरुष अपने ज्ञान की व्यक्ति विशेष को तत्काल समेंट कर कर्म के पटल से बाह्य निकलता तथा संपूर्ण ज्ञानघन का समूह स्वरूप निश्चल जो शांत रूप ज्ञानमय प्रताप का पुंज उसे अवलोकन करते (देखते) हैं ।

भावार्थ—शुद्धनय, एक ज्ञानमय तेज (प्रताप) के पुज व एक चैतन्य मात्र आत्मा को समस्त ज्ञान के विशेषों को गौणकर तथा समस्त परनिमित्त से हुए भावों को गौणकर शुद्ध नित्य अभेद (एक) रूप ग्रहण करना है । सो ऐसे शुद्ध के विषयस्वरूप अपने आत्मा को जो अनुभव कर एकाग्र हो स्थित हैं वे ही समस्त कर्मों के समूह से भिन्न केवल ज्ञानस्वरूप अमूर्तीक पुरुषाकार वीतराग ज्ञानमूर्ति स्वरूप अपने आत्मा को देखते हैं । इस शुद्धनय में अंतर्मुहूर्त ठहरने से शुक्लध्यान की प्रवृत्ति होकर केवल ज्ञान उत्पन्न होता है ऐसा इसका माहात्म्य है । सो इसको अवलंबन कर जब तक केवल ज्ञान न उत्पन्न हो तब तक फिर इससे छूटना नहीं ऐसा श्रीगुरुओं का उपदेश है ॥ इस तरह आस्रव का अधिकार पूर्ण किया ॥ १२३ ॥ अब रंगभूमि में आस्रव का स्वांग प्रवेश हुआ था उसको ज्ञान ने यथार्थ जान स्वांग दूर कराया और आप प्रगट हुआ इस तरह ज्ञान की महिमा के अर्थरूप काव्य कहते हैं—**रागादीनां** इत्यादि । **अर्थ**—रागादिक आस्रवों के तत्काल (क्षणमात्र में) सब तरह दूर होने से नित्य उद्योत रूप

---

१. आत्मशुद्धत्वानुभवः । २. ज्ञानविशेषव्यक्तिसमूहः । ३. बहिरनात्मपदार्थे निगद् भ्रम्यन् ।

[1]स्फारस्फारैः [2]स्वरसविसरैः प्लावयत्सर्वभावा[3]
नालोकांतादचलमतुलं ज्ञानमुन्मग्नमेतत् ॥ १२४ ॥

इति आस्रवो निष्क्रांतः ।

इति श्रीमदमृतचंद्रसूरिविरचितायां समयसारव्याख्यायामात्मख्यातौ
आस्रवप्ररूपकः चतुर्थोऽकः ॥ ४ ॥

यरूपसर्वकर्मनिर्मूलनसमर्थशुद्धनयो विवेकिभिर्न त्याज्य इति । एवं कार्यकारणव्याख्यानमुख्यत्वेन गाथाचतुष्टयं गतं ॥ १७९।१८० ॥

इति **श्रीजयसेनाचार्य**कृतायां समयसारव्याख्यायां शुद्धात्मानुभूतिलक्षणायां **तात्पर्यवृत्तौ** सप्तदश-गाथाभिः पंचस्थलैः संवरविपक्षद्वारेण पंचमःआस्रवाधिकारः समाप्तः ॥ ४ ॥

कुछ परम वस्तु को अंतरंग में अवलोकन करने वाले पुरुष का यह ज्ञान, अति विस्तार रूप फैलता हुआ अपने निज रस के प्रवाह से सब लोक पर्यंत अन्य भावों को अंतर्मग्न करता हुआ उदय रूप प्रगट हुआ। कैसा है ज्ञान ? अचल है अर्थात् ज्यों का त्यों सब पदार्थ जिसमें सदा प्रतिभासित हैं, चले नहीं । फिर कैसा है ? जिसके बराबर दूसरा कोई नहीं है ।

भावार्थ—शुद्धनय को अवलंबन कर जो पुरुष अंगरंग में चैतन्यमात्र परवस्तु को एकाग्र अनुभव करते हैं उनके सब रागादिक आस्रव भाव दूर हो के सब पदार्थों को जानने वाला निश्चय अतुल्य केवल ज्ञान प्रगट होता है । ऐसा यह ज्ञान सब से महान् है । इस प्रकार आस्रव का स्वांग रंगभूमि में प्रवेश हुआ था उसको ज्ञान ने यथार्थ स्वरूप जान लिया तब वह निकल गया ॥ १२४ ॥

सवैया तेईसा—योग कषाय मिथ्यात्व असंयम, आस्रव द्रव्यत आगम गाये,
राग विरोध विमोह विभाव, अज्ञानमयी यह भावित जाये ।
जे मुनिराज करें इनि पाल, सुरिद्धि समाज लये सिव थाये,
काय नवाय नमूं चितलाय, कहूं जय पाय लहूं मन भाये ॥

यहां तक १८० गाथा और १२४ कलशा हुए ॥

इस प्रकार **पंडित जयचंद्रजी** कृत समयसार ग्रंथ की आत्मख्याति नाम टीका की भाषावचनिका में **आस्रव** नाम **चौथा** अधिकार पूर्ण हुआ ॥ ४ ॥

---

१. अनंतानंतैः । २. स्वरसस्य चिद्रूपतायाः विसरैः प्रसरैः । ३. सर्वभावानतीतानागतवर्तमानान् पदार्थान् प्लावयन्नात्मनि प्रतिबिंबितान् कुर्वन्

॥ अथ संवराधिकारः ॥ ५ ॥

अथ प्रविशति संवरः ।

आसंसारविरोधिसंवरजयैकांतावलिप्तास्रव-
न्यक्कारात्प्रतिलब्धनित्यविजयं संपादयत्संवरं ।
व्यावृत्तं पररूपतो नियमितं सम्यक् स्वरूपे स्फुर-
ज्ज्योतिश्चिन्मयमुज्ज्वलं निजरसप्राग्भारमुज्जृम्भते ॥१२५॥

अथ प्रविशति संवरः । संवराधिकारेऽपि यत्र मिथ्यात्वरागादिपरिणतबहिरात्मभावनारूप आस्रवो नास्ति तत्र संवरो भवतीत्यास्रवविपक्षद्वारेण, चतुर्दशगाथापर्यंतं वीतरागसम्यक्त्वरूपसंवरव्याख्यानं करोति । तत्रादौ भेदज्ञानात् शुद्धात्मोपलाभो भवति इति संक्षेपव्याख्यानमुख्यत्वेन **उवओगे**—इत्यादि गाथात्रयं । तदनंतरं भेदज्ञानात्कथं शुद्धात्मोपलम्भो भवतीति प्रश्ने परिहाररूपेण **जह कणयमग्गि** इत्यादि गाथाद्वयं । ततः परं शुद्धभावनया पुनः शुद्धो भवतीति मुख्यत्वेन **शुद्धं तु वियाणंतो** इत्यादि गाथैकं । ततः परं केन प्रकारेण संवरो भवतीति पूर्वपक्षे कृते सति परिहारमुख्यतया **अप्पाणमप्पणा** इत्यादि गाथात्रयं । अथात्मा परोक्षस्तस्य ध्यानं कथं क्रियेतेति पृष्टे सति देवतारूपदृष्टांतेन परोक्षेऽपि ज्ञायत इति परिहाररूपेण **उवदेसेण** इत्यादि गाथाद्वयं । तदनंतरं अथोदयप्राप्तप्रत्ययागतानां रागाद्यध्यव-

---

अथ **संवराधिकार** ।

दोहा—"मोह राग रुष दूरिकरि, समिति गुप्ति व्रत पारि ।
संवरमय आतम कियो, नमूं ताहि मन धारि ॥"

अब रंग भूमि में संवर प्रवेश करता है । प्रथम ही टीकाकार मगल के लिये सब स्वांगों को जानने वाले सम्यग्ज्ञान की ज्योति का मंगल करते हैं—**आसंसार** इत्यादि । **अर्थ**—चैतन्यस्वरूपमय स्फुरायमान प्रकाश रूप ज्योति उदयरूप होकर फैलती है । वह ज्योति अनादि संसार से लेकर अपने विरोधी संवर को जीत कर एकांतपने से मद को प्राप्त हुए आस्रव के तिरस्कार से जिसने नित्य ही जीत पाई है ऐसे संवर को उत्पन्न कराती है । तथा परद्रव्य और परद्रव्य के निमित्त से हुए भावों से भिन्न है । वह ज्योति अपने यथार्थ स्वरूप में निश्चित है, उज्ज्वल है निर्बाध, निर्मल, देदीप्यमान प्रकाश रूप है और उसमें ज्ञान प्रवाह रूपी रस का प्राग्भार है अर्थात् अपने रस के बोझे को लिये हुए है अन्य बोझा उतारके रख दिया है ।

भावार्थ—अनादि काल से संवर आस्रव का विरोधी है उसको आस्रव ने जीत लिया था इसलिये मदसे गर्वित हुआ उसका फिर तिरस्कार कर जय को प्राप्त हुए संवर को प्राप्त करता हुआ और सब पररूपों से भिन्न होके अपने स्वरूप में निश्चल हुआ जो यह चैतन्य प्रकाश है वह अपने ज्ञान रस रूप भार को लिये हुए निर्मल उदयरूप होता है ॥१२५॥

तत्रादावेव सकलकर्मसंवरणस्य परमोपायं भेदविज्ञानमभिनंदति—

उवओए उवओगो कोहादिसु णत्थि कोवि उवओगो ।
कोहे कोहो चेव हि उवओगे णत्थि खलु कोहो ॥१८१॥
अट्ठवियप्पे कम्मे णोकम्मे चावि णत्थि उवओगो ।
उवओगह्मि य कम्मं णोकम्मं चावि णो अत्थि ॥१८२॥
एयं तु अविवरीदं णाणं जइया उ होदि जीवस्स ।
तइया ण किंचि कुव्वदि भावं उवओगसुद्धप्पा ॥१८३॥ (त्रिकलम्)

उपयोगे उपयोगः क्रोधादिषु नास्ति कोऽप्युपयोगः ।
क्रोधे क्रोधश्चैव हि उपयोगे नास्ति खलु क्रोधः ॥१८१॥
अष्टविकल्पे कर्मणि नोकर्मणि चापि नास्त्युपयोगः ।
उपयोगे च कर्म नोकर्म चापि नो अस्ति ॥१८२॥
एतत्त्वविपरीतं ज्ञानं यदा तु भवति जीवस्य ।
तदा न किंचित्करोति भावमुपयोगशुद्धात्मा ॥१८३॥

सानानामभावे सति जीवगतानां रागादिभावास्रवाणामभावो भवतीत्यादि संवरक्रमाख्यानमुख्यत्वेन **तेसिं हेदू** इत्यादि गाथात्रयं । एवं आस्रवविपक्षद्वारेण संवरव्याख्याने समुदायपातनिका । तद्यथा–प्रथमतस्तावच्छुभाशुभकर्मसंवरस्य परमोपायभूतं निर्विकारस्वसंवेदनज्ञानलक्षणं भेदज्ञानं निरूपयति;—**उवओगे उवओगो** ज्ञानदर्शनोपयोगलक्षणत्वाद-भेदनयेनात्मैवोपयोगस्तस्मिन्नुपयोगाभिधाने शुद्धात्मन्युपयोग आत्मा तिष्ठति **कोहादिसु णत्थि कोवि उवओगो**

आगे संवर के प्रवेश की आदि में ही सब कर्मों के संवर होने के उत्कृष्ट उपाय भेदविज्ञान की प्रशंसा करते हैं;—**[उपयोगे]** उपयोग में **[उपयोगः]** उपयोग है **[क्रोधादिषु]** क्रोध आदिकों में **[कोऽपि उपयोगः]** कोई उपयोग **[नास्ति]** नहीं है **[च]** और **[हि]** निश्चय कर **[क्रोधे एव]** क्रोध में ही **[क्रोधः]** क्रोध है **[उपयोगे]** उपयोग में **[खलु]** निश्चय कर **[क्रोधः नास्ति]** क्रोध नहीं है, **[अष्टविकल्पे कर्मणि]** आठ प्रकार के ज्ञानावरण आदि कर्मों में **[च]** तथा **[नोकर्मणि अपि]** शरीर आदि नोकर्मों में भी **[उपयोगः नास्ति]** उपयोग नहीं है **[च]** और **[उपयोगे]** उपयोग में **[कर्म अपि च नोकर्म]** कर्म और नोकर्म भी **[नो अस्ति]** नहीं है **[यदा तु]** जिस काल में **[एतत्तु]** ऐसा **[अविपरीतं]** सत्यार्थ **[ज्ञानं]** ज्ञान **[जीवस्य]** जीव के **[भवति]** हो जाता है **[तदा]** उस काल में **[उपयोगशुद्धात्मा]** केवल उपयोग स्वरूप शुद्धात्मा **[किंचित् भावं]** उपयोग के विना अन्य कुछ भी भाव **[न करोति]** नहीं करता ।

न खल्वेकस्य द्वितीयमस्ति द्वयोर्भिन्नप्रदेशत्वेनैकसत्तानुपपत्तेस्तदसत्त्वे च तेन सहाधाराधेयसंबंधोऽपि नास्त्येव, ततः स्वरूपप्रतिष्ठत्वलक्षण एवाधाराधेयसंबंधोऽवतिष्ठते। तेन ज्ञानं जानत्तायां स्वरूपे प्रतिष्ठितं। जानत्ताया ज्ञानादपृथग्भूतत्वात् ज्ञाने एव स्यात्। क्रोधादीनि क्रुध्यत्तादौ स्वरूपे प्रतिष्ठितानि, क्रुध्यत्तादेः क्रोधादिभ्योऽपृथग्भूतत्वात्क्रोधादिष्वेव स्युः, न पुनः क्रोधादिषु कर्मणि नोकर्मणि वा ज्ञानमस्ति, न च ज्ञाने क्रोधादयः कर्म नोकर्म वा संति परस्परमत्यंतं स्वरूपवैपरीत्येन परमार्थाधाराधेयसंबंधशून्यत्वात्। न च यथा ज्ञानस्य जानत्तास्वरूपं तथा क्रुध्यत्तादिरपि, क्रोधादीनां च यथा क्रुध्यत्तादिस्वरूपं तथा जानत्तापि कथंचनापि व्यवस्थापयितुं शक्येत, जानत्तायाः क्रुध्यत्तादेश्चस्वभावभेदेनोद्भासमानत्वात् स्वभाव-

---

शुद्धनिश्चयेन क्रोधादिपरिणामेषु नास्ति कोऽप्युपयोग आत्मा **कोहे कोहो चेव हि** क्रोधे क्रोधश्चैव हि स्फुटं तिष्ठति **उवओगे णत्थि खलु कोहो** उपयोगे शुद्धात्मनि नास्ति खलु स्फुट क्रोधः ॥ **अट्ठवियप्पे कम्मे णोकम्मे चावि णत्थि उवओगो** तथैव चाष्टविधज्ञानावरणादिद्रव्यकर्मणि, औदारिकशरीरादिनोकर्मणि चैव नास्त्युपयोगः उपयोग-शब्दवाच्यः शुद्धबुद्धैकस्वभावः परमात्मा **उवओगम्हि य कम्मं णोकम्मं चावि णो अत्थि** उपयोगे शुद्धात्मनि शुद्धनिश्चयेन कर्म नोकर्म चैव नास्ति इति। **एदं तु अविवरीदं णाणं जइया दु होदि जीवस्स** इदं तु चिदानंदैक-स्वभावशुद्धात्मसंवित्तिरूपं विपरीताभिनिवेशरहितं भेदज्ञान यदा भवति जीवस्य **तइया ण किंचि कुव्वदि भावं उवओगसुद्धप्पा** तस्माद्भेदविज्ञानात्स्वात्मोपलंभो भवति शुद्धात्मोपलभे जाते सति किमपि मिथ्यात्वरागादिभाव न करोति

टीका—निश्चय से एक द्रव्य का दूसरा द्रव्य कुछ भी सम्बन्धी नही है क्योंकि द्रव्य भिन्न भिन्न प्रदेश रूप है इसलिए एक सत्ता की अप्राप्ति है प्रत्येक द्रव्य की सत्ता भिन्न भिन्न है और सत्ता के एक न होने से अन्य द्रव्य का अन्य द्रव्य के साथ आधाराधेय सम्बन्ध भी नही है। इस कारण द्रव्य का अपने स्वरूप में ही प्रतिष्ठा रूप आधाराधेय सम्बन्ध स्थित है इसलिए ज्ञान आधेय जानपने अपने स्वरूप आधार में प्रतिष्ठित है क्योंकि जानपना ज्ञान से अभिन्न स्वरूप है अर्थात् भिन्न प्रदेशरूप नही है इस कारण जानने क्रिया स्वरूप ज्ञान है वह ज्ञान में ही है, और क्रोधादिक हैं वे क्रोधरूप क्रिया जो क्रोधपना अपना स्वरूप उसी मे प्रतिष्ठित हैं। क्योंकि क्रोध रूप क्रिया क्रोधादिक से अभिन्न प्रदेश है इसलिए क्रोध रूप क्रिया क्रोधादि में ही होती है। तथा क्रोधादिक में अथवा कर्म नोकर्म में ज्ञान नहीं है और ज्ञान में क्रोधादिक अथवा कर्म नोकर्म नही हैं क्योंकि ज्ञान का तथा क्रोधादिक और कर्म नोकर्म का आपस में स्वरूप का अत्यन्त विपरीतपना है उनका स्वरूप एक नहीं है। इसलिए परमार्थ रूप आधाराधेय सम्बन्ध का शून्यपना है। जैसे ज्ञान का जानन क्रिया रूप जानपना स्वरूप है उस तरह क्रोध रूप क्रियापना स्वरूप नहीं है, तथा जैसे क्रोधादिक का क्रोधपना आदिक क्रियापना स्वरूप है उस तरह जानन क्रिया स्वरूप नहीं है। किसी तरह से ज्ञान को क्रोधादि क्रियारूप परिणामस्वरूप स्थापन नहीं किया जाता क्योंकि जानन क्रिया के और क्रोधरूप क्रिया के स्वभाव को भेद कर प्रकट प्रतिभासमान हैं, स्वभाव के

भेदाच्च वस्तुभेद एवेति नास्ति ज्ञानाज्ञानयोराधाराधेयत्वं । किं च यदा किलैकमेवाकाशं स्वबुद्धिमधिरोप्याधाराधेयभावो विभाव्यते तदा शेषद्रव्यांतराधिरोपनिरोधादेव बुद्धेर्न भिन्नाधिकरणापेक्षा प्रभवति । तदप्रभवे चैकमाकाशमेवैकस्मिन्नाकाश एव प्रतिष्ठितं विभावयतो न पराधाराधेयत्वं प्रतिभाति । एवं यदैकमेव ज्ञानं स्वबुद्धिमधिरोप्याधाराधेयभावो विभाव्यते तदा शेषद्रव्यान्तराधिरोप निरोधादेव बुद्धेर्न भिन्नाधिकरणापेक्षा प्रभवति । तदप्रभवे चैकं ज्ञानमेवैकस्मिन् ज्ञान एव प्रतिष्ठितं विभावयतो नापराधाराधेयत्वं प्रतिभाति । ततो ज्ञानमेव ज्ञाने एव । क्रोधादय एव क्रोधादिष्वेवेति साधु सिद्धं भेदविज्ञानं ॥ १८१ । १८२ । १८३ ॥

न परिणमति । कथंभूतः सन् ? निर्विकारचिदानंदैकलक्षणशुद्धोपयोगेन शुद्धात्मा शुद्धस्वभावः सन्निति । यत्रैवंभूतो संवरो नास्ति तत्रास्रवो भवत्यस्मिन्नधिकारे सर्वत्र ज्ञातव्यमिति तात्पर्यं । एव पूर्वप्रकारेण भेदविज्ञानात् शुद्धात्मोपलंभो भवति । शुद्धात्मोपलंभे सति मिथ्यात्वरागादिभावं न करोति ततो नवतरकर्मसंवरो भवतीति संक्षेपव्याख्यानमुख्यत्वेन गाथात्रयं गतं ॥१८१॥१८२॥१८३॥ अथ कथं भेदज्ञानादेव शुद्धात्मोपलंभो भवतीति पुनरपि पृच्छतिः—**जह कणयमग्गितवियं**

भेद से ही वस्तु का भेद है यह नियम है। इसलिये ज्ञान का और अज्ञानस्वरूप क्रोधादिक का आधाराधेय भाव नहीं है। यहां दृष्टांत से विशेष कहते हैं। जैसे आकाश द्रव्य एक ही है उसको अपनी बुद्धि मे स्थापित करके आधाराधेयभाव कल्पित कीजिए तब आकाश के सिवाय अन्य द्रव्यों का तो अधिकरण रूप आरोप का निरोध हुआ इसीसे बुद्धि को भिन्न आधार की अपेक्षा नहीं रही। और जब भिन्न आधार की अपेक्षा न रही तब बुद्धि मे यही ठहरा कि आकाश एक ही है वह एक आकाश में ही प्रतिष्ठित है आकाश का आधार अन्य द्रव्य नहीं है आप अपने ही आधार है। ऐसी भावना करने वाले के अन्य का अन्य में आधाराधेय भाव नहीं प्रतिभासित होता। इसी तरह जब एक ही ज्ञान को अपनी बुद्धि में स्थापित कर आधाराधेय भाव कल्पना करें तब अवशेष अन्य द्रव्यों का अधिरोप करने का निरोध हुआ क्योंकि बुद्धि को भिन्न आधार की अपेक्षा नहीं रहती। जब भिन्न आधार की अपेक्षा ही बुद्धि में न रही तब एक ज्ञान ही ज्ञान में प्रतिष्ठित सिद्ध हुआ। ऐसी भावना करने वाले को अन्य का अन्य में आधाराधेय भाव प्रतिभासित नहीं होता। इसलिए ज्ञान तो ज्ञान में ही है और क्रोधादिक क्रोधादिक में है। इस प्रकार ज्ञान का और क्रोधादिक का तथा कर्म नोकर्म के भेद का ज्ञान अच्छी तरह सिद्ध हुआ।

भावार्थ—उपयोग तो चैतन्य का परिणमन है वह ज्ञान स्वरूप है और क्रोधादिक भावकर्म, ज्ञानावरणादि द्रव्य कर्म, शरीरादि नोकर्म ये सब पुद्गलद्रव्य के ही परिणाम हैं वे जड़ हैं. इनका और ज्ञान का प्रदेश भेद है, इसलिए अत्यन्त भेद है। उपयोग में तो क्रोधादिक, कर्म, नोकर्म नहीं है और क्रोधादिक, कर्म, नोकर्म में उपयोग नहीं है। इस तरह इनमें परमार्थस्वरूप आधाराधेय भाव नहीं है अपना अपना आधाराधेय भाव अपने अपने में है। इस प्रकार इनमें परस्पर परमार्थ से अत्यन्त भेद है। इस भेद को जानना ही भेदविज्ञान है यह अच्छी तरह सिद्ध होता है ॥ १८१ । १८२ । १८३ ॥

चैद्रूप्यं जडरूपतां च दधतोः कृत्वा विभागं द्वयो-
रंतर्दारुणदारणेन परितो ज्ञानस्य रागस्य च।
भेदज्ञानमुदेति निर्मलमिदं मोदध्वमध्यासिताः
शुद्धज्ञानघनौघमेकमधुना संतो द्वितीयच्युताः ॥१२६॥

एवमिदं भेदविज्ञानं यदा ज्ञानस्य वैपरीत्यकणिकामप्यनासादयदविचलितमवतिष्ठते तदा शुद्धोपयोगमयात्मत्वेन ज्ञानं ज्ञानमेव केवलं सन्न किंचनापि रागद्वेषमोहरूपं भावमारचयति। ततो भेदविज्ञानाच्छुद्धात्मोपलंभः प्रभवति। शुद्धात्मोपलंभात् रागद्वेषमोहाभावलक्षणः संवरः प्रभवति।

कणयसहावं ण तं परिच्चयदि—यथा कनकं सुवर्णमग्नितप्तमपि तं कनकस्वभावं न परित्यजति। **तह कम्मोदयतविदो ण चयदि णाणी दु णाणित्तं** तेन प्रकारेण तीव्रपरीषहोपसर्गेण कर्मोदयेन संतप्तोऽपि रागद्वेषमोह-

---

अब इसी अर्थ का कलश कहते हैं—**चैद्रूप्यं** इत्यादि। **अर्थ**—यह निर्मल भेदज्ञान उदय को प्राप्त होता है इसका निश्चय करने वाले सत्पुरुषों को सम्बोधन कर कहते हैं कि हे सत्पुरुषो! तुम इस भेदज्ञान को प्राप्त करके दूसरे रागादिभावों से रहित हुए एक शुद्ध ज्ञानघन के समूह को आश्रय कर उसमें लीन होकर बहुत आनद मानो। यह ज्ञान कैसे उदय होता है? चैतन्यरूप को धारण करता ज्ञान और जड़ रूप को धारण करता हुआ राग इन दोनों का जो अज्ञानदशा में एकत्व दीखता था उसको अन्तरंग में अनुभव के अभ्यास रूप बल से अच्छी तरह विदारणकर (सब प्रकार विभाग कर) उदय होता है।

भावार्थ—ज्ञान तो चेतनास्वरूप है और रागादि पुद्गल के विकार होने से जड़ हैं सो दोनों अज्ञान से एक जड़रूप भासते है। सो जब भेदविज्ञान प्रकट हो जाता है तब ज्ञान का और रागादिक का भिन्नत्व अन्तरग अनुभव के अभ्यास से प्रकट होता है तब ऐसा जानता है कि, ज्ञान का स्वभाव तो जाननेमात्र ही है और ज्ञान में जो रागादिक की कलुषता (मलिनता) आकुलतारूप संकल्प विकल्प प्रतिभासित होते हैं ये सब पुद्गल के विकार हैं जड़ हैं। ऐसे ज्ञान और रागादिक के भेद का आस्वाद आता है। यह भेद-विज्ञान सब विभाव भावों के मेंटने का कारण होता है और आत्मा में परमसंवरभाव को प्राप्त करता है। इसलिये सत्पुरुषों से कहते हैं कि इसको पाकर रागादिकों से रहित होकर शुद्ध ज्ञानघन आत्मा का आश्रय लेकर आनंद को प्राप्त होओ ॥१२६॥

अब कहते हैं कि ऐसे यह भेदविज्ञान, जिस समय ज्ञान में रागादिविकाररूप विपरीतपने की कणिका को नहीं प्राप्त करता अविचलित होता है, उस समय वह ज्ञान शुद्धोपयोग स्वरूपपने कर ज्ञान रूप ही केवल हुआ किंचिन्मात्र भी राग द्वेष मोह भाव को प्राप्त नहीं होता। इसलिये यह सिद्ध हुआ कि भेद-विज्ञान से शुद्धात्मा की प्राप्ति होती है और शुद्धात्मा की प्राप्ति से राग-द्वेष-मोहस्वरूप आस्रवभावों का अभावस्वरूप संवर होता है।

कथं भेदविज्ञानादेव शुद्धात्मोपलंभ ? इति चेत्—

जह कणयमग्गितवियं पि कणयहावं ण तं परिच्चयइ ।
तह कम्मोदयतविदो ण जहदि णाणी उ णाणित्तं ॥ १८४ ॥
एवं जाणइ णाणी अण्णाणी मुणदि रायमेवादं ।
अण्णाणतमोच्छिण्णो आदसहावं अयाणंतो ॥ १८५ ॥ (युग्मं)

यथा कनकमग्नितप्तमपि कनकभावं न तं परित्यजति ।
तथा कर्मोदयतप्तो न जहाति ज्ञानी तु ज्ञानित्वं ॥ १८४ ॥
एवं जानाति ज्ञानी अज्ञानी जानाति रागमेवात्मानं ।
अज्ञानतमोऽवच्छन्नः आत्मस्वभावमजानन् ॥ १८५ ॥

यतो यस्यैव यथोदितं भेदविज्ञानमस्ति स एव तत्सद्भावाज् ज्ञानी सन्नेवं जानाति । यथा प्रचंडपावकप्रतप्तमपि सुवर्णं न सुवर्णत्वमपोहति तथा प्रचंडकर्मविपाकोपष्टब्धमपि ज्ञानं न

परिणामपरिहारपरिणतो भेदरत्नत्रयलक्षणभेदज्ञानी न त्यजति । किं तत् ?—शुद्धात्मसंवित्तिलक्षणं ज्ञानित्वं पांडवादिवदिति । **एवं जाणदि णाणी** एवमुक्तप्रकारेण शुद्धात्मानं जानाति । कोऽसौ ? वीतरागस्वसंवेदनलक्षण-भेदज्ञानी **अण्णाणी मुणदि रागमेवादं** अज्ञानी पुनः पूर्वोक्तभेदज्ञानाभावात् मिथ्यात्वरागादिरूपमेवात्मानं मनुते जानाति । कथंभूतः सन् ? **अण्णाणतमोच्छण्णो** अज्ञानतमसोच्छन्नः प्रच्छादितो झंपितः । पुनरपि कथंभूतः सन् । **आदसहावं अयाणंतो** निर्विकारपरमचैतन्यचमत्कारस्वभावं शुद्धात्मानं निर्विकल्पसमाधेरभावादजानन् अननुभवन् इति ।

आगे पूछते हैं कि भेदविज्ञान से ही शुद्धात्मा की प्राप्ति कैसे होती है ? इसका उत्तर गाथा में कहते हैं:—**[यथा]** जैसे **[कनकं]** सुवर्ण **[अग्नितप्तं अपि]** अग्नि से तप्त हुआ भी **[तं]** अपने **[कनकभावं]** सुवर्णपने को **[न परित्यजति]** नहीं छोड़ता **[तथा]** उसी तरह **[ज्ञानी]** ज्ञानी **[कर्मोदयतप्तस्तु]** कर्मों के उदय से तप्तायमान हुआ भी **[ज्ञानित्वं]** ज्ञानीपने के स्वभावको **[न जहाति]** नहीं छोड़ता **[एवं]** इस तरह **[ज्ञानी]** ज्ञानी **[जानाति]** जानता है । और **[अज्ञानी]** अज्ञानी **[रागमेव]** राग को ही **[आत्मानं]** आत्मा जानता है क्योंकि वह अज्ञानी **[अज्ञानतमोवच्छन्नः]** अज्ञानरूप अंधकार से व्याप्त है इसलिये **[आत्मस्वभावं]** आत्मा के स्वभाव को **[अजानन्]** नहीं जानता हुआ प्रवर्तता है ।

टीका—जिसके जैसा कहा गया है वैसा भेदविज्ञान है, वह उस भेदज्ञान के सद्भाव से ज्ञानी हुआ ऐसा जानता है । जैसे प्रचंड अग्नि से तपाया हुआ भी सुवर्ण अपने सुवर्णपने स्वभाव को नहीं छोड़ता उसी तरह तीव्र कर्म के उदय सहित हुआ भी ज्ञानी अपने ज्ञानपने को नहीं छोड़ता, क्योंकि जो

ज्ञानत्वमपोहति, कारणसहस्रेणापि स्वभावस्यापोढुमशक्यत्वात्। तदपोहेन तन्मात्रस्य वस्तुन एवोच्छेदात्। नचास्ति वस्तूच्छेदः सतो नाशासंभवात्। एवं जानंश्च कर्माक्रांतोऽपि न रज्यते न द्वेष्टि न मुह्यति किन्तु शुद्धमात्मानमेवोपलभते। यस्य तु यथोदितं भेदविज्ञानं नास्ति स तदभावादज्ञानी सन्नज्ञानतमसाच्छन्नतया चैतन्यचमत्कारमात्रमात्मस्वभावमजानन् रागमेवात्मानं मन्यमानो रज्यते द्वेष्टि मुह्यति च न जातु शुद्धमात्मानमुपलभते। ततो भेदविज्ञानादेव शुद्धात्मोपलंभः ॥ १८४।१८५ ॥

एवं भेदज्ञानात्कथं शुद्धात्मोपलंभो भवतीति पृष्टे प्रत्युत्तरकथनरूपेण गाथाद्वयं गतं ॥१८४।१८५॥ अथ कथं शुद्धात्मोपलंभात्संवर इति पुनरपि पृच्छति;—**सुद्धं तु वियाणंतो सुद्धमेवप्पयं लहदि जीवो** भावकर्मद्रव्यकर्मनोकर्मरहितमनंतज्ञानादिगुणस्वरूपं शुद्धात्मानं निर्विकारसुखानुभूतिलक्षणेन भेदज्ञानेन विजानन्ननुभवन् ज्ञानी जीवः। एवं गुणविशिष्टं यादृशं शुद्धात्मानं ध्यायति भावयति तादृशमेव लभते। कस्मात्? इति चेत् उपादानकारणसदृशं कार्यमितिहेतोः **जाणंतो दु असुद्धं असुद्धमेवप्पयं लहदि** अशुद्धं मिथ्यात्वादिपरिणतमात्मानं जानन्ननुभवन् सन् अशुद्धं, नरनारकादिरूपमेवात्मानं लभते। स कः? अज्ञानी जीव इति। एवं शुद्धात्मोपलंभादेव कथं संवरो भवतीति पृष्टे प्रत्युत्तरकथनरूपेण गाथा गता ॥ १८६ ॥ अथ केन प्रकारेण संवरो भवतीति पृष्टे पुनरपि विशेषेणोत्तरं ददाति;—**अप्पाणमप्पणा रुंभिदूण दो (सु) पुण्णपावजोगेसु** आत्मानं कर्मत्वापन्नं आत्मना करणभूतेन द्वयोः पुण्यपापयोगयोरधिकारभूतयोर्वर्तमानं स्वसंवेदनज्ञानबलेन शुभाशुभयोगाभ्यां सकाशाद्रुन्ध्वा व्यावर्त्य। **दंसणणाणम्हि ठिदो** दर्शनज्ञाने स्थितः सन्। **इच्छाविरदो य अण्णम्हि** अन्यस्मिन् देहरागादिपरद्रव्ये सर्वत्रेच्छारहितश्चेति प्रथमगाथा गता।

जिसका स्वभाव है वह हजारों कारण मिलने पर भी अपने स्वभाव के छोड़ने को असमर्थ है। यदि स्वभाव को छोड़ दे तो उसके छोड़ने से उस स्वभावमात्र वस्तु का ही अभाव हो जाय, ऐसा वस्तु का अभाव नहीं होता है क्योंकि सत्ता का नाश होना असंभव है। ऐसा जानता हुआ ज्ञानी कर्मों से व्याप्त हुआ भी रागरूप, द्वेषरूप और मोहरूप नहीं होता। वह तो एक शुद्ध आत्मा को ही पाता है। तथा जिसके जैसा कहा गया है वैसा विज्ञान नहीं है, वह उस भेदविज्ञान के अभाव से अज्ञानी हुआ अज्ञान रूप अंधकार से आच्छादित होने के कारण चैतन्यचमत्कारमात्र आत्मा के स्वभाव को नहीं जानता, रागस्वरूप ही आत्मा को मानता हुआ रागी होता है, द्वेषी होता है, मोही होता है, परंतु शुद्ध आत्मा को कभी नहीं पाता। इसलिये यह सिद्ध हुआ कि भेदविज्ञान से ही शुद्ध आत्मा की प्राप्ति है।

भावार्थ—भेद विज्ञान से आत्मा जब ज्ञानी होता है तब कर्म के उदय से संतप्त हुआ भी अपने ज्ञानस्वभाव से नहीं छूटता। यदि स्वभाव से छूट जाय तो वस्तु का नाश हो जाय ऐसा न्याय है। इसलिये कर्म के उदय के समय ज्ञानी, रागी, द्वेषी, मोही नहीं होता। और जिसके भेदविज्ञान नहीं है वह अज्ञानी हुआ रागी, द्वेषी, मोही होता है। इसलिये यह निश्चय हुआ कि भेदविज्ञान से ही शुद्ध आत्मा की प्राप्ति होती है ॥१८४।१८५॥

कथं शुद्धात्मोपलंभादेव संवर ? इति चेत्—

सुद्धं तु वियाणंतो सुद्धं चेवप्पयं लहदि जीवो ।
जाणंतो दु असुद्धं असुद्धमेवप्पयं लहइ ॥ १८६ ॥

शुद्धं तु विजानन् शुद्धं चैवात्मानं लभते जीवः ।
जानंस्त्वशुद्धमशुद्धमेवात्मानं लभते ॥ १८६ ॥

यो हि नित्यमेवाच्छिन्नधारावाहिना ज्ञानेन शुद्धमात्मानमुपलभमानोऽवतिष्ठते स ज्ञानमयात् भावात् ज्ञानमय एव भावो भवतीति कृत्वा प्रत्यग्रकर्मास्रवणनिमित्तस्य रागद्वेषमोहसंतानस्य निरोधाच्छुद्धमेवात्मानं प्राप्नोति । यो हि नित्यमेवाज्ञानेनाशुद्धमात्मानमुपलभमानोऽवतिष्ठते सोऽज्ञानमयाद्भावादज्ञानमय एव भावो भवतीति कृत्वा प्रत्यग्रकर्मास्रवणनिमित्तस्य रागद्वेषमोहसंतानस्यानिरोधादशुद्धमेवात्मानं प्राप्नोति । अतः शुद्धात्मोपलंभादेव संवरः ॥१८६॥

जो यः कर्ता सव्वसंगमुक्को झायदि अप्पाणमप्पणो अप्पा आत्मा, पुनरपि कथंभूतः । सव्वसंगमुक्को निस्संगात्मतत्त्वविलक्षणबाह्याभ्यन्तरसर्वसंगमुक्तः सन् । झायदि ध्यायति । कं, अप्पाणं निजशुद्धात्मानं । केन करणभूतेन । अप्पणो स्वशुद्धात्मना । णवि कम्मं णोकम्मं नैव कर्म नोकर्म ध्यायति, आत्मानं ध्यायन् । किं करोति । चेदा चिंतेदि एवं गुणविशिष्टश्चेतयितात्मा चिंतयति । किं ? एयत्तं "एकोऽहं निर्ममः शुद्धो ज्ञानी

प्रश्न—शुद्ध आत्मा की प्राप्ति से ही संवर कैसे होता है ? उत्तर—[शुद्धं तु] शुद्ध आत्मा को [विजानन्] जानता हुआ [जीवः] जीव [शुद्धं चैव] शुद्ध ही [आत्मानं] आत्मा को [लभते] पाता है [तु] और [अशुद्धं आत्मानं] अशुद्ध आत्मा को [जानन्] जानता हुआ जीव [अशुद्धमेव] अशुद्ध आत्मा को ही [लभते] पाता है ।

टीका—जो पुरुष अविच्छेद रूप धारावाही ज्ञान से शुद्ध आत्मा को पाता हुआ स्थित है वह पुरुष "ज्ञानमय भाव से ज्ञानमय ही भाव होते हैं" ऐसे न्यायकर आगामी कर्म के आस्रव के निमित्त जो राग, द्वेष, मोह उनकी संतान (परिपाटी) रूप उत्पत्ति के निरोध से शुद्ध आत्मा को ही पाता है । और जो जीव नित्य ही अज्ञानकर अशुद्ध आत्मा को पाता हुआ स्थित है वह जीव "अज्ञानमय भाव से अज्ञानमय ही भाव होता है" ऐसे न्यायकर आगामी कर्म के आस्रवण के निमित्त जो राग-द्वेष मोह उनकी संतान रूप उत्पत्ति का निरोध न होने से अशुद्ध आत्मा को ही पाता है । इसलिये शुद्ध आत्मा की प्राप्ति से ही संवर होता है ।

भावार्थ—जो पुरुष शुद्ध आत्मा का अनुभव करता है वह तो शुद्ध को ही पाता है उसके आस्रव रुक कर संवर होता है और जो अशुद्ध आत्मा को अनुभव करता है वह अशुद्ध को ही पाता है उसके आस्रव नहीं रुकते अर्थात् संवर नहीं होता ॥१८६॥

यदि कथमपि धारावाहिना बोधनेन ध्रुवमुपलभमानः शुद्धमात्मानमास्ते ।
तदयमुदयदात्मारामात्मानमात्मा परपरिणतिरोधाच्छुद्धमेवाभ्युपैति ॥ १२७ ॥

केन प्रकारेण संवरो भवतीति चेत्—

अप्पाणमप्पणा रुंधिऊण दो पुण्णपावजोएसु ।
दंसणणाणह्मि ठिदो इच्छाविरओ य अण्णह्मि ॥ १८७ ॥
जो सव्वसंगमुक्को झायदि अप्पाणमप्पणो अप्पा ।
णवि कम्मं णोकम्मं चेदा चेयेइ[1] एयत्तं ॥ १८८ ॥
अप्पाणं झायंतो दंसणणाणमओ अणण्णमओ ।
लहइ अचिरेण अप्पाणमेव सो कम्मपविमुक्कं ॥ १८९ ॥(त्रिकलम्)

आत्मानमात्मना रुन्ध्वा द्विपुण्यपापयोगयोः ।
दर्शनज्ञाने स्थितः इच्छाविरतश्चान्यस्मिन् ॥ १८७ ॥
यः सर्वसंगमुक्तो ध्यायत्यात्मानमात्मनात्मा ।
नापि कर्म नोकर्म चेतयिता चेतयत्येकत्वं ॥ १८८ ॥
आत्मानं ध्यायन् दर्शनज्ञानमयोऽनन्यमयः ।
लभतेऽचिरेणात्मानमेव स कर्मप्रविमुक्तं ॥ १८९ ॥

योगीन्द्रगोचर । बाह्याः संयोगजा भावा मत्त सर्वेऽपि सर्वथा ।" इत्याद्येकत्व इति द्वितीयगाथा गता । **सो** इत्यादि । **सो** स पूर्वसूत्रद्वयोक्त पुरुष. **अप्पाणं झायंतो** एवं पूर्वोक्तप्रकारेणात्मानं कर्मतापन्नं चितयन् निर्विकल्परूपेण

अब इस अर्थ का कलशरूप काव्य कहते है—**यदि** इत्यादि । **अर्थ**—जो आत्मा किसी प्रकार (महान् भाग्य से) धारावाही ज्ञान से निश्चल शुद्ध आत्मा को प्राप्त हुआ स्थित होता है वह आत्मा उदय होते हुए आत्मा रूप क्रीड़ावन वाले अपने आत्मा को परपरिणति रूप राग, द्वेष, मोह के निरोध से शुद्ध को पाता है । इस तरह शुद्ध आत्मा की प्राप्ति से संवर होता है । यहां पर जो धारावाही ज्ञान कहा गया है उसका अर्थ यह है कि जो एक प्रवाह रूप ज्ञान हो वह धारावाही है । सो इसकी दो रीतियां हैं—एक तो मिथ्याज्ञान बीच में न आये ऐसा सम्यग्ज्ञान वह धारावाही है और दूसरा उपयोग का ज्ञेय के साथ उपयुक्त होने की अपेक्षा है । सो जहाँ तक एक ज्ञेय से उपयोग उपयुक्त होता है वहां तक धारावाही कहा जाता है । इसकी स्थिति अंतर्मुहूर्त्त ही है, बाद में विच्छेद हो जाता है । सो जहां जैसी विवक्षा हो वहां वैसा जानना । श्रेणी चढ़े तब शुद्ध आत्मा से उपयुक्त हो धारावाही होता है ॥ १२७ ॥

आगे पूछते हैं कि वह संवर किस तरह से होता है ? उसका उत्तर कहते हैं [यः] जो [आत्मा]

---

१. चितेदि इत्यपि पाठः ।

यो हि नाम रागद्वेषमोहमूले शुभाशुभयोगे प्रवर्तमानं, दृढतरभेदविज्ञानावष्टंभेन आत्मानं आत्मनैवात्यंतं रुंध्वा शुद्धदर्शनज्ञानात्मन्यात्मद्रव्ये सुष्ठु प्रतिष्ठितं कृत्वा समस्तपरद्रव्येच्छा-परिहारेण समस्तसंगविमुक्तो भूत्वा नित्यमेवातिनिष्प्रकंपः सन्, मनागपि कर्मनोकर्मणोरसंस्पर्शेन आत्मीयमात्मानमेवात्मना ध्यायन् स्वयं सहजचेतयितृत्वादेकत्वमेव चेतयते; स खल्वेकत्वचेतनेनात्यंतविविक्तं[1] चैतन्यचमत्कारमात्रमात्मानं ध्यायन् शुद्धदर्शनज्ञानमयमात्मद्रव्यमवाप्तः शुद्धात्मोपलंभे सति समस्तपरद्रव्यमयत्वमतिक्रांतः सन् अचिरेणैव सकलकर्मविमुक्तमात्मानमवाप्नोति। एष संवरप्रकारः ॥ १८७।१८८।१८९ ॥

ध्यायन् सन्। **दंसणणाणमइओ** दर्शनज्ञानमयोभूत्वा। **अणण्णमणो** अनन्यमनाश्च **लहदि** लभते। कमेव **अप्पाणमेव** आत्मानमेव। कथंभूतं, **कम्मणिम्मुक्कं** भावकर्मद्रव्यकर्मनोकर्मविमुक्तं। केन, **अचिरेण** स्तोककालेन। एवं केन प्रकारेण संवरो भवति, इति प्रश्ने सति विशेषपरिहारव्याख्यानमुख्यत्वेन गाथात्रयं गतं ॥१८७।१८८।१८९ ॥ अथ-परोक्षस्यात्मनः कथं ध्यानं भवतीति[2] प्रश्ने सत्युत्तरं ददाति;—

जीव **[आत्मानं]** अपने आत्मा को **[आत्मना]** अपने से **[द्विपुण्यपापयोगयोः]** दो पुण्यपाप रूप शुभाशुभ योगों से **[रुन्ध्वा]** रोक के **[दर्शनज्ञाने]** दर्शन ज्ञान में **[स्थितः]** ठहरा हुआ **[अन्यस्मिन् इच्छाविरतः]** अन्यवस्तु में इच्छा रहित **[च]** और **[सर्वसंगमुक्तः]** सब परिग्रह से रहित हुआ **[आत्मना]** आत्मा से ही **[आत्मानं]** आत्मा को **[ध्यायति]** ध्याता है तथा **[कर्म नोकर्म]** कर्म नोकर्म को **[न अपि]** नहीं ध्याता और आप **[चेतयिता]** चेतना रूप होने से **[एकत्वं]** उस स्वरूप एकत्व को **[चिंतयति]** अनुभव करता है विचारता है **[सः]** वह जीव **[दर्शनज्ञानमयः]** दर्शनज्ञानमय हुआ **[अनन्यमयः]** अन्यमय नहीं हो के **[आत्मानं ध्यायन्]** आत्मा को ध्यान करता हुआ **[अचिरेण]** थोड़े समय में **[एव]** ही **[कर्मविप्रमुक्तं]** कर्मों से रहित **[आत्मानं]** आत्मा को **[लभते]** पाता है।

टीका—निश्चय से जो जीव राग द्वेष मोहरूप मूल वाले ऐसे शुभाशुभ योगों में प्रवर्तमान अपने आत्मा को दृढ़तर भेदविज्ञान के बल से आप से ही अत्यंत रोक कर, शुद्धज्ञान दर्शनरूप अपने आत्मद्रव्य में अच्छी तरह ठहरा कर, समस्त परद्रव्यों की इच्छारूप परिग्रह से रहित होकर नित्य ही निश्चल हुआ किंचिन्मात्र भी कर्म को नहीं स्पर्श करके अपने आत्मा को अपने से ही ध्यावता आप (स्वयं) चेतने वाला है, अपने चेतना रूप ही एकत्व को अनुभव करता है ज्ञान चेतनामय होता है, वह जीव निश्चय से एकत्व का अनुभव करने से परद्रव्य से अत्यंत भिन्न चैतन्य चमत्कारमात्र अपने आत्मा को ध्याता हुआ, शुद्ध दर्शन ज्ञानमय आत्मद्रव्य को प्राप्त होने से समस्त पर द्रव्य से पृथक् होकर थोड़े समय में ही सब कर्मों से रहित आत्मा को पाता है। यह संवर का प्रकार है।

---

१. विमक्तं इत्यपि पाठः। २. क्रियते इति पाठान्तरं।

निजमहिमरतानां भेदविज्ञानशक्त्या भवति नियतमेषां शुद्धतत्त्वोपलंभः ।
अचलितमखिलान्यद्रव्यदूरे स्थितानां भवति सति च तस्मिन्नक्षयः कर्ममोक्षः॥१२८॥

केन क्रमेण संवरो भवतीति चेत्—

तेसिं हेऊ भणिदा अज्झवसाणाणि सव्वदरसीहिं ।
मिच्छत्तं अण्णाणं अविरयभावो य जोगो य ॥१९०॥
हेउअभावे णियमा जायदि णाणिस्स आसवणिरोहो ।
आसवभावेण विणा जायदि कम्मस्स वि णिरोहो ॥१९१॥
कम्मस्साभावेण य णोकम्माणं पि जायइ णिरोहो ।
णोकम्मणिरोहेण य संसारणिरोहणं होइ ॥१९२॥ (त्रिकलम्)

तेषां हेतवः भणिताः अध्यवसानानि सर्वदर्शिभिः ।
मिथ्यात्वमज्ञानमविरतभावश्च योगश्च ॥१९०॥
हेत्वभावे नियमाज्जायते ज्ञानिनः आस्रवनिरोधः ।
आस्रवभावेन विना जायते कर्मणोऽपि निरोधः ॥१९१॥

उवदेसेण परोक्खं रूवं जह पस्सिदूण णादेदि ।
भण्णदि तहेव धिप्पदि जीवो दिट्ठो य णादो य ॥

उपदेशेन परोक्षरूपं यथा द्रष्टा जानाति । भण्यते तथैव ध्रियते जीवो दृष्टश्च ज्ञातश्च । **उवदेसेण परोक्खं रूवं जह पस्सिदूण णादेदि** यथालोके परोक्षमपि देवतारूपं परोपदेशाल्लिखितं दृष्ट्वा कश्चिद्देवदत्तो जानाति । **भण्णदि तहेव धिप्पदि जीवो दिट्ठो य णादो य** । तथैव वचनेन भण्यते तथैव मनसि गृह्यते । कोसौ ?

भावार्थ—जो जीव पहले तो रागद्वेषमोह से मिले हुए शुभ अशुभ मन वचन काय के योगों से अपनी आत्मा को भेदज्ञान के बल से चलने न दे, पीछे शुद्ध दर्शन ज्ञानमय अपने स्वरूप में निश्चल करे और फिर सब बाह्य अभ्यन्तर के परिग्रहों से रहित होकर कर्म नोकर्म से भिन्न अपने स्वरूप में एकाग्र होके ध्यान करता हुआ स्थित होता है वह थोड़े समय में ही सब कर्मों का नाश करता है। यह संवर होने की रीति है ॥१८७।१८८।१८९॥

अब इस अर्थ का कलश कहते हैं—**निज** इत्यादि । **अर्थ**—जो पुरुष भेद-विज्ञान की शक्ति से अपने स्वरूप की महिमा में लीन हैं उनको नियम से शुद्धतत्त्व की प्राप्ति होती है और जो उस शुद्धतत्त्व की प्राप्ति होने पर निश्चल होके समस्त अन्य द्रव्यों से दूर ठहरे हुए हैं उनके अक्षय मोक्ष होता है फिर कर्म का बंध नहीं होता ॥१२८॥

कर्मणोऽभावेन च नोकर्मणामपि जायते निरोधः।
नोकर्मनिरोधेन च संसारनिरोधनं भवति ॥१६२॥

संति तावज्जीवस्य, आत्मकर्मैकत्वाध्यासमूलानि मिथ्यात्वाज्ञानाविरतियोगलक्षणानि अध्यवसानानि। तानि रागद्वेषमोहलक्षणस्यास्रवभावस्य हेतवः। आस्रवभावः कर्महेतुः। कर्म-नोकर्महेतुः। नोकर्म संसारहेतुः, इति ततो नित्यमेवायमात्मा, आत्मकर्मणोरेकत्वाध्यासेन मिथ्यात्वाज्ञानाविरतियोगमयमात्मानमध्यवस्यति। ततो रागद्वेषमोहरूपमास्रवभावं भावयति। ततः कर्म आस्रवति, ततो नोकर्म भवति, ततः संसारः प्रभवति। यदा तु आत्मकर्मणोर्भेदविज्ञानेन शुद्धं चैतन्य-चमत्कारमात्रमात्मानं उपलभते तदा मिथ्यात्वाज्ञानाविरतियोगलक्षणानां अध्यवसानानां आस्रव-भावहेतूनां भवत्यभावः। तदभावे रागद्वेषमोहरूपास्रवभावस्य भवत्यभावः, तदभावेऽपि भवति कर्माभावः तदभावे नोकर्माभावः, तदभावेपि भवति संसाराभावः। इत्येष संवरक्रमः ॥१६०।१६१।१६२॥

जीवः, केन रूपेण ? मया दृष्टो ज्ञातश्चेति मनसा संप्रधारयति। तथा चोक्तं। गुरूपदेशादभ्यासात्संवित्तेः स्वपरांतरं।

आगे संवर का क्रम बतलाते हैं;—[तेषां] पूर्व कहे हुए राग-द्वेष-मोहरूप आस्रवों के [हेतवः] हेतु [सर्वदर्शिभिः] सर्वज्ञदेव ने [मिथ्यात्वं] मिथ्यात्व [अज्ञानं] अज्ञान [च अविरतभावः] अविरत-भाव [च योगः] और योग ये चार [अध्यवसानानि] अध्यवसान [भणिताः] कहे हैं सो [ज्ञानिनः] ज्ञानी के [हेत्वभावे] इन हेतुओं का अभाव होने से [नियमात्] नियम से [आस्रवनिरोधः] आस्रव का निरोध [जायते] होता है और [आस्रवभावेन विना] आस्रवभाव के विना [कर्मणः अपि] कर्म का भी [निरोधः] निरोध [जायते] होता है [च] और [कर्मणः अभावेन] कर्म के अभाव से [नोकर्मणां अपि] नोकर्मों का भी [निरोधः] निरोध [जायते] होता है [च] तथा [नोकर्मनिरोधेन] नोकर्म के निरोध होने से [संसारनिरोधनं] संसार का निरोध [भवति] होता है।

टीका—पहले ही जीव के आत्मा और कर्म के एकत्व के निश्चयरूप मूलकारण वाले मिथ्यात्व, अज्ञान, अविरति, योगस्वरूप अध्यवसान विद्यमान हैं; वे राग-द्वेष-मोहस्वरूप आस्रवों के कारण हैं, आस्रवभाव कर्म के कारण हैं, कर्म नोकर्म के कारण हैं और नोकर्म संसार के कारण हैं। इसलिये आत्मा नित्य ही आत्मा और कर्म के एकत्व के निश्चय से आत्मा को मिथ्यात्व अज्ञान अविरति योगमय मानता है। उस निश्चय से राग-द्वेष-मोहरूप आस्रव भावों को भाता है उससे कर्म का आस्रव होता है, कर्म से नोकर्म होता है और नोकर्म से संसार प्रगट होता है। तथा जिस समय यह आत्मा, आत्मा और कर्म के भेद ज्ञान से शुद्ध चैतन्य चमत्कार मात्र आत्मा को पाता है उस समय मिथ्यात्व अज्ञान अविरति योग-स्वरूप अध्यवसान रूप आस्रवभावों के कारणों का इसके अभाव होता है, मिथ्यात्व आदि का अभाव होने से राग-द्वेष-मोहरूप आस्रव भाव का अभाव होता है, राग-द्वेष-मोह का अभाव होने से नोकर्म का अभाव होता है और नोकर्म का अभाव होने से संसार का अभाव होता है। ऐसा यह संवर का अनुक्रम है।

संपद्यते संवर एष साक्षात् शुद्धात्मतत्त्वस्य किलोपलंभात् ।
स भेदविज्ञानत एव तस्मात्तद्भेदविज्ञानमतीव भाव्यं ॥१२९॥
भावयेद्भेदविज्ञानमिदमच्छिन्नधारया ।
तावद्यावत्पराच्च्युत्वा ज्ञानं ज्ञाने प्रतिष्ठते ॥१३०॥

जानाति यः स जानाति मोक्षसौख्यं निरतरं ॥ अथ—

कोविदिदच्छो साहू संपडिकाले भणिज्ज रूवमिणं ।
पच्चक्खमेव दिट्ठं परोक्खणाणे पवट्टंतं ॥

कोविदितार्थः साधुः संप्रतिकाले भणेत् रूपमिदं । प्रत्यक्षमेव दृष्टं परोक्षज्ञाने प्रवर्तमानं । अथ मतं **भणिज्ज रूवमिणं पच्चक्खमेव दिट्ठं परोक्खणाणे पवट्टंतं** । योसौ प्रत्यक्षेणात्मानं दर्शयति तस्य पार्श्वे पृच्छामो वय । नैवं **कोविदिदच्छो साहू सम्पडिकाले भणिज्ज** कोऽविदितार्थः साधुः सम्प्रतिकाले ब्रूयात् ? न कोपि ।

भावार्थ—यह अध्यवसान कि "मैं पर को मारता हूं" तथा "मैं परद्रव्य को जानता हूं" तब तक प्रवर्तता है जब तक आत्मा के रागादिक के तथा आत्मा के ज्ञेयरूप अन्यद्रव्य के भेद न जाने। वह भेद ज्ञान के विना मिथ्याज्ञानरूप है, मिथ्यादर्शनरूप है तथा मिथ्याचारित्ररूप है। ऐसे तीन प्रकार प्रवर्तता है। जिनके यह नहीं है वे मुनिकुंजर हैं, वे ही आत्मा को सम्यक् जानते हैं सम्यक् श्रद्धान करते

१. नेयमात्मख्यातौ गाथा नात आत्मख्यातिव्याख्यैतस्याः।

किमेतदध्यवसानं नामेति चेत्—

बुद्धी-ववसाओवि य अज्झवसाणं मई य विण्णाणं ।
एक्कट्ठमेव सव्वं चित्तं भावो य परिणामो ॥२७१॥

बुद्धिर्व्यवसायोऽपि च अध्यवसानं मतिश्च विज्ञानं ।
एकार्थमेव सर्वं चित्तं भावश्च परिणामः ॥२७१॥

स्वपरयोरविवेके सति जीवस्याध्यवसितिमात्रमध्यवसानं । तदेव च बोधनमात्रत्वाद्बुद्धिः । व्यवसानमात्रत्वाद् व्यवसायः । मननमात्रत्वान्मतिः । विज्ञप्तिमात्रत्वाद्विज्ञानं । चेतनमात्रत्वाच्चित्तं । चितो भवनमात्रत्वाद् भावः । चितः परिणमनमात्रत्वात् परिणामः ॥२७१॥

यावत्संकल्पविकल्पो तावत्कर्म करोत्यशुभशुभजनकं । आत्मस्वरूपा ऋद्धिः यावत् न हृदये परिस्फुरति । यावत्कालं बहिर्विषये देहपुत्रकलत्रादो ममेतिरूपं संकल्पं करोति अभ्यंतरे हर्षविषादरूपं विकल्पं च करोति तावत्कालमनंतज्ञानादिसमृद्धिरूपमात्मानं हृदये न जानाति । यावत्कालमित्थंभूत आत्मा हृदये न परिस्फुरति, तावत्कालं शुभाशुभजनकं कर्म करोतीत्यर्थः । अथाध्यवसानस्य नाममालामाह;—बोधनं बुद्धिः, व्यवसनं व्यवसायः, अध्यवसनमध्यवसायः, मननं पर्यालोचनं मतिश्च, विज्ञायते अनेनेति विज्ञानं, चितनं चित्तं, भवनं भावः, परिणमनं परिणामः, इति शब्दभेदेऽपि नार्थभेदः–किं तु सर्वोऽपि समभिरूढनयापेक्षयाऽध्यवसानार्थ एव । कथं ? इति चेत्, यथेंद्रः शक्रः पुरंदर इति । एवं व्रतैः पुण्यं, अव्रतैः पापमिति कथनेन सूत्रद्वयं पूर्वमेव व्याख्यातं तस्यैव सूत्रद्वयस्य विशेषविवरणार्थं बाह्यं वस्तु रागाद्यध्यवसानकारणं रागाद्यध्यवसानं तु बंधकारणमिति

हैं सम्यक् आचरण करते हैं । इसलिये अज्ञान के अभाव से सम्यग्दर्शन ज्ञान चारित्ररूप हुए कर्मों से लिप्त नहीं होते ॥२७०॥

आगे पूछते हैं कि जिसे कई बार कहते आ रहे हैं वह अध्यवसान क्या है ? इसका स्वरूप अच्छी तरह समझने में नहीं आया, ऐसा पूछने पर अध्यवसान का स्वरूप दिखलाते हैं;—**[बुद्धिः]** बुद्धि **[व्यवसायः]** व्यवसाय **[अपि च]** और **[अध्यवसानं]** अध्यवसान **[च]** और **[मतिः]** मति **[विज्ञानं]** विज्ञान **[चित्तं]** चित्त **[भावः]** भाव **[च]** और **[परिणामः]** परिणाम **[सर्वं]** ये सब **[एकार्थमेव]** एकार्थ ही हैं नाम भेद है इनका अर्थ भिन्न नहीं है ।

टीका—स्व और परका भेद ज्ञान न होने से जो जीव की निश्चिति होना वह अध्यवसान है । वही बोधन मात्र पने से बुद्धि है, निश्चयमात्र पने से व्यवसाय है, जानने मात्रपने से मति है, विज्ञप्ति मात्रपने से विज्ञान है, चेतन मात्रपन से चित्त है, चेतन के भवन मात्रपन से भाव है और परिणमन मात्रपन से परिणाम है । ये सब ही एकार्थ हैं ।

भावार्थ—ये जो बुद्धि आदि आठ नाम कहे हैं वे सभी चेतन आत्मा के परिणाम हैं । जब तक स्व और परका भेद ज्ञान न हो तब तक परमें और अपने में जो एकत्व के निश्चय रूप बुद्धि आदिक होते हैं वे ही अध्यवसान नाम से कहे जाते हैं ॥२७१॥

सर्वत्राध्यवसानमेवमखिलं त्याज्यं यदुक्तं जिनैः
तन्मन्ये व्यवहार एव निखिलोऽप्यन्याश्रयस्त्याजितः ।
सम्यक् निश्चयमेकमेव तदमी निष्कंपमाक्रम्य किं
शुद्धज्ञानघने महिम्नि न निजे बध्नंति संतोधृतिं ॥१७३॥

एवं ववहारणओ पडिसिद्धो जाण णिच्छयणयेण ।
[1]णिच्छयणयासिदा पुण मुणिणो पावंति णिव्वाणं ॥२७२॥

एवं व्यवहारनयः प्रतिषिद्धो जानीहि निश्चयनयेन ।
निश्चयनयाश्रिताः पुनः मुनयः प्राप्नुवंति निर्वाणं ॥२७२॥

कथनमुख्यत्वेन त्रयोदश गाथा गताः, इति समुदायेन पंचदशसूत्रैश्चतुर्थस्थलं समाप्तं ॥ २७१ ॥ अतः परमभेदरत्नत्रयात्मक-निर्विकल्पसमाधिरूपेण निश्चयनयेन विकल्पात्मकव्यवहारनयो हि बाध्यत इति कथनमुख्यत्वेन गाथाषट्कपर्यंतं व्याख्यानं करोति;—**एवं ववहारणओ पडिसिद्धो जाण णिच्छयणयेण** एवं पूर्वोक्तप्रकारेण परद्रव्याश्रितत्वाद् व्यवहारनयः प्रतिषिद्ध इति जानीहि। केन कर्तृभूतेन ? शुद्धात्मद्रव्याश्रितनिश्चयनयेन। कस्मात् ? **णिच्छयणयसल्लीणा मुणिणो पावंति णिव्वाणं** निश्चयनयमालीना आश्रिताः स्थिताः संतो मुनयो निर्वाणं लभंते यतः कारणादिति। किं च यद्यपि प्राथमिकापेक्षया प्रारम्भप्रस्तावे सविकल्पावस्थायां निश्चयसाधकत्वाद् व्यवहारनयः सप्रयोजनस्तथापि विशुद्ध-ज्ञानदर्शनलक्षणे शुद्धात्मनि स्थितानां निष्प्रयोजन इति भावार्थः। कथं निष्प्रयोजनः ? इति चेत्, कर्मभिरमुच्यमानेना

आगे अगले कथन की सूचनिका के अर्थ काव्य कहते है—जो अध्यवसान त्यागने योग्य कहा है वहां ऐसी संभावना है कि व्यवहार का त्याग कराया है निश्चय का ग्रहण कराया है—**सर्वत्र** इत्यादि। **अर्थ**—सभी वस्तुओं में जो अध्यवसान है उन्हें जिनेन्द्र भगवान ने सभी को त्यागने योग्य कहा है सो आचार्य कहते हैं कि हम ऐसा मानते हैं कि परके आश्रय से प्रवर्तने वाला सभी व्यवहार छुड़ाया है। इसलिए हम उपदेश करते हैं कि जो सत्पुरुष हैं वे सम्यक् प्रकार एक निश्चय को ही जिस तरह हो सके उस तरह निश्चल अंगीकार करके शुद्ध ज्ञानघनस्वरूप अपनी आत्मस्वरूप महिमा में स्थिरता क्यों नहीं धारण करते।

भावार्थ—जिनेश्वरदेव ने अन्य पदार्थों में जो आत्मबुद्धिरूप अध्यवसान छुड़ाया है सो ऐसा समझना चाहिए कि पराश्रित सभी व्यवहार छुड़ाया है। इस कारण शुद्धज्ञानस्वरूप अपने आत्मा में स्थिरता रखो ऐसा शुद्ध निश्चय के ग्रहण का उपदेश है। आचार्य ने आश्चर्य भी किया है कि जब भगवान ने अध्यवसान को छुड़ाया है तो सत्पुरुष इसको छोड़कर अपने में स्थिर क्यों नहीं होते ? ॥ १७३ ॥

आगे इसी अर्थ को गाथा में कहते हैं;—**[एवं]** पूर्वकथित रीति से **[व्यवहारनयः]** अध्यवसान रूप व्यवहारनय है वह **[निश्चयनयेन]** निश्चयनय से **[प्रतिषिद्धः]** निषेध रूप **[जानीहि]** जानो **[पुनः]**

---

१. णिच्छयणयसल्लीणा पाठोयं तात्पर्यवृत्तौ।

आत्माश्रितो निश्चयनयः, पराश्रितो व्यवहारनयः। तत्रैवं निश्चयनयेन पराश्रितं समस्तमध्यवसानं बंधहेतुत्वेन मुमुक्षोः प्रतिषेधयता व्यवहारनय एव किल प्रतिषिद्धः, तस्यापि पराश्रितत्वाविशेषात्। प्रतिषेध्य एवं चायं, आत्माश्रितनिश्चयनयाश्रितानामेव मुच्यमानत्वात्, पराश्रितव्यवहारनयस्यैकांतेनामुच्यमानेनाभव्येनाप्याश्रीयमाणत्वाच्च ॥२७२॥

कथमभव्येनाश्रीयते व्यवहारनयः? इति चेत्—

वदसमिदीगुत्तीओ सीलतवं जिणवरेहि पण्णत्तं।
कुव्वंतोवि अभव्वो अण्णाणी मिच्छदिट्ठी दु ॥२७३॥

व्रतसमितिगुप्तयः शीलतपो जिनवरैः प्रज्ञप्तं।
कुर्वन्नप्यभव्योऽज्ञानी मिथ्यादृष्टिस्तु ॥२७३॥

भव्येनाप्याश्रीयमाणत्वात् ॥२७२॥ वदसमिदीगुत्तीओ सीलतवं जिणवरेहि पण्णत्तं व्रतसमितिगुप्तिशीलतप-

---

जो [मुनयः] मुनिराज [निश्चयनयाश्रिताः] निश्चय के आश्रित हैं वे [निर्वाणं] मोक्ष को [प्राप्नुवंति] पाते हैं।

टीका—निश्चयनय आत्मा के आश्रित है और व्यवहारनय पर के आश्रित। यहां निश्चयनय से पराश्रित समस्त अध्यवसान (पर और अपने को एक मानना) मुमुक्षुओं को बंध का कारण होने से उस (अध्यवसान) का निषेध करने से वास्तव में व्यवहारनय का ही निषेध कराया है; क्योंकि अध्यवसान और व्यवहारनय दोनों ही पराश्रित हैं। इसलिए व्यवहारनय निषेध करने योग्य है; क्योंकि आत्माश्रित निश्चयनय का आश्रय लेने वाले ही मुक्त होते हैं। पराश्रित व्यवहारनय का आश्रय तो एकांततः कभी मुक्त न होने वाला अभव्य भी करता है।

भावार्थ—आत्मा के जो परके निमित्त से अनेक भाव होते हैं वे सब व्यवहारनय के विषय हैं। इसलिए व्यवहारनय तो पराश्रित है और जो एक अपना स्वाभाविक भाव है वह निश्चय का विषय है। इसलिये निश्चयनय आत्माश्रित है। अध्यवसान भी व्यवहारनय का ही विषय है। इसलिये जो अध्यवसान का त्याग है वह व्यवहारनय का ही त्याग है। सो निश्चयनय को प्रधान कर व्यवहारनय के त्याग का उपदेश है। जो निश्चय के आश्रय प्रवर्तते हैं वे तो कर्म से छूटते हैं और जो एकांत से व्यवहारनय के ही आश्रय प्रवर्त रहे हैं वे कर्म से कभी नहीं छूटते ॥२७२॥

आगे पूछते हैं कि अभव्य जीव व्यवहारनय को कैसे आश्रय करता है? ऐसा पूछने पर उत्तर कहते हैं;—[व्रतसमितिगुप्तयः] व्रत समिति गुप्ति [शीलतपः] शील तप [जिनवरैः] जिनेश्वर देव ने [प्रज्ञप्तं] कहे हैं उनको [कुर्वन्नपि] करता हुआ भी [अभव्यः] अभव्य जीव [अज्ञानी मिथ्यादृष्टिः तु] अज्ञानी मिथ्यादृष्टि ही है।

शीलतपःपरिपूर्णं त्रिगुप्तिपंचसमितिपरिकलितमहिंसादिपंचमहाव्रतरूपं व्यवहारचारित्रमभव्योऽपि कुर्यात् तथापि स निश्चारित्रोऽज्ञानी मिथ्यादृष्टिरेव निश्चयचारित्रहेतुभूतज्ञानश्रद्धानशून्यत्वात् ॥२७३॥

तस्यैकादशांगज्ञानमस्ति ? इति चेत्—

मोक्खं असद्दहंतो अभवियसत्तो दु जो अधीएज्ज।
पाठो ण करेदि गुणं असद्दहंतस्स णाणं तु ॥२७४॥

मोक्षमश्रद्दधानोऽभव्यसत्त्वस्तु योऽधीयीत।
पाठो न करोति गुणमश्रद्दधानस्य ज्ञानं तु ॥२७४॥

श्चरणादिकं जिनवरैः प्रज्ञप्तं कथितं **कुव्वंतोवि अभव्वो अण्णाणी मिच्छदिट्ठीओ** मंदमिथ्यात्वमंदकषायोदये सति कुर्वन्नप्यभव्यो जीवस्त्वज्ञानी भवति मिथ्यादृष्टिश्च भवति। कस्मात् ? इति चेत्, मिथ्यात्वादिसप्तप्रकृत्युपशमक्षयोपशमक्षयाभावात् शुद्धात्मोपादेयश्रद्धानाभावात् इति ॥२७३॥ अथ तस्यैकादशांगश्रुतज्ञानमस्ति कथमज्ञानी ? इति चेत्:— **मोक्खं असद्दहंतो अभविय सत्तो दु जो अधीयेज्ज** मोक्षमश्रद्दधानः सन्नभव्यजीवो यद्यपि ख्यातिपूजालाभार्थमेकादशांगश्रुताध्ययनं कुर्यात् **पाठो ण करेदि गुणं** तथापि तस्य शास्त्रपाठः शुद्धात्मपरिज्ञानरूपं गुणं न करोति। किं कुर्वतस्तस्य ? **असद्दहंतस्स णाणं तु** अश्रद्दधतोऽरोचमानस्य। किं ? ज्ञानं। कोऽर्थः ? शुद्धात्मसम्यक्श्रद्धानज्ञानानुष्ठानरूपेण निर्विकल्पसमाधिना प्राप्यं गम्यं शुद्धात्मस्वरूपमिति। कस्मान्न श्रद्धत्ते ? दर्शनचारित्रमोहनीयोपशमक्षयोपशमक्षयाभावात्। तदपि कस्मात् ? अभव्यत्वादिति भावार्थः ॥२७४॥ अथ तस्य पुण्यरूपधर्मादिश्रद्धानमस्तीति चेत्;—

टीका—शील तप से परिपूर्ण तीन गुप्ति पांच समिति से संयुक्त, अहिंसादिक पांच महाव्रत रूप ऐसा व्यवहार चारित्र को अभव्य भी करता (पालता) है, तो भी वह अभव्य चारित्र से रहित ही है अज्ञानी मिथ्यादृष्टि ही है क्योंकि उसके निश्चय चारित्र का कारण स्वरूप का ज्ञान और श्रद्धान नहीं है।

भावार्थ—अभव्य जीव महाव्रत समिति गुप्त रूप व्यवहार पाले तौ भी निश्चय सम्यक् ज्ञान श्रद्धान के बिना वह सम्यक् चारित्र नाम नहीं पाता। इसलिये वह अज्ञानी मिथ्यादृष्टि ही रहता है ॥२७३॥

आगे शिष्य कहता है कि उसके तो ग्यारह अंगतक का ज्ञान होता है उसे अज्ञानी क्यों कहा ? उसका उत्तर कहते हैं;—**[यः अभव्यसत्त्वः]** जो अभव्य जीव **[अधीयीत]** शास्त्र का पाठ भी पढ़ता है **[तु]** परंतु **[मोक्षं]** मोक्ष तत्त्व का **[अश्रद्दधानः]** श्रद्धान नहीं करता **[तु]** तो **[ज्ञानं अश्रद्दधानस्य]** ज्ञान का श्रद्धान नहीं करने वाले उस अभव्य का **[पाठः]** शास्त्र पढ़ना **[गुणं न करोति]** लाभ नहीं करता।

मोक्षं हि न तावदभव्यः श्रद्धत्ते शुद्धज्ञानमयात्मज्ञानशून्यत्वात् ततो ज्ञानमपि नासौ श्रद्धत्ते, ज्ञानमश्रद्दधानश्चाचाराद्येकादशांगं श्रुतमधीयानोऽपि श्रुताध्ययनगुणाभावान्न ज्ञानी स्यात् स किल गुणः श्रुताध्ययनस्य यद्विविक्तवस्तुभूतज्ञानमयात्मज्ञानं तच्च विविक्तवस्तुभूतं ज्ञानमश्रद्दधानस्या-भव्यस्य श्रुताध्ययनेन न विधातुं शक्येत ततस्तस्य तद्गुणाभावः, ततश्च ज्ञानश्रद्धानाभावात् सोऽज्ञानीति प्रतिनियतः ॥२७४॥

तस्य धर्मश्रद्धानमस्तीति चेत्—

सद्दहदि य पत्तियदि य रोचेदि य तह पुणो य फासेदि ।
धम्मं भोगणिमित्तं ण दु सो कम्मक्खयणिमित्तं ॥ २७५ ॥

श्रद्दधाति च प्रत्येति च रोचयति च तथा पुनश्च स्पृशति ।
धर्मं भोगनिमित्तं न तु स कर्मक्षयनिमित्तं ॥ २७५ ॥

अभव्यो हि नित्यकर्मकर्मफलचेतनारूपं वस्तु श्रद्धत्ते, नित्यज्ञानचेतनामात्रं न तु श्रद्धत्ते

सद्दहदि य श्रद्धते च पत्तेदि य ज्ञानरूपेण प्रत्येति च प्रतीतिं परिच्छित्तिं करोति रोचेदि य विशेषश्रद्धानरूपेण रोचते च तह पुणोवि फासेदिय तथा पुनः स्पृशति च अनुष्ठानरूपेण । कं ? धम्मं भोगणिमित्तं अहमिंद्रादि

टीका—अभव्य जीव प्रथम तो निश्चय से मोक्ष का ही श्रद्धान नहीं करता क्योंकि शुद्ध ज्ञानमय आत्मा का ज्ञान ही अभव्य के नहीं है, इसलिये अभव्य जीव ज्ञान को भी श्रद्धानरूप नहीं करता । और ज्ञान का श्रद्धान न करने वाला अभव्य आचारांग को आदि लेकर ग्यारह अंगरूप श्रुत को पढ़ता हुआ भी शास्त्र पढने के फल के अभाव से ज्ञानी नहीं होता । शास्त्र पढ़ने का यह गुण है कि भिन्न वस्तुभूत ज्ञानमय आत्मा का ज्ञान हो । सो उस भिन्न वस्तुभूत ज्ञान को नहीं श्रद्धान करने वाला अभव्य शास्त्र के पढ़ने से आत्मज्ञान करने को समर्थ नहीं होता । इसलिये उसके शास्त्र पढ़ने का जो भिन्न आत्मा का जानना, वह नहीं है इसलिये सच्चे ज्ञान श्रद्धान के अभाव से वह अभव्य अज्ञानी ही है यह नियम है ।

भावार्थ—अभव्य जीव ग्यारह अंग पढ़े तो भी उसके शुद्ध आत्मा का ज्ञान श्रद्धान नहीं होता इसलिये उसके शास्त्र का पढ़ना गुणकारी नहीं हुआ । इस कारण वह अज्ञानी ही है ।।२७४।।

आगे शिष्य फिर कहता है कि उस अभव्य के धर्म का तो श्रद्धान होता है वह कैसे निषेध करते हो ? उसका उत्तर कहते है;—[सः] वह अभव्य जीव [धर्मं] धर्म को [श्रद्दधाति च] श्रद्धान करता है [प्रत्येति च] प्रतीति करता है [रोचयति च] रुचि करता है [पुनश्च] और [स्पृशति] स्पर्शता है वह [भोगनिमित्तं] संसार भोग के निमित्त जो धर्म है उसी को श्रद्धान आदि करता है [तु] परन्तु [कर्मक्षयनिमित्तं] कर्मक्षय होने का निमित्तरूप धर्म का [न] श्रद्धान आदि नहीं करता ।

टीका—अभव्य जीव नित्य ही कर्म और कर्मफलचेतनारूप वस्तु की श्रद्धा करता है परन्तु

निस्यमेव भेदविज्ञानानर्हत्वात् । ततः स कर्ममोक्षनिमित्तं ज्ञानमात्रं भूतार्थं धर्मं न श्रद्धत्ते । भोगनिमित्तं शुभकर्ममात्रमभूतार्थमेव श्रद्धत्ते । तत एवासौ अभूतार्थधर्मश्रद्धानप्रत्ययनरोचनस्पर्शनैरुपरितनग्रैवेयकभोगमात्रमास्कंदेन्न पुनः कदाचनापि विमुच्यते, ततोऽस्य भूतार्थधर्मश्रद्धानाभावात् श्रद्धानमपि नास्ति । एवं सति तु निश्चयनयस्य व्यवहारनयप्रतिषेधो युज्यत एव ॥ २७५ ॥

पदवीकारणत्वादिति मत्वा भोगाकांक्षारूपेण पुण्यरूपं धर्मं **ण हु सो कम्मक्खयणिमित्तं** नच कर्मक्षयनिमित्तं शुद्धात्मसंवित्तिलक्षणं निश्चयधर्ममिति ॥ २७५ ॥ अथ कीदृशौ तौ प्रतिषेध्यप्रतिषेधकौ व्यवहारनिश्चयनयाविति चेत्;—**आयारादी णाणं** आचारसूत्रकृतमित्यादि एकादशांगशब्दशास्त्रं ज्ञानस्याश्रयत्वात्कारणत्वाद् व्यवहारेण ज्ञानं भवति । **जीवादी दंसणं च विण्णेयं** जीवादिनवपदार्थः श्रद्धानविषयः सम्यक्त्वाश्रयत्वान्निमित्तत्वाद् व्यवहारेण सम्यक्त्वं भवति । **छज्जीवाणं रक्खा भणदि चरित्तं तु ववहारो** षट्जीवनिकायरक्षा चारित्राश्रयत्वात् हेतुत्वाद् व्यवहारेण चारित्रं भवति । एवं पराश्रितत्वेन व्यवहारमोक्षमार्गः प्रोक्त इति । **आदा खु मज्झ णाणे** स्वशुद्धात्मा ज्ञानस्याश्रयत्वान्निमित्तत्वान्निश्चयनयेन मम सम्यग्ज्ञानं भवति । **आदा मे दंसणे** शुद्धात्मा सम्यग्दर्शनस्याश्रयत्वात् कारणत्वात् निश्चयेन सम्यग्दर्शनं भवति **चरित्ते य** शुद्धात्मा चारित्रस्याश्रयत्वाद्धेतुत्वात् निश्चयेन सम्यक्चारित्रं भवति **आदा पच्चक्खाणे** शुद्धात्मा रागादिपरित्यागलक्षणस्यप्रत्याख्यानस्याश्रयत्वात्कारणत्वात् निश्चयेन प्रत्याख्यानं भवति । **आदा मे संवरे** शुद्धात्मा स्वरूपोपलब्धिबलेन हर्षविषादादिनिरोधलक्षणसंवरस्याश्रयत्वान्निश्चयेन संवरो

नित्य ज्ञान चेतनामात्र वस्तु का श्रद्धान नहीं करता क्योंकि अभव्य जीव नित्य ही आप परके भेदज्ञान के योग्य नहीं है । इसलिये वह अभव्य ज्ञानमात्र सत्यार्थ धर्म जो कि कर्मक्षय का निमित्त है उसको श्रद्धान नहीं करता, परन्तु शुभ कर्ममात्र असत्यार्थ धर्म जो भोगों का निमित्त है उसको श्रद्धान करता है । इसीलिये यह अभव्य अभूतार्थ धर्म का श्रद्धान, प्रतीति, रुचि, स्पर्शन इनकर ऊपर के ग्रैवेयकतक के भोगमात्रों को पाता है परन्तु कर्म से कभी नहीं छूटता । इसलिये इसके सत्यार्थ धर्म के श्रद्धान का अभाव होने से सच्चा श्रद्धान भी नहीं है । ऐसा होनेपर निश्चयनय में व्यवहारनय का निषेध युक्त ही है ।

भावार्थ—अभव्य जीव कर्मफलचेतना को जानता है परन्तु ज्ञानचेतना को नहीं जानता क्योंकि इसके भेदज्ञान होने की योग्यता नहीं है; इस कारण इसके शुद्ध आत्मीक धर्म का श्रद्धान नहीं है । शुभ कर्म को ही धर्म समझ कर श्रद्धान करता है, उसका फल ग्रैवेयकतक के भोग पाता है परन्तु कर्म का क्षय नहीं होता । इसलिये इसके सत्यार्थ धर्म का भी श्रद्धान नहीं कहा जा सकता, इसी से निश्चयनय में व्यवहारनय का निषेध है । यहां इतना और जानना कि यह हेतुवादरूप अनुभवप्रधानग्रंथ है इसलिये भव्य अभव्य का अनुभव की अपेक्षा निर्णय है, तथा यही अहेतुवाद आगम से मिलाओ तब अभव्य के सूक्ष्म केवली गम्य ऐसा ही व्यवहारनय की पक्ष का आशय रह जाता है । वह छद्मस्थ (अल्पज्ञानी) के अनुभवगोचर नहीं होता, सर्वज्ञदेव जानते हैं । उसके केवल व्यवहार की पक्ष से सर्वथा एकांत रूप मिथ्यात्व रहता है अभव्य का यह आशय सर्वथा नहीं मिटता इसलिये अभव्य ही है ॥२७५॥

कीदृशौ प्रतिषेध्यप्रतिषेधकौ व्यवहारनिश्चयनयाविति चेत्—

आयारादी णाणं जीवादी दंसणं च विण्णेयं ।
[1]छज्जीवणिकं च तहा भणइ चरित्तं तु ववहारो ॥ २७६ ॥
आदा खु मज्झ णाणं आदा मे दंसणं चरित्तं च ।
आदा पच्चक्खाणं आदा मे संवरो जोगो ॥ २७७ ॥ (युगलम्)

आचारादि ज्ञानं जीवादि दर्शनं च विज्ञेयं ।
षड्जीवनिकां च तथा भणति चरित्रं तु व्यवहारः ॥२७६॥
आत्मा खलु मम ज्ञानमात्मा मे दर्शनं चरित्रं च ।
आत्मा प्रत्याख्यानं आत्मा मे संवरो योगः ॥२७७॥

आचारादिशब्दश्रुतं ज्ञानस्याश्रयत्वात् ज्ञानं, जीवादयो नवपदार्था दर्शनस्याश्रयत्वा-

---

भवति **जोगो** शुद्धात्मा शुभाशुभचिंतानिरोधलक्षणपरमध्यानशब्दवाच्ययोगस्याश्रयत्वाद्धेतुत्वात् परमयोगो भवतीति । शुद्धात्माश्रितत्वेन निश्चयमोक्षमार्गो ज्ञातव्यः। एवं व्यवहारनिश्चयमोक्षमार्गस्वरूपं कथितं। तत्र निश्चयः प्रतिषेधको भवति, व्यवहारस्तु प्रतिषेध्य इति। कस्मादिति चेत्, निश्चयमोक्षमार्गे स्थितानां नियमेन मोक्षो भवति, व्यवहारमोक्षमार्गे स्थितानां तु भवति न भवति च। कथं भवति न भवति ? इति चेत्, यदि मिथ्यात्वादिसप्तप्रकृत्युपशमक्षयोपशमक्षयात्स-काशाच्छुद्धात्मानमुपादेयं कृत्वा वर्तते तदा मोक्षो भवति। यदि पुनः सप्तप्रकृत्युपशमाद्यभावे शुद्धात्मानमुपादेयं कृत्वा न वर्तते तदा मोक्षो न भवति। तदपि कस्मात् ? सप्तप्रकृत्युपशमाद्यभावे सति अनंतज्ञानादिगुणस्वरूपमात्मानमुपादेयं कृत्वा न वर्तते न श्रद्धत्ते यतः कारणात्। यस्तु तादृशमात्मानमुपादेयं कृत्वा श्रद्धत्ते तस्य सप्तप्रकृत्युपशमादिकं विद्यते स तु भव्यो भवति। यस्य पुनः पूर्वोक्तशुद्धात्मस्वरूपमुपादेयं नास्ति तस्य सप्तप्रकृत्युपशमादिकं न विद्यते इति ज्ञातव्यं

आगे पूछते हैं कि निश्चयनय तो व्यवहार का प्रतिषेधक कहा है और निश्चयनय के व्यवहारनय प्रतिषेधने योग्य कहा सो ये दोनों ही किस तरह हैं ? ऐसा पूछने पर निश्चय व्यवहार का स्वरूप कहते हैं—**[आचारादि ज्ञानं]** आचारांग आदि शास्त्र तो ज्ञान हैं **[च]** तथा **[जीवादि दर्शनं]** जीवादि तत्त्व हैं वे दर्शन **[विज्ञेयं]** जानना **[च]** और **[षड्जीवनिकायं]** छह काय के जीवों की रक्षा **[चारित्रं]** चारित्र है **[तथा तु]** इस तरह तो **[व्यवहारः भणति]** व्यवहारनय कहता है **[खलु]** और निश्चयकर **[मम आत्मा ज्ञानं]** मेरा आत्मा ही ज्ञान है **[मे आत्मा]** मेरा आत्मा ही **[दर्शनं चारित्रं च]** दर्शन और चारित्र है **[आत्मा]** मेरा आत्मा ही **[प्रत्याख्यानं]** प्रत्याख्यान है **[मे आत्मा]** मेरा आत्मा ही **[संवरः योगः]** संवर और योग (समाधि ध्यान) है। ऐसे निश्चयनय कहता है।

टीका—आचारांग को आदि लेकर जो शब्दश्रुत है वह ज्ञान है क्योंकि वह ज्ञान का आश्रय

---

१. तात्पर्यवृत्तौ छज्जीवाणं रक्खा इति पाठः।

दर्शनं, षड्जीवनिकायरक्षाचारित्रस्याश्रयत्वात् चारित्रं, इति व्यवहारः। शुद्ध आत्मा ज्ञानाश्रयत्वाद् ज्ञानं, शुद्ध आत्मा दर्शनाश्रयत्वाद्दर्शनं, शुद्ध आत्मा चारित्राश्रयत्वाच्चारित्रमिति निश्चयः। तत्राचारादीनां ज्ञानाश्रयत्वस्यानैकांतिकत्वाद् व्यवहारनयः प्रतिषेध्यः। निश्चयनयस्तु शुद्धस्यात्मनो ज्ञानाद्याश्रयत्वस्यैकांतिकत्वात् तत्प्रतिषेधकः। तथाहि—नाचारादिशब्दश्रुतं, एकांतेन ज्ञानस्याश्रयः तत्सद्भावेप्यभव्यानां शुद्धात्माभावेन ज्ञानस्याभावात्। न जीवादयः पदार्था दर्शनस्याश्रयाः, तत्सद्भावेप्यभव्यानां शुद्धात्माभावेन दर्शनस्याभावात्। न च षड्जीवनिकायः चारित्रस्याश्रयस्तत्सद्भावेप्यभव्यानां शुद्धात्माभावेन चारित्रस्याभावात्। शुद्ध आत्मैव ज्ञानस्याश्रयः, आचारादिशब्दश्रुतसद्भावेऽसद्भावे वा तत्सद्भावेनैव ज्ञानस्य सद्भावात्। शुद्ध आत्मैव दर्शनस्याश्रयः, जीवादिपदार्थसद्भावेऽसद्भावे वा तत्सद्भावेनैव दर्शनस्य सद्भावात्। शुद्ध आत्मैव चारित्रस्याश्रयः षड्जीवनिकायसद्भावेऽसद्भावे वा तत्सद्भावेनैव चारित्रस्य सद्भावात्॥ २७६। २७७॥

मिथ्यादृष्टिरसौ। तेन कारणेनाभव्यजीवस्य मिथ्यात्वादिसप्तप्रकृत्युपशमादिकं कदाचिदपि न संभवति इति भावार्थः। किं च, निर्विकल्पसमाधिरूपे निश्चये स्थित्वा व्यवहारस्त्याज्यः, किं तु तस्यां त्रिगुप्तावस्थायां व्यवहारः स्वयमेव

है। जीव को आदि लेकर नव पदार्थ हैं वे दर्शन हैं क्योंकि ये दर्शन के आश्रय हैं। छः जीवों की रक्षा चारित्र है क्योंकि यह चारित्र का आश्रय है। इस तरह से तो व्यवहारनय के वचन हैं। शुद्ध आत्मा ज्ञान है क्योंकि ज्ञान का आश्रय आत्मा ही है। शुद्ध आत्मा ही दर्शन है क्योंकि दर्शन का आश्रय आत्मा ही है। शुद्ध आत्मा ही चारित्र है क्योंकि चारित्र का आश्रय आत्मा ही है। ऐसे निश्चयनय के वचन हैं। आचारांग आदिक को ज्ञानादिक के आश्रयपने का व्यभिचार है, आचारांग आदिक तो हों परन्तु ज्ञान आदिक नहीं भी हों इसलिये व्यवहारनय प्रतिषेध करने योग्य है निश्चयनय में शुद्ध आत्मा के साथ ज्ञानादिक के आश्रयत्व का ऐकांतिकपना है। जहां शुद्ध आत्मा है वहां ही ज्ञान दर्शन चारित्र हैं इसलिये व्यवहारनय का निषेध करने वाला है। यही हेतु से कहते हैं—आचारादि शब्दश्रुत एकांत से ज्ञान का आश्रय नहीं है क्योंकि आचारांगादिक का अभव्य जीव के सद्भाव होने पर भी शुद्ध आत्मा का अभाव होने से ज्ञान का अभाव है। जीव आदि नौ पदार्थ दर्शन का आश्रय नहीं हैं क्योंकि अभव्य के उनका सद्भाव होने पर भी शुद्धात्मा का अभाव होने से दर्शन का भी अभाव है। छहकाय के जीवों की रक्षा चारित्र का आश्रय नहीं है क्योंकि उसके मौजूद होने पर भी अभव्य के शुद्धात्मा का अभाव होने से चारित्र का अभाव है। शुद्ध आत्मा ही ज्ञान का आश्रय है क्योंकि आचारांगादि शब्दश्रुत का सद्भाव होने पर या असद्भाव होने पर शुद्ध आत्मा के सद्भाव से ही ज्ञान का सद्भाव है। शुद्ध आत्मा ही दर्शन का आश्रय है क्योंकि जीवादि पदार्थों का सद्भाव होने वा न होने पर भी शुद्ध आत्मा के सद्भाव से ही दर्शन का सद्भाव है। शुद्ध आत्मा ही चारित्र का आश्रय है क्योंकि छहकाय के जीवों की रक्षा का सद्भाव होने तथा असद्भाव होने पर भी शुद्धात्मा के सद्भाव से ही चारित्र का सद्भाव है।

भावार्थ—आचारांगादि शब्द श्रुत का जानना, जीवादि पदार्थों का श्रद्धान करना तथा छह-

रागादयो बंधनिदानमुक्तास्ते शुद्धचिन्मात्रमहोऽतिरिक्ताः ।
आत्मा परो वा किमु तन्निमित्तमिति प्रणुन्नाः पुनरेवमाहुः ॥ १७४ ॥

जह फलिहमणी सुद्धो ण सयं परिणमइ रायमाईहिं ।
रंगिज्जदि अण्णेहिं दु सो रत्तादीहिं दव्वेहिं ॥ २७८ ॥
एवं णाणी सुद्धो ण सयं परिणमइ रायमाईहिं ।
राइज्जदि अण्णेहिं दु सो रागादीहिं दोसेहिं ॥ २७९ ॥ (युगलम्)

यथा स्फटिकमणिः शुद्धो न स्वयं परिणमते रागाद्यैः ।
रज्यतेऽन्यैस्तु स रक्तादिभिर्द्रव्यैः ॥ २७८ ॥
एवं ज्ञानी शुद्धो न स्वयं परिणमते रागाद्यैः ।
रज्यतेऽन्यैस्तु स रागादिभिर्दोषैः ॥ २७९ ॥

यथा खलु केवलः स्फटिकोपलः परिणामस्वभावत्वे सत्यपि स्वस्य शुद्धस्वभावत्वेन

नास्तीति तात्पर्यार्थः । एवं निश्चयनयेन व्यवहारः प्रतिषिद्ध इति कथनरूपेण षट्सूत्रैः पंचमं स्थलं गतं ॥२७६।२७७॥ अथ रागादयः किल कर्मबंधकारणं भणिताः, तेषां पुनः किं कारणं ? इति पृष्टे प्रत्युत्तरमाह;—यथा स्फटिकमणिर्विशुद्धो बहिरुपाधिं विना स्वयं रागादिभावेन न परिणमति पश्चात् स एव रज्यते, कैः ? जपापुष्पादिबहिर्भूतान्यद्रव्यैरिति दृष्टांतो गतः । एवमनेन दृष्टांतेन ज्ञानी शुद्धो भवन् स्वयं निरुपाधिचिच्चमत्कारस्वभावेन कृत्वा जपापुष्पस्थानीयकर्मोदयरूपपरोपाधिं विना

काय के जीवों की रक्षा इन सब के होने पर भी अभव्य के ज्ञान दर्शन चारित्र नहीं होते इसलिये व्यवहार नय प्रतिषेध्य है । तथा शुद्धात्मा के होनेपर ज्ञान दर्शन चारित्र होते ही हैं इस कारण निश्चयनय इस व्यवहार का प्रतिषेधक है; इसलिये शुद्धनय उपादेय कहा है ॥२७६।२७७॥

आगे अगले कथन की सूचनिका का काव्य कहते हैं—**रागादयो** इत्यादि । **अर्थ**—यहां शिष्य फिर पूछताहै कि रागादिक हैं वे तो बंध के कारण कहे और वे शुद्ध चैतन्यमात्र आत्मा से भिन्न कहे हैं वहां पर उनके होने में आत्मा निमित्त कारण है या कोई अन्य ? ॥१७४॥

ऐसे प्रेरे हुए आचार्य इसका उत्तर दृष्टांतपूर्वक कहते हैं;—**[यथा]** जैसे **[स्फटिकमणिः]** स्फटिकमणि **[शुद्धः]** आप शुद्ध है वह **[रागाद्यैः]** ललाई आदि रंगस्वरूप **[स्वयं न परिणमते]** आप तो नहीं परणमती **[तु]** परन्तु **[सः]** वह **[अन्यैः रक्तादिभिः द्रव्यैः]** दूसरे लाल काले आदि द्रव्यों से **[रज्यते]** ललाई आदि रंग स्वरूप परणमती है **[एवं]** इसी प्रकार **[ज्ञानी]** ज्ञानी **[शुद्धः]** आप शुद्ध है **[सः]** वह **[रागाद्यैः]** रागादि भावों से **[स्वयं न परिणमते]** आप तो नहीं परिणमता **[तु]** परन्तु **[अन्यैः रागादिभिः दोषैः]** अन्य रागादि दोषों से **[रज्यते]** रागादिरूप किया जाता है ।

टीका—जैसे वास्तव में केवल (अकेला) स्फटिक पाषाण आप परिणाम स्वभावरूप होने पर

रागादिनिमित्तत्वाभावात् रागादिभिः स्वयं न परिणमते, परद्रव्येणैव स्वयं रागादिभावापन्नतया स्वस्य रागादिनिमित्तभूतेन शुद्धस्वभावात्प्रच्यवमान एव रागादिभिः परिणम्यते। तथा केवलः किलात्मा परिणामस्वभावत्वे सत्यपि स्वस्य शुद्धस्वभावत्वेन रागादिनिमित्तत्वाभावात् रागादिभिः स्वयं न परिणमते परद्रव्येणैव स्वयं रागादिभावापन्नतया स्वस्य रागादिनिमित्तभूतेन शुद्धस्वभावात्प्रच्यवमान एव रागादिभिः परिणम्येत, इति तावद्वस्तुस्वभावः ॥ २७८। २७९ ॥

न जातु रागादिनिमित्तभावमात्मात्मनो याति यथार्ककांतः।
तस्मिन्निमित्तं परसंग एव वस्तुस्वभावोऽयमुदेति तावत् ॥ १७५ ॥
इति वस्तुस्वभावं स्वं ज्ञानी जानाति तेन सः।
रागादीन्नात्मनः कुर्यान्नातो भवति कारकः ॥ १७६ ॥

रागादिविभावैर्न परिणमति पश्चात्सहजस्वच्छभावच्युतः सन् स एव रज्यते। कैः ? अन्यैः कर्मोदयनिमित्तै रागादिदोषैः

भी अपने शुद्ध स्वभावपने से तो रागादि निमित्त के अभाव से रागादिकों से आप नहीं परिणमता, आप ही अपने रागादि परिणाम होने का निमित्त नहीं है, परन्तु परद्रव्य स्वयं रागादिभाव को प्राप्त होने से स्फटिक के रागादिक का निमित्तभूत है, उससे शुद्ध स्वभाव से च्युत (रहित) हुआ ही रागादि रंग रूप परिणमता है, उसी तरह अकेला आत्मा परिणमन स्वभावरूप होने पर भी अपने शुद्ध स्वभावपने से रागादि निमित्तपने के अभाव से आप ही रागादिभावों से नहीं परिणमता, अपने आपही रागादि परिणाम का निमित्त नहीं है परन्तु परद्रव्य स्वयं रागादिभाव को प्राप्त होने से आत्मा के रागादिक का निमित्तभूत है उससे शुद्धस्वभाव से च्युत हुआ ही रागादिक से परिणमता है। ऐसा ही वस्तुका स्वभाव है।

भावार्थ—आत्मा एकाकी तो शुद्ध ही है परन्तु परिणाम स्वभाव है, जिस तरह का परका निमित्त मिले वैसा ही परिणमता है। इसलिये रागादिक रूप परद्रव्य के निमित्त से परिणमता है। यहां स्फटिकमणि का दृष्टांत है—कि, स्फटिकमणि आप तो केवल एकाकार शुद्ध ही है परन्तु जब परद्रव्य की ललाई आदिका डंक लगे तब ललाई आदि रूप परिणमती है। ऐसा यह वस्तुका ही स्वभाव है।२७८।२७९।

अब इस अर्थ का कलश कहते हैं—**न जातु** इत्यादि। **अर्थ**—आत्मा अपने रागादिक के निमित्त-भाव को कभी नहीं प्राप्त होता। उस आत्मा में रागादिक होने का निमित्त परद्रव्य का सम्बन्ध ही है। यहां सूर्यकांतमणि का दृष्टांत है—जैसे सूर्यकांतमणि आप अग्निरूप नहीं परणमती उसमें सूर्य का बिंब अग्निरूप होने को निमित्त है वैसे जानना। यह वस्तु का स्वभाव उदय को प्राप्त है किसी का किया हुआ नहीं है ॥१७५॥

आगे कहते हैं कि ऐसे वस्तु के स्वभाव को जानता हुआ ज्ञानी रागादिक को अपने नहीं करता ऐसी सूचनिका का श्लोक कहते हैं—**इति वस्तु** इत्यादि। **अर्थ**—इस तरह अपने वस्तुस्वभाव को ज्ञानी जानता है इस कारण वह ज्ञानी रागादिक को अपने में नहीं करता इसलिये रागादिक का कर्ता नहीं है ॥१७६॥

ण य रायदोसमोहं कुव्वदि णाणी कसायभावं वा ।
सयमप्पणो ण सो तेण कारगो तेसिं भावाणं ॥२८०॥

नापि रागद्वेषमोहं करोति ज्ञानी कषायभावं वा ।
[1]स्वयमात्मनो न स तेन कारकस्तेषां भावानां ॥२८०॥

यथोक्तं वस्तुस्वभावं जानन् ज्ञानी शुद्धस्वभावादेव न प्रच्यवते, ततो रागद्वेषमोहादिभावैः स्वयं न परिणमते न परेणापि परिणम्यते, ततष्टंकोत्कीर्णैकज्ञायकस्वभावो ज्ञानी रागद्वेषमोहादिभावानामकर्तैवेति [2]नियमः ॥२८०॥

"इति वस्तुस्वभावं स्वं नाज्ञानी वेत्ति तेन सः ।
रागादीनात्मनः कुर्यादतो भवति कारकः ॥१७७॥

परिणामैरिति, तेन ज्ञायते, कर्मोदयजनिता रागादयो न तु ज्ञानिजीवजनिता इति दार्ष्टांतो गतः ॥२७८।२७९॥ एवं चिदानंदैकलक्षणं स्वस्वभावं जानन् ज्ञानी रागादीन्न करोति ततो नवतररागाद्युत्पत्तिकारणभूतकर्मणां कर्ता न भवतीति कथयति;—**णवि रागदोसमोहं कुव्वदि णाणी कसायभावं वा** ज्ञानी न करोति । कान् ? रागादिदोषरहितशुद्धात्मस्वभावात्पृथग्भूतान् रागद्वेषमोहान् क्रोधादिकषायभावं वा । कथं न करोति ? **सयं** स्वयं शुद्धात्मभावेन कर्मोदयसहकारिकारणं विना । कस्य संबंधित्वेन ? **अप्पणो** आत्मनः **ण सो तेण कारगो तेसिं भावाणं** तेन कार-

आगे ऐसा ही गाथा में कहते हैं;—**[ज्ञानी]** ज्ञानी **[स्वयमेव]** आप ही **[आत्मनः]** अपने **[रागद्वेषमोहं]** राग द्वेष मोह **[वा कषायभावं]** तथा कषाय भाव **[न च करोति]** नहीं करता **[तेन]** इस कारण **[सः]** वह ज्ञानी **[तेषां भावानां]** उन भावों का **[कारकः न]** कर्ता नहीं है ।

टीका—जैसा वस्तु का स्वभाव कहा गया है वैसा जानता हुआ ज्ञानी अपने शुद्ध स्वभावसे नहीं छूटता, इसलिये राग-द्वेष-मोह आदि भावों से अपने आप नहीं परिणमता और दूसरे से भी नहीं परिणमाया जाता । इस कारण टंकोत्कीर्ण एक ज्ञायक भाव स्वरूप ज्ञानी राग-द्वेष-मोह आदि भावों का अकर्ता ही है ऐसा नियम है ।

भावार्थ—जब ज्ञानी हुआ तब वस्तु का ऐसा स्वभाव जाना कि आप तो आत्मा शुद्ध है द्रव्य-दृष्टि से अपरिणमन स्वरूप है पर्याय दृष्टि से परद्रव्य के निमित्त से रागादि रूप परिणमता है सो अब आप ज्ञानी हुआ उन भावों का कर्ता नहीं होता, उदय में आये हुए फलों का ज्ञाता ही है ॥२८०॥

आगे कहते हैं कि अज्ञानी ऐसा वस्तु का स्वभाव नहीं जानता इसलिये रागादिभावों का कर्ता होता है इसकी सूचना का श्लोक कहा है—**इति वस्तु** इत्यादि । **अर्थ**—अज्ञानी ऐसे अपने वस्तु स्वभाव को नहीं जानता इसलिये वह अज्ञानी रागादिक भावों को अपने करता है, इस कारण उन (रागादिकों) का करने वाला (करता) होता है ॥१७७॥

१. "स्वयमेवात्मनः" इति लिखितप्रतिषु पाठः । २. 'प्रतिनियमः' इत्यपि पाठांतरं ।

रायह्मि य दोसह्मि य कसायकम्मेसु चेव जे भावा।
तेहिं दु परिणमंतो रायाई बंधदि पुणोवि ॥२८१॥

रागे च द्वेषे च कषायकर्मसु चैव ये भावाः।
तैस्तु परिणममानो रागादीन् बध्नाति पुनरपि ॥२८१॥

यथोक्तं वस्तुस्वभावमजानंस्त्वज्ञानी शुद्धस्वभावादासंसारं प्रच्युत एव। ततः कर्मविपाकप्रभवै रागद्वेषमोहादिभावैः परिणममानोऽज्ञानी रागद्वेषमोहादिभावानां कर्ता भवन् बध्यत एवेति प्रतिनियमः ॥२८१॥

णेन स तत्त्वज्ञानी तेषां रागादिभावानां कर्ता न भवतीति ॥२८०॥ अज्ञानी जीवः शुद्धस्वभावमात्मानमजानन् रागादीन् करोति ततः स भाविरागादिजनकनवतरकर्मणां कर्ता भवतीत्युपदिशति;—**रागह्मि य दोसह्मि य कसायकम्मेसु चेव जे भावा** रागद्वेषकषायरूपे द्रव्यकर्मण्युदयागते सति स्वस्वभावच्युतस्य तदुदयनिमित्तेन ये जीवगतरागादिभावाः परिणामा भवंति। **तेहिं दु परिणममाणो रागादी बंधदि पुणोवि** तैः कृत्वा रागादिरहमित्यभेदेनाहमिति प्रत्ययेन कृत्वा परिणमन् सन् पुनरपि भाविरागादिपरिणामोत्पादकानि द्रव्यकर्माणि बध्नाति ततस्तेषां रागादीनामज्ञानी जीवः कर्ता भवतीति ॥२८१॥ तमेवार्थं दृढयति;—पूर्वगाथायामहं रागादीत्यभेदेन परिणमन् सन् तानि रागादिभावोत्पादकानि नवतरद्रव्यकर्माणि बध्नातीत्युक्तं। अत्र तु शुद्धात्मभावनारहितत्वेन मदीयो रागः इति संबंधेन परिणमन् सन् तानि नवतरद्रव्यकर्माणि बध्नाति, इति विशेषः? किं च विस्तरः—यत्र मोहरागद्वेषा व्याख्यायंते तत्र मोहशब्देन दर्शनमोहः मिथ्यात्वादिजनक इति ज्ञातव्यं, रागद्वेषशब्देन तु क्रोधादिकषायोत्पादकश्चारित्रमोहो ज्ञातव्यः। अत्राह शिष्यः—मोहशब्देन तु मिथ्यात्वादिजनको दर्शनमोहो भवतु दोषो नास्ति रागद्वेषशब्देन चारित्रमोह इति कथं भण्यते? इति पूर्वपक्षे परिहारं ददाति—कषायवेदनीयाभिधानचारित्रमोहमध्ये क्रोधमानौ द्वेषांगौ द्वेषोत्पादकत्वात्, मायालोभौ रागांगौ रागजनकत्वात्, नोकषायवेदनीयसंज्ञचारित्रमोहमध्ये स्त्रीपुन्नपुंसकवेदत्रयहास्यरतयः पंचनोकषायाः रागांगा रागोत्पादकत्वात्, अरतिशोकभयजुगुप्सासंज्ञा-

---

अब इस अर्थ की गाथा कहते हैं;—**[रागे च द्वेषे च कषायकर्मसु चैव]** रागद्वेष और कषाय कर्म इनके होने पर **[ये भावाः]** जो भाव होते है **[तैस्तु]** उनसे **[परिणममानः]** परिणमता हुआ अज्ञानी **[रागादीन्]** रागादिकों को **[पुनरपि]** बार-बार **[बध्नाति]** बांधता है।

टीका—जैसा वस्तु का स्वभाव कहा गया है वैसे स्वभाव को नहीं जानता हुआ अज्ञानी अपने शुद्ध स्वभाव से अनादि संसार से लेकर च्युत हुआ ही है इस कारण कर्म के उदय से हुए जो राग-द्वेष-मोहादिक भाव हैं उनसे परिणमता अज्ञानी राग-द्वेष-मोहादिक भावों का कर्ता हुआ कर्मों से बंधता ही है, ऐसा नियम है।

भावार्थ—अज्ञानी वस्तु का यथार्थस्वभाव तो जानता नहीं है परंतु कर्म के उदय से जैसा भाव हो उसको अपना समझ परिणमता है तब उन भावों का कर्ता हुआ आगामी बार-बार कर्म बांधता है यह नियम है ॥२८१॥

ततः स्थितमेतत्—

रायह्मि य दोसह्मि य कसायकम्मेसु चेव जे भावा ।
तेहिं[1] दु परिणमंतो रायाई बंधदे चेदा ॥ २८२ ॥

रागे च द्वेषे च कषायकर्मसु चैव ये भावाः ।
तैस्तु परिणममानो रागादीन् बध्नाति चेतयिता ॥ २८२ ॥

य इमे किलाज्ञानिनः पुद्गलकर्मनिमित्ता रागद्वेषमोहादिपरिणामास्त एव भूयो रागद्वेष-मोहादिपरिणामनिमित्तस्य पुद्गलकर्मणो बंधहेतुरिति ॥ २८२ ॥

कथमात्मा रागादीनामकारकः ? इति चेत्—

अपडिक्कमणं दुविहं अपच्चक्खाणं तहेव विण्णेयं ।
एएणुवएसेण य अकारओ वण्णिओ चेया ॥२८३ ॥
अपडिक्कमणं दुविहं दव्वे भावे तहा अपच्चक्खाणं ।
एएणुवएसेण य अकारओ वण्णिओ चेया ॥ २८४ ॥
जावं अपडिक्कमणं अपच्चक्खाणं च दव्वभावाणं ।
कुव्वइ आदा तावं कत्ता सो होइ णायव्वो ॥ २८५ ॥ (त्रिकलम्)

अप्रतिक्रमणं द्विविधमप्रत्याख्यानं तथैव विज्ञेयं ।
एतेनोपदेशेन चाकारको वर्णितश्चेतयिता ॥२८३॥

इचत्वारो द्वेषांगा द्वेषोत्पादकत्वात् इत्यनेनाभिप्रायेण मोहशब्देन दर्शनमोहो मिथ्यात्वं भण्यते रागद्वेषशब्देन पुनश्चारित्रमोह इति सर्वत्र ज्ञातव्यं । एवं कर्मबंधकारणं रागादयः, रागादीना च कारणं निश्चयेन कर्मोदयो, न च ज्ञानी जीव इति व्याख्यान-मुख्यत्वेन सप्तमस्थले गाथापंचकं गतं ॥२८२॥ अथ कथं सम्यग्ज्ञानी जीवो रागादीनामकारक इति पृष्टे प्रत्युत्तरमाह;—

इस हेतु से जो बात सिद्ध हुई उसकी गाथा कहते हैं;—[रागे च द्वेषे च] राग द्वेष [कर्मसु चैव] और कषाय कर्मों के होने पर [ये भावाः] जो भाव होते हैं [तैस्तु] उनसे [परिणममानः] परिणमता हुआ [चेतयिता] आत्मा [रागादीन्] रागादिकों को [बध्नाति] बांधता है ।

टीका—वास्तव में जो ये पुद्गल कर्म के निमित्त से हुए अज्ञानी के राग-द्वेष-मोह आदि भाव हैं अज्ञानी उनको करता हुआ कर्मों से बंधता ही है । ऐसे परिणाम ही फिर राग द्वेष मोह आदि परिणाम का निमित्त जो पुद्गलकर्म उसके बंध के कारण होते हैं ।

भावार्थ—अज्ञानी के जो कर्म के निमित्त से राग-द्वेष-मोह आदिक परिणाम होते हैं वे फिर आगामी कर्मबंध के कारण होते हैं ॥ २८२ ॥

१. तात्पर्यवृत्तौ 'ते मम दु' इत्येव पाठः ।

अप्रतिक्रमणं द्विविधं द्रव्ये भावे तथाऽप्रत्याख्यानं ।
एतेनोपदेशेन चाकारको वर्णितश्चेतयिता ॥२८४॥
यावदप्रतिक्रमणमप्रत्याख्यानं च द्रव्यभावयोः ।
करोत्यात्मा तावत्कर्ता स भवति ज्ञातव्यः ॥२८५॥

आत्मात्मना रागादीनामकारक एव, अप्रतिक्रमणाप्रत्याख्यानयोर्द्वैविध्योपदेशान्यथानुपपत्तेः। यः खलु अप्रतिक्रमणाप्रत्याख्यानयोर्द्रव्यभावभेदेन द्विविधोपदेशः स द्रव्यभावयोर्निमित्तनैमित्तिकभावं प्रथयन्नकर्तृत्वमात्मनो ज्ञापयति। तत एतत् स्थितं, परद्रव्यं निमित्तं, नैमित्तिका

अपडिक्कमणं दुविहं अपच्चक्खाणं तहेव विण्णेयं पूर्वानुभूतविषयानुभवरागादिस्मरणरूपमप्रतिक्रमणं द्विविधं, भाविरागादिविषयाकांक्षारूपमप्रत्याख्यानमपि तथैव द्विविधं विज्ञेयं **एदेणुवदेसेण दु अकारगो वण्णिदो चेदा** एतेनोपदेशेन परमागमेन ज्ञायते। किं ज्ञायते ? चेतयितात्मा हि द्विप्रकाराप्रतिक्रमणेन द्विप्रकाराप्रत्याख्यानेन च रहितत्वात् कर्मणामकर्ता भवतीति। **अपडिक्कमणं दुविहं दव्वे भावे अपच्चक्खाणंपि** द्रव्यभावरूपेणाप्रतिक्रमणमप्रत्याख्यानं च द्विविधं भवति **एदेणुवदेसेण दु अकारगो, वण्णिदो चेदा** तदेव बन्धकारणमित्युपदेश आगमः तेनोपदेशेन ज्ञायते, किं ज्ञायते ? द्रव्यभावरूपेणाप्रत्याख्यानेनाप्रतिक्रमणेन च परिणतः शुद्धात्मभावनाच्युतो योऽसावज्ञानी जीवः स कर्मणां कारकः। तद्विपरीतोज्ञानी चेतयिता पुनरकारक इति। तमेवार्थं दृढयति—**जाव ण पच्चक्खाणं** यावत्कालं द्रव्यभावरूपं, निर्विकारस्वसंवित्तिलक्षणं प्रत्याख्यानं नास्ति **अपडिक्कमणं तु दव्वभावाणं कुव्वदि** यावत्कालं द्रव्यभावरूपमप्रतिक्रमणं च करोति **आदा तावदु कत्ता सो होदि णादव्वो** तावत्कालं परमसमाधेरभावात्

आगे फिर पूछते हैं कि यदि अज्ञानी के रागादिक फिर कर्मबंध के कारण हैं, तो आत्मा रागादिकों का अकारक कैसे है ? उसका समाधान कहते हैं;—**[अप्रतिक्रमणं]** अप्रतिक्रमण **[द्विविधं]** दो प्रकार का **[विज्ञेयं]** जानना **[तथैव]** उसी तरह **[अप्रत्याख्यानं]** अप्रत्याख्यान भी दो प्रकार जानना **[एतेनोपदेशेन च]** इस उपदेश से **[चेतयिता]** आत्मा **[अकारकः भणितः]** अकारक कहा है। **[अप्रतिक्रमणं]** अप्रतिक्रमण **[द्विविधं]** दो प्रकार है **[द्रव्ये भावे]** एक तो द्रव्य में दूसरा भाव में **[तथा अप्रत्याख्यानं]** उसी तरह अप्रत्याख्यान भी दो तरह का है एक द्रव्य में दूसरा भाव में **[एतेन उपदेशेन च]** इस उपदेश से **[चेतयिता]** आत्मा **[अकारकः वर्णितः]** अकारक कहा है। **[यावत्]** जब तक **[आत्मा]** आत्मा **[द्रव्यभावयोः]** द्रव्य और भाव में **[अप्रतिक्रमणं च अप्रत्याख्यानं]** अप्रतिक्रमण और अप्रत्याख्यान **[करोति]** करता है **[तावत्]** तब तक **[सः]** वह आत्मा **[कर्ता भवति]** कर्ता होता है **[ज्ञातव्यः]** ऐसा जानना।

टीका—आत्मा स्वतः रागादि भावों का अकारक ही है, क्योंकि आप ही कारक हो तो अप्रतिक्रमण और अप्रत्याख्यान दो भेद–द्रव्य भेद और भाव भेद इन दोनों भेदों के उपदेश की अप्राप्ति आती है। अप्रतिक्रमण और अप्रत्याख्यान जो वास्तव में दो प्रकार का उपदेश है वह उपदेश द्रव्य और भाव

आत्मनो रागादिभावाः। यद्येवं नेष्येत तदा द्रव्याप्रतिक्रमणाप्रत्याख्यानयोः कर्तृत्वनिमित्तत्वोपदेशोऽनर्थक एव स्यात्। तदनर्थकत्वे त्वेकस्यैवात्मनो रागादिभावनिमित्तत्वापत्तौ नित्यकर्तृत्वानुषंगान्मोक्षाभावः प्रसजेच्च। ततः परद्रव्यमेवात्मनो रागादिभावनिमित्तमस्तु। तथासति तु रागादीनामकारक एवात्मा, तथापि यावन्निमित्तभूतं द्रव्यं न प्रतिक्रामति न प्रत्याचष्टे च तावन्नैमित्तिकभूतं भावं न प्रतिक्रामति न प्रत्याचष्टे च, यावत्तु भावं न प्रतिक्रामति न प्रत्याचष्टे तावत्तत्कर्तैव स्यात्। यदैव निमित्तभूतं द्रव्यं प्रतिक्रामति प्रत्याचष्टे च तदैव नैमित्तिकभूतं भावं प्रतिक्रामति प्रत्याचष्टे च। यदा तु भावं प्रतिक्रामति प्रत्याचष्टे च तदा साक्षादकर्तैव स्यात् ॥२८३।२८४।२८५॥

स चाज्ञानी जीवः कर्मणां कारको भवतीति ज्ञातव्यः। किं चाप्रतिक्रमणमप्रत्याख्यानं च कर्मणां कर्तृ, न च ज्ञानी जीवः। यदि जीवः कर्ता भवति ? तदा सर्वदैव कर्तृत्वमेव। कस्मात् ? इति चेत्, जीवस्य सदैव विद्यमानत्वात् इति। अप्रतिक्रमणमप्रत्याख्यानं पुनरनित्यं रागादिविकल्परूपं, तच्च स्वस्थभावच्युतानां भवति न सर्वदैव। तेन किं सिद्धं ?

के निमित्त नैमित्तिक भाव को बतलाता हुआ आत्मा के अकर्तापन को बतलाता है। इसलिये यह सिद्ध हुआ कि परद्रव्य तो निमित्त है और आत्मा के रागादिक भाव नैमित्तिक है। यदि ऐसा न माना जाय तो जो द्रव्य अप्रतिक्रमण और द्रव्य अप्रत्याख्यान इन दोनो के कर्तृत्व के निमित्तपने का उपदेश वह व्यर्थ ही हो जायगा। और उपदेश के व्यर्थ होने पर एक आत्मा के ही रागादिक भाव के निमित्तपने की प्राप्ति होनेपर सदा कर्तापन का प्रसंग आयेगा, उससे मोक्ष का अभाव सिद्ध होगा। इसलिये आत्मा के रागादि भावों का परद्रव्य ही निमित्त है। ऐसा होनेपर आत्मा रागादिभावों का अकारक ही है यह सिद्ध हुआ। तो भी जब तक रागादिक का निमित्तभूत परद्रव्य का प्रतिक्रमण तथा प्रत्याख्यान न करे तबतक नैमित्तिकभूतरागादिभावों का प्रतिक्रमण प्रत्याख्यान नही होता। और जबतक इन भावों का प्रतिक्रमण प्रत्याख्यान न हो तबतक रागादिभावों का कर्ता ही है। जिस समय रागादिभावों का निमित्त भूतद्रव्यों का प्रतिक्रमण प्रत्याख्यान करता है, उसी समय नैमित्तिकभूत रागादिभावों का प्रतिक्रमण प्रत्याख्यान होता है। तथा जिस समय इन भावों का प्रतिक्रमण प्रत्याख्यान हुआ उस समय साक्षात् अकर्ता ही है।

भावार्थ—प्रतिक्रमण प्रत्याख्यान का द्रव्यभाव के भेद से दो तरह का उपदेश है। यहां शुद्धनय को प्रधान करके कथन है, इसलिये निषेध का यहां प्रधानतः वर्णन है। जो अतीत काल में परद्रव्य का ग्रहण किया उसको अब अच्छा समझे उसका संस्कार रहे, ममत्व रहे वह तो द्रव्य अप्रतिक्रमण है और उस परद्रव्य के ग्रहण के निमित्त से रागादिक भाव जो हुए थे उनको वर्तमान में अच्छा समझे, उनसे ममत्वसंस्कार रहे, वह भाव अप्रतिक्रमण है। तथा आगामी काल में परद्रव्य की वांछा से ममत्व रखे वह द्रव्य अप्रत्याख्यान है और उसके निमित्त से आगामी काल में होने वाले रागादि भावों की वांछा रखना, ममत्व रखना वह भाव अप्रत्याख्यान है। यह द्रव्य अप्रतिक्रमण और भाव अप्रतिक्रमण, द्रव्य

द्रव्यभावयोर्निमित्तनैमित्तिकभावोदाहरणं चैतत्—

आधाकम्माईया पुग्गलदव्वस्स जे इमे दोसा।
कह ते कुव्वइ णाणी परदव्वगुणा उ जे णिच्चं ॥२८६॥
आधाकम्मं उद्देसियं च पोग्गलमयं इमं दव्वं।
कह तं मम होइ कयं जं णिच्चमचेयणं उत्तं ॥२८७॥ (युग्मम्)

अधःकर्माद्याः पुद्गलद्रव्यस्य य इमे दोषाः।
कथं तान् करोति ज्ञानी परद्रव्यगुणास्तु ये नित्यं ॥२८६॥
अधःकर्मोद्देशिकं च पुद्गलमयमिदं द्रव्यं।
कथं तन्मम भवति कृतं यन्नित्यमचेतनमुक्तं ॥२८७॥

यदा स्वस्वभावच्युतः सन् अप्रतिक्रमणाप्रत्याख्यानाभ्यां परिणमति तदा कर्मणां कारको भवति। स्वस्वभावे पुनरकारकः इति भावार्थः। एवमज्ञानिजीवपरिणतिरूपमप्रतिक्रमणमप्रत्याख्यानं च बंधकारणं न च ज्ञानी जीवः इति व्याख्यानमुख्यत्वेनाष्टमस्थले गाथात्रयं गतं। अथ निर्विकल्पसमाधिरूपनिश्चयप्रतिक्रमणनिश्चयप्रत्याख्यानरहितानां जीवानां योऽसौ बंधो भणितः स च हेयस्याशेषस्य नरकादिदुःखस्य कारणत्वाद्धेयः। तस्य बंधस्य विनाशार्थं विशेषभावनामाह— सहजशुद्धज्ञानानंदैकस्वभावोऽहं, निर्विकल्पोहं, उदासीनोहं, निरंजननिजशुद्धात्मसम्यक्श्रद्धानज्ञानानुष्ठानरूपनिश्चय-

---

अप्रत्यख्यान और भाव अप्रत्याख्यान ऐसे दो प्रकार का उपदेश है वह द्रव्यभाव के निमित्तनैमित्तिक भाव को जनाता है। परद्रव्य तो निमित्त है और रागादिक भाव नैमित्तिक हैं। सो जबतक निमित्तभूत परद्रव्य का अप्रतिक्रमण और अप्रत्यख्यान इस आत्मा के है तब तक तो रागादिभावों का अप्रतिक्रमण और अप्रत्याख्यान है और जब तक रागादिभावों का अप्रतिक्रमण और अप्रत्याख्यान है तबतक रागादि भावों का कर्ता ही है। तथा जिस समय निमित्तभूत परद्रव्य का प्रतिक्रमण और प्रत्याख्यान करे; उस समय नैमित्तिक रागादि भावों का भी प्रतिक्रमण प्रत्याख्यान हो जाता है; और जब रागादिभावों का प्रतिक्रमण और प्रत्याख्यान हो जाय तब साक्षात् अकर्ता ही है। इस प्रकार आत्मा स्वयमेव तो रागादि भावों का अकर्ता ही है ॥२८३।२८४।२८५॥

आगे द्रव्य और भाव की निमित्त-नैमित्तिकता का उदाहरण देते हैं;—[अधः कर्माद्याः ये इमे] अधःकर्म को आदि लेकर जो ये [पुद्गलद्रव्यस्यदोषाः] पुद्गल द्रव्य के दोष हैं [तान्] उनको [ज्ञानी] ज्ञानी [कथं करोति] कैसे करे? [तु] क्योंकि [ये] ये [नित्यं] सदा ही [परद्रव्यगुणाः] पुद्गल द्रव्य के गुण हैं [च] और [इदं] यह [अधःकर्मोद्देशिकं] अधःकर्म और उद्देशिक [पुद्गलमयं द्रव्यं] पुद्गलमय द्रव्य हैं उनको यह ज्ञानी जानता है कि [यत्] जो [नित्यं] सदा [अचेतनं उक्तं] अचेतन कहे हैं [तत्] वे [मम] मेरे [कृतं] किये [कथं भवति] कैसे हो सकते हैं?

'यथाधःकर्मनिष्पन्नमुद्देशनिष्पन्नं च पुद्गलद्रव्यं निमित्तभूतमप्रत्याचक्षाणो नैमित्तिकभूतं बंधसाधकं भावं न प्रत्याचष्टे तथा समस्तमपि परद्रव्यमप्रत्याचक्षाणस्तन्निमित्तकं भावं न प्रत्याचष्टे। यथा चाधःकर्मादीन् पुद्गलद्रव्यदोषान्न नाम करोत्यात्मा परद्रव्यपरिणामत्वे सति आत्म कार्यत्वाभावात्। ततोऽधःकर्मोद्देशिकं च पुद्गलद्रव्यं न मम कार्यं, नित्यमचेतनत्वे सति मत्कार्यत्वाभावात् इति तत्त्वज्ञानपूर्वकं पुद्गलद्रव्यं निमित्तभूतं प्रत्याचक्षाणो नैमित्तिकभूतं बंधसाधकं भावं प्रत्याचष्टे तथा समस्तमपि परद्रव्यं प्रत्याचक्षाणस्तन्निमित्तं भावं प्रत्याचष्टे। एवं द्रव्यभावयोरस्ति निमित्तनैमित्तिकभावः ॥ २८६ ॥ २८७ ॥

रत्नत्रयात्मकनिर्विकल्पसमाधिसंजातवीतरागसहजानंदरूपसुखानुभूतिमात्रलक्षणेन स्वसंवेदनज्ञानेन संवेद्यो गम्यः प्राप्यो भरितावस्थोऽहं, राग-द्वेष- मोह-क्रोध-मान-माया-लोभ—पंचेंद्रियविषयव्यापार, मनोवचनकायव्यापार—भावकर्म—द्रव्यकर्म—नोकर्म—ख्याति-पूजा- लाभ-दृष्टश्रुतानुभूतभोगाकांक्षारूपनिदानमायामिथ्याशल्यत्रयादिसर्वविभावपरिणामरहित.। शून्योऽहं जगत्त्रये कालत्रयेपि मनोवचनकायैः कृतकारितानुमतैश्च शुद्धनिश्चयेन, तथा सर्वे जीवाः इति निरंतरं भावना कर्तव्या ॥२८३।२८४।२८५॥ अथाहारविषये सरसविरसमानापमानादिचिंतारूपरागद्वेषकरणाभावादाहारग्रहणकृतो ज्ञानिनां बधो नास्ति, इति कथयति;—

आधाकम्मादीया पुग्गलदव्वस्स जे इमे दोसा।
कहमणुमण्णदि अण्णेण कीरमाणा परस्स गुणा॥
आधाकम्मं उद्देसियं च पोग्गलमयं इमं दव्वं।
कह तं मम कारविदं जं णिच्चमचेदणं वुत्तं॥

अधःकर्माद्याः पुद्गलद्रव्यस्य ये इमे दोषाः। कथमनुमन्यते अन्येन क्रियमाणाः परस्य गुणाः। स्वयं पाकेनो-

---

टीका—जैसे अधःकर्म से और उद्देश से उत्पन्न (आहार आदिक) पुद्गल द्रव्य हैं। वे भावों को निमित्तभूत हैं। जैसा भक्षण करे वैसा भाव होता है। ऐसे द्रव्य को अप्रत्याख्यानरूप करता (त्याग न करता) जो मुनि वह उस द्रव्य के नैमित्तिकभूत और बंध के साधक ऐसे भावों को भी त्याग नहीं करता, उसी प्रकार जो समस्त पर द्रव्य को त्याग नहीं करता है वह उसके निमित्त से हुए भावों को भी त्याग नहीं करता। जैसे अधःकर्म आदिक पुद्गल द्रव्यों के दोषों को आत्मा नहीं करता, क्योंकि ये दोष पुद्गल द्रव्य के परिणाम हैं। ऐसा होने पर आत्मा के इनके कार्यत्व का अभाव है। इस कारण ज्ञानी ऐसा जानता है कि जो अधःकर्म उद्देशिक पुद्गल द्रव्य हैं वे मेरे कार्य नहीं हैं; क्योंकि ये नित्य ही अचेतन होने से मेरे कार्यत्व का इनके अभाव हैं। ऐसे तत्त्व ज्ञानपूर्वक निमित्तभूत पुद्गल द्रव्य को त्यागता हुआ मुनि बंध के साधक नैमित्तिकभूत भाव को भी त्यागता है; उसी तरह समस्त पर द्रव्य को त्याग करता हुआ उस परद्रव्य के निमित्त से हुए भावों को भी त्यागता है। इस प्रकार द्रव्य और भाव इन दोनों का आपस में निमित्तनैमित्तिक भाव है।

---

१. या मुंचदि तेण कम्मबंधेण पाठोयं तात्पर्यवृत्तौ।

**इत्यालोच्य विवेच्य तत्किल परद्रव्यं समग्रं बलात्तन्मूलं बहुभावसंततिमिमामुद्धर्तुकामः समं ।
आत्मानं समुपैति निर्भरवहत्पूर्णैकसंविद्युतं येनोन्मूलितबंध एष भगवानात्मात्मनि स्फूर्जति ॥१७८॥**

त्पन्न आहार अधःकर्मशब्देनोच्यते तत्प्रभृतिव्याख्यानं करोति—अधःकर्माद्या ये इमे दोषाः, कथंभूताः ? शुद्धात्मनः सकाशात्परस्याभिन्नस्याहाररूपपुद्गलद्रव्यस्य गुणाः । पुनरपि कथंभूताः ? तस्यैवाहारपुद्गलस्य पचनपाचनादिक्रियारूपाः तान्निश्चयेन कथं करोतीति ज्ञानीति प्रथमगाथार्थः। अनुमोदयति वा कथमिति द्वितीयगाथार्थः । परेण गृहस्थेन क्रियमाणान्, न कथमपि । कस्मात् निर्विकल्पसमाधौ सति आहारविषये मनोवचनकायकृतकारितानुमननाभावात् इत्याधःकर्मव्याख्यानरूपेण गाथाद्वयं गतं ॥२८६॥ आहारग्रहणात्पूर्वं तस्य पात्रस्य निमित्तं यत्किमप्यशनपानादिकं कृतं तदौपदेशिकं भण्यते, तेनौपदेशिकेन सह तदेवाध.कर्म पुनरपि गाथाद्वयेन कथ्यते—अधःकर्मौपदेशिकं च पुद्गलमयमेतद्द्रव्यं । कथं तन्मम कारितं यन्नित्यमचेतनमुक्तं । यदिदमाहारकपुद्गलद्रव्यमधःकर्मरूपमौपदेशिकं च चेतनशुद्धात्मद्रव्यपृथक्त्वेन नित्यमेवाचेतनं भणितं तत्कथं मया कृतं भवति कारितं वा कथं भवति ? न कथमपि । कस्माद्धेतोः ? निश्चयरत्नत्रयलक्षणभेदज्ञाने सति आहारविषये मनोवचनकायकृतकारितानुमननाभावात् । इत्यौपदेशिकव्याख्यानमुख्यत्वेन च गाथाद्वयं गतं । अयमत्राभिप्रायः । पश्चात्पूर्वं संप्रतिकाले वा योग्याहारादिविषये मनोवचनकायकृतकारितानुमतरूपैर्नवभिर्विकल्पैः शुद्धास्तेषां परकृताहारादिविषये बंधो नास्ति । यदि पुनः परकीयपरिणामेन बंधो भवति तर्हि क्वापि काले निर्वाणं नास्ति । तथा

भावार्थ—यह द्रव्य और भावका निमित्तनैमित्तिकपना उदाहरण से पुष्ट किया है । लौकिक जन कहते हैं कि "जैसा अन्न खाय वैसी ही बुद्धि हो जाती है" उसी तरह शास्त्र में उदाहरण है—कि, जो पाप कर्म से आहार उत्पन्न हो उसे **अधःकर्म** निष्पन्न कहते है । जो आहार किसी के निमित्त से बना हुआ हो उसे **उद्देशिक** कहते हैं । इन दोनों प्रकार के आहार का जो पुरुष सेवन करे उसके वैसे ही भाव होते हैं इस तरह द्रव्य और भाव का निमित्तनैमित्तिक संबध है, उसी तरह समस्त द्रव्यों का निमित्त नैमित्तिक सम्बन्ध जानना । ऐसा होने पर जो परद्रव्य को ग्रहण करता है, उसके रागादिभाव भी होते हैं उनका कर्ता भी होता है तब कर्म का बंध भी करता है । और जब ज्ञानी हो जाता है तब किसी के ग्रहण करने का राग नहीं, रागादिरूप परिणमन भी नही, तब आगामी कर्मबंध भी नहीं होता । इस तरह ज्ञानी परद्रव्य का कर्ता नहीं है ॥१८६।१८७॥

अब इस अर्थ का कलशरूप काव्य कह कर परद्रव्य के त्याग का उपदेश करते हैं—**इत्यालोच्य** इत्यादि । **अर्थ**—जो पुरुष इस तरह परद्रव्य का और अपने भाव का निमित्तनैमित्तिकपना विचार कर उस समस्त परद्रव्य को अपने पराक्रम से त्याग कर तथा परद्रव्य जिसका मूल है ऐसे बहुत भावों की परिपाटी को दूर से युगपत् उखाड़ फेंकने का इच्छुक अतिशय से बहने वाला प्रवाहरूप धारावाही पूर्ण एक संवेदनयुक्त जो अपना आत्मा उसे प्राप्त होता है । जिससे कि जिसने कर्मबंधन मूल से उखाड़ दिये हैं, ऐसा भगवान् यह आत्मा आप में ही स्फुरायमान (प्रकट) होता है ।

भावार्थ—परद्रव्य और अपने भाव का निमित्तनैमित्तिकभाव जान कर समस्त परद्रव्य का त्याग करे तब समस्त रागादिभावों की संतती कट जाती है, उस समय आत्मा अपना ही अनुभव करता हुआ कर्म के बंधन को काट कर आप में ही प्रकाशरूप प्रकट होता है । हितेच्छु ऐसा ही करें ॥१७८॥

रागादीनामुदयमदयं दारयत्कारणानां कार्यं बंधं विविधमधुना सद्य एव प्रणुद्य ।
ज्ञानज्योतिः क्षपिततिमिरं साधु सन्नद्धमेतत्तद्वद्यद्वत्प्रसरमपरः कोऽपि नास्यावृणोति ॥१७९॥

इति बंधो निष्क्रांतः ।

इति श्रीमदमृतचंद्रसूरिविरचितायां समयसारव्याख्यायामात्मख्यातौ बंध—
प्ररूपकः सप्तमोऽङ्कः ॥ ७ ॥

चोक्तं । णवकोडिकम्मसुद्धो पच्छा पुरदो य संपदियकाले । परसुहदुक्खणिमित्त वज्झदि जदि णत्थि णिव्वाणं ॥ एवं ज्ञानिनामाहारग्रहणकृतो बंधो नास्तीति व्याख्यानमुख्यत्वेन सूत्रचतुष्टयेन षष्ठस्थलं गतं ॥ २८७ ॥

इति **श्रीजयसेनाचार्य**कृतायां समयसारव्याख्यायां शुद्धात्मानुभूतिलक्षणायां **तात्पर्यवृत्तौ** पूर्वोक्तक्रमेण **जह णाम कोवि पुरिसो** इत्यादि मिथ्यादृष्टिसद्दृष्टिव्याख्यानरूपेण गाथादशकं, निश्चयहिंसाकथनरूपेण गाथासप्तकं, निश्चयेन रागादिविकल्प एव हिंसेति कथनरूपेण सूत्रषट्कं, अव्रतव्रतानि पापपुण्यबंधकारणानीत्यादिकथनेन गाथापंचदश, निश्चयनयेन स्थित्वा व्यवहारस्त्याज्य इति मुख्यत्वेन गाथाषट्कं, पिंडशुद्धिमुख्यत्वेन सूत्रचतुष्टयं। निश्चयनयेन रागादयः कर्मोदयजनिता इति कथनमुख्यत्वेन सूत्रपचकं, निश्चयनयेनाप्रतिक्रमणमप्रत्याख्यानं च बंधकारणमिति प्रतिपादनरूपेण गाथात्रयमित्येवं समुदायेन षट्पंचाशद्गाथाभिरष्टभिरंतराधिकारैः अष्टमो **बंधाधिकारः** समाप्तः ॥ ७ ॥

अब बंध का अधिकार पूर्ण किया । उसके अंत मंगलरूप ज्ञान की महिमा का कलश कहते हैं—**रागादि** इत्यादि । **अर्थ**—बंध के कारणरूप रागादि के उदय को निर्दयतापूर्वक (प्रखर पुरुषार्थ से) विदारण करती हुई, उस रागादि के कार्यरूप (ज्ञानावरणादि) अनेक प्रकार के बंध को अब तत्काल ही दूर करके, यह ज्ञान ज्योति, कि जिसने अज्ञानरूपी अंधकार का नाश किया है—भली भांति ऐसी सज्जित है, कि उसके विस्तार को अन्य कोई आवृत नहीं कर सकता ।

भावार्थ—जब ज्ञान प्रकट होता है तब रागादिक नहीं रहते, उनका कार्य बंध भी नहीं रहता तब फिर इसको आवरण करने वाला कोई नहीं रहता, सदाकाल प्रकाश रूप ही रहती है ॥२८६।२८८॥

इस तरह रंग भूमि में बंध के स्वांगने प्रवेश किया था सो जब ज्ञान ज्योति प्रकट हुई तब बंध स्वांग को दूर कर निकल गया । यहां तक गाथा २८७ और कलश १७९ हुए ।

सवैया तेईसा—जो नर कोय परै रजमांहि सच्चिक्कण अंग लगै वह गाढै,
त्यों मतिहीन जु रागविरोध लिये विचरे तब बंधन वाढै ।
पाय समै उपदेश यथारथ रागविरोध तजै निज चाटै ।
नांहि बंधै तब कर्मसमूह जु आप गहै पर भावनि काटै ॥ १ ॥

इस प्रकार श्री पं० जयचंद्र कृत समयसार नामा ग्रंथ की आत्मख्यातिनामक टोका की भाषावचनिका में बंध नामा सातवां अधिकार पूर्ण हुआ ॥ ७ ॥

अथ मोक्षाधिकारः ॥ ८ ॥

अथ प्रविशति मोक्षः ।

द्विधाकृत्य प्रज्ञाक्रकचदलनाद्बंधपुरुषौ नयन्मोक्षं साक्षात्पुरुषमुपलंभैकनियतं ।
इदानीमुन्मज्जत् सहजपरमानंदसरसं परं पूर्णं ज्ञानं कृतसकलकृत्यं विजयते ॥१८०॥

जह णाम कोवि पुरिसो बंधणयह्मि चिरकालपडिवद्धो ।
तिव्वं मंदसहावं कालं च वियाणए तस्स ॥२८८॥
जइ णवि कुणइ च्छेदं ण मुच्चए तेण बंधणवसो सं ।
कालेण उ वहुएणवि ण सो णरो पावइ विमोक्खं ॥२८९॥

तत्रैवं सति पात्रस्थानीयशुद्धात्मनः सकाशात्पृथग्भूत्वा शृंगारस्थानीयबंधो निष्क्रांतः । **अथ प्रविशति मोक्षः–जह णाम कोवि पुरिसो** इत्यादि गाथामादिं कृत्वा यथाक्रमेण द्वाविंशतिगाथापर्यंतं मोक्षपदार्थव्याख्यानं करोति–

अथ **मोक्षाधिकार** ।

दोहा—"कर्मबंध सब काटिके, पहुँचे मोक्ष सुथान ।
नमूं सिद्ध परमातमा, करूं ध्यान अमलान ॥"

जिस प्रकार नृत्य के अखाडे में स्वांग प्रवेश करता है उसी प्रकार अब मोक्ष तत्त्व प्रवेश करता है । वहां ज्ञान सब स्वांग के जानने वाला है इसलिये मोक्ष अधिकार के आदि में सम्यग्ज्ञान की महिमारूप मंगल करते हैं—**द्विधाकृत्य** इत्यादि । **अर्थ**—अब बंध पदार्थ के पश्चात् पूर्ण ज्ञान प्रज्ञारूप करोंत से बंध और पुरुष को पृथक् करके पुरुष को साक्षात् मोक्ष में प्राप्त कराता हुआ जयवंत प्रवर्त रहा है । वह पुरुष अपने स्वरूप के साक्षात् अनुभव से निश्चित है । ज्ञान अपने स्वाभाविक परम आनन्द से सरस (रस भरा) है, उत्कृष्ट है और जिसने करने योग्य समस्त कार्य कर लिये हैं अब कुछ करना नहीं रहा ।

भावार्थ—ज्ञान बंध और पुरुष को पृथक् कर के पुरुष को मोक्ष प्राप्त कराता हुआ अपना संपूर्ण स्वरूप प्रगट करके जयवंत प्रवर्त रहा है इसका सर्वोत्कृष्टपना कहना यही मंगल वचन है ॥१८०॥

आगे कहते हैं कि मोक्ष की प्राप्ति कैसे होती है ? उस जगह प्रथम तो ऐसा कहते हैं, कि जो बंध का छेद नहीं करते और बंध का स्वरूप ही जानकर संतुष्ट हैं वे मोक्ष नहीं पाते;—[**नाम**] अहो देखो [**यथा**] जैसे [**कश्चित् पुरुषः**] कोई पुरुष [**बंधनके**] बंधन में [**चिरकालप्रतिबद्धः**] बहुत काल का बंधा हुआ [**तस्य**] उस बंधन के [**तीव्रमंदस्वभावं**] तीव्र मंद स्वभाव को [**च**] और [**कालं**] काल को [**विजानाति**] जानता है कि इतने काल का बंध है । [**यदि**] जो उस बंधन को आप [**नापि छेदं**

इय कम्मबंधणाणं पएसठिइपयडिमेवमणुभागं ।
जाणंतोवि ण मुच्चइ मुच्चइ सो चेव जइ सुद्धो॥२९०॥(त्रिकलम्)

यथा नाम कश्चित्पुरुषो बंधनके चिरकालप्रतिबद्धः ।
तीव्रमंदस्वभावं कालं च विजानाति तस्य ॥२८८॥
यदि नापि करोति छेदं न मुच्यते तेन बंधनवशः सन् ।
कालेन तु बहुकेनापि न स नरः प्राप्नोति विमोक्षं ॥२८९॥
इति कर्मबंधनानां प्रदेशस्थितिप्रकृतिमेवमनुभागं ।
जानन्नपि न मुच्यते मुच्यते स चैव यदि शुद्धः ॥२९०॥

तत्रादौ मोक्षपदार्थस्य संक्षेपव्याख्यानरूपेण गाथासप्तकं, तदनंतरं मोक्षकारणभूतभेदविज्ञानसंक्षेपसूचनार्थं **बंधाणं च सहावं** इत्यादि सूत्रचतुष्टयं, अत: परं तस्यैव भेदज्ञानस्य विशेषविवरणार्थं **पण्णाए घेत्तव्वो** इत्यादि सूत्रपंचकं, तदनंतरं वीतरागचारित्रसहितस्य द्रव्यप्रतिक्रमणादिकं विषकुंभ: सरागचारित्रस्यामृतकुंभ इति युक्तिसूचनमुख्यत्वेन **तेयादी अवराहे** इत्यादि सूत्रषट्कं कथयतीति द्वाविंशतिगाथाभि: स्थलचतुष्टये मोक्षाधिकारे समुदायपातनिका । तद्यथा-विशिष्टभेदज्ञानावष्टंभेन बंधात्मनो: पृथक्करणं मोक्ष इति प्रतिपादयति,—**जह णाम** इत्यादि । यथा कश्चित्पुरुष: बंधनके चिरकालबद्धस्तिष्ठति तस्य बंधस्य तीव्रमंदस्वभावं जानाति दिवसमासादिकालं च विजानाति इति प्रथमगाथा गता । जानन्नपि यदि बंधच्छेदं न करोति तदा न मुच्यते तेन कर्मबंधविशेषेणामुच्यमान: सन् पुरुषो बहुतरकालेऽपि मोक्षं न लभते इति गाथाद्वयेन दृष्टांतो गत: । अथ **इय कम्मबंधणाणं पदेसपयडिट्ठिदीय अणुभागं जाणंतोवि ण मुंचदि** एवं ज्ञानावरणादिमूलोत्तरप्रकृतिभेदभिन्नकर्मबंधनानां प्रदेशं प्रकृतिस्थिती, अनुभागं च जानन्नपि कर्मणा न मुच्यते । **मुंचदि सव्वे जदि विसुद्धो** यदा मिथ्यात्वरागादिरहितो भवति तदाऽनंतज्ञानादिगुणात्मकपरमात्मस्वरूपे स्थित: सर्वान्कर्मबंधान् मुंचति । अथवा पाठांतरं **मुंचदि सव्वे जदि स बंधे** मुच्यते कर्मणा यदि किं, सिस्यति छिनत्ति । कान् ? सर्वबंधान् । अनेन व्याख्यानेन ये प्रकृत्यादिबंधपरिज्ञानमात्रेण संतुष्टास्ते प्रतिबोध्यते । कथं ? इति चेत्, बंधपरिज्ञानमात्रेण स्वरूपोपलब्धिरूपवीतरागचारित्ररहितानां स्वर्गादिसुखनिमित्तभूत: पुण्यबंधो भवति न च मोक्ष इति दार्ष्टांतगाथा गता । एतेन व्याख्यानेन कर्मबंधप्रपंचरचनाविषये चिंतामात्रपरिज्ञानेन संतुष्टा निराक्रियते ॥२८८।२८९॥

करोति] नहीं काटता है **[तेन बंधनवशः सन्]** तो उस बंधन के वश हुआ ही रहता है उससे छूटता नहीं है ऐसा **[स नरः]** वह पुरुष **[बहुकेनापि]** बहुत **[कालेन अपि]** काल में भी **[विमोक्षं न प्राप्नोति]** उस बंध से छूटने रूप मोक्ष को प्राप्त नहीं करता **[इति]** उसी प्रकार जो पुरुष **[कर्मबंधनानां]** कर्म के बंधनों के **[प्रदेशस्थितिप्रकृति अनुभागं]** प्रदेश स्थिति प्रकृति और अनुभाग ये भेद हैं **[एवं जानन्नपि]** ऐसा जानता है तो भी वह **[न मुच्यते]** कर्म से नहीं छूटता **[यदि शुद्धः]** जो स्वयं रागादिक को दूर करके शुद्ध हो **[स एव च]** वही **[मुच्यते]** मोक्ष पाता है ।

आत्मबंधयोर्द्विधाकरणं मोक्षः । बंधस्वरूपज्ञानमात्रं तद्धेतुरित्येके तदसत्, न कर्मबद्धस्य बंधस्वरूपज्ञानमात्रं मोक्षहेतुरहेतुत्वात् निगडादिबद्धस्य बंधस्वरूपज्ञानमात्रवत् । एतेन कर्मबंधप्रपंचरचनापरिज्ञानमात्रसंतुष्टा उत्थाप्यंते ॥२८८।२८९।२९०॥

जह बंधे चिंतंतो बंधणबद्धो ण पावइ विमोक्खं ।
तह बंधे चिंतंतो जीवोवि ण पावइ विमोक्खं ॥२९१॥

यथा बंधान् चिंतयन् बंधनबद्धो न प्राप्नोति विमोक्षं ।
तथा बंधांश्चिंतयन् जीवोऽपि न प्राप्नोति विमोक्षं ॥२९१॥

२९०॥ **जह वंधे चिंतंतो बंधणबद्धो ण पावदि विमोक्खं** यथा कश्चित्पुरुषो बंधनबद्धो बधं चिंतयमानो मोक्षं न लभते **तह बंधं चिंतंतो जीवोवि ण पावदि विमोक्खं** तथा जीवोऽपि प्रकृतिस्थित्यनुभागप्रदेशबंधांश्चिंतयमानः स्वशुद्धात्मावाप्तिलक्षणं मोक्षं न लभते । किं च समस्तशुभाशुभबहिर्द्रव्यालंबनरहितचिदानंदैकशुद्धात्मावलंबनस्वरूपवीतरागधर्मध्यानशुक्लध्यानरहितो जीवः, बंधप्रपंचरचनाचिंतारूपसरागधर्मध्यानशुभोपयोगेन स्वर्गादिसुखकारणपुण्यबंध लभते न च मोक्षमिति भावार्थः ॥२९१॥ अथ कस्तर्हि मोक्षहेतुरिति प्रश्ने प्रत्युत्तरं ददाति;—**जह बंधे मुत्तूण य बंधणबद्धो य पावदि विमोक्खं तह बंधे मुत्तूण य जीवो संपावदि विमोक्खं** यथा बंधनबद्धः कश्चित्पुरुषो रज्जुबंधं शृङ्खलाबंधं काष्ठनिगलबंधं वा कमपि बंधं छित्त्वा कमपि भित्त्वा कमपि मुक्त्वा स्वकीयविज्ञानपौरुषबलेन मोक्षं प्राप्नोति । तथा जीवोऽपि वीतरागनिर्विकल्पस्वसंवेदनज्ञानखड्गेन बंधं छित्त्वा द्विधा कृत्वा, भित्त्वा विदार्य,

---

टीका—आत्मा और बंध का पृथक् करना मोक्ष है। वहां कोई ऐसा कहते हैं कि बंध का स्वरूप जानना ही मोक्ष का कारण है। ऐसा कहना असत्य है, कर्म से बंधे पुरुष के बंध के स्वरूप का ज्ञानमात्र ही मोक्ष का कारण नहीं है, क्योंकि यह जानना ही कर्म से छूटने का हेतु नहीं है। जिस प्रकार बेड़ी आदि से बंधे हुए पुरुष के बेड़ी आदि बंधन के स्वरूप का जानना ही बेड़ी आदि कटने का कारण नहीं होता उसी तरह कर्म के बंध का स्वरूप जानने मात्र से ही कर्मबंध से नहीं छूटता। इस कथन से कर्म के बंधके विस्तार की रचना के (अनेक प्रकार होने के) जानने मात्र से ही जो कोई अन्यमती आदि मोक्ष मानते हैं वे उसके ज्ञानमात्र में ही संतुष्ट हैं उनका खंडन किया है।

भावार्थ—जो अन्यमती ऐसा मानते हैं कि बंधका स्वरूप जानने से मोक्ष है उनके कहने का इस कथन से निराकरण जानना। जानने मात्र से ही बंध नहीं कटता, बंध तो काटने से ही कटता है ॥२८८।२८९।२९०॥

आगे कहते हैं कि बंधकी चिंता करने से भी बंध नहीं कटता;—[यथा] जैसे कोई [बंधनबद्धः] बंधन से बंधा हुआ पुरुष [बंधान् चितयन्] उन बंधों को विचारता हुआ [विमोक्षं] मोक्ष को [न प्राप्नोति] नहीं पाता [तथा] उसी तरह [बंधान् चिंतयन्] कर्मबंध की चिंता करता हुआ [जीवोपि] जीव भी [विमोक्षं] मोक्ष को [न प्राप्नोति] नहीं पाता।

बंधचिंताप्रबंधो मोक्षहेतुरित्यन्ये तदप्यसत्, न कर्मबद्धस्य बंधचिंताप्रबंधो मोक्षहेतुरहेतुत्वात् निगडादिबद्धस्य बंधचिंताप्रबंधवत् । एतेन कर्मबंधविषयचिंताप्रबंधात्मकविशुद्धधर्मध्यानांधबुद्धयो बोध्यंते ॥२९१॥

कस्तर्हि मोक्षहेतुः ? इति चेत्—

जह बंधे छित्तूण य बंधणबद्धो उ पावइ विमोक्खं ।
तह बंधे छित्तूण य जीवो संपावइ विमोक्खं ॥२९२॥

यथा बंधांश्छित्त्वा च बंधनबद्धस्तु प्राप्नोति विमोक्षं ।
तथा बंधांश्छित्त्वा च जीवः संप्राप्नोति विमोक्षं ॥ २९२ ॥

कर्मबद्धस्य[1] बंधच्छेदो मोक्षहेतुः, हेतुत्वात् निगडादिबद्धस्य बंधच्छेदवत् । एतेन उभयेऽपि पूर्वे आत्मबंधयोर्द्विधाकरणे व्यापार्यंते ॥ २९२ ॥

मुक्त्वा छोटयित्वा च निजशुद्धात्मोपलंभस्वरूपं मोक्षं प्राप्नोतीति । अत्राह शिष्यः—प्राभृतग्रंथे यन्निर्विकल्पस्वसंवेदनज्ञानं भण्यते तन्न घटते । कस्मात् ? इति चेत् तदुच्यते--सत्तावलोकनरूपं चक्षुरादिदर्शनं यथा जैनमते निर्विकल्पं कथ्यते तथा

टीका—कोई अन्यमती ऐसा मानते हैं कि बंध की चिंता का प्रबंध मोक्ष का कारण है, यह मानना भी असत्य है । कर्मबंधन से बंधे हुए पुरुष के उस बंध की चिंता का प्रबंध कि यह बंध कैसे छूटेगा वह भी बंध के अभावरूप मोक्ष का कारण नहीं है; क्योंकि यह चिंता का प्रबंध बंध से छूटने का हेतु नहीं है । जैसे बेड़ी (सांकल) से बंधा हुआ पुरुष उस बंधकी चिंता ही करे, छूटने का उपाय न करे तो वह उस बेड़ी आदि के बंधन से नहीं छूटता, उसी प्रकार कर्मबंध की चिंता के प्रबंध से मोक्ष नहीं है । इस कथन से कर्मबंध में चिंताप्रबंधस्वरूप विशुद्ध धर्मध्यान से जिनकी बुद्धि अंधी है उनको समझाया है ।

भावार्थ—कर्मबंध की चिन्ता में मोक्ष नहीं होता । धर्मध्यान रूप शुभपरिणाम है । जो केवल शुभपरिणाम से ही मोक्ष मानते हैं, उनको उपदेश है कि शुभपरिणाम से मोक्ष नहीं होता ॥२९१॥

आगे पूछते हैं कि यदि बंध के स्वरूप के ज्ञान से भी मोक्ष नहीं होता और उसका सोच करने से भी मोक्ष नहीं होता तो मोक्ष का कारण क्या है ? ऐसा पूछने पर मोक्ष होने का उपाय कहते हैं;—

[यथा च] जैसे **[बंधनबद्धः]** बंधन से बंधा पुरुष **[बंधान् छित्त्वा तु]** बंधको छेदकर **[विमोक्षं]** मोक्षको **[प्राप्नोति]** प्राप्त करता है **[तथा च]** उसी तरह **[बंधान् छित्त्वा]** कर्म के बंधन को छेदकर **[जीवः]** जीव **[विमोक्षं प्राप्नोति]** मोक्ष को प्राप्त करता है ।

टीका—कर्म के बंधन को छेदन करना मोक्ष का कारण है, जिस प्रकार बेड़ी सांकल आदि से बंधे हुए पुरुष के सांकल का बंध काटना ही छूटने का कारण है उसी प्रकार इस कथन से पहले कहे गये जो दो प्रकार के पुरुष 'एक तो बंध का स्वरूप जानने वाला और एक बंध की चिंता करने वाला' उन दोनों को आत्मा और बंध के पृथक् पृथक् करने में प्रेरणा कराई गई है ॥ २९२ ॥

1. 'बंधस्य' इति पाठो हस्तलिखितप्रतिष्वपि प्रतिषु ।

किमयमेव मोक्षहेतुः ? इतिचेत्—

बंधाणं च सहावं वियाणिओ अप्पणो सहावं च ।
बंधेसु जो विरज्जदि सो कम्मविमोक्खणं कुणई ॥ २९३ ॥

बंधानां च स्वभावं विज्ञायात्मनः स्वभावं च ।
बंधेषु यो विरज्यते स कर्मविमोक्षणं करोति ॥ २९३ ॥

य एव निर्विकारचैतन्यचमत्कारमात्रमात्मस्वभावं तद्विकारकारकं बंधानां च स्वभावं विज्ञाय बंधेभ्यो विरमति स एव सकलकर्ममोक्षं कुर्यात् । एतेनात्मबंधयोर्द्विधाकरणस्य मोक्षहेतुत्वं नियम्यते ॥ २९३ ॥

केनात्मबंधौ द्विधा क्रियेते ? इतिचेत्—

जीवो बंधो य तहा छिज्जंति सलक्खणेहिं णियएहिं ।
पण्णाछेदणएण उ छिण्णा णाणत्तमावण्णा ॥ २९४ ॥

जीवो बंधश्च तथा छिद्येते स्वलक्षणाभ्यां नियताभ्यां ।
प्रज्ञाछेदकेन तु छिन्नौ नानात्वमापन्नौ ॥ २९४ ॥

बौद्धमते ज्ञानं निर्विकल्पं भण्यते परंतु तन्निर्विकल्पमपि विकल्पजनकं भवति । जैनमते तु विकल्पस्योत्पादकं भवत्येवं न किंतु स्वरूपेणैव सविकल्पमिति तथैव स्वपरप्रकाशकं चेति । तत्र परिहारः—कथंचित्सविकल्पमपि च कथंचिन्निर्विकल्पं

कर्म बंधन का ही छेदना मोक्ष का कारण कहा गया, क्या यही मोक्ष का कारण है ? ऐसा पूछने पर उत्तर कहते हैं;—[बंधानां च स्वभावं] बंधों का स्वभाव [च] और [आत्मनः स्वभावं] आत्मा का स्वभाव [विज्ञाय] जानकर [यः] जो पुरुष [बंधेषु] बंधों से [विरज्यते] विरक्त होता है [सः] वह पुरुष [कर्मविमोक्षणं करोति] कर्मों से मुक्त होता है ।

टीका—जो पुरुष निश्चय से निर्विकारचैतन्यचमत्कारमात्र आत्मा का स्वभाव और उस आत्मा के विकार को करने वाले बंधों के स्वभाव इन दोनों के भेदों को जानकर उन बंधों से विरक्त होता है वही पुरुष समस्त कर्मों से मुक्त होता है । इस कथन से आत्मा और बंध के पृथक् पृथक् करने को मोक्ष के कारण का नियम बतलाया है । दोनों का पृथक् पृथक् करना ही मोक्ष का कारण है ऐसा नियम से कहा गया है ॥ २९३ ॥

आगे फिर पूछते हैं कि आत्मा और बंध ये दोनों किस प्रकार पृथक् करने ? ऐसा पूछने पर उत्तर कहते हैं;—[जीवः च बंधः] जीव और बंध ये दोनों [नियताभ्यां] निश्चित [स्वलक्षणाभ्यां] अपने अपने लक्षणों से [प्रज्ञाछेदकेन] बुद्धिरूपी छैनी से [तथा] इस तरह [छिद्येते] छेदने चाहिए [तु] कि जिस तरह [छिन्नौ] छेदे हुए [नानात्वं] नानापन को [आपन्नौ] प्राप्त हो जायं ।

आत्मबंधयोर्द्विधाकरणे कार्ये कर्तुरात्मनः करणमीमांसायां निश्चयतः स्वतो भिन्नकरणासंभवात् भगवती प्रज्ञैव छेदनात्मकं करणं। तया हि तौ छिन्नौ नानात्वमवश्यमापद्येते[1] ततः प्रज्ञयैवात्मबंधयोर्द्विधाकरणं। ननु कथमात्मबंधौ चेत्यचेतकभावेनात्यंतप्रत्यासत्तेरेकीभूतौ भेदविज्ञानाभावादेकचेतकवद्व्यवह्रियमाणौ प्रज्ञया छेत्तुं शक्येते? नियतस्वलक्षणसूक्ष्मांतःसंधिसावधाननिपातनादिति बुध्येमहि। आत्मनो हि समस्तशेषद्रव्यासाधारणत्वाच्चैतन्यं स्वलक्षणं तत्तु प्रवर्तमानं यद्यदभिव्याप्य प्रवर्तते निवर्तमानं च यद्यदुपादाय निवर्तते तत्तत्समस्तमपि सहप्रवृत्तं क्रमप्रवृत्तं वा पर्यायजातमात्मेति लक्षणीयं तदेकलक्षणलक्ष्यत्वात्, समस्तसहक्रमप्रवृत्तानंतपर्यायाविनाभावित्वाच्चैतन्यस्य चिन्मात्र एवात्मा निश्चेतव्यः, इति यावत्। बंधस्य तु आत्मद्रव्यासाधारणा

च। तद्यथा—यथा विषयानंदरूपं सरागस्वसंवेदनज्ञानं सरागसंवित्तिविकल्परूपेण सविकल्पमपि शेषानीहितसूक्ष्मविकल्पानां सद्भावेऽपि सति तेषां मुख्यत्वं नास्ति तेन कारणेन निर्विकल्पमपि भण्यते। तथापि स्वशुद्धात्मसंवित्तिरूपं वीतरागस्वसंवेदनज्ञानमपि स्वसंवित्त्याकारैकविकल्पेन सविकल्पमपि बहिर्विषयानीहितसूक्ष्मविकल्पानां सद्भावेऽपि सति तेषां मुख्यत्वं नास्ति तेन कारणेन निर्विकल्पमपि भण्यते। यत एवेहापूर्वस्वसंवित्त्याकारांतर्मुखप्रतिभासेऽपि बहिर्विषयानीहितसूक्ष्मविकल्पा अपि संति तत एव कारणात् स्वपरप्रकाशकं च सिद्धं इदं निर्विकल्पसविकल्पस्य तथैव स्वपरप्रकाशकस्य च ज्ञानस्य च व्याख्यानं यथागमाध्यात्मतर्कशास्त्रानुसारेण विशेषेण व्याख्यायते तदा महान् विस्तारो भवति स चाध्यात्मशास्त्रत्वान्न कृतः। एवं मोक्षपदार्थसंक्षेपसूचनार्थं प्रथमस्थले गाथासप्तकं गतं॥ २९२॥ अथ किमयमेव मोक्षमार्गः? इति चेत्;—**बंधाणं च सहावं वियाणिदुं** भावबंधानां मिथ्यात्वरागादीनां स्वभावं ज्ञात्वा कथं ज्ञात्वा?। मिथ्यात्वस्वभावो हेयोपादेयतत्त्वविषये विपरीताभिनिवेशो भण्यते रागादीनां च स्वभावः पंचेंद्रियविषयेष्विष्टानिष्टपरिणाम इति। न केवलं बंधस्वभावं ज्ञात्वा **अप्पणो सहावं च** अनंतज्ञानादिस्वरूपं शुद्धात्मनः स्वभावं च ज्ञात्वा **बंधेसु जो ण रज्जदि** द्रव्यबंधहेतुभूतेषु मिथ्यात्वरागादिभावबंधेषु निर्विकल्पसमाधिबलेन यो न रज्यते **सो कम्मविमोक्खणं कुणदि** स कर्मविमोक्षणं करोति॥२९३॥ अथ केन कृत्वात्मबंधौ द्विधा भवतः? इति चेत्;—**जीवो बंधो य तहा छिज्जंति सलक्खणेहिं णियएहिं** यथा जीवस्तथा बंधश्चेतौ द्वौ छिद्येते पृथक् क्रियेते। काभ्यां कृत्वा? स्वलक्षणरूपाभ्यां निजकाभ्यां **पण्णाछेदणएण दु छिण्णा णाणत्तमावण्णा** प्रज्ञाछेदनैकलक्षणेन भेदज्ञानेन छिन्नौ संतौ नानात्व-

टीका—आत्मा और बंध का भिन्न भिन्न करना रूप जो कार्य उसमें करने वाला करता आत्मा है। यदि उसके करण का विचार किया जाय, तो निश्चयनय से आत्मा से पृथक् करण तो असंभव है; इसलिये भगवती प्रज्ञा (ज्ञानस्वरूप बुद्धि) ही छेदनस्वरूप करण है। उस प्रज्ञा से ही वे दोनों—आत्मा और बंध, छेदे हुए नानापने को अवश्य प्राप्त होते हैं, अर्थात् पृथक्-पृथक् हो जाते हैं। इसलिये प्रज्ञा से ही आत्मा और बंध का पृथक्-पृथक् करना है। यहां प्रश्न है कि आत्मा और बंध ये दोनों तो चेत्यचेतक भाव से अत्यंत निकटता के कारण एकसरीखे हो रहे हैं। आत्मा तो चेतक है और बंध चेत्य है सो दोनों एकरूप हुए अनुभव में आते हैं। प्रश्न—भेदविज्ञान के अभाव से एक चेतकरूप ही जो व्यवहार में प्रवर्तते देखे जाते हैं वे प्रज्ञा से कैसे छेदे जा सकते हैं? आचार्य उसका समाधान करते हैं—हम ऐसा

१—अवश्यमेवापद्येते इति पाठो मुद्रितप्रतिषु।

रागादयः स्वलक्षणं । न च रागादय आत्मद्रव्यसाधारणतां[1] बिभ्राणाः प्रतिभासंते नित्यमेव चैतन्यचमत्कारादतिरिक्तत्वेन प्रतिभासमानत्वात्। न च यावदेव समस्तस्वपर्यायव्यापि चैतन्यं प्रतिभाति तावंत एव रागादयः प्रतिभांति । रागादीनंतरेणापि चैतन्यस्यात्मलाभसंभावनात् । यत्तु रागादीनां चैतन्येन सहैवोत्प्लवनं तच्चेत्यचेतकभावप्रत्यासत्तेरेव नैकद्रव्यत्वात्, चेत्यमानस्तु रागादिरात्मनः प्रदीप्यमानो घटादिः प्रदीपस्य प्रदीपकतामिव चेतकतामेव प्रथयेन्न पुना रागादीनां, एवमपि तयोरत्यंतप्रत्यासत्त्या भेदसंभावनाभावादनादिरस्त्येकत्वव्यामोहः स तु प्रज्ञयैव छिद्यत एव ।। २९४ ।।

मापन्नौ इति । तथाहि—जीवस्य लक्षणं शुद्धचैतन्यं भण्यते, बंधस्य लक्षणं मिथ्यात्वरागादिकं, ताभ्यां पृथक् कृतौ । केन ? करणभूतेन प्रज्ञाछेदनकेन, शुद्धात्मानुभूतिलक्षणभेदज्ञानरूपा प्रज्ञैव छेत्रैव छुरिका तया एवेत्यर्थः । छिन्नौ संतौ नानात्व-

जानते हैं कि आत्मा और बंध के निश्चित स्वलक्षण की सूक्ष्म जो अंतरंग की संधि है, उसमें इस प्रज्ञा छैनी को सावधान होके पटकने से दोनों आत्मा और बंध पृथक्-पृथक् हो जाते हैं । वहां आत्मा का तो निजलक्षण निश्चय से समस्त अन्यद्रव्यों से असाधारण—जो अन्य में न पाया जाय ऐसा चैतन्यस्वलक्षण है। यह चैतन्यस्वलक्षण प्रवर्तता हुआ जिस जिस पर्याय को व्याप्त कर प्रवर्तता है तथा निवर्तता हुआ जिस जिस पर्याय को ग्रहण कर निवृत्त होता है वह वह समस्त सहवर्ती और क्रमवर्ती पर्यायों का समूह ही आत्मा है ऐसा देखने योग्य है । यह लक्षण समस्त गुणपर्यायों में व्यापक है, इस कारण सभी गुणपर्यायों का समुदाय आत्मा है । ऐसा इस लक्षण से जानना, क्योंकि आत्मा उसी एक लक्षण से लक्ष्य है । तथा चैतन्य के समस्त सहवर्ती व क्रमवर्ती जो अनंत पर्याय हैं उसी का अविनाभावी संबंध है इसलिये आत्मा चिन्मात्र ही है ऐसा निश्चय करना । इस प्रकार दूसरा व्याख्यान है । और बंध का स्वलक्षण आत्मद्रव्य से असाधारण रागादिक है, क्योंकि ये रागादिक आत्मद्रव्य से साधारणपन को धारण करते हुए प्रतिभासित नहीं होते वे सदा ही चैतन्य चमत्कार से भिन्न प्रतिभासित होते हैं । जितना अपने समस्त पर्यायों में व्यापने स्वरूप चैतन्य प्रतिभासित होता है, उतने रागादिक प्रतिभासित नहीं होते । रागादिक के विना भी चैतन्य का आत्मलाभ (स्वरूप पाना) की संभावना है । जो रागादिक का चैतन्य के साथ ही उत्पन्न होना दीखता है वह इस ज्ञेयज्ञायक भाव के प्रति निकट होने से दीखता है, एक द्रव्यपने से नहीं है । वहां ज्ञेयरूप ज्ञान में आते हुए जो रागादिक हैं, वे आत्मा के ज्ञायकपने को ही विस्तारते हैं, रागादिकपने को नहीं विस्तारते, जैसे दीपक के घटादिक प्रकाशने योग्य होते प्रदीपकपने को ही विस्तारते हैं, घटादिकपन को नहीं विस्तारते, उस तरह जानना । ऐसा होने पर भी आत्मा और बंध दोनों के अत्यंत निकटपने से भेद की संभावना का अभाव है अर्थात् भेद नहीं दीखता । इसलिये इस अज्ञानी के अनादिकाल से एकत्व का भ्रम है । ऐसा भ्रम प्रज्ञा से ही छेदा जाता है ।

भावार्थ—आत्मा और बंध दोनों को लक्षणभेद से पहचान कर बुद्धिरूपी छैनी से छेद पृथक्-पृथक् करना, क्योंकि आत्मा तो अमूर्तीक है और बंध सूक्ष्म पुद्गलपरमाणुओं का स्कंध है इसलिये ये

१. 'असाधारणतां' केषुचित् प्रतिषु पाठः ।

प्रज्ञा छेत्री शितेयं कथमपि निपुणैः पातिता सावधानैः
सूक्ष्मेऽन्तःसंधिबंधे निपतति रभसादात्मकर्मोभयस्य ।
आत्मानं मग्नमंतःस्थिरविशदलसद्धाम्नि चैतन्यपूरे
बंधं चाज्ञानभावे नियमितमभितः कुर्वती भिन्नभिन्नौ ॥१८१॥

मापन्नौ ॥२९४॥ आत्मबंधयोर्द्विधाकरणे किं साध्यं ? इति चेत्—**जीवो बंधो य तहा छिज्जंति सलक्खणेहिं णियएहिं** जीवबंधौ द्वौ पूर्वोक्ताभ्यां स्वलक्षणाभ्यां निजकाभ्यां छिद्येते पूर्ववत् । ततश्छेदानंतरं किं साध्यं ? **बंधो छेदेदव्वो** विशुद्धज्ञानदर्शनस्वभावपरमात्मतत्त्वसम्यक्श्रद्धानज्ञानानुचरणरूपनिश्चयरत्नत्रयात्मकभेदज्ञानछुरिकया मिथ्यात्वरागादिरूपो बंधश्छेत्तव्यः शुद्धात्मनः सकाशात्पृथक्कर्तव्यः । **सुद्धो अप्पा य घेत्तव्वो** वीतरागसहजपरमानंदलक्षणः सुखसमरसीभावेन शुद्धात्मा च गृहीतव्य इत्यभिप्रायः ॥२९५॥ इदमेवात्मबंधयोर्द्विधाकरणे प्रयोजनं यद्बंध-

---

दोनों पृथक् छद्मस्थ के ज्ञान में नहीं आते । एक स्कंध दीखता है, इसलिये अनादि अज्ञान है । सो श्रीगुरुओं का उपदेश पाकर इन दोनों का लक्षण न्यारा-न्यारा ही अनुभव कर जानना कि, चैतन्यमात्र तो आत्मा का लक्षण है और रागादिक बंध का लक्षण है । ये दोनों भी ज्ञेयज्ञायकभाव की अतिनिकटता से एकसे हो रहे दीखते हैं, सो तीक्ष्णबुद्धिरूपी छैनी इनके भेद (पृथक्-पृथक्) करने का जो शस्त्र है उसको इनकी सूक्ष्म संधि को देख सावधान (निष्प्रमाद) होके पटकना । उसके पड़ते ही दोनों अलग-अलग दीखने लगते हैं । तब आत्मा को ज्ञानभाव में ही रखना और बंध को अज्ञानभाव में रखना । इस तरह दोनों को भिन्न करना ॥२९४॥

अब इस अर्थ का कलशरूप काव्य कहते हैं—**प्रज्ञा** इत्यादि । **अर्थ**—आत्मा और बंध के पृथक् करने को यह प्रज्ञा तीक्ष्ण छैनी है । जो चतुरपुरुष हैं वे सावधान (प्रमादरहित) हुए, आत्मा और कर्म इन दोनों का सूक्ष्म मध्य का संधी का बंधन उसमें किसी प्रकार यत्न से उस छैनी को ऐसा पटकते हैं कि वहां पड़ी हुई यह छैनी शीघ्र ही सब तरह से भिन्न कर देती है । वह आत्मा को तो अंतरंग में स्थिर और स्पष्ट प्रकाशरूप देदीप्यमान तेज वाले चैतन्य के प्रवाह में मग्न करती है तथा बंध को अज्ञानभाव में नियम से निश्चल कर देती है । अर्थात् आत्मा और बंध को भिन्न कर देती है ।

भावार्थ—यहां पर आत्मा और बंध का भिन्न-भिन्न करना रूप कार्य है उसका कर्ता आत्मा है । उसमें भी करण के विना कर्ता किससे कार्य करे ? इसलिये करण भी चाहिये । निश्चयनय से तो कर्ता से पृथक् करण होता नहीं है । इसलिये आत्मा से अभिन्न यह बुद्धि ही इस कार्य में करण है । आत्मा के अनादि बंध ज्ञानावरणादि कर्म हैं उनका कार्य भावबंध तो रागादिक हैं और नोकर्म शरीरादिक हैं । सो बुद्धिकर आत्मा को शरीर से, ज्ञानावरणादिक द्रव्यकर्म से तथा रागादिक भावकर्म से भिन्न एक चैतन्य भावमात्र अनुभव से ज्ञान में ही लीन रखना, भिन्न करना है । इसी से सब कर्मों का नाश हो जाने से सिद्धपद को प्राप्त हो जाता है ऐसा जानना ॥१८१॥

आत्मबंधौ द्विधा कृत्वा किं कर्तव्यं ? इति चेत्—

जीवो बंधो य तहा छिज्जंति सलक्खणेहिं णियएहिं ।
बंधो छेएदव्वो सुद्धो अप्पा य घेत्तव्वो ॥२९५॥

जीवो बंधश्च तथा छिद्येते स्वलक्षणाभ्यां नियताभ्यां ।
बंधश्छेत्तव्यः शुद्ध आत्मा च गृहीतव्यः ॥२९५॥

आत्मबंधौ हि तावन्नियतस्वलक्षणविज्ञानेन सर्वथैव छेत्तव्यौ, ततो रागादिलक्षणः समस्त एव बंधो निर्मोक्तव्यः, उपयोगलक्षणः शुद्ध आत्मैव गृहीतव्यः ॥२९५॥

एतदेव किलात्मबंधयोर्द्विधाकरणस्य प्रयोजनं यद्बंधत्यागेन शुद्धात्मोपादानं—

कह सो घिप्पइ अप्पा पण्णाए सो उ घिप्पए अप्पा ।
जह पण्णाइ विहत्तो तह पण्णाएव घित्तव्वो ॥२९६॥

कथं स गृह्यते आत्मा प्रज्ञया स तु गृह्यते आत्मा ।
यथा प्रज्ञया विभक्तस्तथा प्रज्ञयैव गृहीतव्यः ॥२९६॥

परिहारेण शुद्धात्मोपादानमित्युपदिशति;—**कह सो घिप्पदि अप्पा** कथं स गृह्यते आत्मा 'दृष्टिविषयो न भवत्य-मूर्तत्वात्', इति प्रश्नः ? **पण्णाए सो दु घिप्पदे अप्पा** प्रज्ञया भेदज्ञानेन गृह्यते, इत्युत्तरं । कथं ? इति चेत्

आगे फिर पूछते हैं कि आत्मा और बंध को द्विधा करके क्या करना ? ऐसा पूछने पर उत्तर कहते हैं;—[**जीवः**] जीव [**च**] और [**बंधः**] बंध इन दोनों को [**नियताभ्यां**] निश्चित [**स्वलक्षणाभ्यां**] अपने-अपने लक्षणों से [**तथा**] इस तरह [**छिद्येते**] भिन्न करना कि [**बंधः छेत्तव्यः**] बंध तो छिदकर भिन्न हो जाय [**च**] और [**आत्मा गृहीतव्यः**] आत्मा ग्रहण किया जाय ।

टीका—आत्मा और बंध इन दोनों को पहले तो अपने-अपने निश्चित लक्षण के ज्ञान से सब तरह ही भिन्न करना, पीछे रागादिक लक्षण वाले सभी बंध को तो छोड़ना तथा उपयोग लक्षण वाले अकेले शुद्ध आत्मा को ही ग्रहण करना । यही निश्चय से आत्मा और बंध के द्विधा करने का प्रयोजन है कि बंध का त्याग कर शुद्ध आत्मा को ग्रहण करना ।

भावार्थ—शिष्य ने पूछा था कि आत्मा और बंध को द्विधाकर के क्या करना ? उसका उत्तर यह दिया कि बंध का तो त्याग करना और शुद्ध आत्मा को ग्रहण करना ॥२९५॥

आगे पूछते हैं कि आत्मा और बंध को प्रज्ञा से तो भिन्न किया परंतु आत्मा को ग्रहण किससे किया जाय ? उसके प्रश्नोत्तर की गाथा कहते हैं;—शिष्य पूछता है कि [**स आत्मा**] वह शुद्धात्मा [**कथं**] कैसे [**गृह्यते**] ग्रहण किया जा सकता है? आचार्य उत्तर कहते हैं कि [**स तु**] वह शुद्धात्मा

ननु केन शुद्धोयमात्मा गृहीतव्यः ? प्रज्ञयैव शुद्धोयमात्मा गृहीतव्यः, शुद्धस्यात्मनः स्वयमात्मानं गृह्णतो विभजत इव प्रज्ञैककरणत्वात् । अतो यथा प्रज्ञया विभक्तस्तथा प्रज्ञयैव गृहीतव्यः ॥२९६॥

कथमयमात्मा प्रज्ञया गृहीतव्यः ? इति चेत्;—

पण्णाए घित्तव्वो जो चेदा सो अहं तु णिच्छयदो ।
अवसेसा जे भावा ते मज्झ परेत्ति णायव्वा ॥२९७॥

प्रज्ञया गृहीतव्यो यश्चेतयिता सोऽहं तु निश्चयतः ।
अवशेषा ये भावाः ते मम परा इति ज्ञातव्याः ॥२९७॥

यो हि नियतस्वलक्षणावलंबिन्या प्रज्ञया प्रविभक्तश्चेतयिता सोऽयमहं । ये त्वमी अवशिष्टा अन्यस्वलक्षणलक्ष्या व्यवह्रियमाणा भावाः, ते सर्वेऽपि चेतयितृत्वस्य व्यापकस्य व्याप्यत्वमनायांतोऽत्यंतं मत्तो भिन्नाः । ततोऽहमेव मयैव मह्यमेव मत्त एव मय्येव मामेव गृह्णामि ।

जह पण्णाए विभत्तो यथा पूर्वसूत्रे प्रज्ञया विभक्तः रागादिभ्यः पृथक्कृतः **तह पण्णाएव घित्तव्वो** तथा प्रज्ञयैव गृहीतव्यः । ननु केन शुद्धोऽयमात्मा गृहीतव्यः ? प्रज्ञयैव शुद्धोयमात्मा गृहीतव्य. शुद्धस्यात्मनः स्वयमात्मानं गृह्णतोऽपि विभजत इव प्रज्ञैककरणत्वात् । अतो यथा प्रज्ञया प्रविभक्तस्तथा प्रज्ञयैव गृहीतव्य. ॥२९६॥ कथमात्मा प्रज्ञया गृहीतव्य

[प्रज्ञया] प्रज्ञा से ही **[गृह्यते]** ग्रहण किया जाता है । **[तथा]** जिस तरह पहले **[प्रज्ञया]** प्रज्ञा से **[विभक्तः]** भिन्न किया था **[तथा]** उसी तरह **[प्रज्ञयैव]** प्रज्ञा से ही **[गृहीतव्यः]** ग्रहण करना ।

टीका—शिष्य का प्रश्न है कि यह शुद्ध आत्मा किस तरह ग्रहण करना ? उसका गुरु उत्तर देते हैं कि यह शुद्धात्मा प्रज्ञा से ही ग्रहण करना, आप स्वयं शुद्ध आत्मा को ग्रहण करता जो शुद्ध आत्मा उसके पहले जैसे भिन्न करता के प्रज्ञा ही एक करण था उसी प्रकार ग्रहण कर्ता के भी वही प्रज्ञा एक करण है भिन्न करण नहीं है । इसलिये जैसे पहले प्रज्ञा से भिन्न किया था वैसे प्रज्ञा से ही ग्रहण करना ।

भावार्थ—भिन्न करने में और ग्रहण करने में पृथक् करण नहीं है इसलिये प्रज्ञा से ही तो भिन्न किया और प्रज्ञा से ही ग्रहण करना चाहिये ॥२९६॥

आगे फिर पूछते हैं कि आत्मा को प्रज्ञा के द्वारा किस तरह ग्रहण करना चाहिए ? उसका उत्तर कहते हैं;— **[यः चेतयिता]** जो चेतन स्वरूप आत्मा है **[निश्चयतः]** निश्चय से **[सः तु]** वह **[अहं]** मैं हूं इस तरह **[प्रज्ञया]** प्रज्ञा द्वारा **[गृहीतव्यः]** ग्रहण करने योग्य है **[अवशेषाः]** और अवशेष **[ये भावाः]** जो भाव हैं **[ते]** वे **[मम पराः]** मुझ से पर हैं **[इति ज्ञातव्याः]** इस प्रकार जानना चाहिये

टीका—निश्चय से जो निश्चित निजलक्षण को अवलंबन करने वाली प्रज्ञा है उसके द्वारा चैतन्य स्वरूप आत्मा को भिन्न किया था, कि वही यह मैं हूं और जो ये अवशेष अन्य अपने लक्षण से

यत्किल गृह्णामि तच्चेतनैकक्रियत्वादात्मनश्चेतये एव, चेतयमान एव चेतये, चेतयमानेनैव चेतये, चेतयमानायैव चेतये, चेतयमानादेव चेतये, चेतयमाने एव चेतये, चेतयमानमेव चेतये। अथवा न चेतये, न चेतयमानश्चेतये, न चेतयमानेन चेतये, न चेतयमानाय चेतये, न चेतयमानाच्चेतये, न चेतयमाने चेतये, न चेतयमानं चेतये। किंतु सर्वविशुद्धचिन्मात्रो भावोऽस्मि ॥२९७॥

भित्त्वा सर्वमपि स्वलक्षणबलाद्भेत्तुं हि यच्छक्यते।
चिन्मुद्रांकितनिर्विभागमहिमा शुद्धश्चिदेवास्म्यहं।
भिद्यंते यदि कारकाणि यदि वा धर्मा गुणा वा यदि।
भिद्यंतां न भिदास्ति काचन विभौ भावे विशुद्धे चिति ॥१८२॥

इति चेत्;—प्रज्ञया गृहीतव्यो यश्चेतयिता सोहं तु निश्चयतः अवशेषा ये भावास्ते मम परे इति ज्ञातव्याः। यो हि निश्चयतः स्वलक्षणावलंबिन्या प्रज्ञया प्रविभक्तश्चेतयिता सोऽयमहं, ये त्वमी अवशिष्टा अन्ये स्वलक्षणलक्ष्या व्यवहि-

---

पहचानने योग्य व्यवहाररूप भाव हैं, वे सभी आत्मा का व्यापक जो चेतकपन उसके व्याप्यपने में नही आते। वे मुझसे अत्यंत भिन्न हैं। इसलिये मैं ही, अपने द्वारा ही, अपने ही लिये, अपने से ही, अपने में ही, अपने को ही ग्रहण करता हूं। जो मैं निश्चयतः ग्रहण करता वह आत्मा की चेतना ही एक क्रिया है। उस क्रिया से चेतता ही हूं, चेतता हुआ ही चेतता हूं, चेतते हुए से ही चेतता हूं, चेतते हुए के लिये ही चेतता हूं, चेतते हुए से ही चेतता हूं, चेतते हुए में ही चेतता हूं, चेतते हुए को ही चेतता हूं। अथवा न तो चेतता हूं, न चेतता हुआ चेतता हूं, न चेतते हुए से चेतता हूं, न चेतते हुए के लिये चेतता हूं, न चेतते हुए से चेतता हूं, न चेतते हुए में चेतता हूं, न चेतते हुए को चेतता हूं। तो कैसा हूं ? सर्व विशुद्ध चैतन्यमात्र भाव हूं।

भावार्थ—जिस प्रज्ञा द्वारा आत्मा को बंध से भिन्न किया था उसी से यह चैतन्यस्वरूप आत्मा मैं हूं, अन्य अवशेष भाव मुझसे भिन्न हैं; यहां अभिन्न छह कारको से मैं, मुझको, मुझकर, मेरे लिये, मुझ से अपने में ग्रहण करता हूं। वह ग्रहण करना चेतन की चित्स्वरूप क्रिया ही है उससे चेतता हूं—जानता हूं, अनुभवता हूं इस तरह लगाना। फिर इन कारकों के भेद का भी निषेध किया। कि, मैं शुद्ध चैतन्यमात्र भाव हूं, सो एक अभेद हूं, द्रव्यदृष्टि से कर्ता कर्म आदि षट्कारक का भी भेद मुझ में नहीं है। इस तरह बुद्धि के द्वारा आत्मा को ग्रहण करना ॥ २९७ ॥

अब इस अर्थ का कलश रूप काव्य कहते हैं;—**भित्त्वा** इत्यादि। **अर्थ**—ज्ञानी कहता है कि जो भेदने को समर्थ है उस सब को निजलक्षण के बल से भेदकर चैतन्य चिन्ह से चिन्हित, विभाग रहित महिमावाला मैं शुद्ध चैतन्य ही हूं। यदि कर्ता, कर्म, करण, संप्रदान, अपादान, अधिकरण ये छह कारक और सत्त्व, असत्त्व, नित्यत्व, अनित्यत्व, एकत्व, अनेकत्व आदिक धर्म व ज्ञान, दर्शन आदिक गुण ये भेदरूप हों तो हों परंतु विशुद्ध समस्त विभावों से रहित एक तथा सब गुणपर्यायों में व्यापक ऐसे चैतन्य भाव में तो कुछ भेद नहीं है।

पण्णाए घित्तव्वो जो दट्ठा सो अहं तु णिच्छयओ ।
अवसेसा जे भावा ते मज्झ परेत्ति णायव्वा ॥२९८॥
पण्णाए घित्तव्वो जो णादा सो अहं तु णिच्छयदो ।
अवसेसा जे भावा ते मज्झ परेत्ति णादव्वा ॥२९९॥ (युग्मम्)

प्रज्ञया गृहीतव्यो यो द्रष्टा सोऽहं तु निश्चयतः ।
अवशेषा ये भावास्ते मम परा इति ज्ञातव्याः ॥२९८॥
प्रज्ञया गृहीतव्यो यो ज्ञाता सोऽहं तु निश्चयतः ।
अवशेषा ये भावास्ते मम परा इति ज्ञातव्याः ॥२९९॥

चेतनाया दर्शनज्ञानविकल्पानतिक्रमणाच्चेतयितृत्वमिव द्रष्टृत्वं ज्ञातृत्वं चात्मनः स्व-

---

यमाणा भावास्ते सर्वेऽपि चेतयितृत्वस्य व्यापकस्य व्याप्यत्वमनायांतोऽत्यंतं मत्तो भिन्नास्ततोऽहमेव मयैव मह्यमेव मत्त एव मय्येव मामेव गृह्णामि, यत् किल गृह्णामि तच्चेतनैकक्रियत्वादात्मनश्चेतये एव, चेतयमान एव चेतये, चेतयमानेनैव चेतये, चेतयमानायैव चेतये, चेतयमानादेव चेतये, चेतयमान एव चेतये, चेतयमानमेव चेतये । अथवा न चेतये, न चेतयमानश्चेतये, न चेतयमानेन चेतये, न चेतयमानाय चेतये, न चेतयमानाच्चेतये, न चेतयमाने चेतये, न चेतयमानं चेतये, किं तु सर्वविशुद्धचिन्मात्रो भावोऽस्मि । भित्त्वा सर्वमपि स्वलक्षणबलाद्भेत्तु हि यच्छक्यते चिन्मुद्रांकितनिर्विभाग-महिमा शुद्धश्चिदेवास्म्यहं । भिद्यंते यदि कारकाणि यदि वा धर्मा गुणा वा यदि भिद्यंतां न भिदास्ति काचन विभौ भावे विशुद्धे चिति ॥२९७॥ प्रज्ञया गृहीतव्यो यो द्रष्टा सोहं तु निश्चयतः, अवशेषा मे भावाः ते मम परा इति ज्ञातव्याः । प्रज्ञया

भावार्थ—इस चैतन्यभाव से अन्य, अपने स्वलक्षण से भेदे गये, कारकभेद धर्मभेद और गुणभेद हैं तो रहें, शुद्ध चैतन्यमात्र में कुछ भी भेद नहीं हैं। शुद्धनय से आत्मा को ऐसा अभेदरूप ग्रहण करना ॥१८२॥

आगे कहते हैं कि शुद्ध चैतन्यमात्र तो ग्रहण कराया, परंतु सामान्य चेतना दर्शन ज्ञान सामान्यमय है इसलिये अनुभव में दर्शन ज्ञान स्वरूप आत्मा का ऐसा अनुभव करना;—**[प्रज्ञया गृहीतव्यः]** प्रज्ञा से इस प्रकार ग्रहण करना कि **[यो द्रष्टा]** जो देखने वाला है **[स तु]** वह तो **[निश्चयतः]** निश्चय से **[अहं]** मैं हूं **[अवशेषा ये भावाः]** अवशेष जो भाव हैं **[ते मम पराः]** वे मुझ से पर हैं **[इति ज्ञातव्याः]** ऐसा जानना, तथा **[प्रज्ञया गृहीतव्यः]** प्रज्ञा से ही ग्रहण करना कि **[यो ज्ञाता]** जो जानने वाला है **[स तु]** वह तो **[निश्चयतः]** निश्चय से **[अहं]** मैं हूं **[अवशेषा ये भावाः]** अवशेष जो भाव हैं **[ते]** वे **[मम पराः]** मुझ से पर हैं **[इति ज्ञातव्याः]** ऐसा जानना ।

टीका—चेतना में दर्शन ज्ञान के भेद का उल्लंघन नहीं है । इस कारण चेतकत्व की तरह दर्शकपना व ज्ञातापना आत्मा का निज लक्षण ही है । इसलिये ऐसा अनुभव करना कि मैं देखने वाला आत्मा को ग्रहण

लक्षणमेव । ततोऽहं द्रष्टारमात्मानं गृह्णामि यत्किल गृह्णामि तत्पश्याम्येव, पश्यन्नेव पश्यामि, पश्यतैव पश्यामि, पश्यते एव पश्यामि, पश्यत एव पश्यामि, पश्यत्येव पश्यामि, पश्यंतमेव पश्यामि । अथवा—न पश्यामि, न पश्यन् पश्यामि, न पश्यता पश्यामि, न पश्यते पश्यामि, न पश्यतः पश्यामि, न पश्यति पश्यामि, न पश्यंतं पश्यामि । किंतु सर्वविशुद्धो दृङ्मात्रो भावोऽस्मि । अपि च—ज्ञातारमात्मानं गृह्णामि यत्किल गृह्णामि तज्जानाम्येव, जानन्नेव जानामि, जानतैव जानामि, जानते एव जानामि, जानत एव जानामि, जानत्येव जानामि, जानंतमेव जानामि । अथवा—न जानामि, न जानन् जानामि, न जानता जानामि, न जानते जानामि, न जानतो जानामि, न जानति जानामि न जानंतं जानामि । किंतु सर्वविशुद्धो ज्ञप्तिमात्रो भावोऽस्मि । ननु कथं चेतना दर्शनज्ञानविकल्पौ नातिक्रामति येन चेतयिता द्रष्टा ज्ञाता च स्यात् ? उच्यते—चेतना

गृहीतव्यो यो ज्ञाता सोऽहं तु निश्चयतः, अवशेषा ये भावाः ते मम परा इति ज्ञातव्याः चेतनाया दर्शनज्ञानविकल्पानतिक्रमणाच्चेतयितृत्वमेव द्रष्टृत्वं ज्ञातृत्वं चात्मनः स्वलक्षणमेव । ततोहं द्रष्टारमात्मानं गृह्णामि । यत्किल गृह्णामि तत्पश्याम्येव, पश्यन्नेव पश्यामि, पश्यतैव पश्यामि, पश्यते एव पश्यामि, पश्यत एव पश्यामि, पश्यत्येव पश्यामि, पश्यंतमेव पश्यामि । अथवा—न पश्यामि, न पश्यन् पश्यामि, न पश्यता पश्यामि, न पश्यते पश्यामि, न पश्यतः पश्यामि, न पश्यति पश्यामि, न पश्यंतं पश्यामि । किं तु सर्वविशुद्धो दृङ्मात्रो भावोऽस्मि । अपि च ज्ञातारमात्मानं गृह्णामि यत्किल गृह्णामि तज्जानाम्येव, जानन्नेव जानामि, जानतैव जानामि, जानते एव जानामि, जानत एव जानामि, जानत्येव जानामि, जानंतमेव जानामि । अथवा न जानामि, न जानन् जानामि, न जानतैव जानामि, न जानते जानामि, न जानतो जानामि, न जानति जानामि, न जानंतं जानामि । किं तु सर्वविशुद्धो ज्ञप्तिमात्रो भावोऽस्मि । ननु कथं चेतना दर्शनज्ञानविकल्पौ नातिक्रामति येन चेतयिता द्रष्टा ज्ञाता च स्यात् ? उच्यते-चेतना तावत्प्रतिभासरूपा सा तु सर्वेषामेव वस्तूनां सामान्यविशेषात्मकत्वाद् द्वैरूप्यं नातिक्रामति । ये तु तस्या द्वे रूपे ते दर्शनज्ञाने, ततः सा ते नातिक्रामति । यद्यतिक्रामति ? सामान्यविशेषातिक्रांतत्वाच्चेतनैव न भवति । तदभावे द्वौ दोषौ स्वगुणोच्छेदाच्चेतनस्याचेतनतापत्तिः, व्यापकाभावे व्याप्यस्य चेतनस्याभावो वा । ततस्तद्दोषभयाद्दर्शनज्ञानात्मिकैव चेतनाभ्युपगंतव्या ।

अद्वैतापि हि चेतना जगति चेद् दृग्ज्ञप्तिरूपं त्यजेत् तत्सामान्यविशेषरूपविरहात्सास्तित्वमेव त्यजेत् ।
तत्त्यागे जड़ता चितोऽपि भवति व्याप्यो विना व्यापकादात्मा चांतमुपैति तेन नियतं दृग्ज्ञप्तिरूपास्तु चित् ।

एकश्चितश्चिन्मय एव भावो भावाः परे ये किल ते परेषां
ग्राह्यस्ततश्चिन्मय एव भावो भावाः परे सर्वत एव हेयाः ॥

निश्चयतः अवशेषा ये रागादिभावा विभावपरिणामास्ते चिदानंदैकभावस्य ममापेक्षया परा इति ज्ञातव्याः ।

करता हूं, जो निश्चय से ग्रहण करता हूं सो देखता ही हूं, देखता हुआ ही देखता हूं, देखते हुए के द्वारा ही देखता हूं, देखते हुए के लिये ही देखता हूं, देखते हुए से ही देखता हूं, देखते हुए में ही देखता हूं और देखते हुए को ही देखता हूं । अथवा नहीं देखता, न देखते हुए को देखता हूं, न देखतेकर देखता हूं, न देखते के लिये देखता हूं, न देखते से देखता हूं, न देखते में देखता हूं, न देखते को देखता हूं । तो कैसा हूं ? सर्व विशुद्ध एक दर्शनमात्र भाव मैं हूं । इस प्रकार तो दर्शन पर कर्ता कर्म करण संप्रदान अपादान अधिकरण लगा कर फिर उनका निषेध करके एक दर्शनमात्र भाव स्वरूप आत्मा को अनुभव रूप करना । तथा उसी

तावत्प्रतिभासरूपा सा तु सर्वेषामेव वस्तूनां सामान्यविशेषात्मकत्वात् द्वैरूप्यं नातिक्रामति । ये तु तस्या द्वे रूपे ते दर्शनज्ञाने, ततः सा ते नातिक्रामति । यद्यतिक्रामति ? सामान्यविशेषातिक्रांतत्वाच्चेतनैव न भवति । तदभावे द्वौ दोषौ—स्वगुणोच्छेदाच्चेतनस्याचेतनतापत्तिः, व्यापकाभावे व्याप्यस्य चेतनस्याभावो वा । ततस्तद्दोषभयाद्दर्शनज्ञानात्मिकैव चेतनाभ्युपगंतव्या ॥२९८।२९९॥

अत्राह शिष्यः—चेतनाया ज्ञानदर्शनभेदौ न स्तः, एकैव चेतना ततो ज्ञाता द्रष्टेति द्विधात्मा कथं घटते इति ? अत्र पूर्वपक्षे परिहारः—सामान्यग्राहकं दर्शनं, विशेषग्राहकं ज्ञानं । सामान्यविशेषात्मकं च वस्तु । सामान्यविशेषात्मकत्वाभावे चेतनाया अभावः स्यात् । चेतनाया अभावे सति आत्मनो जडत्वं, चेतनालक्षणस्य विशेषगुणस्याभावे सत्यभावो वा भवति । नचात्मनो जडत्वं दृश्यते, नचाभावः ? प्रत्यक्षविरोधात् ? ततः स्थितं यद्यप्यभेदनयेनैकरूपा चेतना तथापि सामान्यविशेषविषयभेदेन दर्शनज्ञानरूपा भवतीत्यभिप्रायः ॥ २९८ ॥ २९९ ॥ अथ शुद्धबुद्धैकस्वभावस्य परमात्मनः शुद्धचिद्रूप एक एव

तरह ज्ञान पर भी लगाना । मैं जानने वाली आत्मा को ग्रहण करता हूँ, जो ग्रहण करता हूँ सो निश्चय से जानता ही हूँ; जानता हुआ ही जानता हूं, जानते हुए से ही जानता हूं; जानते हुए के लिये ही जानता हूं, जानते हुए से ही जानता हूं; जानते हुए में ही जानता हूं; जानते हुए को ही जानता हूं । अथवा नहीं जानता, न जानते हुए को जानता हूँ; न जानते हुए के द्वारा जानता हूं, न जानते के लिये जानता हूँ, न जानते हुए से जानता हूँ, न जानते में जानता हुँ न जानते को जानता हूँ । तो कैसा हूँ ? सर्व विशुद्ध एक जाननक्रियामात्र भाव में हूँ । इस तरह ज्ञान पर छह कारक भेदरूप लगा के फिर अभेदरूप करने को कारक भेद का निषेध कर ज्ञानमात्र अपना अनुभव करना ।

भावार्थ—पहले तो सामान्य चेतना का अनुभव कराया । पहले आत्मा को ज्ञान द्वारा ग्रहण करना कहा था सो चेतना का अनुभव करना ही ग्रहण करना है कुछ अन्य वस्तु का ग्रहण करना नहीं है । तथा अनुभव करना, अनुभव करने वाला, जिससे अनुभव किया जाय इत्यादि छह कारक भेदरूप कहकर अभेद विवक्षा में कारक भेद का निषेध करके एक शुद्ध चेतना मात्र ही कहा था । अब यहां चेतना सामान्य है, वह दर्शन ज्ञान विशेष को उलंघन नहीं करता, इसलिये द्रष्टा और ज्ञाता का अनुभव कराया । वहां भी छहकारकरूप भेद अनुभव कर पीछे अभेद अनुभव अपेक्षा कारक भेद दूर कर द्रष्टा ज्ञातामात्र का अनुभव कराया है । यहां शिष्य पूछता है कि चेतना दर्शन ज्ञान भेद को कैसे उलंघन नहीं करती कि जिससे आत्मा द्रष्टा ज्ञाता हो जाता है । उसका उत्तर कहते हैं—प्रथम तो चेतना प्रतिभासरूप है, ऐसी चेतना दोरूपपने को उलंघन नहीं करती क्योंकि सभी वस्तु का सामान्यविशेषरूप स्वरूप है । सो चेतना भी वस्तु है, वह सामान्य विशेषरूप को कैसे उलंघन करे । उसके दो रूप हैं वे दर्शन, ज्ञान हैं । इसलिये वह चेतना दर्शन ज्ञान इन दोनों को उलंघन नहीं करती । यदि इन दो स्वरूपों को लांघे तो सामान्य विशेषरूप के उलंघनेपने से चेतना ही नहीं होतो । उस चेतना के अभाव से दो दोष आते हैं—एक तो अपने गुण का उच्छेद होने से चेतन के अचेतनपन की प्राप्ति आती है और दूसरे, व्यापक चेतन का अभाव होने से व्याप्य जो चेतन आत्मा उसका अभाव होता है । इस कारण इन दोषों के भय से चेतना दर्शनज्ञानस्वरूप ही अंगीकार करनी ॥२९८।२९९॥

अद्वैतापि हि चेतना जगति चेद्दृग्ज्ञप्तिरूपं त्यजेत्
तत्सामान्यविशेषरूपविरहात्सास्तित्वमेव त्यजेत् ।
तत्त्यागे जडता चितोऽपि भवति व्याप्यो विना व्यापका-
दात्मा चांतमुपैति तेन नियतं दृग्ज्ञप्तिरूपास्तु चित् ॥ १८३ ॥
एकश्चितश्चिन्मय एव भावो भावाः परे ये किल ते परेषां ।
ग्राह्यस्ततश्चिन्मय एव भावो भावाः परे सर्वत एव हेयाः ॥ १८४ ॥

भावः न च रागादय इत्याख्याति;—**को णाम भणिज्ज बुहो** को ब्रूयात् बुधो ज्ञानी विवेकी नाम स्फुटमहो वा न कोऽपि । किं ब्रूयात् । **मज्झमिणंतिय वयणं** ममेति वचनं किं कृत्वा ? पूर्वं **णादुं** निर्मलात्मानुभूतिलक्षणभेदज्ञानेन ज्ञात्वा । कान् ? **सव्वे परोदये भावे** सर्वान् मिथ्यात्वरागादिभावान् विभावपरिणामान् । कथंभूतान् ? परोदयान् शुद्धात्मन. सकाशात् परेण कर्मोदयेन जनितान् । किं कुर्वन् सन् ? **जाणंतो अप्पयं सुद्धं** जानन् परमसमरसीभावेना-नुभवन्, कं ? आत्मानं । कथंभूतं ? शुद्धं, भावकर्मद्रव्यकर्मनोकर्मरहितं । केन कृत्वा जानन् ? शुद्धात्मभावनापरिणता-भेदरत्नत्रयलक्षणेन भेदज्ञानेनेति । एवं विशेषभेदभावनाव्याख्यानमुख्यत्वेन तृतीयस्थले सूत्रपंचकं गतं ॥ ३०० ॥ अथ मिथ्यात्वरागादिपरभावस्वीकारेण बध्यते वीतरागपरमचैतन्यलक्षणस्वस्वभावस्वीकारेण मुच्यते जीव इति प्रकाशयति—

अब इस अर्थ का कलशरूप काव्य कहते हैं—**अद्वैता** इत्यादि । **अर्थ**—जगत में निश्चय से चेतना अद्वैत है, तो भी जो दर्शन ज्ञानरूप को छोड़े तो सामान्य विशेषरूप के अभाव से वह चेतना अपने अस्तित्व को छोड़ दे, और जब चेतना अपने अस्तित्व को छोड़ दे तो चेतन के जड़पना हो जाय । तथा व्याप्य आत्मा व्यापक चेतना के बिना अन्त को प्राप्त हो जाय अर्थात् आत्मा का नाश हो जाय । इसलिए चेतना नियम से दर्शन ज्ञानस्वरूप ही है ।

भावार्थ—वस्तु का स्वरूप सामान्य विशेषरूप है । चेतना भी वस्तु है वह दर्शन ज्ञान विशेष को यदि छोड़ दे तो वस्तुपने का नाश हो जाय तब चेतना का अभाव होने से चेतन के जड़पना आ जायेगा । चेतना आत्मा की सब अवस्थाओं में पाई जाती है, इसलिए व्यापक है । आत्मा चेतना ही है इस कारण चेतना का व्याप्य है सो व्यापक के अभाव से व्याप्य जो चेतन आत्मा उसका अभाव होता है । इसलिये चेतना दर्शनज्ञानस्वरूप ही माननी चाहिए । यहां पर तात्पर्य ऐसा है कि सांख्यमती आदि कई मतवाले सामान्य चेतना को ही मानकर एकांत करते हैं, उनके निषेध करने को 'वस्तु का स्वरूप सामान्य विशेषरूप है सो चेतना को भी सामान्य विशेषरूप अंगीकार करना' ऐसा जतलाया है ॥१८३॥

आगे कहते हैं कि चेतना का तो चिन्मय ही एकभाव है अन्य परभाव हैं सो चिन्मयभाव तो उपादेय है और परभाव हेय हैं यह सूचना आगे के कथन की है उसका श्लोक कहते हैं—**एक** इत्यादि । **अर्थ**—चैतन्य का तो एक चिन्मय ही भाव है । दूसरे भाव हैं वे प्रगट रीति से परके भाव हैं । इसलिए एक चिन्मयभाव ही ग्रहण करने योग्य है और जो परभाव हैं वे सभी त्यागने योग्य हैं ॥१८४॥

को णाम भणिज्ज बुहो णाउं सव्वे [1]पराइए भावे।
मज्झमिणंति य वयणं जाणंतो अप्पयं सुद्धं ॥ ३०० ॥

को नाम भणेद् बुधो ज्ञात्वा सर्वान् परकीयान् भावान्।
ममेदमिति च वचनं जानन्नात्मानं शुद्धं ॥ ३०० ॥

यो हि परात्मनोर्नियतस्वलक्षणविभागपातिन्या प्रज्ञया ज्ञानी स्यात् स खल्वेकं चिन्मात्रं भावमात्मीयं जानाति शेषांश्च सर्वानेव भावान् परकीयान् जानाति। एवं च जानन् कथं परभावान्ममामी इति ब्रूयात्? परात्मनोर्निश्चयेन स्वस्वामिसंबंधस्यासंभवात्। अतः सर्वथा चिद्भाव एव गृहीतव्यः शेषाःसर्वे एव भावाः प्रहातव्या इति सिद्धांतः ॥ ३०० ॥

सिद्धांतोऽयमुदात्तचित्तचरितैर्मोक्षार्थिभिः सेव्यतां
शुद्धं चिन्मयमेकमेव परमं ज्योतिः सदैवास्म्यहं।
एते ये तु समुल्लसंति विविधा भावा पृथग्लक्षणाः
तेऽहंनास्ति यतोऽत्र ते मम परद्रव्यं समग्रा अपि ॥१८५॥

तेयादी अवराहे कुव्वदि सो ससंकिदो होदि यः स्तेयपरदाराद्यपराधान् करोति स पुरुषः सशंकितो भवति। केन

अब इस उपदेश की गाथा कहते हैं;—[सर्वान् परकीयान् भावान्] ज्ञानी अपने स्वरूप को जान और सभी परके भावों को [ज्ञात्वा] जानकर [इदं मम] ये मेरे हैं [इति च वचनं] ऐसा वचन [कः नाम बुधः] कौन बुद्धिमान् [भणेत्] कहेगा? ज्ञानी पंडित तो नहीं कह सकता। कैसा है ज्ञानी? [आत्मानं] अपने आत्मा को [शुद्धं जानन्] शुद्ध जानने वाला है।

टीका—जो पुरुष आत्मा और परके निश्चित स्वलक्षण के विभाग में पड़ने वाली प्रज्ञा से ज्ञानी होता है, वह पुरुष निश्चयतः एक चैतन्यमात्र अपने भाव को तो अपना जानता है और बाकी के सभी भावों को परके जानता है। ऐसा जानता हुआ परके भावों को 'ये मेरे हैं' ऐसे किस तरह कह सकता है? ज्ञानी तो नहीं कहता क्योंकि पर और आप में निश्चय से स्वस्वामिपने के सम्बन्ध का असम्भव है। इसलिये सर्वथा चिद्भाव ही एक ग्रहण करने योग्य है अवशेष सभी भाव त्यागने योग्य हैं ऐसा सिद्धान्त है।

भावार्थ—लोक में भी यह न्याय है, कि जो सुबुद्धि और न्यायवान् है, वह परके धनादिक को अपना नहीं कहता, उसी तरह सम्यग्ज्ञानी भी समस्त परद्रव्य को अपना नहीं बनाता, अपने निज भाव को ही अपने जान ग्रहण करता है ॥३००॥

अब इस अर्थ का कलशरूप काव्य कहते हैं—**सिद्धांतो** इत्यादि। **अर्थ**—जिनके चित्त का चरित्र उज्वल (उत्कट) है, ऐसे मोक्ष के इच्छुक पुरुष हैं वे इस सिद्धान्त का सेवन करो 'जो मैं तो शुद्ध चैतन्य-

१. परोदये भावे पाठोयं तात्पर्यवृत्तौ।

परद्रव्यग्रहं कुर्वन् बध्येतैवापराधवान् ।
बध्येतानपराधो न स्वद्रव्ये संवृतो मुनिः ॥ १८६ ॥

थेयाई अवराहे कुव्वदि जो सो उ संकिदो भमई ।
मा वज्भेज्जं केणवि चोरोत्ति जणम्मि वियरंतो ॥ ३०१॥
जो ण कुणइ अवराहे सो णिस्संको दु जणवए भमदि ।
णवि तस्स वज्झिदुं जे चिंता उप्पज्जदि कयाइ ॥ ३०२ ॥
एवंहि सावराहो वज्झामि अहं तु संकिदो चेया ।
जइ पुण णिरवराहो णिस्संकोहं ण वज्झामि ॥३०३॥(त्रिकलम्)

स्तेयादीनपराधान् करोति यः स तु शंकितो भ्रमति ।
मा बध्ये केनापि चौर इति जने विचरन् ॥३०१॥
यो न करोत्यपराधान् स निश्शंकस्तु जनपदे भ्रमति ।
नापि तस्य बद्धुं यत् चिन्तोत्पद्यते कदाचित् ॥३०२॥

रूपेण ? **मा वज्भेहं केणवि चोरोत्ति जणम्मि वियरंतो** जने विचरन् माहं बध्ये केनापि तलवरादिना। किं कृत्वा ? चौर इति मत्वा । इत्यन्वयदृष्टांतगाथा गता । **जो ण कुणदि अवराहे सो णिस्संको दु जणवदे भमदि**

मय एक परम ज्योति ही सदा हूं और ये जो अनेक प्रकार के भिन्न लक्षणरूप भाव हैं मैं वे नहीं हूं क्योंकि वे सभी परद्रव्य हैं । इसका भावार्थ सुगम है ।

आगे कहते हैं कि परद्रव्य को जो ग्रहण करता है वह अपराध वाला है, बंध में पड़ता है; और जो निजद्रव्य में संतुष्ट है वह निरपराधी है नहीं बंधता ऐसी सूचनिका का अगले कथन का श्लोक कहते हैं—**परद्रव्य** इत्यादि । **अर्थ**—जो परद्रव्य को ग्रहण करता है वह तो अपराधी है, वही बंध में पड़ता है; और जो अपने द्रव्य में ही संतुष्ट है परद्रव्य को नहीं ग्रहण करता वह यतीश्वर अपराध रहित है वह नहीं बंधता ॥१८६॥

आगे इस कथन को दृष्टांतपूर्वक गाथा में कहते हैं;—**[यः]** जो पुरुष **[स्तेयादीन् अपराधान्]** चोरी आदि अपराधों को **[करोति]** करता है **[स तु]** वह **[शंकितो भ्रमति]** ऐसी शंका सहित हुआ भ्रमता है कि **[जने विचरन्]** लोक में विचरता हुआ मैं **[चौर इति]** चोर ऐसा मालूम होने पर **[केनापि मा बध्ये]** किसी से पकड़ा न जाऊं **[यः]** जो **[अपराधान्]** कोई भी अपराध **[न करोति]** नहीं करता **[स तु]** वह पुरुष **[जनपदे]** देश में **[निःशंकः भ्रमति]** निशंक भ्रमता है **[तस्य]** उसको **[यत् बद्धुं चिंता]** बंधने की चिंता **[कदाचित् अपि]** कभी भी **[न उत्पद्यते]** नहीं उपजती (होती)

एवमस्मि सापराधो बध्येऽहं तु शंकितश्चेतयिता ।
यदि पुनर्निरपराधो निश्शंकोऽहं न बध्ये ॥३०३॥

यथात्र लोके य एव परद्रव्यग्रहणलक्षणमपराधं करोति तस्यैव बंधशंका संभवति । यस्तु तं न करोति तस्य सा न संभवति । तथात्मापि य एवाशुद्धः सन् परद्रव्यग्रहणलक्षणमपराधं करोति तस्यैव बंधशंका संभवति यस्तु शुद्धः संस्तं न करोति तस्य सा न संभवति, इति नियमः । अतः सर्वथा सर्वपरकीयभावपरिहारेण शुद्ध आत्मा गृहीतव्यः, तथा सत्येव निरपराधत्वात् ॥३०१।३०२।३०३॥

य स्तेयपरदाराद्यपराधं न करोति स निश्शंको जनपदे लोके भ्रमति । **णवि तस्स बज्झिदुं जे चिंता उप्पज्जदि कयावि** तस्य चिंता नोपद्यते कदाचिदपि जे अहो यस्मात्कारणात् वा निरपराधः, केन रूपेण चिंता नोत्पद्यते ? नाहं बध्ये केनापि चौर इति मत्वा । एवं व्यतिरेकदृष्टांतगाथा गता । **एवं हि सावराहो वज्झामि अहं तु संकिदो चेदा** यो रागादिपरद्रव्यग्रहणं स्वीकारं करोति स स्वस्वभावच्युतः सन् सापराधो भवति [1]सापराधोऽत्र शंकितो भवति । केन रूपेण ? बध्येऽहं कर्मतापन्नो ज्ञानावरणादिकर्मणा । ततः कर्मबंधभीतः प्रायश्चित्तं प्रति मरणरूपं दंडं ददाति **जो पुण णिरवराहो णिस्संकोहं ण बज्झामि** यस्तु पुनर्निरपराधो भवति सतु दृष्टश्रुतानुभूतभोगाकांक्षारूपनिदानबंधादि-समस्तविभावपरिणामरहितो भूत्वा निश्शङ्को भवति । केन रूपेण ? इति चेत्-रागाद्यपराधरहितत्वात् नाहं बध्ये केनापि कर्मणेति प्रतिक्रमणादिदंडं विनाप्यनंतज्ञानादिरूपनिर्दोषपरमात्मभावनयैव शुद्ध्यति इत्यन्वयव्यतिरेकदाष्टांतगाथा गता ॥३०१॥३०२॥३०३॥ अथ को हि नामायमपराधः ? इति पृच्छति;—**संसिद्धिराधसिद्धी साधिदमाराधिदं च**

[एवं अहं] ऐसे मैं **[सापराधः अस्मि]** जो अपराधसहित हूं **[तु]** तो **[बध्ये]** बँधूंगा ऐसी **[शंकितः]** शंकायुक्त **[चेतयिता]** आत्मा होता है **[यदि पुनः]** और जो **[निरपराधः]** निरपराध हूं तो **[अहं निशंकः]** मैं निःशंक हूं **[न बध्ये]** नहीं बँधूंगा । ऐसे ज्ञानी विचारता है ।

टीका—जैसे इस लोक में जो पुरुष परद्रव्य का ग्रहण करने वाला है वही अपराध को करता है, उसी के बंध की शंका होती है । और जो अपराध नहीं करता है उसके तो शंका संभव ही नहीं है । उसी तरह आत्मा भी यदि अशुद्ध हुआ परद्रव्य को ग्रहणस्वरूप अपराध करता है, उसी के बंध की शंका होती है । और जो आत्मा शुद्ध हुआ उस अपराध को नहीं करता उसके वह शंका भी नहीं होती, यह नियम है । इसलिये सर्वथा सब परद्रव्य के भाव का त्याग कर शुद्ध आत्मा को ग्रहण करना । ऐसा करने पर भी निरपराधपन है ।

भावार्थ—चोरी आदि अपराध करे तो बंधने की शंका हो, निरपराध के शंका क्यों हो ? उसी तरह आत्मा पर द्रव्य का ग्रहणरूप अपराध करे तो बंध की शंका होवे ही, यदि अपने को शुद्ध अनुभवे, पर को नहीं ग्रहण करे तो बंध की शंका कैसे हो ? इसलिये पर द्रव्य को छोड़ शुद्ध आत्मा का ग्रहण करना तभी निरपराध होता है ॥३०१।३०२।३०३॥

---

१. सापराधाच्छंकितो भवतीति पाठः ।

को हि नामायमपराधः ?—

संसिद्धिराधसिद्धं साधियमाराधियं च एयट्ठं ।
अवगयराधो जो खलु चेया सो होइ अवराधो ॥३०४॥
जो[1] पुण णिरवराधो चेया णिस्संकिओ उ सो होइ ।
आराहणाए[2] णिच्चं वट्टेइ अहं ति जाणंतो ॥३०५॥ (युग्मम्)

संसिद्धिराधसिद्धं साधितमाराधितं चैकार्थं ।
अपगतराधो यः खलु चेतयिता स भवत्यपराधः ॥३०४॥
यः पुनर्निरपराधश्चेतयिता निश्शंकितस्तु स भवति ।
आराधनया नित्यं वर्तते, अहमिति जानन् ॥३०५॥

परद्रव्यपरिहारेण शुद्धस्यात्मनः सिद्धिः साधनं वा राधः अपगतो राधो यस्य चेतयितुः सोऽपराधः। अथवा अपगतो राधो यस्य भावस्य सोऽपराधस्तेन सह यश्चेतयिता वर्तते स सापराधः स तु परद्रव्यग्रहणसद्भावेन शुद्धात्मसिद्ध्यभावाद्बंधशंकासंभवे सति स्वयमशुद्धत्वादनारा-

---

एयट्ठो कालत्रयवर्तिसमस्तमिथ्यात्वविषयकषायादिविभावपरिणामरहितत्वेन निर्विकल्पसमाधौ स्थित्वा निजशुद्धात्माराधनं सेवनं राध इत्युच्यते संसिद्धिः सिद्धिरिति साधितमित्याराधितं च तस्यैव राधशब्दस्य पर्यायनामानि। **अवगदराधो जो खलु चेदा सो होदि अवराहो** अपगतो विनष्टो राधः शुद्धात्माराधना यस्य पुरुषस्य स पुरुष एवाभेदेन भवत्यपराधः। अथवा अपगतो विनष्टो राधः शुद्धात्माराधः शुद्धात्माराधना यस्य रागादिविभावपरिणामस्य स भवत्यपराधः सहापराधेन वर्तते यः स सापराधः, चेतयितात्मा तद्विपरीतः त्रिगुप्तिसमाधिस्थो निरपराध इति। अथ हे भगवन् किमनेन शुद्धात्माराधनाप्रयासेन यतः प्रतिक्रमणाद्यनुष्ठानेनैव निरपराधो भवत्यात्मा, कस्मात् ? इति चेत्, सापराधस्याप्रतिक्रमणादेर्बोध-

---

आगे पूछते हैं कि यह अपराध क्या है ? उसका उत्तर अपराध का स्वरूप कहते हैं;—**[संसिद्धराधसिद्धं]** संसिद्ध, राध, सिद्ध **[साधितं च आराधितं]** साधित और आराधित **[एकार्थं]** ये शब्द एकार्थ हैं। इसलिये **[यः खलु चेतयिता]** जो आत्मा **[अपगतराधः]** राध से रहित हो **[सः]** वह आत्मा **[अपराधः भवति]** अपराध है **[यः पुनः]** और जो **[चेतयिता]** आत्मा **[निरपराधः]** अपराधी नहीं है **[सः तु]** वह **निःशंकितः]** शंकारहित **[भवति]** है और अपने को **[अहं इति]** में हूं ऐसा **[जानन्]** जानता हुआ **[आराधनया]** आराधना कर **[नित्यं वर्तते]** हमेशा वर्तता है।

टीका—पर द्रव्य का परिहार करके जो शुद्ध आत्मा की सिद्धि अथवा साधन उसे राध कहते हैं। जिस आत्मा के राध अर्थात् शुद्ध आत्मा की सिद्धि अथवा साधन दूरवर्ती हों वह आत्मा अपराध है। अथवा इसकी दूसरी व्युत्पत्ति (समास विग्रह) ऐसी कि जिस भाव का राध दूरवर्ती हो

---

१. नेयं गाथाऽत्र तात्पर्यवृत्तौ। २. आराहणाइ इत्यपि पाठः।

धक एव स्यात् । यस्तु निरपराधः स समग्रपरद्रव्यपरिहारेण शुद्धात्मसिद्धिसद्भावाद्बंधशंकाया असंभवे सति, उपयोगैकलक्षणशुद्ध आत्मैक एवाहमिति निश्चिन्वन् नित्यमेव शुद्धात्मसिद्धिलक्षणयाराधनया वर्तमानत्वादाराधक एव स्यात् ॥ ३०४ । ३०५ ॥

अनवरतमनंतैर्बध्यते सापराधः स्पृशति निरपराधो बंधनं नैव जातु ।
नियतमयमशुद्धं स्वं भजन् सापराधो भवति निरपराधः साधु शुद्धात्मसेवी ॥१८७॥

शब्दवाच्यापराधाविनाशकत्वेन विषकुंभत्वे सति प्रतिक्रमणादेर्दोषशब्दवाच्यापराधविनाशकत्वेनामृतकुंभत्वात् इति । तथा चोक्तं चिरंतनप्रायश्चित्तग्रंथे—'अपडिक्कमणं अपडिसरणं अप्पडिहारो अधारणा चेव । अणियत्तीय अणिंदा अगरुहाऽसोहीय विसकुंभो ॥ १ ॥ "पडिकमणं पडिसरणं पडिहरणं धारणा णियत्तीय । णिंदा गरुहा सोही अट्ठविहो अमयकुंभो दु ॥ २ ॥" ॥ ३०४ । ३०५ ॥ अत्र पूर्वपक्षे परिहारः—**पडिकमणमित्यादि** । **पडिकमणं** प्रतिक्रमणं कृतदोषनिराकरणं । **पडिसरणं** प्रतिसरणं सम्यक्त्वादिगुणेषु प्रेरणं । **पडिहरणं** प्रतिहरणं मिथ्यात्वरागादिदोषेषु निवारणं **धारणा** पंचनमस्कारप्रभृतिमंत्रप्रतिमादिबहिर्द्रव्यावलंबनेन चित्तस्थिरीकरणं धारणा । **णियत्तीय** बहिरंगविषयकषायादीहागतचित्तस्य निवर्तनं निवृत्तिः । **णिंदा** आत्मसाक्षिदोषप्रकटनं निंदा **गरुहा** गुरुसाक्षिदोषप्रकटनं गर्हा । **सोहिय** दोषे सति प्रायश्चित्तं गृहीत्वा विशुद्धिकारणं शुद्धिः । इत्यष्टविकल्परूपशुभोपयोगो यद्यपि मिथ्यात्वादिविषयकषायपरिणतिरूपाशुभोपयोगापेक्षया सविकल्पसरागचारित्रावस्थायाममृतकुंभो भवति । तथापि रागद्वेषमोहख्यातिपूजालाभदृष्टश्रुतानुभूतभोगाकांक्षारूपनिदानबंधादिसमस्तपरद्रव्यालंबनविभावपरिणामशून्या, चिदानंदैकस्व-

---

उस भाव को अपराध कहते हैं। उस अपराध सहित जो आत्मा वर्ते वह आत्मा सापराध है। ऐसा आत्मा परद्रव्य के ग्रहण के सद्भाव से, शुद्ध आत्मा की सिद्धि के अभाव से, उसके बंध की शंका का संभव होने से, आप स्वयं अशुद्धपन से आराधना करने वाला नहीं है। और जो आत्मा निरपराध है वह समस्त परद्रव्य के परिग्रह का परिहार करके शुद्ध आत्मा की सिद्धि के सद्भाव से उसके बंध की शंका के न होने से ऐसा निश्चय करता वर्तता है 'कि मैं उपयोग लक्षण वाला एक शुद्ध आत्मा ही हूं वह आत्मा नित्य ही शुद्ध आत्मा की सिद्धि लक्षण वाली आराधनायुक्त सदा वर्तता है, इसलिये आराधक ही है।

भावार्थ—संसिद्धि, राध, सिद्धि, साधित और आराधित—इन शब्दों का अर्थ एक ही है। यहां शुद्ध आत्मा की सिद्धि अथवा साधन का नाम राध है। जिसके यह नहीं है वह आत्मा सापराध है, और जिसके यह हो वह निरपराध है। सापराध के बंध की शंका होती है इसलिये अनाराधक है, और निरपराध निश्शंक हुआ अपने उपयोग में लीन होता है तब बंध की शंका नहीं होती, तब वह सम्यग्दर्शन ज्ञान चारित्र तप का एक भावरूप निश्चय आराधना का आराधक ही है ॥३०४।३०५॥

अब इस अर्थ का कलशरूप काव्य कहते हैं—**अनवरत** इत्यादि। **अर्थ**—जो आत्मा सापराध है वह तो निरंतर अनंत पुद्गल परमाणुरूप कर्मों से बंधता है; और जो निरपराध है वह बंधन को कभी स्पर्शन नहीं करता। तथा यह सापराध आत्मा तो अपने आत्मा को नियम से अशुद्ध ही सेवन करके सापराध ही होता है और जो निरपराध है वह अच्छी तरह शुद्ध आत्माका सेवन करनेवाला होता है॥१८७॥

ननु किमनेन शुद्धात्मोपासनप्रयासेन यतः प्रतिक्रमणादिनैव निरपराधो भवत्यात्मा सापराधस्याप्रतिक्रमणादेस्तदनपोहकत्वेन विषकुम्भत्वे सति प्रतिक्रमणादेस्तदपोहकत्वेनामृतकुम्भत्वात् । उक्तं च व्यवहाराचारसूत्रे—

अपडिकमणं अपरिसरणं अप्पडिहारो अधारणा चेव ।
अणियत्ती य अणिंदाऽगरुहाऽसोहीय विसकुंभो ॥ १ ॥
पडिकमणं पडिसरणं परिहारो धारणा णियत्ती य ।
णिंदा गरुहा सोही अट्ठविहो अमयकुंभो दु ॥ २ ॥

अत्रोच्यते—

पडिकमणं [1]पडिसरणं परिहारो धारणा णियत्ती य ।
णिंदा गरहा सोही अट्ठविहो होइ विसकुंभो ॥ ३०६ ॥
अपडिकमणं अप्पडिसरणं अप्परिहारो अधारणा चेव ।
अणियत्ती य अणिंदाऽगरहाऽसोही अमयकुंभो ॥ ३०७ ॥ (युग्मम्)

प्रतिक्रमणं प्रतिसरणं परिहारो धारणा निवृत्तिश्च ।
निंदा गर्हा शुद्धिः अष्टविधो भवति विषकुंभः ॥३०६॥

भावविशुद्धात्मालंबनभरितावस्था निर्विकल्पशुद्धोपयोगलक्षणा, **अपडिकमणं** इति गाथाकथितक्रमेण ज्ञानिजनाश्रितनिश्चयाप्रतिक्रमणाविरूपा तु या तृतीया भूमिस्तदपेक्षया वीतरागचारित्रस्थितानां पुरुषाणां विषकुंभ एवेत्यर्थः । किं च विशेषः—अप्रतिक्रमणं द्विविधं भवति ज्ञानिजनाश्रितं, अज्ञानिजनाश्रितं चेति । अज्ञानिजनाश्रितं यदप्रतिक्रमणं तद्विषयकषायपरिणतिरूपं भवति । ज्ञानिजीवाश्रितमप्रतिक्रमणं तु शुद्धात्मसम्यक्श्रद्धानज्ञानानुष्ठानलक्षणं त्रिगुप्तिरूपं । तच्च

आगे व्यवहारनय का आलम्बन करने वाला तर्क करता है कि इस शुद्ध आत्मा के सेवन से क्या लाभ है ? क्योंकि प्रतिक्रमण आदि प्रायश्चित से ही आत्मा निरपराध हो जाता है । सापराध के अप्रतिक्रमणादि अपराध के दूर करने वाले नहीं हैं इसलिए विषकुंभ कहे गये हैं, और निरपराध के प्रतिक्रमणादिक उस अपराध के दूर करने वाले हैं; इसलिये वे अमृतकुंभ कहे गये हैं ।

यही व्यवहार के कहने वाले आचार सूत्र में कहा है अप्पडि इत्यादि । **अर्थ**—अप्रतिक्रमण, अप्रतिसरण, अपरिहार, अधारणा, अनिवृत्ति, अनिंदा, अगर्हा और अशुद्धि ऐसे आठ प्रकार के लगे हुये दोष का प्रायश्चित न करना वह तो विषकुंभ है और प्रतिक्रमण, प्रतिसरण, परिहार, धारणा, निवृत्ति, निंदा, गर्हा और शुद्धि, इस तरह आठ प्रकार से लगे हुये दोष का प्रायश्चित करना वह अमृतकुंभ है । ऐसा व्यवहारनय के पक्ष वाले ने तर्क किया था ।

---

१. तात्पर्यवृत्तौ 'परिहरणं धारणा णियत्तीय' इति पाठः ।

अप्रतिक्रमणमप्रतिसरणमपरिहारोऽधारणा चैव ।
अनिवृत्तिश्चानिंदाऽगर्हाऽशुद्धिरमृतकुम्भः ॥३०७॥

यस्तावदज्ञानिजनसाधारणोऽप्रतिक्रमणादिः स शुद्धात्मसिद्ध्यभावस्वभावत्वेन स्वयमेवापराधत्वाद् विषकुम्भ एव किं तस्य विचारेण । यस्तु द्रव्यरूपः प्रतिक्रमणादिः स सर्वापराधविषदोषापकर्षणसमर्थत्वेनामृतकुम्भोऽपि प्रतिक्रमणाऽप्रतिक्रमणादिविलक्षणाप्रतिक्रमणादिरूपां तार्तीयीकीं भूमिमपश्यतः स्वकार्यकरणासमर्थत्वेन विपक्षकार्यकारित्वाद्विषकुम्भ एव स्यात् । अप्रतिक्रमणादिरूपा तृतीयभूमिस्तु स्वयं शुद्धात्मसिद्धिरूपत्वेन सर्वापराधविषदोषाणां सर्वंकषत्वात् साक्षात्स्वयममृतकुम्भो भवतीति व्यवहारेण द्रव्यप्रतिक्रमणादेरपि, अमृतकुम्भत्वं साधयति। तयैव च निरपराधो भवति चेतयिता। तदभावे द्रव्यप्रतिक्रमणादिरप्यपराध एव। अतस्तृतीयभूमिकयैव निरपराधत्वमित्यवतिष्ठते, तत्प्राप्त्यर्थ एवायं द्रव्यप्रतिक्रमणादिः, ततो मेति मंस्था यत्प्रतिक्रमणादीन् श्रुतिस्त्याजयति किंतु द्रव्यप्रतिक्रमणादिना न मुञ्चति अन्यदपि प्रतिक्रमणाप्रतिक्रमणाद्यगोचराप्रतिक्रमणादिरूपं शुद्धात्मसिद्धिलक्षणमतिदुष्करं किमपि कारयति।

अज्ञानिजनाश्रितमप्रतिक्रमणं सरागचारित्रलक्षणशुभोपयोगापेक्षया यद्यप्यप्रतिक्रमणं भण्यते तथापि वीतरागचारित्रापेक्षया तदेव निश्चयप्रतिक्रमणं। कस्मात् ? इति चेत्, समस्तशुभाशुभास्रवदोषनिराकरणरूपत्वादिति। ततः स्थितं तदेव

भावार्थ—जब तक ज्ञान ज्ञानरूप नहीं होता ज्ञेय ज्ञेयरूप नहीं होता तब तक राग-द्वेष उत्पन्न होते हैं। इसलिये यह ज्ञान अज्ञान भाव को दूर करके ज्ञानरूप हो अर्थात् जिस कारण ज्ञान में भाव अभाव ये दो अवस्थायें होती हैं वे मिट जांय और ज्ञान पूर्णस्वभाव को प्राप्त हो जाय। यह प्रार्थना है ॥२१७॥

आगे कहते हैं कि रागद्वेष मोह से दर्शन ज्ञान चारित्र का घात होता है। दर्शनज्ञान चारित्र पुद्गल द्रव्य में नहीं हैं, आत्मा ही में दर्शन ज्ञान चारित्र हैं, और आत्मा में ही अज्ञान से राग द्वेष मोह हैं इसलिए अज्ञान से अपना ही घात होता है;—**[दर्शनज्ञानचारित्रं]** दर्शन ज्ञान चारित्र **[अचेतने विषये तु]** अचेतन विषय में तो **[किंचिदपि नास्ति]** कुछ भी नहीं हैं **[तस्मात्]** इसलिये **[तेषु विषयेषु]** उन विषयों में **[चेतयिता]** आत्मा **[किं हंति]** क्या घात करे ? **[दर्शनज्ञानचारित्रं]** दर्शन ज्ञान चारित्र **[अचेतने कर्मणि तु]** अचेतन कर्म में **[किंचिदपि नास्ति]** कुछ भी नहीं हैं। **[तस्मात्]** इसलिये

१. 'पुनर्बोध्यतां याति बोध्यं' इत्यपि पाठः।

णाणस्स दंसणस्स य भणिओ घाओ तहा चरित्तस्स।
णवि तहिं पुग्गलदव्वस्स कोऽवि घाओ उ णिद्दिट्ठो ॥३६९॥
जीवस्स जे गुणा केइ णत्थि खलु ते परेसु दव्वेसु।
तह्मा सम्माइट्ठिस्स णत्थि रागो उ विसएसु ॥३७०॥
रागो दोसो मोहो जीवस्सेव य अणण्णपरिणामा।
एएण कारणेण उ सद्दादिसु णत्थि रागादि ॥३७१॥ (षट्कम्)

दर्शनज्ञानचरित्रं किंचिदपि नास्ति त्वचेतने विषये।
तस्मात्किं हंति चेतयिता तेषु विषयेषु ॥३६६॥
दर्शनज्ञानचरित्रं किंचिदपि नास्ति त्वचेतने कर्मणि।
तस्मात्किं हंति चेतयिता तत्र कर्मणि ॥३६७॥
दर्शनज्ञानचरित्रं किंचिदपि नास्ति त्वचेतने काये।
तस्मात् किं हंति चेतयिता तेषु कायेषु ॥३६८॥
ज्ञानस्य दर्शनस्य भणितो घातस्तथा चरित्रस्य।
नापि तत्र पुद्गलद्रव्यस्य कोऽपि घातस्तुनिर्दिष्टः ॥३६९॥
जीवस्य ये गुणाः केचिन्न संति खलु ते परेषु द्रव्येषु।
तस्मात्सम्यग्दृष्टेर्नास्ति रागस्तु विषयेषु ॥३७०॥
रागो द्वेषो मोहो जीवस्यैव चानन्यपरिणामाः।
एतेन कारणेन तु शब्दादिषु न संति रागादयः ॥३७१॥

द्रव्यकर्मसु औदारिकादिपंचकायेषु। कथं भूतेषु तेषु? अचेतनेषु। तस्मात्किं घातयते चेतयिता आत्मा तेषु जडस्वरूप-विषयकर्मकायेषु? न किमपि। किंच शब्दादिपंचेंद्रियविषयाभिलाषरूपो ज्ञानावरणादिद्रव्यकर्मबंधकारणभूतः कायम-

---

[तत्र कर्मणि] उस कर्म में [चेतयिता] आत्मा [किं हंति] क्या घात करे? [दर्शनज्ञानचारित्रं] दर्शन ज्ञान चारित्र [अचेतने काये तु] अचेतन काय में [किंचिदपि नास्ति] कुछ भी नहीं है [तस्मात्] इसलिये [तेषु कायेषु] उन कायों में [चेतयिता] आत्मा [किं हंति] क्या घाते? [घातः] घात [ज्ञानस्य दर्शनस्य तथा चारित्रस्य] ज्ञान का दर्शन का तथा चारित्र का [भणितः] कहा है [तत्र] वहां [पुद्गलद्रव्यस्य तु] पुद्गल द्रव्य का तो [कोपि घातः] कुछ भी घात [नापि निर्दिष्टः] नहीं कहा। [ये केचित्] जो कुछ [जीवस्य गुणाः] जीव के गुण हैं [ते] वे [खलु] निश्चय से [परेषु द्रव्येषु]

यद्धि यत्र भवति तत्तद्घाते हन्यत एव यथा प्रदीपघाते प्रकाशो हन्यते । यत्र च यद्भवति तत्तद्घाते हन्यते एव यथा प्रकाशघाते प्रदीपो हन्यते । यत्तु यत्र न भवति तत्तद्घाते न हन्यते यथा घटघाते घटप्रदीपो न हन्यते। यत्र यन्न भवति तत्तद्घातेन हन्यते यथा घटप्रदीपघाते घटो न हन्यते । तथात्मनो धर्मा दर्शनज्ञानचारित्राणि पुद्गलद्रव्यघातेऽपि न हन्यंते, नच दर्शनज्ञानचारित्राणां घातेऽपि पुद्गलद्रव्यं हन्यते, एवं दर्शनज्ञानचारित्राणि पुद्गलद्रव्ये न भवंतीत्यायाति अन्यथा तद्घाते' पुद्गलद्रव्यघातस्य, पुद्गलद्रव्यघाते तद्घातस्य दुर्निवारत्वात् । यत एवं ततो ये यावन्तः

मत्वरूपश्च योऽसौ मिथ्यात्वरागादिपरिणामो मनसि तिष्ठति तस्य घातः कर्तव्यः ते च शब्दादयो रागादीनां बहिरंग-कारणभूतास्त्याज्याः—इति भावार्थः । तस्यैव पूर्वोक्तगाथात्रयस्य विशेषविवरणं करोति—तद्यथा—**णाणस्स दंसणस्स य भणिदो घादो तहा चरित्तस्स** शब्दादिपंचेंद्रियाभिलाषरूपेण कायममत्वरूपेण वा ज्ञानावरणादिकर्मबंधनिमित्तमनं-तानुबध्यादिरागद्वेषरूपं यन्मनसि मिथ्याज्ञानं तिष्ठति तस्य मिथ्याज्ञानस्य निर्विकल्पसमाधिप्रहरणेन सर्वज्ञैर्घातो भणितः न केवलं मिथ्याज्ञानस्य मिथ्यादर्शनस्य च । तथैव मिथ्यात्वचारित्रस्य च **णवि तह्मि कोवि पुग्गलदव्वे घादो दु णिद्दिट्ठो** न च तत्राचेतने शब्दादिविषयकर्मकायरूपे पुद्गलद्रव्ये कोऽपि घातो निर्दिष्टः। किं च यथा घटाधारभूते प्रदीपे हते सति घटो हतो न भवति तथा रागादिनिमित्तभूते शब्दादिपंचेंद्रियविषये हतेऽपि सति मनसि गता रागादयो हता न भवंति नचान्यस्य घाते कृते सत्यन्यस्य घातो भवति । कस्मात् ? अतिप्रसंगादिति भावः । **जीवस्स जे गुणा केई णत्थि ते खलु परेसु दव्वेसु** यस्माज्जीवस्य ये केचन सम्यक्त्वादयो गुणास्ते परेषु परद्रव्येषु शब्दादिविषयेषु न संति खलु स्फुटं **तह्मा सम्मादिट्ठिस्स णत्थि रागो दु विसयेसु** तस्मात्कारणान्निर्विषयस्वशुद्धात्मभावनोत्थसुखतृप्तस्य सम्यग्दृष्टेर्विषयेषु रागो नास्तीति **रागो दोसो मोहो जीवस्स दु जे अणण्णपरिणामा** रागद्वेषमोहा यस्मादज्ञा-

---

परद्रव्यों में [न संति] नहीं हैं [तस्मात्] इसलिये [सम्यग्दृष्टेः] सम्यग्दृष्टि के [विषयेषु] विषयों में [रागस्तु] राग ही [नास्ति] नहीं है [रागः द्वेषः मोहः] राग-द्वेष-मोह ये सब [जीवस्यैव च] जीव के ही [अनन्यपरिणामाः] एक (अभेद) रूप परिणाम हैं [एतेन कारणेन तु] इसी कारण [रागादयः] रागादिक [शब्दादिषु] शब्दादिकों में [न संति] नहीं हैं ।

टीका—निश्चय से जो जिसमें होता है वह उसके घात होने पर घाता जाता है । जैसे दीपक में प्रकाश है सो दीपक के घात होने से प्रकाश भी हना जाता है । और जिसमें जो है, उसके घात होने से उस आधार का भी घात होता है; जैसे प्रकाश का घात होने से दीपक भी हना जाता है । जो जिसमें नहीं है वह उसके घात होने से नहीं हना जाता जैसे घट का घात होने से दीपक नहीं हना जाता । तथा जिसमें जो नहीं है वह उसके घात होने से नहीं हना जा सकता । जैसे घड़े में दीपक का घात होने से घड़ा नहीं घाता जाता । आत्मा के धर्म दर्शन-ज्ञान और चारित्र पुद्गलद्रव्य के घात होने पर भी नहीं घाते जाते, तथा दर्शन ज्ञान और चारित्र का घात होने पर पुद्गलद्रव्य भी नहीं घाता जाता । इस तरह दर्शन ज्ञान

---

१. आत्मधर्मघाते ।

केनापि जीवगुणास्ते सर्वेऽपि परद्रव्येषु न संतीति सम्यक् पश्यामः। अन्यथा अत्रापि जीवगुणघाते पुद्गलद्रव्यघातस्य पुद्गलद्रव्यघाते जीवगुणघातस्य च दुर्निवारत्वात्। यद्येवं तर्हि कुतः सम्यग्दृष्टेर्भवति रागो विषयेषु? न कुतोऽपि। तर्हि रागस्य कतरा खनिः? रागद्वेषमोहा हि जीवस्यैवाज्ञानमयाः परिणामास्ततः परद्रव्यत्वाद्विषयेषु न संति, अज्ञानाभावात्सम्यग्दृष्टौ तु न भवंति। एवं ते विषयेष्वसंतः सम्यग्दृष्टेर्न भवंतो न भवंत्येव ॥३६६।३७१॥

रागद्वेषाविह हि भवति ज्ञानमज्ञानभावात्
तौ वस्तुत्वप्रणिहितदृशा दृश्यमानौ न किंचित्।
सम्यग्दृष्टिः क्षपयतु ततस्तत्त्वदृष्ट्या स्फुटंतौ
ज्ञानज्योतिर्ज्वलति सहजं येन पूर्णाचलार्चिः ॥२१८॥

निर्जीवस्याशुद्धनिश्चयेनाभिन्नपरिणामः। **एदेन कारणेण दु सद्दादिसु णत्थि रागादी** तेन कारणेन शब्दादिमनोज्ञामनोज्ञपंचेंद्रियविषयेष्वचेतनेषु यद्यप्यज्ञानी जीवो भ्रांतिज्ञानेन शब्दादिषु रागादीन् कल्पयत्यारोपयति तथापि शब्दा-

---

और चारित्र पुद्गलद्रव्य में नहीं हैं। यदि ऐसा न हो तो दर्शन ज्ञान चारित्र का घात होने से पुद्गलद्रव्य का घात अवश्य हो जावेगा और पुद्गलद्रव्य का घात होने से दर्शन-ज्ञान और चारित्र का घात अवश्य हो जावेगा। इसीलिये आचार्य कहते हैं कि जीवद्रव्य के गुण हैं वे सभी परद्रव्यों में नहीं हैं। ऐसे पुद्गल को अच्छीतरह हम देखते हैं। यदि ऐसा न हो तो यहांपर भी जीव के गुणका घात होने से पुद्गलद्रव्य का घात अवश्य होना चाहिये और पुद्गलद्रव्य का घात होने से जीव गुण का घात अवश्य होना चाहिये। सो ऐसा नहीं होता। अब विचारते हैं कि ऐसा होनेपर सम्यग्दृष्टि के विषयों में राग किस कारण से होता है? वहां कहते हैं कि किसी भी कारण से नही होता। तब पूछते हैं कि राग के उपजने की कौनसी खान है? वहां कहते हैं कि रागद्वेष मोह जीव के ही अज्ञानमय परिणाम हैं। यह अज्ञान ही रागादिक के उपजने की खान है। क्योंकि विषय परद्रव्य हैं, उनमें रागादिक अज्ञानमय परिणाम नहीं है। जब अज्ञान का अभाव हो जावे तब आत्मा सम्यग्दृष्टि होवे तब उसमें रागादिक भी नहीं हो सकते इस तरह रागादिक विषयों में न होते हुए सम्यग्दृष्टि के न होने से नहीं होते।

भावार्थ—दर्शन-ज्ञान-चारित्र आदि जितने जीव के गुण हैं वे अचेतन पुद्गलद्रव्य में नहीं हैं। आत्मा के अज्ञानमय परिणाम से ही राग-द्वेष-मोह होते हैं, उनसे अपने ही दर्शन-ज्ञानचारित्र आदि गुण घाते जाते हैं और वे राग द्वेष मोह जीव के ही अस्तित्व में अज्ञान से उत्पन्न होते हैं। जब अज्ञान का अभाव हो जाने पर सम्यग्दृष्टि बन जाता हैं तब वे राग-द्वेष-मोह नहीं उत्पन्न होते। ऐसा होनेपर शुद्धद्रव्य की दृष्टि में पुद्गल में भी रागद्वेष मोह नहीं है और सम्यग्दृष्टि जीव में भी नहीं हैं। इसतरह वे दोनों में ही नहीं हैं। तथा पर्यायदृष्टि में जीव के अज्ञान अवस्था में हैं, ऐसा जानना ॥३६६।३७१॥

अब इस अर्थ का कलशरूप काव्य कहते हैं—**रागद्वेष** इत्यादि। **अर्थ**—इस आत्मा में ज्ञान ही अज्ञानभाव से रागद्वेषरूप परिणमित होता है। वास्तव में स्वायिदृष्टि से देखे जांय तो रागादिक कुछ

रागद्वेषोत्पादकं तत्त्वदृष्ट्या नान्यद् द्रव्यं वीक्ष्यते किंचनापि ।
सर्वद्रव्योत्पत्तिरंतश्चकास्ति व्यक्तात्यंतं स्वस्वभावेन यस्मात् ॥२१९॥

अरणदविएण अरणदवियस्स ण कीरए गुणुप्पाओ[1] ।
तह्मा उ सव्वदव्वा उप्पज्जंते सहावेण ॥३७२॥

अन्यद्रव्येणान्यद्रव्यस्य न क्रियते गुणोत्पादः ।
तस्मात्तु सर्वद्रव्याण्युत्पद्यंते स्वभावेन ॥३७२॥

न च जीवस्य परद्रव्यं रागादीनुत्पादयतीति शंक्यं—अन्यद्रव्येणान्यद्रव्यगुणोत्पादकरणस्यायोगात् । सर्वद्रव्याणां स्वभावेनैवोत्पादात् । तथाहि—मृत्तिका कुम्भभावेनोत्पद्यमाना किं कुम्भकारस्वभावेनोत्पद्यते किं मृत्तिकास्वभावेन ? यदि कुम्भकारस्वभावेनोत्पद्यते तदा कुम्भकरणा-

---

विषु रागादयो न संति । कस्मात् ? शब्दादीनामचेतनत्वात् । ततःस्थितं तावदेव रागद्वेषद्वयमुदयते बहिरात्मनो यावन्मनसि त्रिगुप्तिरूपं स्वसंवेदनज्ञानं नास्ति । इति गाथाषट्कं गतं ॥३६६–३७१॥ एवमेतदायाति शब्दादीद्रियविषया अचेतनाश्चेतनरागाद्युत्पत्तौ निश्चयेन कारणं न भवंति;— **अरणदविएण अरणदवियस्स णो कीरदे गुणविघादो** अन्यद्रव्येण बहिरंगनिमित्तभूतेन कुभकारादिनाऽन्यद्रव्यस्योपादानरूपस्य मृत्तिकादेर्न क्रियते । स कः ? चेतनस्याचेत-

---

भी नहीं हैं, द्रव्यरूप भिन्न पदार्थ नहीं हैं। इसलिये आचार्य प्रेरणा करते हैं कि सम्यग्दृष्टि उनको तत्त्वदृष्टिसे प्रकट देखकर नाश करे जिससे कि पूर्ण प्रकाशरूप अचल दीप्तिवाली स्वाभाविक ज्ञानज्योति प्रकाशित हो।

भावार्थ—रागद्वेष भिन्न द्रव्य नहीं हैं, जीव के अज्ञानभाव से होते हैं। इसलिये सम्यग्दृष्टि होके तत्त्वदृष्टि से देखो तो कुछ भी वस्तु नहीं। इस तरह देखने से घातिकर्म का नाश होके केवल ज्ञान उत्पन्न होता है ॥२१८॥

आगे कहते है कि अन्यद्रव्य से अन्यद्रव्य के गुण उत्पन्न नहीं होते । उसकी सूचना का काव्य— **रागद्वेषो** इत्यादि । **अर्थ**—तत्त्वदृष्टि से देखो तो रागद्वेष का उत्पन्न करने वाला अन्य द्रव्य कुछ भी नहीं दीखता, चेतन के ही परिणाम हैं । क्योंकि यह न्याय है कि सब द्रव्यों की उत्पत्ति अपने ही निज स्वभाव में अत्यंत प्रगट रूप शोभित होती है । अन्यद्रव्य में अन्य के गुणपर्यायों की उत्पत्ति नहीं है ॥२१९॥

आगे इस अर्थ को गाथा में कहते हैं;—**[अन्यद्रव्येण]** अन्यद्रव्य से **[अन्यद्रव्यस्य]** अन्यद्रव्य के **[गुणोत्पादः]** गुण का उत्पाद **[न क्रियते]** नहीं किया जा सकता **[तस्मात्तु]** इसलिये यह सिद्धांत है कि **[सर्वद्रव्याणि]** सभी द्रव्य **[स्वभावेन]** अपने अपने स्वभाव से **[उत्पद्यन्ते]** उत्पन्न होते हैं ।

टीका—ऐसी आशंका नहीं करनी चाहिए कि परद्रव्य जीव को रागादिक उत्पन्न कराता है; क्योंकि अन्यद्रव्य से अन्यद्रव्य के गुणों को उत्पन्न कराने की असमर्थता है । सब द्रव्यों में स्वभाव से ही उत्पाद होता है । यही दृष्टांत से दिखलाते हैं कि मृतिका घटभाव से उत्पन्न होती हुई कुंभकार के स्वभाव

---

१. तात्पर्यवृत्तौ गुणविघादो इति पाठः ।

हंकारनिर्भरपुरुषाधिष्ठितव्यापृतकरपुरुषशरीराकारः कुम्भः स्यात्, न च तथास्ति द्रव्यांतरस्वभावेन द्रव्यपरिणामोत्पादस्यादर्शनात् । यद्येवं तर्हि मृत्तिका कुम्भकारस्वभावेन नोत्पद्यते किंतु मृत्तिकास्वभावेनैव, स्वस्वभावेन द्रव्यपरिणामोत्पादस्य दर्शनात् । एवं च सति मृत्तिकायाः स्वस्वभावानतिक्रमान्न कुम्भकारः कुम्भस्योत्पादक एव मृत्तिकैव कुम्भकारस्वभावमस्पृशंती स्वस्वभावेन कुम्भभावेनोत्पद्यते । एवं सर्वाण्यपि द्रव्याणि स्वपरिणामपर्यायेणोत्पद्यमानानि किं निमित्तभूतद्रव्यांतरस्वभावेनोत्पद्यंते किं स्वस्वभावेन ? यदि निमित्तभूतद्रव्यांतरस्वभावेनोत्पद्यंते तदा निमित्तभूतपरद्रव्याकारस्तत्परिणामः स्यात्, नच तथास्ति द्रव्यांतरस्वभावेन द्रव्यपरिणामोत्पादस्यादर्शनात् । यद्येवं तर्हि न सर्वद्रव्याणि निमित्तभूतपरद्रव्यस्वभावेनोत्पद्यंते किंतु स्वस्वभावेनैव, स्वस्वभावेन द्रव्यपरिणामोत्पादस्य दर्शनात् । एवं च सति स्वस्वभावानतिक्रमात् सर्वद्रव्याणां निमित्तभूतद्रव्यांतराणि परिणामस्योत्पादकान्येव सर्वद्रव्याण्येव निमित्तभूतद्रव्यांतरस्वभावमस्पृशंति

नरूपेण, अचेतनस्य चेतनरूपेण वा चेतनाचेतनगुणघातो विनाशो न क्रियते यस्मात् । **तह्मा दु सव्वदव्वा उप्पज्जंते सहावेण** तस्मात्कारणान्मृत्तिकादिसर्वद्रव्याणि कर्तृणि घटादिरूपेण जायमानानि स्वकीयोपादानकारणेन मृत्तिकादिरूपेण जायंते न च कुंभकारादिबहिरंगनिमित्तरूपेण । कस्मात् इति चेत् । उपादानकारणसदृशं कार्यं भवतीति यस्मात् ।

से उत्पन्न होती है या मृत्तिका के स्वभाव से ? यदि कुंभकार के स्वभाव से उत्पन्न होती है तो जिसमें घट बनाने के अहंकार से भरा हुआ पुरुष विद्यमान है और जिसका हाथ घट बनाने का व्यापार करता है ऐसे पुरुष के आकार रूप घड़ा होना चाहिये अर्थात् कुम्हार के शरीर के आकार घड़ा बनना चाहिये । किन्तु ऐसा नहीं होता । क्योंकि अन्यद्रव्य के स्वभाव से अन्यद्रव्य के परिणाम का उत्पन्न होना नहीं देखते । यदि ऐसा है कि मृत्तिका कुंभकार के स्वभाव से तो उत्पन्न नहीं होती । तो किस तरह उत्पन्न होती है ? मृत्तिका स्वभाव से ही उत्पन्न होती है क्योंकि अपने स्वभाव से ही द्रव्य के परिणाम का उत्पाद देखा जाता है । ऐसा होने पर मृत्तिका को स्वभाव के उल्लंघन करने से कुंभकार घड़े को उत्पन्न करने वाला नहीं है । मिट्टी ही कुंभकार के स्वभाव को नहीं स्पर्शती, अपने ही स्वभाव से कुंभ भाव से उत्पन्न होती है । इसी तरह सब द्रव्य अपने परिणामरूप पर्याय से उत्पन्न होते हैं । क्या वे निमित्तभूत अन्यद्रव्य के स्वभाव से उत्पन्न होते हैं या अपने ही स्वभाव से उत्पन्न होते हैं ? यदि कहो कि निमित्तभूत अन्यद्रव्य के स्वभाव से उत्पन्न होते हैं तो निमित्तभूत परद्रव्य के आकार उसका परिणाम होना चाहिये । ऐसा नहीं होता क्योंकि अन्यद्रव्य के स्वभाव से अन्यद्रव्य के परिणाम का उत्पन्न होना नहीं देखा जाता । जब सभी द्रव्य निमित्तभूत परद्रव्य के स्वभाव से उत्पन्न नहीं होते तो अपने स्वभाव से ही उत्पन्न होते हैं । क्योंकि अपने स्वभाव से ही सब द्रव्यों के परिणाम का उत्पाद देखा जाता है । ऐसा होने पर सभी द्रव्यों के निमित्तभूत जो अन्यद्रव्य वे अन्यद्रव्य के परिणाम के उत्पन्न कराने वाले नहीं हैं । सभी द्रव्य निमित्तभूत अन्यद्रव्यों के स्वभाव को नहीं स्पर्शते अपने स्वभाव से अपने परिणाम भाव से उत्पन्न होते हैं इस कारण आचार्य कहते हैं

स्वस्वभावेन स्वपरिणामभावेनोत्पद्यंते। अतो न परद्रव्यं जीवस्य रागादीनामुत्पादकमुत्पश्यामो यस्मै कुप्यामः ॥३७२॥

यदिह भवति रागद्वेषदोषप्रसूतिः कतरदपि परेषां दूषणं नास्ति तत्र।
स्वयमयमपराधी तत्र सर्पत्यबोधो भवतु विदितमस्तं यात्वबोधोऽस्मि बोधः ॥२२०॥

रागजन्मनि निमित्ततां परद्रव्यमेव कलयंति ये तु ते।
उत्तरंति न हि मोहवाहिनीं शुद्धबोधविधुरांधबुद्धयः ॥२२१॥

तेन किं सिद्धं ? यद्यपि पंचेंद्रियविषयरूपेण शब्दादीनां बहिरंगनिमित्तभूतेनाज्ञानिजीवस्य रागादयो जायंते तथापि जीवस्वरूपा एव चेतना न पुनः शब्दादिरूपा अचेतना भवंतीति भावार्थः। एवं कोऽपि प्राथमिकशिष्यश्चित्तस्थानरागादीन्न जानाति बहिरंगशब्दादिविषयाणां रागादिनिमित्तानां घातं करोमीति निर्विकल्पसमाधिलक्षणभेदज्ञानाभावाच्चिंतयति

कि जो परद्रव्य है वह जीव के रागादिक के उत्पन्न करने वाला नहीं दीखता जिस पर हम कोप करें।

भावार्थ—आत्मा के रागादिक अपने ही अशुद्ध परिणाम हैं। निश्चयनय से विचारो तो इनके उत्पन्न करने वाला अन्यद्रव्य नहीं है। अन्यद्रव्य इनका निमित्तमात्र है। क्योंकि यह नियम है कि अन्यद्रव्य के अन्यद्रव्य गुणपर्याय उत्पन्न नहीं करते। इसलिये जो ऐसा मानते हैं कि मेरे रागादिक परद्रव्य ही उत्पन्न कराता है, ऐसा एकांत करते हैं वे नियम विभाग नहीं समझे, मिथ्यादृष्टि हैं। ये रागादिक जीव के सत्त्व में उत्पन्न होते हैं, परद्रव्य तो निमित्तमात्र है, ऐसा मानना सम्यग्ज्ञान है। इस कारण आचार्य ऐसा कहते हैं कि हम रागद्वेष की उत्पत्ति में अन्यद्रव्य पर क्यों कोप (गुस्सा) करें। राग-द्वेष का उपजना अपना ही अपराध है ॥३७२॥

अब इस अर्थ का कलश रूप काव्य कहते हैं—**यदिह** इत्यादि। **अर्थ**—जो इस आत्मा में राग-द्वेष रूप दोष की उत्पत्ति है वहां परद्रव्य का कुछ भी दोष नहीं है। उस आत्मा में यह आप अपराधी फैलता है। यह कथन प्रकट होवे और यह अज्ञान भी अस्त हो जाय। क्योंकि मैं तो ज्ञान स्वरूप हूं ऐसा मानना सम्यग्ज्ञान है॥

भावार्थ—अज्ञानी जीव राग-द्वेष की उत्पत्ति परद्रव्य से मानकर परद्रव्य पर कोप करता है कि मेरे परद्रव्य राग-द्वेष उत्पन्न करता है उसको दूर करूं। उसके समझाने को कहते हैं कि राग-द्वेष की उत्पत्ति अज्ञान से अपने में ही होती है, वे अपने ही अशुद्ध परिणाम हैं। सो यह अज्ञान नाश को प्राप्त होवे और सम्यग्ज्ञान प्रगट हो। आत्मा ज्ञानस्वरूप है ऐसा अनुभव करो। राग-द्वेष के उत्पन्न होने में परद्रव्य को उत्पन्न करने वाला मानकर उस पर कोप मत करो ऐसा उपदेश है ॥२२०॥

अब इसी अर्थ के दृढ़ करने को अगले कथन की सूचनिकारूप काव्य कहते हैं—**रागजन्मनि** **अर्थ**—जो पुरुष राग की उत्पत्ति में परद्रव्य का ही निमित्तपना मानते हैं, अपना कुछ भी हेतु नहीं मानते, वे मोहरूप नदी के पार नहीं उतरे हैं, क्योंकि शुद्धनय का विषयभूत जो आत्मा का स्वरूप उसके ज्ञान से रहित अंध बुद्धि वाले हैं।

णिंदियसंथुयवयणाणि पोग्गला परिणमंति बहुयाणि ।
ताणि सुणिऊण रूसदि तूसदि य अहं पुणो भणिदो ॥३७३॥
पोग्गलदव्वं सद्दत्तपरिणयं तस्स जइ गुणो अण्णो ।
तह्मा ण तुमं भणिओ किंचिवि किं रूससि अबुद्धो ॥३७४॥
असुहो सुहो व सद्दो ण तं भणइ सुणसु मंति सो चेव ।
ण य एइ विणिग्गहिउं सोयविसयमागयं सद्दं ॥ ३७५ ॥
असुहं सुहं च रूवं ण तं भणइ पिच्छ मंति सो चेव ।
णय एइ विणिग्गहिउं चक्खुविसयमागयं रूवं ॥ ३७६ ॥
असुहो सुहो व गंधो ण तं भणइ जिग्घ मंति सो चेव ।
णय एइ विणिग्गहिउं घाणविसयमागयं गंधं ॥ ३७७ ॥
असुहो सुहो व रसो ण तं भणइ रसय मंति सो चेव ।
ण य एइ विणिग्गहिउं रसणविसयमागयं तु रसं ॥ ३७८ ॥

तस्य संबोधनार्थं पूर्वं गाथाषट्केन सह सूत्रसप्तकं गतं ॥३७२॥ अथेन्द्रियमनोविषयेषु रागद्वेषौ मिथ्याज्ञानपरिणत एव जीवः करोतीत्याख्याति रूसदि तूसदि य एकेंद्रियविकलेंद्रियादिदुर्लभपरंपराक्रमेणातीतानंतकाले दृष्टश्रुतानुभूत-

---

भावार्थ—शुद्धनय का विषय आत्मा अनंतशक्ति को लिये चैतन्य चमत्कारमात्र नित्य एक है। उसमें यह स्वच्छता है कि जैसा निमित्त मिले वैसे आप परिणमता है। ऐसा नहीं कि जो जैसा परिणमावे वैसा परिणमन करे, अपना कुछ पुरुषार्थ नहीं हो। आत्मा के स्वरूप का जिनको ज्ञान नहीं है वे ऐसा मानते हैं कि आत्मा को परद्रव्य जैसा परिणमावे वैसे परिणमता है। ऐसा मानने वाले मोह की सेना अथवा नदी रागद्वेषादि, परिणाम उनसे पार नहीं होते, उनके राग-द्वेष नहीं मिटते। क्योंकि अपना पुरुषार्थ उनके होने में हो तो उनके मेटने में भी होना चाहिये और पर के ही करने से हो तो वह किया ही करे, अपना मेटना किस काम का? इस कारण अपना किया होता है, अपना मेंटा मिटता है, इस तरह कथंचित् मानना सम्यग्ज्ञान है ॥२२१॥

आगे इस कथन को प्रगट करते हैं कि जो स्पर्श-रस-गंध-वर्ण-शब्दरूप पुद्गल परिणत होते हैं वे यद्यपि इन्द्रियों से आत्मा के जानने में आते हैं तो भी वे जड़ हैं, आत्मा को यह नहीं कहते कि हम को ग्रहण करो। आत्मा ही अज्ञानी होकर उनको भले बुरे मान रागी द्वेषी होता है ऐसा गाथा में कहते हैं—**[बहुकानि]** बहुत प्रकार के **[निंदितसंस्तुतवचनानि]** निंदा और स्तुति के वचन हैं **[पुद्गलाः परिण-मंति]** पुद्गल उनरूप परिणमते हैं **[तानि]** उनको **[श्रुत्वा]** सुन कर **[अहं भणितः]** यह अज्ञानी जीव

असुहो सुहो व फासो ण तं भणइ फुससु मंति सो चेव ।
ण य एइ विणिग्गहिउं कायविसयमागयं फासं ॥३७९॥
असुहो सुहो व गुणो ण तं भणइ बुज्झ मंति सो चेव ।
ण य एइ विणिग्गहिउं बुद्धिविसयमागयं तु गुणं ॥३८०॥
असुहं सुहं व दव्वं ण तं भणइ बुज्झ मंति सो चेव ।
ण य एइ विणिग्गहिउं बुद्धिविसयमागयं दव्वं ॥३८१॥
एयं तु जाणिऊण उवसमं णेव गच्छई मूढो ।
णिग्गहमणा परस्स य सयं च बुद्धिं सिवमपत्तो ॥३८२॥ (दशकम्)

निंदितसंस्तुतवचनानि पुद्गलाः परिणमंति बहुकानि ।
तानि श्रुत्वा रुष्यति तुष्यति च पुनरहं भणितः ॥३७३॥
पुद्गलद्रव्यं शब्दत्वपरिणतं तस्य यदि गुणोऽन्यः ।
तस्मान्न त्वं भणितः किंचिदपि किं रुष्यस्यबुद्धः ॥३७४॥
अशुभः शुभो वा शब्दः न त्वां भणति शृणु मामिति स एव ।
नचैति विनिर्गृहीतुं श्रोत्रविषयमागतं शब्दं ॥३७५॥

मिथ्यात्वविषयकषायादिविभावपरिणामाधीनतया अत्यंतदुर्लभेन कथंचित्कालादिलब्धिवशेन मिथ्यात्वादिसप्तप्रकृतीनां तथैव चारित्रमोहनीयस्य चोपशमक्षयोपशमक्षये सति षड्द्रव्यपंचास्तिकायसप्ततत्त्वनवपदार्थादिश्रद्धानज्ञानरागद्वेषपरिहाररूपेण भेदरत्नत्रयात्मकव्यवहारमोक्षमार्गसंज्ञेन व्यवहारकारणसमयसारेण साध्येन विशुद्धज्ञानदर्शनस्वभावशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुचरणरूपाभेदरत्नत्रयात्मकनिर्विकल्पसमाधिरूपेणानंतकेवलज्ञानादिचतुष्टयव्यक्तिरूपस्य कार्यसमयसारस्योत्पादकेन निश्चयकारणसमयसारेण विना खल्वज्ञानिजीवो रुष्यति तुष्यति च । किं कृत्वा ? **सुणिऊण** श्रुत्वा । पुनः पश्चात् केन रूपेण ? **अहं भणिदो** अनेनाहं भणित इति । कानि श्रुत्वा ? **णिंदिदसंथुदवयणाणि** निंदितसंस्तुतवचनानि **ताणि** तानि । किंविशिष्टानि ? **पोग्गला परिणमंति बहुगाणि** भाषावर्गणायोग्यपुद्गलाः कर्तारो यानि

ऐसा मानता है कि मुझको कहा है इसलिये **[रुष्यति]** ऐसा मान रोस (गुस्सा) करता है **[च पुनः]** और **[तुष्यति]** संतुष्ट होता है । **[शब्दत्वपरिणतं]** शब्द रूप परिणत हुआ **[पुद्गलद्रव्यं]** पुद्गलद्रव्य **[तस्य गुणः]** उसका गुण **[अन्यः]** यदि तुझ से अन्य है **[तस्मात्]** तो हे अज्ञानी जीव **[त्वं किंचिदपि न भणितः]** तुझ को तो कुछ भी नहीं कहा **[अबुद्धः]** तू अज्ञानी हुआ **[किं रुष्यसि]** क्यों रोष करता है ? **[अशुभः वा शुभः]** अशुभ अथवा शुभ **[शब्दः]** शब्द **[त्वां न भणति इति]**

अशुभं शुभं वा रूपं न त्वां भणति पश्य मामिति स एव ।
न चैति विनिगृहीतुं चक्षुर्विषयमागतं रूपं ॥३७६॥
अशुभः शुभो वा गंधो न त्वां भणति जिघ्र मामिति स एव ।
न चैति विनिगृहीतुं घ्राणविषयमागतं गंधं ॥३७७॥
अशुभः शुभो वा रसो न त्वां भणति रसय मामिति स एव ।
न चैति विनिगृहीतुं रसनविषयमागतं तु रसं ॥३७८॥
अशुभः शुभो वा स्पर्शो न त्वां भणति स्पृश मामिति स एव ।
न चैति विनिगृहीतुं कायविषयमागतं तु स्पर्शं ॥३७९॥

कर्मतापन्नानि बहुविधानि परिणमंति । ज्ञानी पुनर्व्यवहारमोक्षमार्गं निश्चयमोक्षमार्गभूतं पूर्वोक्तद्विविधकारणसमयसारं ज्ञात्वा बहिरंगेष्टानिष्टविषये रागद्वेषौ न करोतीति भावार्थः । **पुग्गलदव्वं सद्दत्तपरिणदं** भाषावर्गणायोग्य-पुद्गलद्रव्यं कर्तृ क्रियस्वेति जीवस्त्वमिति रूपेण निंदितसंस्तुतशब्दरूपत्वपरिणतं **तस्स जदि गुणो अण्णो** तस्य पुद्गलद्रव्यस्य शुद्धात्मस्वरूपाद्यदि गुणोऽन्यो भिन्नो जडरूपः, तर्हि जीवस्य किमायातं ? न किमपि । तस्यैवाज्ञानिजीवस्य पूर्वोक्तव्यवहारकारणसमयसारनिश्चयकारणसमयसाररहितस्य संबोधनं क्रियते । कथं ? इति चेत्, यस्मान्निंदित-संस्तुतवचनेन पुद्गलाः परिणमंति **तह्मा ण तुमं भणिदो किंचिवि** तस्मात्कारणात्त्वं न भणितः किंचिदपि **किं रूससे अबुहो** किं रुष्यसे अबुध । बहिरात्मन्निति । स चैवाज्ञानिजीवो व्यवहारनिश्चयकारणसमयसाराभ्यां रहितः पुनरपि संबोध्यते ।

तुझ को ऐसा नहीं कहता कि **[मां शृणु]** मुझ को सुन **[च]** और **[श्रोत्रविषयं आगतं]** श्रोत्र इंद्रिय के विषय में आये हुए **[शब्दं]** शब्द के **[विनिर्ग्रहीतुं]** ग्रहण करने को **[स एव]** वह आत्मा भी अपने स्वरूप को छोड़ **[न एति]** प्राप्त नहीं होता । **[अशुभं शुभं वा]** अशुभ अथवा शुभ **[रूपं]** रूप **[त्वां इति न भणति]** तुझको ऐसा नहीं कहता कि **[मां पश्य]** तू मुझको देख **[च]** और **[चक्षुर्विषयं आगतं रूपं]** चक्षु इन्द्रिय के विषय में आये हुए रूप के **[विनिर्ग्रहीतुं]** ग्रहण करने को **[स एव]** वह आत्मा भी अपने प्रदेशों को छोड़ **[न एति]** प्राप्त नहीं होता । **[अशुभः वा शुभः]** अशुभ अथवा शुभ **[गंधः]** गंध **[त्वां इति न भणति]** तुझ को ऐसा नहीं कहता कि **[मां जिघ्र]** तू मुझको सूंघ **[च]** और **[घ्राणविषयं आगतं गंधं]** घ्राण इन्द्रिय के विषय में आये हुए गंध के **[विनिर्ग्रहीतुं]** ग्रहण करने को **[स एव]** वह आत्मा भी अपने प्रदेश को छोड़ **[न एति]** प्राप्त नहीं होता है । **[अशुभः वा शुभः रसः]** अशुभ वा शुभ रस **[त्वां इति न भणति]** तुझ को ऐसा नहीं कहता कि **[मां रसय]** मुझ को तू आस्वाद कर **[च]** और **[रसनविषयं आगतं तु रसं]** रसना इंद्रिय के विषय में आये रस के **[विनिर्ग्रहीतुं]** ग्रहण करने को **[स एव]** वह आत्मा भी अपने प्रदेश को छोड़ **[न एति]** प्राप्त नहीं होता । **[अशुभः वा शुभः स्पर्शः]** अशुभ वा शुभ स्पर्श **[त्वां इति न भणति]** तुझ को ऐसा नहीं कहता कि **[मां स्पृश]** तू मुझ को स्पर्श (छू ले) **[च]** और **[कायविषयं आगतं स्पर्शं]** स्पर्शन इंद्रिय के विषय में

अशुभः शुभो वा गुणो न त्वां भणति बुध्यस्व मामिति स एव ।
न चैति विनिर्ग्रहीतुं बुद्धिविषयमागतं तु गुणं ॥३८०॥
अशुभं शुभं वा द्रव्यं न त्वां भणति बुध्यस्व मामिति स एव ।
न चैति विनिर्ग्रहीतुं बुद्धिविषयमागतं द्रव्यं ॥३८१॥
एतत्तु ज्ञात्वा उपशमं नैव गच्छति मूढः ।
विनिर्ग्रहमनाः परस्य च स्वयं च बुद्धिं शिवामप्राप्तः ॥३८२॥

यथेह बहिरर्थोघटपटादिः, देवदत्तो यज्ञदत्तमिव हस्ते गृहीत्वा 'मां प्रकाशय' इति स्वप्रकाशने न प्रदीपं प्रयोजयति । न च प्रदीपोप्ययःकांतोपलकृष्टायःसूचीवत् स्वस्थानात्प्रच्युत्य

हे अज्ञानिन् ! शब्दरूपगंधरसस्पर्शरूपा मनोज्ञामनोज्ञपंचेंद्रियविषयाः कर्तारः, त्वां कर्मतापन्नं किमपि न भणंति । किं न भणंति ? हे देवदत्त ! मां कर्मतापन्नं शृणु, मां पश्य, मां जिघ्र, मां स्वादय, मां स्पृशेति । पुनरप्यज्ञानी ब्रूते एते शब्दादयः कर्तारो मां किमपि न भणंति, परं किंतु मदीयश्रोत्रादिविषयस्थानेषु समागच्छंति ? आचार्या उत्तरमाहुः — हे मूढ ! नवायांति विनिर्ग्रहीतुं एते शब्दादिपंचेंद्रियविषयाः । कथंभूताः संतः ? श्रोत्रेंद्रियादिस्वकीयस्वकीयविषयभावमागच्छंतः । कस्मात् ? इति चेत् वस्तुस्वभावादिति । यस्तु परमतत्त्वज्ञानी जीवः स पूर्वोक्तव्यवहारनिश्चयकारणसमयसाराभ्यां बाह्याभ्यंतररत्नत्रयलक्षणाभ्यां सहितः सन् मनोज्ञामनोज्ञशब्दादिविषयेषु समागतेषु रागद्वेषौ न करोति, किंतु स्वस्वभावेन शुद्धात्मस्वरूपमनुभवतीति भावार्थः । यथा पंचेंद्रियविषये मनोज्ञामनोज्ञेंद्रियसंकल्पवशेन रागद्वेषौ करोत्यज्ञानी जीवः, तथा परकीयगुणपरिच्छेदरूपे परद्रव्यपरिच्छेदरूपे च मनोविषयेऽपि रागद्वेषौ करोति तस्याज्ञानिजीवस्य पुनरपि

आये हुए स्पर्श के **[विनिर्ग्रहीतुं]** ग्रहण करने को **[स एव]** वह आत्मा भी अपने प्रदेश को छोड़ **[न एति]** प्राप्त नहीं होता । **[अशुभः वा शुभः]** अशुभ वा शुभ **[गुणः]** द्रव्य का गुण **[त्वां इति न भणति]** तुझ को ऐसा नहीं कहता कि **[मां बुध्यस्व]** तू मुझ को जान **[च]** और **[बुद्धिविषयं आगतं तु गुणं]** बुद्धि के विषय में आये हुए गुण के **[विनिर्ग्रहीतुं]** ग्रहण करने को **[स एव]** वह आत्मा भी अपने प्रदेश को छोड़कर **[न एति]** प्राप्त नहीं होता । **[अशुभं वा शुभं द्रव्यं]** अशुभ वा शुभ द्रव्य **[त्वां इति न भणति]** तुझ को ऐसा नहीं कहता कि **[मां बुध्यस्व]** तू मुझे जान **[च]** और **[बुद्धिविषयं आगतं द्रव्यं]** बुद्धि के विषय में आये हुए द्रव्य के **[विनिर्ग्रहीतुं]** ग्रहण करने को **[स एव]** वह आत्मा भी अपने प्रदेश को छोड़ **[न एति]** प्राप्त नहीं होता । **[मूढः]** मूढ जीव **[एतत्तु ज्ञात्वा]** ऐसा जानकर भी **[उपशमं नैव गच्छति]** उपशम भाव को नहीं प्राप्त होता **[च]** और **[परस्य विनिर्ग्रहमनाः]** परके ग्रहण करने का मन करता है **[च]** क्योंकि **[स्वयं शिवां बुद्धिं अप्राप्तः]** आप कल्याणरूप बुद्धि जो सम्यग्ज्ञान उसको नहीं प्राप्त हुआ है ।

टीका—प्रथम दृष्टांत कहते हैं :—जिस प्रकार देवदत्त यज्ञदत्त का हाथ पकड़ कर उससे अपना कार्य करा लेता है, उस प्रकार घटपटादि बाह्य पदार्थ दीपक से यह नहीं कहते कि तू हमें प्रकाशित कर । और दीपक भी चुम्बक से आकृष्ट सूई की तरह अपना स्थान छोड़कर उन पदार्थों को प्रकाशित करने

तं प्रकाशयितुमायाति। किं तु वस्तुस्वभावस्य परेणोत्पादयितुमशक्यत्वात् परमुत्पादयितुमशक्यत्वाच्च यथा तदसन्निधाने तथा तत्संनिधानेऽपि स्वरूपेणैव प्रकाशते। स्वरूपेणैव प्रकाशमानस्य चास्य वस्तुस्वभावादेव विचित्रां परिणतिमासादयन् कमनीयोऽकमनीयो वा घटपटादिर्न मनागपि विक्रियायै कल्प्यते। तथा बहिरर्थः शब्दो रूपं गंधो रसः स्पर्शो गुणद्रव्ये च देवदत्तो यज्ञदत्तमिव हस्ते गृहीत्वा मां शृणु मां पश्य मां जिघ्र मां रसय मां स्पर्श मां बुध्यस्वेति स्वज्ञाने नात्मानं प्रयोजयति। नचात्माप्ययःकांतोपलकृष्टायःसूचीवत् स्वस्थानात्प्रच्युत्य तान् ज्ञातुमायाति। किंतु वस्तुस्वभावस्य परेणोत्पादयितुमशक्यत्वात् परमुत्पादयितुमशक्यत्वाच्च यथा तद-

---

संबोधनं क्रियते तद्यथा—परकीयगुणः शुभोऽशुभो वा चेतनोऽचेतनो वा। द्रव्यमपि परकीयं कर्तृ त्वं। कर्मतापन्नं न भणति हे मनोबुद्धे हे अज्ञानिजनचित्त ! मां कर्मतापन्नं बुध्यस्व जानीहि। अज्ञानी वदति—एवं न ब्रूते किंतु मदीयमनसि परकीयगुणो द्रव्यं वा परिच्छित्तिसंकल्परूपेण स्फुरति प्रतिभाति। तत्रोत्तर दीयते—स चैव परकीयगुणः परकीयद्रव्यं वा मनोबुद्धिविषयमागतं विनिगृहीतुं नायाति। कस्मात् ? ज्ञेयज्ञायकसंबंधस्य निषेधयितुमशक्यत्वात् इति हेतोः—यद्रागद्वेषकरणं तदज्ञानं। यस्तु ज्ञानी स पुनः पूर्वोक्तव्यवहारनिश्चयकारणं समयसारं जानन् हर्षविषादौ न करोतीति भावार्थः **एवं तु** एवं पूर्वोक्तप्रकारेण मनोज्ञामनोज्ञशब्दादिपंचेंद्रियविषयस्य परकीयगुणद्रव्यरूपस्य मनोविषयस्य वा, कथंभूतस्य ? **जाणिदव्वस्स** ज्ञातद्रव्यस्य पंचेंद्रियमनोविषयभूतस्येत्यर्थः।.तस्य पूर्वोक्तप्रकारेण स्वरूपं ज्ञात्वापि **उवसमं णेव गच्छदे मूढो** उपशमेनैव गच्छति मूढो बहिरात्मा स्वय। कथंभूतः ? **णिग्गहमणा** निग्रहमनाः निवारणबुद्धिः। कस्य संबंधित्वेन ? **परस्स य** परस्य पंचेंद्रियमनोविषयस्य। कथंभूतस्य ? परकीयशब्दादिगुणद्रव्यरूपस्य। पुनरपि कथंभूतस्य ? स्वकीयविषयमागतस्य प्राप्तस्य। पुनरपि किं रूपश्चाज्ञानी जीवः। **सयं च बुद्धिं सिवमपत्तो** स्वयं च शुद्धात्मसंवित्तिरूपां बुद्धिमप्राप्तः। वीतरागसहजपरमानंदरूपं शिवशब्दवाच्यं सुखं चाप्राप्त इति। किंच, यथायस्कांतोपलाकृष्टा सूची स्वस्थानात्प्रच्युत्यायस्कांतोपलपाषाणसमीपं गच्छति तथा शब्दादयश्चित्तक्षोभरूपविकृतिकरणार्थं जीवसमीपं न गच्छंति। जीवोऽपि तत्समीपं न गच्छति निश्चयतः किंतु स्वस्थाने स्वस्वरूपेणैव तिष्ठति। एव वस्तुस्वभावे सत्यपि यदज्ञानी जीव उदासीनभावं मुक्त्वा रागद्वेषौ करोति तदज्ञानमिति। हे भगवन् पूर्वं बंधाधिकारे भणित—"एव णाणी सुद्धो ण सयं परिणमदि रायमादीहिं। राइज्जदि अण्णेहिं दु सो रत्तादि एहिं भावेहिं ॥१॥" इत्यादि रागादीनामकर्ता ज्ञानी, परद्रव्यजनिता रागादयः इत्युक्तं। अत्र तु स्वकीयबुद्धिदोषजनिता रागादयः परेषां शब्दादिपंचेन्द्रियविषयाणां दूषणं नास्तीति

नहीं पहुंचता। किन्तु दीपक घटपटादि पदार्थों के सद्भाव मे भी उसी प्रकार प्रकाशमान रहता है जिस प्रकार उनके अभाव में, क्योंकि वस्तु स्वभाव ही यह है कि वह दूसरे से उत्पन्न नहीं होता न दूसरे को उत्पन्न करता है। इसी तरह घटपटादि पदार्थ भी वे सुन्दर हों या असुन्दर वस्तु स्वभाव के कारण स्वयं तो नाना प्रकार परिणमन करते हैं किन्तु स्वभाव से प्रकाशमान दीपक में कोई विकार पैदा नहीं करते वैसे ही शब्द, रूप, गंध, रस, स्पर्श और गुण द्रव्य यज्ञदत्त का हाथ पकड़ कर देवदत्त की तरह आत्मा से यह नहीं कहते कि तू मुझे सुन, देख, सूंघ, आस्वादन कर, छू, समझ। और न आत्मा ही चुम्बक से आकृष्ट सूई की तरह अपने स्थान से हट कर उन्हें जानने के लिए उन तक दौड़ी जाती है। किन्तु उनके सद्भाव में भी आत्मा उन्हें उसी प्रकार जानता है जिस प्रकार उनके अभाव में क्योकि वस्तु का स्वभाव

सन्निधाने तथा तत्सन्निधानेऽपि स्वरूपेणैव जानीते। स्वरूपेण जानतश्चास्य वस्तुस्वभावादेव विचित्रां परिणतिमासादयंतः कमनीया अकमनीया वा शब्दादयो बहिरर्था न मनागपि विक्रियायै कल्प्येरन्। एवमात्मा प्रदीपवत् परं प्रति उदासीनो नित्यमेवेति वस्तुस्थितिः, तथापि यद्रागद्वेषौ तदज्ञानं ॥३७३-३८२॥

पूर्णैकाच्युतशुद्धबोधमहिमा बोधः[1] न बोध्यादयं।
यायात्कामपि विक्रियां तत इतो दीपः प्रकाश्यादिव
तद्वस्तुस्थितिबोधबंध्यधिषणा एते किमज्ञानिनो।
रागद्वेषमयीं भवंति सहजां मुंचंत्युदासीनतां ॥२२२॥

पूर्वापरविरोधः? अत्रोत्तरमाह—तत्र बंधाधिकारव्याख्याने ज्ञानिजीवस्य मुख्यता ज्ञानी तु रागादिभिर्न परिणमति तेन कारणेन परद्रव्यजनिता भणिताः। अत्र चाज्ञानिजीवस्य मुख्यता स चाज्ञानी जीवः स्वकीयबुद्धिदोषेण परद्रव्यनिमित्त

ही यह है कि वह दूसरे से उत्पन्न नहीं होता और न दूसरे को उत्पन्न करता है। इसी तरह शब्दादि बाह्य पदार्थ अपनी सुन्दर असुन्दर दोनों अवस्थाओं में वस्तु स्वभाव के कारण नाना रूप परिणमन तो करते हैं किन्तु स्वरूप से जाननेवाली आत्मा में कोई विकार पैदा नहीं करते। इस प्रकार आत्मा पर पदार्थ के प्रति सदा ही उदासीन है, यही वस्तुस्वभाव है। इस पर भी जो रागद्वेष होते हैं वह अज्ञान है।

भावार्थ—आत्मा शब्द को सुनकर, रूप को देखकर, गंध को सूंघकर, रसको आस्वादन कर, स्पर्शकर, गुणद्रव्य को जानकर भला बुरा मान रागद्वेष उपजाता है सो वह अज्ञान है। क्योंकि ये शब्दादिक तो जड़ (पुद्गलद्रव्य) के गुण हैं, आत्मा को कुछ नहीं कहते कि हमको ग्रहण करो। और आत्मा भी स्वयं अपने प्रदेशों को छोड़कर उनके ग्रहण करने को उनमें नहीं जाती है। जैसे उनके समीप न होने पर जानता है वैसे ही समीप होनेपर भी जानता है। आत्मा के विकार के लिये कुछ भी नहीं है। जैसे दीपक घटपटादि को प्रकाशित करता है उसी तरह आत्मा उनको जानता है ऐसा वस्तु का स्वभाव है। तो भी आत्मा में जो रागद्वेष उत्पन्न होता है यह अज्ञान ही है ॥३७३-३८२॥

अब इसी अर्थ का कलशरूप काव्य कहते हैं—पूर्णै इत्यादि। अर्थ—पूर्ण, एक, अच्युत और शुद्ध (विकार से रहित) ज्ञान स्वरूप जिसकी महिमा है ऐसा ज्ञानी ज्ञेय पदार्थों से कुछ भी विकार को प्राप्त नहीं होता उसी तरह जैसे दीपक प्रकाशने योग्य घटपटादि पदार्थो से विकार को नहीं प्राप्त होता। ऐसी जिनकी बुद्धि वस्तु की मर्यादा के ज्ञान से रहित है, ऐसे अज्ञानी जीव अपनी स्वाभाविक उदासीनता को क्यों छोड़ते हैं और रागद्वेषमय क्यों होते हैं? ऐसा आचार्य ने सोच किया है।

भावार्थ—ज्ञान का स्वभाव ज्ञेय को जानने का ही है। दीपक का स्वभाव घटपट आदि को प्रकाश करने का है। यह वस्तु स्वभाव है। ज्ञेय को जानने मात्र से ज्ञान में विकार नहीं होता। और

---

१. 'बोद्धा' इत्यपि पाठः।

रागद्वेषविभावमुक्तमहसो नित्यं स्वभावस्पृशः
पूर्वागामिसमस्तकर्मविकला भिन्नास्तदात्वोदयात् ।
दूरारूढचरित्रवैभवबलाच्चंचच्चिदर्चिर्मयीं
विंदन्ति स्वरसाभिषिक्तभुवनां ज्ञानस्य संचेतनां ॥२२३॥

मात्रमाश्रित्य रागादिभिः परिणमति, तेन कारणेन परेषां शब्दादिपचेंद्रियविषयाणां दूषणं नास्तीति भणितं । ततः कारणात् पूर्वापरविरोधो नास्ति इति एवं निश्चयव्यवहारमोक्षमार्गभूतं निश्चयकारणसमयसारव्यवहारकारणसमयसार-द्वयमजानन् सन्नज्ञानी जीवः स्वकीयबुद्धिदोषेण रागादिभिः परिणमति । परेषां शब्दादीनां दूषणं नास्तीति व्याख्यानमुख्य-त्वेन नवमस्थले गाथादशकं गतं ॥३७३।३८२॥ अथ निश्चयप्रतिक्रमणनिश्चयप्रत्याख्याननिश्चयालोचनपरिणततपोधन एवाभेदेन निश्चयचारित्रं भवतीत्युपदिशति;—**णिच्चदे अप्पयं तु जो** इहलोकपरलोकाकांक्षारूपख्यातिपूजालाभदृष्ट-श्रुतानुभूतभोगाकांक्षालक्षणनिदानबंधादिसमस्तपरद्रव्यालंबनोत्पन्नशुभाशुभसंकल्पविकल्परहिते शून्ये विशुद्धज्ञानदर्शनस्वभावा-त्मतत्त्वसम्यक्श्रद्धानज्ञानानुभवनरूपाभेदरत्नत्रयात्मके निर्विकल्पपरमसमाधिसमुत्पन्नवीतरागसहजपरमानंदस्वभावसुखरसा-

---

जो ज्ञेय को जानकर भलाबुरा मान आत्मा रागी, द्वेषी, विकारी होता है सो यह अज्ञान है । इसीसे आचार्य ने सोच किया है कि वस्तु का स्वभाव तो ऐसा है, किन्तु यह आत्मा अज्ञानी होकर रागद्वेष रूप क्यों परिणमता है ? अपनी स्वाभाविक उदासीनता अवस्था रूप क्यो नहीं रहता ? सो यह आचार्य का सोच करना युक्त (ठीक) है । क्योंकि जब तक शुभ राग है तब तक प्राणियों को अज्ञान से दुःखी देख करुणा उत्पन्न होती है तब सोच भी होता है ॥२२२॥

अब अगले कथन की सूचनिकारूप काव्य कहते हैं—**रागद्वेष** इत्यादि । **अर्थ**—ज्ञानी राग-द्वेष रूप विभाव से रहित तेज वाले हैं । नित्य ही अपने चैतन्य चमत्कारमात्र स्वभाव को स्पर्श करने वाले हैं । पूर्व किये गए समस्त कर्म और आगामी होने वाले जो समस्त कर्मों से रहित हैं । तथा वर्तमान काल में आये हुये कर्म के उदय से भिन्न हैं । ऐसे ज्ञानी अतिशय अंगीकार किये चारित्र का जो विभव, समस्त परद्रव्य का त्याग, उसके बल से ज्ञान की सम्यक् प्रकार चेतना को अनुभव करते हैं । वह ज्ञानचेतना चमकती (जागती) चैतन्यरूप ज्योतिमयी हैं तथा अपने ज्ञानरूप रस से जिसने तीन लोक को सींचा है ।

भावार्थ—जिनका राग द्वेष गया और अपने चैतन्य स्वभाव का अंगीकार हुआ तथा अतीत अनागत वर्तमान कर्म का ममत्व गया, ऐसे ज्ञानी सब परद्रव्य से पृथक् होकर चारित्र को अंगीकार करते हैं । उसके बल से कर्मचेतना और कर्मफलचेतना से पृथक् जो अपनी चैतन्य के परिणमन स्वरूप ज्ञान-चेतना उसका अनुभव करते हैं । यहां तात्पर्य यह जानना कि पहले तो कर्मचेतना और कर्मफलचेतना से भिन्न अपनी ज्ञानचेतना मात्र स्वरूप आगम अनुमान स्वसंवेदन प्रमाण जाने और उसका श्रद्धान (प्रतीति) दृढ़ करे । सो यह तो अविरत, देश विरत और प्रमत्त अवस्था में भी होता है । जब अप्रमत्त अवस्था होती है अपने स्वरूप का ही ध्यान करता है उस समय ज्ञानचेतना का जैसा श्रद्धान किया था उसमें लीन होता है तब श्रेणी चढ़ केवल ज्ञान उत्पन्न कर साक्षात् ज्ञानचेतनारूप होता है । ऐसा जानना ॥२२३॥

कम्मं जं पुव्वकयं सुहासुहमरोयवित्थरविसेसं ।
तत्तो णियत्तए अप्पयं तु जो सो पडिक्कमणं ॥३८३॥
कम्मं जं सुहमसुहं जह्मि य भावह्मि वज्झइ भविस्सं ।
तत्तो णियत्तए जो सो पच्चक्खाणं हवइ चेया ॥३८४॥
जं सुहमसुहमुदिरणं संपडि य अरोयवित्थरविसेसं ।
तं दोसं जो चेयइ सो खलु आलोयणं चेया ॥३८५॥
णिच्चं पच्चक्खाणं कुव्वइ णिच्चं य पडिक्कमदि जो ।
णिच्चं आलोचेयइ सो हु चरित्तं हवइ चेया ॥३८६॥ (चतुष्कम्)

कर्म यत्पूर्वकृतं शुभाशुभमनेकविस्तरविशेषं ।
तस्मान्निवर्तयत्यात्मानं तु यः स प्रतिक्रमणं ॥३८३॥
कर्म यच्छुभमशुभं यस्मिंश्च भावे बध्यते भविष्यत् ।
तस्मान्निवर्तते यः स प्रत्याख्यानं भवति चेतयिता ॥३८४॥

स्वाद्यसमरसीभावपरिणामेन सालंबने भरितावस्थे केवलज्ञानाद्यनंतचतुष्टयव्यक्तिरूपस्य कार्यसमयसारस्योत्पादके कारणसमयसारे स्थित्वा यः कर्ता, आत्मानं कर्मतापन्नं निवर्तयति । कस्मात्सकाशात् ? **कम्मं जं पुव्वकयं सुहासुहमरोयवित्थरविसेसं तत्तो** शुभाशुभमूलोत्तरप्रकृतिभेदेनानेकविस्तरविस्तीर्णं पूर्वकृतं यत्कर्म तस्मात् **सो पडिक्कमणं** स पुरुष एवाभेदनयेन निश्चयप्रतिक्रमणं भवतीत्यर्थः । **णियत्तदे जो** अनंतज्ञानादिस्वरूपात्मद्रव्यसम्यक्श्रद्धानज्ञानानुभूतिस्वरूपाभेदरत्नत्रयलक्षणे परमसामायिके स्थित्वा यः कर्ता आत्मानं निवर्तयति । कस्मात्सकाशात् ? **कम्मं जं सुहमसुहं जह्मि य भावह्मि वज्झदि भविस्सं तत्तो** शुभाशुभानेकविस्तरविस्तीर्णं भविष्यत्कर्म यस्मिन्मिथ्यात्वादिरागा-

---

अब इस अर्थ को गाथा में कहते हैं; वहांपर अतीत कर्म से ममत्व छोड़ना प्रतिक्रमण है, आगामी न करने की प्रतिज्ञा प्रत्याख्यान है, वर्तमान कर्म जो उदयमें आया है उसका ममत्व छोड़े वह आलोचना है। ऐसा चारित्र का विधान है उसको कहते हैं;—**[पूर्वकृतं]** अतीत काल में किये हुये **[यत्]** जो **[शुभाशुभं]** शुभ अशुभ **[अनेकविस्तरविशेषं]** ज्ञानावरण आदि अनेक प्रकार विस्तार विशेषरूप **[कर्म]** कर्म हैं **[तस्मात्]** उनसे **[यः तु]** जो चेतयिता **[आत्मानं निवर्तयति]** अपने आत्मा को छुड़ाता है **[सः]** वह आत्मा **[प्रतिक्रमणं]** प्रतिक्रमण स्वरूप है **[च]** और **[यत् भविष्यत्]** जो आगामी काल में **[शुभं अशुभं]** शुभ तथा अशुभ **[कर्म]** कर्म **[यस्मिन् भावे]** जिस भाव के होने पर **[बध्यते]** बंधे **[तस्मात्]** उस भाव से **[यः चेतयिता]** जो ज्ञानी **[निवर्तते]** छूटे **[सः]** वह आत्मा **[प्रत्याख्यानं भवति]** प्रत्याख्यान स्वरूप है। **[च]** और **[यत् संप्रति]** जो वर्तमान काल में **[शुभं अशुभं]** शुभ अशुभ कर्म

यच्छुभमशुभमुदीर्णं संप्रति चानेकविस्तरविशेषं ।
तं दोषं यः चेतयते स खल्वालोचनं चेतयिता ॥३८५॥
नित्यं प्रत्याख्यानं करोति नित्यं प्रतिक्रामति यश्च ।
नित्यमालोचयति स खलु चरित्रं भवति चेतयिता ॥३८६॥

यः खलु पुद्गलकर्मविपाकभवेभ्यो भावेभ्यश्चेतयितात्मानं निवर्तयति स तत्कारणभूतं पूर्वं कर्म प्रतिक्रामन् स्वयमेव प्रतिक्रमणं भवति। स एव तत्कार्यभूतमुत्तरं कर्म प्रत्याचक्षाणः प्रत्याख्यानं भवति। स एव वर्तमानं कर्मविपाकमात्मनोऽत्यंतभेदेनोपलभमानः आलोचना भवति। एवमयं नित्यं प्रतिक्रामन्, नित्यं प्रत्याचक्षाणो, नित्यमालोचयंश्च पूर्वकर्मकार्येभ्य उत्तर-कर्मकारणेभ्यो भावेभ्योत्यंतं निवृत्तः, वर्तमानं कर्मविपाकमात्मनोऽत्यंतभेदेनोपलभमानः स्वस्मिन्नेव

दिपरिणामे सति बध्यते तस्मात् **सो पच्चक्खाणं हवे चेदा** स एवं गुणविशिष्टस्तपोधन एवाभेदनयेन निश्चय-प्रत्याख्यानं भवतीति विज्ञेयं। **जो वेददि** नित्यानंदैकस्वभावशुद्धात्मसम्यक्श्रद्धानज्ञानानुष्ठानरूपाभेदरत्नत्रयात्मके सुख-दुःखजीवितमरणादिविषये सर्वोपेक्षासंयमे स्थित्वा यः कर्ता वेदयत्यनुभवति जानाति। किं जानाति। **जं** यत्कर्म **तं** तत्। केन रूपेण ? **दोसं** दोषोयं मम स्वरूपं न भवति। कथंभूतं कर्म ? **उदिण्णं** उदयागतं। पुनरपि कथंभूतं ? **सुहमसुहं** शुभाशुभं। पुनश्च किंरूपं ? **अणेयवित्थरविसेसं** मूलोत्तरप्रकृतिभेदेनानेकविस्तरविस्तीर्णं। **संपडिय** संप्रति काले खलु स्फुटं। **सो आलोयणं चेदा** स चेतयिता पुरुष एवाभेदनयेन निश्चयालोचनं भवतीति ज्ञातव्यं। **णिच्चं पच्चक्खाणं कुव्वदि णिच्चंपि जोदुपडिक्कमदि णिच्चं अलोचेदिय** निश्चयरत्नत्रयलक्षणे

[अनेकविस्तरविशेषं] अनेक प्रकार ज्ञानावरणादि विस्ताररूप विशेषों को लिये हुए **[उदीर्णं]** उदय आया है **[तं दोषं]** उस दोषको **[यः चेतयिता]** जो ज्ञानी **[चेतयते]** अनुभव करता है उसका स्वामिपना, कर्तापना छोड़ता है **[सः खलु]** वह आत्मा निश्चय से **[आलोचनं]** आलोचना स्वरूप है **[च यः]** इस तरह जो **[चेतयिता]** आत्मा **[नित्यं प्रत्याख्यानं करोति]** नित्य प्रत्याख्यान करता है **[नित्यं प्रतिक्रामति]** नित्य प्रतिक्रमण करता है **[नित्यं आलोचयति]** नित्य आलोचना करता है **[सः खलु]** वह चेतयिता निश्चय से **[चारित्रं भवति]** चारित्रस्वरूप है।

टीका—जो आत्मा पुद्गल कर्म के उदय से हुए भावों से अपने आत्मा को छुड़ावे, उस भाव के कारणभूत पूर्व (अतीत) काल में किये कर्म को प्रतिक्रमण रूप करता हुआ आप ही प्रतिक्रमण स्वरूप होता है। वही आत्मा पूर्वकर्म का कार्यभूत जो आगामी बंधने वाला कर्म उसको प्रत्याख्यान रूप करता (त्यागता हुआ) आप ही प्रत्याख्यान स्वरूप होता है, तथा वही आत्मा वर्तमान कर्म के उदय से अपने को अत्यंत भेद से अनुभव करता हुआ प्रवर्तता है वह आप ही आलोचना स्वरूप होता है। ऐसे यह आत्मा नित्य प्रतिक्रमण करता हुआ, नित्य प्रत्याख्यान करता हुआ और नित्य आलोचना करता हुआ पूर्व कर्म के कार्यरूप और आगामी कर्म के कारण रूप भावों से अत्यन्त निवृत्तिस्वरूप हुआ वर्तमान कर्म

खलु ज्ञानस्वभावे निरंतरचरणाच्चारित्रं भवति। चारित्रं तु भवन् स्वस्य ज्ञानमात्रस्य चेतनात् स्वयमेव ज्ञानचेतना भवतीति भावः ॥ ३८३। ३८४। ३८५। ३८६ ॥

ज्ञानस्य संचेतनयैव नित्यं प्रकाशते ज्ञानमतीव शुद्धं।
अज्ञानसंचेतनया तु धावन् बोधस्य शुद्धिं निरुणद्धि बंधः ॥२२४।

शुद्धात्मस्वरूपे स्थित्वा यः कर्ता पूर्वोक्तनिश्चयप्रत्याख्यानप्रतिक्रमणालोचनानुष्ठानानि नित्यं सर्वकालं करोति **सो दु चरित्तं हवदि चेदा** स चेतयिता पुरुष एवाभेदनयेन निश्चयचारित्रं भवति। कस्मात् ? इति चेत् शुद्धात्मस्वरूपे चरणं चारित्रमिति वचनात्। एवं निश्चयप्रतिक्रमणप्रत्याख्यानालोचनाचारित्रव्याख्यानरूपेणाष्टमस्थले गाथाचतुष्टयं गतं ॥३८३।३८४।३८५।३८६॥ अथ मिथ्यात्वरागादिपरिणतजीवस्याज्ञानचेतना केवलज्ञानादिगुणप्रच्छादकं कर्मबंधं

के उदय से आपको अत्यंत भेद पूर्वक अनुभव करता हुआ अपने ज्ञान स्वभाव में ही निरंतर प्रवर्तन करने से आप ही चारित्र स्वरूप होता है। ऐसे चारित्र रूप होता अपने को ज्ञानमात्र अनुभव करने से आप ही ज्ञानचेतना स्वरूप होता है ऐसा तात्पर्य है।

भावार्थ—यहां निश्चय चारित्र का प्रधानता से कथन है। चारित्र में प्रतिक्रमण, प्रत्याख्यान और आलोचना का विधान है। पहले लगे हुये दोष से आत्मा को निवर्तन करना प्रतिक्रमण है, आगामी दोष लगाने का त्याग करना प्रत्याख्यान है और वर्तमान दोष से आत्मा को पृथक करना आलोचना है। सो निश्चय से विचारने पर जो आत्मा तीनों काल संबंधी कर्मों से आत्मा को भिन्न जानता है, भिन्न श्रद्धान करता है और भिन्न अनुभव करता है, वह आत्मा स्वयं ही प्रतिक्रमण है, स्वयं ही प्रत्याख्यान है और स्वयं ही आलोचना है। इन तीनों स्वरूप आत्मा का निरंतर अनुभवन करना वही चारित्र है। और निश्चय चारित्र ही ज्ञान चेतना का अनुभवन है। इसी अनुभव से साक्षात् ज्ञान चेतना स्वरूप केवल ज्ञानमय आत्मा प्रकट होता है॥ ३८३-३८६ ॥

अब ज्ञान चेतना और अज्ञान चेतना (कर्म चेतना और कर्मफल चेतना) इनका स्वरूप प्रकट करते हैं उसकी सूचनिका का काव्य कहते हैं—**ज्ञानस्य** इत्यादि। **अर्थ**—ज्ञान की चेतना से ही ज्ञान अत्यंत शुद्ध निरंतर प्रकाशित होता है और अज्ञान की चेतना से बंध दौड़ता हुआ ज्ञान की शुद्धता को रोकता है।

भावार्थ—किसी वस्तु के प्रति उसी का एकाग्र होकर अनुभव रूप स्वाद लेना वह उसका संचेतना कहा जाता है। ज्ञान के प्रति ही एकाग्र उपयुक्त होकर उसी तरफ ध्यान रखना ज्ञानचेतना है। इससे तो ज्ञान अत्यंत शुद्ध होकर प्रकाशित होता है—केवल ज्ञान उत्पन्न हो जाता है, तब संपूर्ण ज्ञान चेतना नाम पाता है। और अज्ञान रूप (कर्म और कर्मफलरूप) उपयोग को करना उसी तरफ एकाग्र होकर अनुभव करना वह अज्ञानचेतना है। इससे कर्म का बंध होता है वह ज्ञान की शुद्धता को रोकता है॥ २२४ ॥

वेदंतो कम्मफलं अप्पाणं कुणइ जो दु कम्मफलं ।
सो तं पुणोवि बंधइ वीयं दुक्खस्स अट्ठविहं ॥ ३८७ ॥
वेदंतो कम्मफलं मए कयं मुणइ जो दु कम्मफलं ।
सो तं पुणोवि बंधइ वीयं दुक्खस्स अट्ठविहं ॥ ३८८ ॥
वेदंतो कम्मफलं सुहिदो दुहिदो य हवदि जो चेदा ।
सो तं पुणोवि बंधइ वीयं दुक्खस्स अट्ठविहं ॥३८९॥ (त्रिकलम्)

वेदयमानः कर्मफलमात्मानं करोति यस्तु कर्मफलं ।
स तत्पुनरपि बध्नाति बीजं दुःखस्याष्टविधं ॥३८७॥
वेदयमानः कर्मफलं मया कृतं जानाति यस्तु कर्मफलं ।
स तत्पुनरपि बध्नाति बीजं दुःखस्याष्टविधं ॥३८८॥
वेदयमानः कर्मफलं सुखितो दुःखितश्च भवति यः चेतयिता ।
स तत्पुनरपि बध्नाति बीजं दुःखस्याष्टविधं ॥३८९॥

ज्ञानादन्यत्रेदमहमिति चेतनं अज्ञानचेतना । सा द्विधा कर्मचेतना कर्मफलचेतना च । तत्र ज्ञानादन्यत्रेदमहं करोमीति चेतनं कर्मचेतना । ज्ञानादन्यत्रेदं वेदयेऽहमिति चेतनं कर्मफल-

---

जनयतीति प्रतिपादयति—ज्ञानाज्ञानभेदेन चेतना तावद्द्विविधा भवति । इयं तावदज्ञानचेतना गाथात्रयेण कथ्यते—उदयागतं शुभाशुभं कर्म वेदयन्ननुभवन् सन्नज्ञानिजीवः स्वस्थभावाद् भ्रष्टो भूत्वा मदीयं कर्मेति भणति । मया कृतं कर्मेति च

अब इस कथन को गाथा से कहते है—[यः तु] जो आत्मा [कर्मफलं वेदयमानः] कर्म के फल को अनुभव करता हुआ [कर्मफलं आत्मानं करोति] कर्मफल को निज रूप ही करता है [सः] वह [पुनरपि] फिर भी [दुःखस्य बीजं] दुःख का बीज [अष्टविधं तत्] ज्ञानावरणादि आठ प्रकार के कर्म को [बध्नाति] बांधता है । [यस्तु] जो [कर्मफलं वेदयमानः] कर्म के फल का वेदन करता हुआ [कर्मफलं मया कृतं जानाति] उस कर्मफल को ऐसा जानता है कि यह मैंने किया है [स पुनरपि] वह फिर भी [दुःखस्य बीजं] दुःख का बीज [अष्टविधं तत्] ज्ञानावरणादि आठ प्रकार के कर्म को [बध्नाति] बांधता है । [यः चेतयिता] जो आत्मा [कर्मफलं वेदयमानः] कर्म के फल को वेदता हुआ [सुखितः च दुःखितः] सुखी और दुःखी [भवति] होता है [सः] वह चेतयिता । [पुनरपि] फिर भी [दुःखस्यबीजं अष्टविधं तत् बध्नाति] दुःख का बीज ज्ञानावरणादि आठ प्रकार के कर्म को बांधता है ।

टीका—ज्ञान से अन्य भावों में ऐसा अनुभव करना कि 'यह मैं हूं' वह अज्ञान चेतना है । वह दो प्रकार की है—कर्मचेतना कर्मफलचेतना । उनमें से ज्ञान के सिवाय अन्य

चेतना । सा तु समस्तापि संसारबीजं । संसारबीजस्याष्टविधकर्मणो बीजत्वात् । ततो मोक्षार्थिना पुरुषेणाज्ञानचेतनाप्रलयाय सकलकर्मसंन्यासभावनां सकलकर्मफलसंन्यासभावनां च नाटयित्वा स्वभावभूता भगवती ज्ञानचेतनैवैका नित्यमेव नाटयितव्या । तत्र तावत्सकलकर्मसंन्यासभावनां नाटयति—

कृतकारितानुमननैस्त्रिकालविषयं मनोवचनकायैः ।
परिहृत्य कर्म सर्वं परमं नैष्कर्म्यमवलंबे ॥२२५॥

यदहमकार्षं यदचीकरं यत्कुर्वंतमप्यन्यं समन्वज्ञासं मनसा च वाचा च कायेन चेति तन्मिथ्या मे दुष्कृतमिति १ यदहमकार्षं यदचीकरं यत्कुर्वंतमप्यन्यं समन्वज्ञासं मनसा च वाचा च तन्मिथ्या मे दुष्कृतमिति २ यदहमकार्षं यदचीकरं यत्कुर्वंतमप्यन्यं समन्वज्ञासं मनसा च कायेन चेति

यो भणति । स जीवः पुनरपि तदष्टविधं कर्म बध्नाति । कथंभूतं ? बीजं कारणं । कस्य ? दुःखस्य । इति गाथाद्वयेनाज्ञानरूपा कर्मचेतना व्याख्याता । कर्मचेतना कोऽर्थः ? इति चेत् मदीयं कर्म मया कृतं कर्मेत्याद्यज्ञानभावेन—ईहापूर्वक-

---

भावों में ऐसा अनुभव करना कि 'इसको मैं करता हूं' यह कर्मचेतना है और ज्ञान के सिवाय अन्य भावों में ऐसा अनुभव करना कि इसको मैं भोगता हूँ वह कर्मफलचेतना है। ये दोनों ही अज्ञानचेतना संसार का बीज हैं। क्योंकि संसार का बीज आठ प्रकार ज्ञानावरणादि कर्म है, उसका यह अज्ञान चेतना बीज है। इससे कर्म बंधते हैं। इसलिये मोक्ष को चाहने वाला पुरुष अज्ञानचेतना का नाश करने के लिये सब कर्मों के छोड़ देने की भावना को भाकर फिर समस्त कर्मों के फल के त्याग की भावना को नृत्य करा कर अपना स्वभावभूत जो ज्ञानवती-भगवती एक ज्ञानचेतना उसी को निरंतर नृत्य कराना चाहिये। वहां प्रथम ही सकल कर्मों के संन्यास की भावना को नचाते हैं उसका कलशरूप काव्य कहते हैं—**कृत** इत्यादि। **अर्थ**—अतीत अनागत वर्तमानकाल सम्बन्धी सभी कर्मों को कृत, कारित, अनुमोदना और मन वचन, काय से छोड़ कर उत्कृष्ट निष्कर्म अवस्था को मैं अवलम्बन करता हूं। इस प्रकार सब कर्मों का त्याग करने वाला ज्ञानी प्रतिज्ञा करता है।

अब सब कर्मों के त्याग करने के कृत, कारित, अनुमोदना और मन, वचन, काय के ४६ भंग होते हैं। वहां अतीत काल सम्बन्धी कर्म के त्याग करने को प्रतिक्रमण कहा है उसके निम्नांकित ४६ भंग हैं **यदहं** इत्यादि। **अर्थ**—प्रतिक्रमण करने वाला कहता है कि जो मैंने (अतीतकाल में कर्म) किया, कराया और दूसरे से करते हुए का अनुमोदन किया, मन से, वचन से तथा काय से, यह मेरा दुष्कृत मिथ्या हो। (कर्म करना, कराना, और अन्य करने वाले का अनुमोदन करना संसार का बीज है, यह जानकर उस दुष्कृत के प्रति हेय बुद्धि आई तब जीव ने उसके प्रति ममत्व छोड़ा, सो यही उसका मिथ्या करना है।) ॥१॥ जो मैंने (अतीतकाल में) किया, कराया और अन्य करते हुए का अनुमोदन किया, मन से तथा वचन से, वह मेरा दुष्कृत मिथ्या हो ॥२॥ जो मैंने किया, कराया और अन्य करते हुए का अनुमोदन किया, मन से तथा

तन्मिथ्या मे दुष्कृतमिति ३ यदहमकार्षं यदचीकरं यत्कुर्वंतमप्यन्यं समन्वज्ञासं वाचा च कायेन चेति तन्मिथ्या मे दुष्कृतमिति ४ यदहमकार्षं यदचीकरं यत्कुर्वंतमप्यन्यं समन्वज्ञासं मनसा च तन्मिथ्या मे दुष्कृतमिति ५ यदहमकार्षं यदचीकरं यत्कुर्वंतमप्यन्यं समन्वज्ञासं वाचा च तन्मिथ्या मे दुष्कृतमिति ६ यदहमकार्षं यदचीकरं यत्कुर्वंतमप्यन्यं समन्वज्ञासं कायेन च तन्मिथ्या मे दुष्कृतमिति ७ यदहमकार्षं यदचीकरं मनसा च वाचा च कायेन च तन्मिथ्या मे दुष्कृतमिति ८ यदहमकार्षं यत्कुर्वंतमप्यन्यं समन्वज्ञासं मनसा च वाचा च कायेन च तन्मिथ्या मे दुष्कृतमिति ९ यदहमचीकरं यत्कुर्वंतमप्यन्यं समन्वज्ञासं मनसा च वाचा च कायेन च तन्मिथ्या मे दुष्कृतमिति १० यदहमकार्षं यदचीकरं मनसा च वाचा च तन्मिथ्या मे दुष्कृतमिति ११ यदहमकार्षं यत्कुर्वंतमप्यन्यं समन्वज्ञासं मनसा च वाचा च तन्मिथ्या मे दुष्कृतमिति १२ यदहमचीकरं यत्कुर्वंतमप्यन्यं समन्वज्ञासं मनसा च वाचा च तन्मिथ्या मे दुष्कृतमिति १३ यदहमकार्षं यदचीकरं मनसा च कायेन च तन्मिथ्या मे दुष्कृतमिति १४ यदहमकार्षं यत्कुर्वंतमप्यन्यं समन्वज्ञासं मनसा च कायेन च तन्मिथ्या मे दुष्कृतमिति १५ यदहमचीकरं यत्कुर्वंतमप्यन्यं समन्वज्ञासं मनसा च

मिष्टानिष्टरूपेण निरुपरागशुद्धात्मानुभूतिच्युतस्य मनोवचनकायव्यापारकरणं यत्, सा बंधकारणभूता कर्मचेतना भण्यते। उदयागतं कर्मफलं वेदयन् शुद्धात्मस्वरूपमचेतयमानो मनोज्ञामनोज्ञेन्द्रियविषयनिमित्तेन यः सुखितो दुःखितो वा भवति स जीवः पुनरपि तदष्टविधं कर्म बध्नाति। कथंभूतं ? बीजं कारणं। कस्य ? दुःखस्य। इत्येकगाथया कर्मफलचेतना व्याख्याता। कर्मफलचेतना कोऽर्थः ? इति चेत् स्वस्थभावरहितेनाज्ञानभावेन यथासंभवं व्यक्ताव्यक्तस्वभावेनेहापूर्वकमिष्टानिष्टविकल्प-

---

काय से, वह मेरा दुष्कृत मिथ्या हो ॥३॥ जो मैंने किया, कराया, और अन्य करते हुए का अनुमोदन किया, वचन से तथा काय से, वह मेरा दुष्कृत मिथ्या हो ॥४॥ जो मैंने (अतीतकाल में) किया, कराया और अन्य करते हुए का अनुमोदन किया, मन से, वह मेरा दुष्कृत मिथ्या हो ॥५॥ जो मैंने किया, कराया और अन्य करते हुए का अनुमोदन किया, वचन से, वह मेरा दुष्कृत मिथ्या हो ॥६॥ जो मैंने किया, कराया और अन्य करते हुए का अनुमोदन किया, काय से, वह मेरा दुष्कृत मिथ्या हो ॥७॥ जो मैंने किया और कराया मन से, वचन से तथा काय से, वह मेरा दुष्कृत मिथ्या हो ॥८॥ जो मैंने किया और अन्य करते हुए का अनुमोदन किया मन से, वचन से और काय से, वह मेरा दुष्कृत मिथ्या हो ॥९॥ जो मैंने कराया और अन्य करते हुए का अनुमोदन किया, मन से, वचन से तथा काय से, वह मेरा दुष्कृत मिथ्या हो ॥१०॥ जो मैंने (अतीत काल में) किया और कराया मन से तथा वचन से वह मेरा दुष्कृत मिथ्या हो ॥११॥ जो मैंने किया और अन्य करते हुए का अनुमोदन किया मन से तथा वचन से, वह मेरा दुष्कृत मिथ्या हो ॥१२॥ जो मैंने कराया और अन्य करते हुए का अनुमोदन किया मन से तथा वचन से, वह मेरा दुष्कृत मिथ्या हो ॥१३॥ जो मैंने किया और कराया मन से तथा काय से, वह मेरा दुष्कृत मिथ्या हो ॥१४॥ जो मैंने किया तथा अन्य करते हुए का अनुमोदन किया मन से तथा काय से, वह मेरा दुष्कृत मिथ्या हो ॥१५॥ जो मैंने कराया और अन्य करते हुए का अनुमोदन किया मन से तथा

कायेन च तन्मिथ्या मे दुष्कृतमिति १६ यदहमकार्षं यदचीकरं वाचा च कायेन च तन्मिथ्या मे दुष्कृतमिति १७ यदहमकार्षं यत्कुर्वंतमप्यन्यं समन्वज्ञासं वाचा च कायेन च तन्मिथ्या मे दुष्कृतमिति १८ यदहमचीकरं यत्कुर्वंतमप्यन्यं समन्वज्ञासं वाचा च कायेन च तन्मिथ्या मे दुष्कृतमिति १९ यदहमकार्षं यदचीकरं मनसा च तन्मिथ्या मे दुष्कृतमिति २० यदहमकार्षं यत्कुर्वंतमप्यन्यं समन्वज्ञासं मनसा च तन्मिथ्या मे दुष्कृतमिति २१ यदहमचीकरं यत्कुर्वंतमप्यन्यं समन्वज्ञासं मनसा च तन्मिथ्या मे दुष्कृतमिति २२ यदहमकार्षं यदचीकरं वाचा च तन्मिथ्या मे दुष्कृतमिति २३ यदहमकार्षं यत्कुर्वंतमप्यन्यं समन्वज्ञासं वाचा च तन्मिथ्या मे दुष्कृतमिति २४ यदहमचीकरं यत्कुर्वंतमप्यन्यं समन्वज्ञासं वाचा च तन्मिथ्या मे दुष्कृतं २५ यदहमकार्षं यदचीकरं कायेन च तन्मिथ्या मे दुष्कृतमिति २६ यदहमकार्षं यत्कुर्वंतमप्यन्यं समन्वज्ञासं कायेन च तन्मिथ्या मे दुष्कृतमिति २७ यदहमचीकरं यत्कुर्वंतमप्यन्यं समन्वज्ञासं कायेन तन्मिथ्या मे दुष्कृतमिति २८ यदहम-

---

मध्यांतमुक्तमेकमखंडप्रतिभासमयं निजनिरंजनसहजशुद्धपरमसमयसाराभिधानं सर्वप्रकारोपादेयभूत शुद्धज्ञानस्वभावं शुद्धात्मतत्त्वमेव श्रद्धेयं ज्ञेयं ध्यातव्यमिति । एवं व्यावहारिकनवपदार्थमध्ये भूतार्थनयेन शुद्धजीव एक एव वास्तवः स्थित इति व्याख्यानमुख्यत्वेन एकादशस्थले पंचदश गाथा गताः । किं च—मत्यादिसंज्ञानपंचकं पर्यायरूपं तिष्ठति शुद्धपारिणामिक-

---

अब उपदेश करते हैं कि ऐसे कर्मचेतना और कर्मफलचेतना के त्याग की भावना से अज्ञान चेतना के अभाव को प्रगट नचाकर ज्ञानचेतना के स्वभाव को पूर्ण कर के, उसको नचाते हुए ज्ञानीजन सदाकाल आनन्द रूप रहें

इसी अर्थ का कलशरूप काव्य है—**अत्यंतं** इत्यादि । **अर्थ**—ज्ञानीजन कर्म से तथा कर्म के फल से अत्यन्त विरक्त भावना को निरंतर भाकर, और समस्त अज्ञानचेतना के नाश को अच्छी तरह नृत्य कराकर, अपने निज रस से प्राप्त स्वभावरूप ज्ञानचेतना को आनंद के साथ जैसे हो उस तरह पूर्ण करके नृत्य कराते हुए यहां से आगे कर्म के अभावरूप आत्मीकरसरूप अमृत रस को सदाकाल पीवें । यह ज्ञानीजनों को प्रेरणा है ।

भावार्थ—पहले तो तीन काल संबंधी कर्म का कर्तृत्व रूप कर्मचेतना के ४६ भंग रूप त्याग की भावना कराई, फिर १४८ कर्मप्रकृतियों का उदयरूप कर्मफल के त्याग की भावना कराई । ऐसे अज्ञानचेतना का प्रलय कराके ज्ञानचेतना में प्रवर्तने का उपदेश किया है । यह ज्ञानचेतना सदा आनन्दरूप अपने स्वभाव का अनुभवरूप है । उसको ज्ञानीजन सदा भोगो, यह श्रीगुरुओं का उपदेश है ।

यह सर्वविशुद्धज्ञान का अधिकार है; इसलिये ज्ञान को कर्ता-भोक्तापने से भिन्न दिखलाया ॥२३३॥

अब अन्य द्रव्य और अन्य द्रव्यों के भावों से ज्ञान को पृथक् दिखलाते हैं, उसकी सूचनिका का काव्य कहते हैं—**इतः पदार्थ** इत्यादि । **अर्थ**—यहां से आगे ज्ञान के अधिकार में सब वस्तुओं से भिन्नत्व के निश्चय से पृथक् किया गया ज्ञान निश्चल ठहरता है । पदार्थ के विस्तार को ज्ञेयज्ञान संबंध करके एकसा दिखलाने से हुई जो अनेक रूप कर्तृत्वभावरूप क्रिया, उसके विना एक ज्ञान क्रियामात्र सब आकुलता से रहित देदीप्यमान हुआ ठहरता है ।

भावार्थ—ज्ञान को सब वस्तुओं से पृथक् दिखलाते हैं ॥२३४॥

सत्थं णाणं ण हवइ जह्मा सत्थं ण याणए किंचि ।
तह्मा अण्णं णाणं अण्णं सत्थं जिणा विंति ॥ ३१० ॥
सद्दो णाणं ण हवइ जह्मा सद्दो ण याणए किंचि ।
तह्मा अण्णं णाणं अण्णं सद्दं जिणा विंति ॥ ३११ ॥
रूवं णाणं ण हवइ जह्मा रूवं ण याणए किंचि ।
तह्मा अण्णं णाणं अण्णं रूवं जिणा विंति ॥ ३१२ ॥
वण्णो णाणं ण हवइ जह्मा वण्णो ण याणए किंचि ।
तह्मा अण्णं णाणं अण्णं वण्णं जिणा विंति ॥ ३१३ ॥
गंधो णाणं ण हवइ जह्मा गंधो ण याणए किंचि ।
तह्मा अण्णं णाणं अण्णं गंधं जिणा विंति ॥ ३१४ ॥
ण रसो दु हवदि णाणं जह्मा दु रसो ण याणए किंचि ।
तह्मा अण्णं णाणं रसं य अण्णं जिणा विंति ॥३१५॥
फासो ण हवइ णाणं जह्मा फासो ण याणए किंचि ।
तह्मा अण्णं णाणं अण्णं फासं जिणा विंति ॥ ३१६ ॥
कम्मं णाणं ण हवइ जह्मा कम्मं ण याणए किंचि ।
तह्मा अण्णं णाणं अण्णं कम्मं जिणा विंति ॥ ३१७ ॥
धम्मो[1] णाणं ण हवइ जह्मा धम्मो ण याणए किंचि ।
तह्मा अण्णं णाणं अण्णं धम्मं जिणा विंति ॥ ३१८ ॥
णाणमधम्मो[2] ण हवइ जह्मा धम्मो ण याणए किंचि ।
तह्मा अण्णं णाणं अण्णमधम्मं जिणा विंति ॥ ३१९ ॥

भावस्तु द्रव्यरूपः । जीवपदार्थो हि न च केवलं द्रव्यं, न च पर्यायः, किंतु परस्परसापेक्षद्रव्यपर्यायधर्माधारभूतो धर्मी ।

यही गाथाओं में कहते हैं;—[शास्त्रं] शास्त्र [ज्ञानं न भवति] ज्ञान नहीं है [यस्मात्] क्योंकि [शास्त्रं किंचित् न जानाति] शास्त्र कुछ नहीं जानता, जड़ है [तस्मात्] इसलिये [ज्ञानं अन्यत्]

---

१. धम्मच्छिओ ण णाणं पाठः तात्पर्यवृत्तौ । २. ण हवदि णाणमधम्मच्छिओ, तात्पर्यवृत्तौ ।

कालो णाणं ण हवइ जह्मा कालो ण याणए किंचि ।
तह्मा अरणं णाणं अरणं कालं जिणा विंति ॥ ४०० ॥
आयामंपि ण णाणं जह्मा यासं ण याणए किंचि ।
तह्मा यासं अरणं अरणं णाणं जिणा विंति ॥ ४०१ ॥
णज्झवसाणं[1] णाणं अज्झवसाणं अचेदणं जह्मा ।
तह्मा अरणं णाणं अज्झवसाणं तहा अरणं ॥४०२ ॥
जह्मा जाणइ णिच्चं तह्मा जीवो दु जाणओ णाणी ।
णाणं च जाणयादो अव्वदिरित्तं मुणेयव्वं ॥ ४०३ ॥
णाणं सम्मादिट्ठिं दु संजमं सुत्तमंगपुव्वगयं ।
धम्माधम्मं च तहा पव्वज्जं अब्भुवंति बुहा ॥४०४॥ (पञ्चदशकम्)

शास्त्रं ज्ञानं न भवति यस्माच्छास्त्रं न जानाति किंचित् ।
तस्मादन्यज्ज्ञानमन्यच्छास्त्रं जिना विदंति ॥ ३९० ॥
शब्दो ज्ञानं न भवति यस्माच्छब्दो न जानाति किंचित् ।
तस्मादन्यज्ज्ञानमन्यं शब्दं जिना विदंति ॥ ३९१ ॥
रूपं ज्ञानं न भवति यस्माद्रूपं न जानाति किंचित् ।
तस्मादन्यज्ज्ञानमन्यद्रूपं जिना विदंति ॥ ३९२ ॥

तत्रेदानीं केन ज्ञानेन मोक्षो भवतीति विचार्यते—केवलज्ञानं तावत्फलभूतमग्रे भविष्यति । अवधिमनःपर्ययज्ञानद्वयं च **रूपिष्ववधेः । तदनंतभागे मनःपर्ययस्य** इति वचनात् मूर्तविषयत्वादेव मूर्तं मोक्षकारणं न भवति ततः सामर्थ्यादेव

ज्ञान अन्य है **[शास्त्रं अन्यत्]** शास्त्र अन्य है, ऐसे **[जिना विदंति]** जिन भगवान कहते हैं। **[शब्दः ज्ञानं न भवति]** शब्द ज्ञान नहीं है **[यस्मात्]** क्योंकि **[शब्दः किंचित् न जानाति]** शब्द कुछ नहीं जानता **[तस्मात्]** इसलिये **[ज्ञानं अन्यत्]** ज्ञान अन्य है **[शब्दं अन्यं]** शब्द अन्य है ऐसा **[जिना विदंति]** जिनदेव कहते हैं **[रूपं ज्ञानं न भवति]** रूप ज्ञान नहीं है **[यस्मात्]** क्योंकि **[रूपं किंचित् न जानाति]** रूप कुछ नहीं जानता **[तस्मात्]** इसलिये **[ज्ञानं अन्यत्]** ज्ञान अन्य है **[रूपं अन्यत्]** रूप अन्य है ऐसा **[जिना विदंति]** जिनदेव कहते हैं। **[वर्णः ज्ञानं न भवति]** वर्ण ज्ञान नहीं है

1. अज्झवसाणं णाणं णहवदि जह्मा अचेदणं णिच्चं इति तात्पर्यवृत्तौ पाठः ।

वर्णो ज्ञानं न भवति यस्माद्वर्णो न जानाति किंचित् ।
तस्मादन्यज्ज्ञानमन्यं वर्णं जिना विदंति ॥ ३६३ ॥
गंधो ज्ञानं न भवति यस्माद्गंधो न जानाति किंचित् ।
तस्मादन्यज्ज्ञानमन्यं गंधं जिना विदंति ॥ ३६४ ॥
न रसस्तु भवति ज्ञानं यस्मात्तु रसो न जानाति किंचित् ।
तस्मादन्यज्ज्ञानं रसं चान्यं जिना विदंति । ।३६५ ॥
स्पर्शो न भवति ज्ञानं यस्मात्स्पर्शो न जानाति किंचित् ।
तस्मादन्यज्ज्ञानमन्यं स्पर्शं जिना विदन्ति ।।३६६।।

बहिर्विषयमतिज्ञानश्रुतज्ञानविकल्परहितत्वेन स्वशुद्धात्माभिमुखपरिच्छित्तिलक्षणं निश्चयनिर्विकल्पभावरूपमानसमतिज्ञान श्रुतज्ञानसंज्ञ पचेंद्रिमाविषयत्वेनातींद्रियं शुद्धपारिणामिकभावविषये तु या भावना तद्रूपं निर्विकारस्वसंवेदनशब्दवाच्य संसारिणा

[यस्मात्] क्योंकि [वर्णः किंचित् न जानाति] वर्ण कुछ नहीं जानता [तस्मात्] इसलिये [ज्ञानं अन्यत्] ज्ञान अन्य है [वर्णः अन्यः] वर्ण अन्य है [जिना विदंति] ऐसा जिनदेव कहते है [गंधः ज्ञानं न भवति] गंध ज्ञान नहीं है [यस्मात्] क्योंकि [गंधः किंचित् न जानाति] गंध कुछ नहीं जानता [तस्मात्] इसलिये [ज्ञानं अन्यत्] ज्ञान अन्य है [गंधं अन्यं] गंध अन्य है ऐसा [जिना विदंति] जिनदेव कहते हैं । [रसः तु ज्ञानं न भवति] और रस ज्ञान नही है [यस्मात्तु] क्योंकि [रसः किंचित् न जानाति] रस कुछ नहीं जानता [तस्मात्] इसलिये [ज्ञानं अन्यत्] ज्ञान अन्य है [रसं च अन्यं] रस अन्य है ऐसा [जिना विदंति] जिनदेव कहते है [स्पर्शः ज्ञानं न भवति] स्पर्श ज्ञान नही है [यस्मात्] क्योंकि [स्पर्शः] स्पर्श [किंचित् न जानाति] कुछ नहीं जानता [तस्मात्] इसलिये [ज्ञानं अन्यत्] ज्ञान अन्य है [स्पर्शं अन्यं] स्पर्श अन्य है ऐसा [जिना विदंति] जिनदेव कहते है । [कर्म ज्ञानं न भवति] कर्म ज्ञान नही है [यस्मात्] क्योंकि [कर्म किंचित् न जानाति] कर्म कुछ नहीं जानता [तस्मात्] इसलिये [ज्ञानं अन्यत्] ज्ञान अन्य है [कर्म अन्यत्] कर्म अन्य है [जिना विदंति] ऐसा जिनदेव कहते हैं । [धर्मः ज्ञानं न भवति] धर्म ज्ञान नही है [यस्मात्] क्योंकि [धर्मः किंचित् न जानाति] धर्म कुछ नहीं जानता [तस्मात्] इसलिये [ज्ञानं अन्यत्] ज्ञान अन्य है [धर्मं अन्यं] धर्म अन्य है ऐसा [जिना विदंति] जिनदेव कहते हैं [अधर्मः ज्ञानं न भवति] अधर्म ज्ञान नहीं है [यस्मात्] क्योंकि [अधर्मः किंचित् न जानाति] अधर्म कुछ नहीं जानता [तस्मात्] इसलिये [ज्ञानं अन्यत्] ज्ञान अन्य है [अधर्मं अन्यं] अधर्म अन्य है ऐसा [जिना विदंति] जिनदेव कहते हैं [कालः ज्ञानं न भवति] काल ज्ञान नहीं है [यस्मात्] क्योंकि [कालः किंचित् न जानाति] काल कुछ नहीं जानता [तस्मात्] इसलिये [ज्ञानं

कर्म ज्ञानं न भवति यस्मात्कर्म न जानाति किंचित् ।
तस्मादन्यज्ज्ञानमन्यत्कर्म जिना विदन्ति ॥३९७॥
धर्मो ज्ञानं न भवति यस्माद्धर्मो न जानाति किंचित् ।
तस्मादन्यज्ज्ञानमन्यं धर्मं जिना विदन्ति ॥३९८॥
ज्ञानमधर्मो न भवति यस्मादधर्मो न जानाति किंचित् ।
तस्मादन्यज्ज्ञानमन्यमधर्मं जिना विदन्ति ॥३९९॥
कालो ज्ञानं न भवति यस्मात्कालो न जानाति किंचित् ।
तस्मादन्यद् ज्ञानमन्यं कालं जिना विदन्ति ॥४००॥
आकाशमपि न ज्ञानं यस्मादाकाशं न जानाति किंचित् ।
तस्मादाकाशमन्यदन्यज्ज्ञानं जिना विदन्ति ॥४०१॥
नाध्यवसानं ज्ञानमध्यवसानमचेतनं यस्मात् ।
तस्मादन्यज्ज्ञानमध्यवसानं तथान्यत् ॥४०२॥
यस्माज्जानाति नित्यं तस्माज्जीवस्तु ज्ञायको ज्ञानी ।
ज्ञानं च ज्ञायकादव्यतिरिक्तं ज्ञातव्यं ॥४०३॥
ज्ञानं सम्यग्दृष्टिं तु संयमं सूत्रमंगपूर्वगतं ।
धर्माधर्मं च तथा प्रव्रज्यामभ्युपयांति बुधाः ॥४०४॥

क्षायिकज्ञानाभावात् क्षायोपशमिकमपि विशिष्टभेदज्ञान मुक्तिकारणं भवति । कस्मात् ? इति चेत् समस्तमिथ्यात्वरागादि

अन्यत्] ज्ञान अन्य है [कालं अन्यं] काल अन्य है ऐसा [जिना विदंति] जिनदेव कहते हैं। [आकाशं अपि ज्ञानं न] आकाश भी ज्ञान नहीं है [यस्मात्] क्योंकि [आकाशं किंचित् न जानाति] आकाश कुछ नहीं जानता [तस्मात्] इसलिए [ज्ञानं अन्यत्] ज्ञान अन्य है [आकाशं अन्यत्] आकाश अन्य है ऐसा [जिना विदंति] जिनदेव ने कहा है। [तथा] उसी प्रकार [अध्यवसानं ज्ञानं न] अध्यवसान ज्ञान नहीं है [यस्मात्] क्योंकि [अध्यवसानं] अध्यवसान [अचेतनं] अचेतन है [तस्मात्] इसलिए [ज्ञानं अन्यत्] ज्ञान अन्य है [अध्यवसानं अन्यत्] अध्यवसान अन्य है ऐसा जिनदेव कहते हैं। [तस्मात् तु] इसलिये [जीवः] जीव [ज्ञायकः ज्ञानी] ज्ञायक है, वही ज्ञानी है [यस्मात्] क्योंकि [नित्यं जानाति] निरंतर जानता है [च] और [ज्ञानं] ज्ञान [ज्ञायकात् अव्यतिरिक्तं ज्ञातव्यं] ज्ञायक से अभिन्न है ऐसा जानना चाहिए [तु] और [ज्ञानं सम्यग्दृष्टिं] ज्ञान ही सम्यग्दृष्टि है [संयमं] संयम है [अंगपूर्वगतं सूत्रं] अंगपूर्वगत सूत्र है [च धर्माधर्मं] और धर्म अधर्म है [तथा] तथा [प्रव्रज्यां] दीक्षा भी ज्ञान है [बुधाः अभ्युपयांति] ऐसा ज्ञानीजन अंगीकार करते (मानते) हैं।

न श्रुतं ज्ञानमचेतनत्वात् ततो ज्ञानश्रुतयोर्व्यतिरेकः । न शब्दो ज्ञानमचेतनत्वात् ततो ज्ञान-शब्दयोर्व्यतिरेकः । न रूपं ज्ञानमचेतनत्वात् ततो ज्ञानरूपयोर्व्यतिरेकः । न वर्णो ज्ञानमचेतनत्वात् ततो ज्ञानवर्णयोर्व्यतिरेकः । न गंधो ज्ञानमचेतनत्वात् ततो ज्ञानगंधयोर्व्यतिरेकः । न रसो ज्ञान-मचेतनत्वात् ततो ज्ञानरसयोर्व्यतिरेकः । न स्पर्शो ज्ञानमचेतनत्वात् ततो ज्ञानस्पर्शयोर्व्यतिरेकः । न कर्म ज्ञानमचेतनत्वात् ततो ज्ञानकर्मणोर्व्यतिरेकः । न धर्मो ज्ञानमचेतनत्वात् ततो ज्ञानधर्मयो-र्व्यतिरेकः । नाधर्मो ज्ञानमचेतनत्वात् ततो ज्ञानाधर्मयोर्व्यतिरेकः । न कालो ज्ञानमचेतनत्वात् ततो ज्ञानकालयोर्व्यतिरेकः । नाकाशं ज्ञानमचेतनत्वात् ततो ज्ञानाकाशयोर्व्यतिरेकः । नाध्यवसानं ज्ञानमचेतनत्वात् ततो ज्ञानाध्यवसानयोर्व्यतिरेकः । इत्येवं ज्ञानस्य सर्वैरेव परद्रव्यैः सह व्यतिरेको निश्चयसाधितो द्रष्टव्यः । अथ जीव एवैको ज्ञानं चेतनत्वात् ततो ज्ञानजीवयोरेवाव्यतिरेकः. न च जीवस्य स्वयं ज्ञानत्वात्ततो व्यतिरेकः कश्चनापि शंकनीयः । एवं तु सति ज्ञानमेव सम्यग्दृष्टिः, ज्ञान-मेव संयमः, ज्ञानमेवांगपूर्वरूपं सूत्रं, ज्ञानमेव धर्माधर्मौ, ज्ञानमेव प्रव्रज्येति ज्ञानस्य जीवपर्यायैरपि

विकल्पोपाधिरहितस्वशुद्धात्मभावनोत्थपरमाल्हादैकलक्षणसुखामृतरसास्वादैकाकारपरमसमरसीभावपरिणामेन कार्यभूतस्या-नंतज्ञानसुखादिरूपस्य मोक्षफलस्य विवक्षितैकशुद्धनिश्चयनयेन शुद्धोपादानकारणत्वादिति । तथा चोक्तं "भेदविज्ञानतः सिद्धाः सिद्धा ये किल केचन । तस्यैवाभावतो बद्धा बद्धा ये किल केचन" ॥३९०—४०४॥ अतः परमेवं सति शुद्धबुद्धैकस्वभाव-परमात्मतत्त्वस्य देह एव नास्ति कथमाहारो भविष्यतीत्युपदिशति; —**अत्ता जस्स अमुत्तो** आत्मा यस्य शुद्धनयस्या-भिप्रायेण मूर्तो न भवति **ण हु सो आहारगो हवदि एवं** स एवममूर्तत्वे सति हु स्फुटं तस्य शुद्धनयस्याभिप्रायेणा-

---

टीका—वचनात्मक द्रव्य श्रुतज्ञान नहीं है क्योंकि वचन अचेतन है इसलिए ज्ञान का और श्रुत का भेद है । शब्द ज्ञान नहीं है क्योंकि शब्द पुद्गल द्रव्य की पर्याय है, अचेतन है; इसलिये ज्ञान का और शब्द का भेद है । रूप ज्ञान नहीं हैं क्योंकि रूप पुद्गल का गुण है, अचेतन है, इसलिये रूप का और ज्ञान का भेद है । वर्ण ज्ञान नहीं है क्योंकि वर्ण पुद्गलद्रव्य का गुण है, अचेतन है, इसलिये वर्ण का और ज्ञान का भेद है । गंध ज्ञान नहीं है क्योंकि गंध पुद्गलद्रव्य का गुण है, अचेतन है, इसलिये गंध का और ज्ञान का भेद है । रस ज्ञान नहीं है क्योंकि रस पुद्गलद्रव्य का गुण है, अचेतन है, इसलिए रस का और ज्ञान का परस्पर भेद है । स्पर्श ज्ञान नहीं है क्योंकि स्पर्श पुद्गलद्रव्य का गुण है, अचेतन है, इसलिये स्पर्श का और ज्ञान का भेद है । कर्म ज्ञान नहीं है क्योंकि कर्म अचेतन है, इसलिये कर्म का और ज्ञान का भेद है । धर्मद्रव्य ज्ञान नहीं है, क्योंकि धर्म अचेतन है इसलिए धर्मद्रव्य का और ज्ञान का भेद है । अधर्मद्रव्य ज्ञान नहीं है क्योंकि अधर्मद्रव्य अचेतन है इसलिए अधर्मद्रव्य का और ज्ञान का भेद है । कालद्रव्य ज्ञान नहीं है, क्योंकि काल अचेतन है इसलिए काल का और ज्ञान का भेद है । आकाशद्रव्य ज्ञान नहीं है, क्योंकि आकाश अचेतन है इसलिये ज्ञान का और आकाश का भेद है । अध्यवसान ज्ञान नहीं, है क्योंकि अध्यवसान अचेतन है, इसलिये ज्ञान का और कर्म के उदय की प्रवृत्ति रूप अध्यवसान

सहाव्यतिरेको निश्चयसाधितो द्रष्टव्यः। अथैवं सर्वपरद्रव्यव्यतिरेकेण सर्वदर्शनादिजीवस्वभावाव्यतिरेकेण वा अतिव्याप्तिमव्याप्तिं च परिहरमाणमनादिविभ्रममूलं धर्माधर्मरूपं परसमयमुद्वम्य स्वयमेव प्रव्रज्यारूपमापद्य दर्शनज्ञानचारित्रस्थितित्वरूपं स्वसमयमवाप्य मोक्षमार्गमात्मन्येव परिणतं कृत्वा समवाप्तसंपूर्णविज्ञानघनभावं हानोपादानशून्यं साक्षात्समयसारभूतं परमार्थरूपं शुद्धंज्ञानमेकमेव स्थितं द्रष्टव्यं ॥३९०-४०४॥

हारको न भवति। **आहारो खलु मुत्तो** आहारः। कथंभूतः? खलु स्फुटं मूर्तः। **जह्मा सो पुग्गलमओ दु** यस्मात् स नोकर्माद्याहारः पुद्गलमयः। **सो कोवि य तस्स गुणो** स कोपि तस्य गुणोऽस्त्यात्मनः। कथं? **पाउ-**

का भेद है। इस प्रकार ज्ञान का सब परद्रव्यों के साथ साथ भिन्न होने का निश्चय साधित देखना चाहिए।

अब कहते हैं कि जीव ही एक ज्ञान है; क्योंकि जीव चेतन है; इसलिये ज्ञान का और जीव का अभेद है। जीव के अपने आप ज्ञानपना है, ज्ञान जीव का भेद कुछ भी शंकारूप नहीं करना। ऐसा होने पर ज्ञान ही सम्यग्दृष्टि है, ज्ञान ही संयम है, ज्ञान ही अंगपूर्वगत सूत्र है। तथा धर्म अधर्म भी ज्ञान ही है और ज्ञान ही दीक्षा है और ज्ञान ही निश्चय चारित्र है। इस तरह जीव का पर्यायों के साथ भी अभेद का निश्चय साधित देखना।

अब कहते है कि इस प्रकार सब परद्रव्यों के साथ तो व्यतिरेक (भेद) के द्वारा तथा सब दर्शनादि जीव स्वभावों के साथ अभेद के द्वारा अतिव्याप्ति और अव्याप्ति दोष को दूर करता हुआ, अनादिकाल से जिसका मूलकारण अविद्या है ऐसे पुण्य पाप जो शुभ अशुभ रूप परसमय उसको दूर कर के, आप निश्चय चारित्ररूप दीक्षा को पाकर, दर्शन ज्ञानचारित्र में स्थिति रूप जो स्वसमय उसको व्यापकर आत्मा में ही मोक्षमार्ग के परिणाम कर जिसने सम्पूर्ण विज्ञानघन स्वभाव पालिया है ऐसा, त्याग ग्रहण से रहित साक्षात् समयसारभूत परमार्थरूप शुद्ध एक ज्ञान ही अवस्थित हुआ देखना अर्थात् प्रत्यक्ष स्वसंवेदन अनुभव करना।

भावार्थ—सब परद्रव्यों से तो जुदा और अपने पर्यायो से अभेदरूप ऐसा एक ज्ञान दिखलाया। इसलिये अतिव्याप्ति और अव्याप्ति नाम वाले लक्षण के दोष दूर हो गये। क्योंकि आत्मा का लक्षण उपयोग है, उपयोग में ज्ञान प्रधान है, वह अन्य अचेतन द्रव्यों में नहीं है; इस कारण अतिव्याप्ति स्वरूप नहीं है। और अपनी सब अवस्थाओं में है, इसलिये अव्याप्ति स्वरूप नहीं है। यहां पर ज्ञान कहने से आत्मा ही जानना, क्योंकि अभेदविवक्षा में गुण और गुणी का आपस में अभेद है; इसलिये विरोध नहीं। यहां ज्ञान को ही प्रधान कर आत्मा का अधिकार है इसी लक्षण से सब परद्रव्यों से भिन्न अनुभवगोचर होता है। यद्यपि आत्मा में अनंत धर्म हैं तो भी उनमें कोई तो छद्मस्थ के अनुभवगोचर ही नहीं कि उनको कहे। छद्मस्थ ज्ञानी आत्मा को नहीं पहचान सकता। कोई धर्म अनुभवगोचर हैं उनमें कोई अस्तित्व, वस्तुत्व, प्रमेयत्वादिक हैं वे अन्यद्रव्यों से साधारण (समान) हैं उनके कहने से पृथक् आत्मा

अन्येभ्यो व्यतिरिक्तमात्मनियतं बिभ्रत्पृथग्वस्तुता-
मादानोज्झनशून्यमेतदमलं ज्ञानं तथावस्थितं ।
मध्याद्यंतविभागमुक्तसहजस्फारप्रभाभासुरः
शुद्धज्ञानघनो यथास्य महिमा नित्योदितस्तिष्ठति ॥२३५॥

ग्गिय विस्ससो वापि प्रायोगिको वैश्रसिकश्चेति । प्रायोगिकः कर्मसंयोगजनितः । वैस्रसिकः स्वभावजः । येन गुणेन किं करोति ? **णवि सक्कदि घित्तुं जे ण मुञ्चिदुं चेव जं परं दव्वं** परद्रव्यमाहारादिकं गृहीतु मोक्तुं च न

नहीं जाना जाता। कोई परद्रव्य के निमित्त से हुए हैं, उनको कहने से परमार्थ आत्मा का शुद्ध स्वरूप कैसे जाना जाय ? इसलिये ज्ञान ही कहने से छद्मस्थ ज्ञानी आत्मा को पहचान सकता है। इसलिये ज्ञान को ही आत्मा कहकर इस ज्ञान में अनादि अज्ञान से शुभाशुभ उपयोगरूप परसमय की प्रवृत्ति को दूर करके, सम्यग्दर्शन ज्ञान चारित्र में प्रवृत्तिरूप स्वसमयरूप परिणमनस्वरूप मोक्षमार्ग में आत्मा को परिणमा के संपूर्ण ज्ञान को जब प्राप्त होता है, तब फिर त्याग ग्रहण के लिये कुछ नहीं रहता। ऐसा साक्षात् समयसारस्वरूप पूर्ण ज्ञान परमार्थभूत शुद्ध ठहरे उसको देखना। वहां पर देखना भी तीन प्रकार जानना। एक तो शुद्धनय के ज्ञान द्वारा इसका श्रद्धान करना। यह तो अविरत आदि अवस्था में भी मिथ्यात्व के अभाव से होता है। दूसरा ज्ञान श्रद्धान हुए बाद बाह्य सब परिग्रह का त्यागकर इसका अभ्यास करना। उपयोग को ज्ञान में ही ठहराता। जैसा शुद्धनय से अपने स्वरूप को सिद्ध समान जानकर श्रद्धान किया, वैसा ही ध्यान में लेकर एकाग्र चित्त को ठहराना, बार बार इसीका अभ्यास करना। किन्तु यह देखना तो अप्रमत्त दशा में होता है। इसलिए जहां तक ऐसे अभ्यास से केवल ज्ञान प्राप्त हो वहां तक यह अभ्यास निरंतर करना। यह देखना दूसरा प्रकार है। यहां तक तो पूर्ण ज्ञान का शुद्धनय के आश्रय से परोक्ष देखना है। और तीसरा केवल ज्ञान प्राप्त हो तब साक्षात् देखना होता है। उस समय सब विभावों से रहित हुआ सब को देखने जानने वाला ज्ञान होता है। यह पूर्ण ज्ञान का प्रत्यक्ष देखना है। ज्ञान है वही आत्मा है। अभेदविवक्षा में ज्ञान कहो या आत्मा कहो कुछ विरोध नहीं जानना।

अब इस अर्थ का कलशरूप काव्य कहते हैं—**अन्येभ्यो** इत्यादि। **अर्थ**—यह ज्ञान उस तरह अवस्थित हुआ है जैसे इसकी महिमा निरंतर उदित रहे, प्रतिपक्षी कर्म न रहे। अन्य परद्रव्यों से भिन्न अवस्थित हुआ है, अपने में ही निश्चित है, पृथक् वस्तुत्व धारण करता हुआ है अर्थात् वस्तु का स्वरूप सामान्य विशेषात्मक है सो ज्ञान ने भी सामान्य विशेषात्मकपने को धारण कर रक्खा है, ग्रहण त्याग से रहित है, रागादिक मलसे रहित है। और इसकी महिमा नित्य उदय रूप ठहर रही है। मध्य आदि अन्त जो भेद उनसे रहित स्वाभाविक विस्तार रूप हुए प्रकाश कर देदीप्यमान है और शुद्ध ज्ञान का समूह है। ऐसी जिसकी महिमा सदा उदयमान है, उस तरह ठहरा हुआ है।

भावार्थ—ज्ञान का पूर्णरूप सबको जानना है। सो जब यह प्रकट होता है तब उन विशे-

उन्मुक्तमुन्मोच्यमशेषतस्तत्तथात्तमादेयमशेषतस्तत् ।
यदात्मनः संहृतसर्वशक्तेः पूर्णस्य संधारणमात्मनीह ॥२३६॥
व्यतिरिक्तं परद्रव्यादेवं ज्ञानमवस्थितं ।
कथमाहारकं तत्स्याद्येन देहोऽस्य शंक्यते ॥२३७॥

अत्ता जस्सामुत्तो ण हु सो आहारओ हवइ एवं ।
आहारो खलु मुत्तो जह्मा सो पुग्गलमओ उ ॥४०५॥
णवि सक्कइ घित्तुं जं ण[1] विमोत्तुं जं य जं परद्दव्वं ।
सो कोवि य तस्स गुणो पाउगिओ विस्ससो वावि ॥४०६॥
तह्मा उ जो विसुद्धो चेया सो णेव गिण्हए किंचि ।
णेव विमुंचइ किंचिवि जीवाजीवाण दव्वाणं ॥४०७ (त्रिकलम्)

शक्नोति । अहो हे भगवन् ? कर्मजनितप्रायोगिकगुणेन आहारं गृह्णंस्ते च कथमनाहारका भवति इति । हे शिष्य ! भद्रमुक्तं त्वया परं किंतु निश्चयेन तन्मयो न भवति स व्यवहारनयः । इद तु निश्चयव्याख्यानमिति । **तह्मा दु जो विशुद्धो चेदा** यस्मान्निश्चयनयेनानाहारकः तस्मात्कारणात् यस्तु विशेषेण शुद्धो रागादिरहितश्चेतयितात्मा **सो णेव गिह्णदे किंचि णेव विमुञ्चदि किंचिवि जीवाजीवाण दव्वाणं** कर्माहार-नोकर्माहार-कवलाहार-लेप्याहार-ओजआहार-मानसाहाररूपेण जीवाजीवद्रव्याणां मध्ये सचित्ताचित्ताहारं नैव किंचिद् गृह्णाति न मुंचति । तत कारणान्नोकर्माहारमयं शरीरं जीवस्वरूपं न भवति । शरीराभावे शरीरमयद्रव्यलिंगमपि जीवस्वरूपं न भवति इति । एवं निश्चयेन जीवस्या-

---

पणों के साथ प्रकट होता है । इसकी महिमा कोई नहीं बिगाड़ सकता, सदा उदयमान रहती है॥२३५॥

अब इसी अर्थ को काव्य से कहते हैं कि ऐसे ज्ञान स्वरूप आत्मा का धारण करना यही कृत-कृत्यपना है—**उन्मुक्त** इत्यादि । **अर्थ**—जिसने सब शक्तियां समेट ली है, ऐसे पूर्ण स्वरूप आत्मा का आत्मा में ही धारण करना वही तो छोड़ने योग्य छोड़ा और जो ग्रहण करने योग्य था सो सब ग्रहण कर लिया ।

भावार्थ—पूर्ण ज्ञान स्वरूप सब शक्तियों का समूह स्वरूप आत्मा को धारण करना वही त्यागने योग्य सभी त्याग किया और ग्रहण करने योग्य था वह ग्रहण किया । यही कृतकृत्यपना है॥२३६॥

आगे कहते हैं कि ऐसे ज्ञान के देह भी नहीं है उसकी सूचना का श्लोक है—**व्यतिरिक्तं** इत्यादि । **अर्थ**—ज्ञान पूर्वोक्त प्रकार परद्रव्य से पृथक् ठहरा । ऐसा ज्ञान कर्म नोकर्मरूप आहार करनेवाला आहारक कैसे हो सकता है ? और जब आहारक नहीं है तो इसके देह की शंका नहीं करना ॥२३७॥

१. ण मु चदे चेव ज पर दव्वं पाठोयं तात्पर्यवृत्तौ ।

आत्मा यस्यामूर्तो न खलु स आहारको भवत्येवं।
आहारः खलु मूर्तो यस्मात्स पुद्गलमयस्तु ॥४०५॥
नापि शक्यते ग्रहीतुं यन्न विमोक्तुं यच्च यत्परं द्रव्यं।
स कोऽपि च तस्य गुणो प्रायोगिको वैस्रसो वापि ॥४०६॥
तस्मात्तु यो विशुद्धश्चेतयिता स नैव गृह्णाति किंचित्।
नैव विमुंचति किंचिदपि जीवाजीवयोर्द्रव्ययोः ॥४०७

ज्ञानं हि परद्रव्यं किंचिदपि न गृह्णाति न मुञ्चति प्रायोगिकगुणसामर्थ्यात् वैस्रसिकगुणसामर्थ्याद्वा ज्ञानेन परद्रव्यस्य गृहीतुं मोक्तुं चाशक्यत्वात्। परद्रव्यं च न ज्ञानस्यामूर्तात्मद्रव्यस्य मूर्तपुद्गलद्रव्यत्वादाहारः ततो ज्ञानं नाहारकं भवत्यतो ज्ञानस्य देहो न शंकनीयः ॥४०५।४०६।४०७॥

हारो नास्ति, इति व्याख्यानमुख्यत्वेन द्वादशस्थले गाथात्रय गतं ॥४०५।४०६।४०७॥ अथैवं विशुद्धज्ञानदर्शनस्वभावस्य परमात्मनो नोकर्माहाराद्यभावे सत्याहारमयदेहो नास्ति। देहाभावे देहमयं द्रव्यलिंगं निश्चयेन मुक्तिकारणं न भवतीति

अब इस अर्थ को गाथा में कहते हैं;—[एवं] इस प्रकार [यस्य आत्मा अमूर्तः] जिसका आत्मा अमूर्तीक है [स खलु] वह निश्चय से [आहारकः न भवति] आहारक नहीं है [यस्मात्] क्योंकि [आहारः खलु मूर्तः] आहार मूर्तीक है [स तु पुद्गलमयः] वह तो पुद्गलमय है। [यत् परद्रव्यं] जो पर द्रव्य है [यत् ग्रहीतुं च विमोक्तुं नापि शक्यते] वह ग्रहण भी नहीं किया जा सकता और छोड़ा भी नहीं जा सकता [स कोपि च तस्य गुणः] वह कोई ऐसा ही आत्मा का गुण [प्रायोगिकः वापि वैस्रसः] प्रायोगिक तथा वैस्रसिक है। [तस्मात्तु] इसलिये [यः विशुद्धः चेतयिता] जो विशुद्ध आत्मा है [सः] वह [जीवाजीवयोः द्रव्ययोः] जीव अजीव पर द्रव्य में से [किंचित् नैव गृह्णाति] किसी को भी न तो ग्रहण ही करता है [अपि किंचित् नैव विमुञ्चति] और न किसी को छोड़ता है।

टीका—यहां आत्मा कहने से ज्ञान का ग्रहण है, क्योंकि अभेद विवक्षा से लक्षण में ही लक्ष्य का व्यवहार है। इस न्याय से आत्मा को ज्ञान ही कहा जाता है। इसलिये टीकाकार कहते हैं कि ज्ञान परद्रव्य को किंचित् मात्र भी ग्रहण नहीं करता और न छोड़ता है; क्योंकि प्रायोगिक अर्थात् परनिमित्त से उत्पन्न हुआ जो गुण, उसकी सामर्थ्य से तथा वैस्रसिक (स्वाभाविक) गुण की सामर्थ्य से दोनों तरह से ज्ञान के द्वारा परद्रव्य के ग्रहण करने का और छोड़ने का असमर्थपना है। अमूर्तीक आत्मद्रव्य जो ज्ञान उसके मूर्तीक पुद्गलद्रव्य आहार नहीं है, क्योंकि अमूर्तीक के मूर्तीक आहार नहीं होता। इसलिये ज्ञान आहारक नहीं है। इस कारण ज्ञान में देह की शंका न करना।

भावार्थ—ज्ञानस्वरूप आत्मा अमूर्तीक है और कर्म नोकर्म रूप पुद्गलमय आहार मूर्तीक

एवं ज्ञानस्य शुद्धस्य देह एव न विद्यते ।
ततो देहमयं ज्ञातुर्न लिंगं मोक्षकारणं ॥२३८॥

पाखंडीलिंगाणि व गिहलिंगाणि व बहुप्पयाराणि ।
घित्तुं वदंति मूढा लिंगमिणं मोक्खमग्गोत्ति ॥४०८॥
ण उ होदि मोक्खमग्गो लिंगं जं देहणिम्ममा अरिहा ।
लिंगं मुइत्तु दंसणणाणचरित्ताणि सेयंति ॥४०९॥

पाषंडिलिंगानि वा गृहलिंगानि वा बहुप्रकाराणि ।
गृहीत्वा वदंति मूढा लिंगमिदं मोक्षमार्ग इति ॥४०८॥
न तु भवति मोक्षमार्गो लिंगं यद्देहनैर्म्मम्या[1] अर्हंतः ।
लिंगं मुक्त्वा दर्शनज्ञानचारित्राणि सेवंते ॥४०९॥

केचिद्द्रव्यलिंगमज्ञानेन मोक्षमार्गं मन्यमानाः संतो मोहेन द्रव्यलिंगमेवोपाददते । तद-

---

प्रतिपादयति;—पाखंडिलिंगानि गृहस्थलिंगानि च बहुप्रकाराणि गृहीत्वा वदंति मूढा । किं वदति ? इदं द्रव्यमयलिंगमेव मुक्तिकारणं । कथंभूताः संतः ? रागादिविकल्पोपाधिरहितं परमसमाधिरूप भावलिंगमजानत. ण य होदि मोक्ख-

---

है; इसलिये परमार्थ से आत्मा के पुद्गलमय आहार नहीं है । आत्मा का ऐसा ही स्वभाव है । इस कारण परद्रव्य को तो ग्रहण ही नहीं करता । स्वभावरूप परिणमन करे तथा विभाव रूप परिणमन करे, अपने ही परिणाम का ग्रहण त्याग है, परद्रव्य का ग्रहण त्याग कुछ भी नहीं है । इसलिये आत्मा के पुद्गलमय देह स्वरूप लिंग (वेष—बाह्यचिह्न) मोक्ष के कारण नहीं ॥४०५। ४०६-४०७॥

उसकी सूचना का श्लोक कहते हैं—**एवं ज्ञानस्य** इत्यादि । **अर्थ**—पूर्वोक्त प्रकार से शुद्धज्ञान के देह ही विद्यमान नहीं है इसलिये ज्ञाता के देहमय चिह्न (भेष) मोक्ष का कारण नहीं है ॥२३८॥

अब इस अर्थ को गाथाओं से कहते है;—[**पाखंडिलिंगानि**] पाखंडिलिंग [**वा**] अथवा [**गृहिलिंगानि**] गृहिलिंग ऐसे [**बहुप्रकाराणि**] बहुत प्रकार के बाह्य लिंग हैं उनको [**ग्रहीत्वा**] धारण करके [**मूढा इति वदंति**] अज्ञानी जन ऐसा कहते हैं कि [**इदं लिंगं**] यह लिंग ही [**मोक्षमार्गः**] मोक्ष का मार्ग है । आचार्य कहते हैं कि [**लिंगं मोक्षमार्गः न तु भवति**] लिंग मोक्ष का मार्ग नहीं है [**यत्**] क्योंकि [**अर्हंतः**] अर्हंत देव भी [**देहनिर्ममाः**] देह से निर्ममत्व हुए [**लिंगं मुक्त्वा**] लिंग को छोड़कर [**दर्शनज्ञानचारित्राणि सेवंते**] दर्शनज्ञान चारित्र को ही सेवन करते हैं ।

टीका—कितने ही लोग अज्ञान से द्रव्यलिंग को ही मोक्ष मार्ग मानते हुए मोह से द्रव्यलिंग को ही अंगीकार करते हैं । इस द्रव्यलिंग को मोक्ष मार्ग मानना अयुक्त है; क्योंकि सभी अरहंत देवों

---

१. निर्ममा इत्यपि पाठः

प्यनुपपन्नं सर्वेषामेव भगवतामर्हद्देवानां शुद्धज्ञानमयत्वे सति द्रव्यलिंगाश्रयभूतशरीरममकारत्यागात्। तदाश्रितद्रव्यलिंगत्यागेन दर्शनज्ञानचारित्राणां मोक्षमार्गत्वेनोपासनस्य दर्शनात् ॥४०८।४०६॥

अथैतदेव साधयति—

ण वि एस मोक्खमग्गो पाखंडीगिहिमयाणि लिंगाणि।
दंसणणाणचरित्ताणि मोक्खमग्गं जिणा विंति ॥४१०॥

नाप्येष मोक्षमार्गः पाखंडिगृहिमयानि लिंगानि।
दर्शनज्ञानचरित्राणि मोक्षमार्गं जिना विदंति ॥४१०॥

न खलु द्रव्यलिंगं मोक्षमार्गः शरीराश्रितत्वे सति परद्रव्यत्वात्। तस्माद्दर्शनज्ञानचारित्राण्येव मोक्षमार्गः, आत्माश्रितत्वे सति स्वद्रव्यत्वात् ॥४१०॥

मग्गो लिंगं भावलिंगरहितं द्रव्यलिंग केवलं मोक्षमार्गो न भवति। कस्मात् ? इति चेत्-जं यस्मात्कारणात् **देहणिम्ममा अरिहा** अर्हंतो भगवंतो देहनिर्ममाः संतः। किं कुर्वंति ? **लिंगं मुइत्तु** लिंगाधारं यच्छरीरं तस्य शरीरस्य

के शुद्ध ज्ञानमयता होने से, द्रव्यलिंग का आश्रयभूत शरीर के ममत्व का त्याग होने से, उस शरीर के आश्रित द्रव्यलिंग के त्याग को और दर्शनज्ञानचारित्र की मोक्षमार्ग रूप से उपासना देखी जाती है।

भावार्थ—यदि देहमय द्रव्यलिंग ही मोक्ष का कारण होता तो अरहंतादिक देह का ममत्व छोड़ दर्शनज्ञानचारित्र को क्यों सेवन करते, द्रव्यलिंग से ही मोक्ष को प्राप्त हो जाते। इसलिये यह निश्चय हुआ कि देहमयलिंग मोक्षमार्ग नहीं है। परमार्थ से दर्शन ज्ञानचारित्र रूप आत्मा ही मोक्ष का मार्ग है ॥४०८।४०६॥

आगे यह सिद्ध करते हैं कि दर्शनज्ञान और चारित्र ही मोक्षमार्ग है;—[**पाखण्डगृहिमयानि लिंगानि**] पाखंडी (मुनिलिंग) और गृहस्थलिंग [**एषः**] यह [**मोक्षमार्गः**] मोक्षमार्ग [**नापि**] नहीं है [**दर्शनज्ञानचारित्राणि**] दर्शनज्ञान और चारित्र [**मोक्षमार्गं**] मोक्षमार्ग हैं [**जिना विदंति**] ऐसा जिनदेव कहते हैं॥

टीका— निश्चय से द्रव्यलिंग मोक्ष का मार्ग नहीं है, क्योंकि इसको शरीर के आश्रित होने से यह परद्रव्य है, दर्शनज्ञानचारित्र ही मोक्ष मार्ग हैं; क्योंकि इसको आत्माश्रित होनेसे (निज आत्म) द्रव्यपना है॥

भावार्थ—मोक्ष सब कर्मों के अभाव रूप आत्मा का परिणाम है, इसलिये इसका कारण भी आत्मा का परिणाम ही होना चाहिये। दर्शनज्ञानचारित्र आत्मा के परिणाम हैं इसलिये वे ही मोक्ष के मार्ग हैं, यह निश्चय से कहा है। लिंग है देहमय है, देह पुद्गलद्रव्यमय है; इसलिये आत्मा के देह मोक्ष का मार्ग नहीं है। परमार्थ से अन्यद्रव्य का अन्यद्रव्य कुछ नहीं करता यह नियम है ॥४१०॥

यत एवं—

तह्मा दुहित्तु लिंगे सागारणगारएहिं वा गहिए।
दंसणणाणचरित्ते अप्पाणं जुंज मोक्खपहे ॥४११॥

तस्मात् तु हित्वा लिंगानि सागारैरनगारैर्वा गृहीतानि।
दर्शनज्ञानचारित्रे आत्मानं युंक्ष्व मोक्षपथे ॥४११॥

यतो द्रव्यलिंगं न मोक्षमार्गः, ततः समस्तमपि द्रव्यलिंगं त्यक्त्वा दर्शनज्ञानचारित्रेष्वेव मोक्षमार्गत्वात् आत्मा योक्तव्य इति सूत्रानुमतिः ॥४११॥

यन्ममत्वं तन्मनोवचनकायैर्मुक्त्वा। पश्चात् **दंसणणाण चरित्ताणि सेवते** चिदानंदैकस्वभावशुद्धात्मतत्त्वविषये यानि श्रद्धानज्ञानानुचरणरूपाणि सम्यग्दर्शनज्ञानचरित्राणि तानि सेवंते भावयंतीत्यर्थः ॥४०८।४०९॥ अथैतदेव व्याख्यानं विशेषेण दृढयति;—**ण वि एस मोक्खमग्गो** न चैष मोक्षमार्गः। एष कः? **पाखंडिगिहिमयाणि लिंगाणि** निर्विकल्पसमाधिरूपभावलिंगान्निरपेक्षाणि रहितानि यानि पाखण्डिगृहिमयानि द्रव्यलिंगानि। कथंभूतानि? निर्ग्रंथकौपीनग्रहणरूपाणि बहिरंगाकारचिह्नानि। तर्हि को मोक्षमार्गः? इति चेत् **दंसणणाणचरित्ताणि मोक्खमग्गं जिणा विंति** शुद्धबुद्धैकस्वभाव एव परमात्मतत्त्वश्रद्धानज्ञानानुभूतिरूपाणि सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गं जिना वदंति कथयंति ॥४१०॥ यत एवं— **तह्मा जहित्तु लिंगे सागारणगारिएहिं वा गहिदे** यस्मात्कारणात्पूर्वोक्तप्रकारेण

आगे कहते हैं कि यदि द्रव्यलिंगमोक्षमार्ग नहीं है तो यह उपदेश है; कि आत्मा को दर्शनज्ञान और चारित्र में ही लगाना चाहिए **[तस्मात्]** इस कारण **[सागारैः]** गृहस्थों के **[वा]** अथवा **[अनगारैः]** मुनियों के **[गृहीतानि लिंगानि]** ग्रहण किये गये लिंगों को **[जहित्वा]** छोड़कर **[आत्मानं]** अपने आत्मा को **[दर्शनज्ञानचारित्रे]** दर्शनज्ञानचारित्रस्वरूप **[मोक्षपथे]** मोक्ष मार्ग में **[युंक्ष्व]** युक्त करो। यह श्री गुरुओं का उपदेश है।

टीका—क्योंकि द्रव्यलिंग मोक्षका मार्ग नहीं है, इस कारण सभी द्रव्यलिंगों को छोड़कर दर्शन ज्ञानचारित्र में ही आत्मा को युक्त करना। यही मोक्ष का मार्ग है ऐसा सूत्र का उपदेश है।

भावार्थ—यहाँ द्रव्यलिंग को छुड़ाकर दर्शन ज्ञान और चारित्र में लगाने का वचन है। यह सामान्य परमार्थ वचन है। मुनि श्रावक के व्रत छुड़ाने का उपदेश नहीं है। जो केवल द्रव्यलिंग को ही मोक्षमार्ग जानकर भेष धारण करते हैं उनको द्रव्यलिंग का पक्ष छुड़ाया है कि वेषमात्र से मोक्ष नहीं है, परमार्थ रूप मोक्षमार्ग आत्मा के दर्शन ज्ञान और चारित्ररूप परिणाम ही हैं। व्यवहार आचार सूत्र में कहे अनुसार जो मुनि श्रावक के बाह्यव्रत हैं वे व्यवहार से निश्चय मोक्षमार्ग के साधक हैं। उनको नहीं छुड़ाते; परन्तु ऐसा कहते हैं कि उनका भी ममत्व छोड़ परमार्थ मोक्षमार्ग में लगने से ही मोक्ष होता है, केवल भेषमात्र से मोक्ष नहीं है, ऐसा जानना ॥४११॥

दर्शनज्ञानचारित्रत्रयात्मा तत्त्वमात्मनः ।
एक एव सदा सेव्यो मोक्षमार्गो मुमुक्षुणा ॥२३९॥

मोक्खपहे अप्पाणं ठवेहि तं चेव झाहि तं चेय ।
तत्थेव विहर णिच्चं मा विहरसु अण्णदव्वेसु ॥४१२॥

मोक्षपथे आत्मानं स्थापय तं चैव ध्यायस्व तं चेतयस्व ।
तत्रैव विहर नित्यं मा विहार्षीरन्यद्रव्येषु ॥४१२॥

आ संसारात्परद्रव्ये रागद्वेषादौ नित्यमेव स्वप्रज्ञादोषेणावतिष्ठमानमपि स्वप्रज्ञागुणेनैव ततो व्यावर्त्य दर्शनज्ञानचारित्रेषु नित्यमेवावस्थापय अतिनिश्चलमात्मानं । तथा समस्तचिन्तान्तर निरोधेनात्यंतमेकाग्रो भूत्वा दर्शनज्ञानचारित्राण्येव ध्याय । तथा सकलकर्मकर्मफलचेतनासंन्यासेन शुद्धज्ञानचेतनामयो भूत्वा दर्शनज्ञानचारित्राण्येव चेतयस्व । तथा द्रव्यस्वभाववशतः प्रतिक्षण-विजृम्भमाणपरिणामतया तन्मयपरिणामो भूत्वा दर्शनज्ञानचारित्रेष्वेव विहर । तथा ज्ञानरूपमेकमे-

---

सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गं जिनाः प्रतिपादयंति तस्मात्यक्त्वा । कानि ? निर्विकारस्वसंवेदनरूपभावलिंगरहितानि सागारानगारवर्गैः समूहैः—गृहीतानि बहिरंगाकारद्रव्यलिंगानि । पश्चात् किं कुरु ? **दंसणणाणचरित्ते अप्पाणं जुंज मोक्खपहे** हे भव्य! आत्मानं योजय संबंधं कुरुष्व । क्व केवलज्ञानाद्यनंतचतुष्टयस्वरूपशुद्धात्मसम्यक्श्रद्धानज्ञानानुष्ठानरूपाभेदरत्नत्रयलक्षणे मोक्षपथे मोक्षमार्गे ॥४११॥ अथ निश्चयरत्नत्रयात्मकः शुद्धात्मानुभूतिलक्षणो मोक्षमार्गो मोक्षार्थिना पुरुषेण सेवितव्य इत्युपदिशति—**मोक्खपहे अप्पाणं ठवेहि** हे भव्य ! आत्मानं स्थापय क्व विषये ? शुद्धज्ञानदर्शनस्वभावात्मतत्त्वसम्यक्श्रद्धानज्ञानानुचरणरूपाभेदरत्नत्रयस्वरूपे मोक्षपथे । **चेदयहि** तमेव मोक्षपथं चेतयस्व परमसमरसी-

---

आगे इसी अर्थ को दृढ़ करने की सूचना का श्लोक कहते हैं—**दर्शन** इत्यादि । **अर्थ**—जिस कारण आत्मा का यथार्थरूप दर्शन ज्ञानचारित्र का त्रिकस्वरूप है इस कारण मोक्ष के इच्छुक पुरुषों को एक यही मोक्षमार्ग सदा सेवने योग्य है ॥२३९॥

अब यही उपदेश गाथा से कहते हैं;—हे भव्य तू **[मोक्षपथे]** मोक्षमार्ग में **[आत्मानं]** अपने आत्मा को **[स्थापय]** स्थापन कर **[च तं एव]** उसीका **[ध्यायस्व]** ध्यान कर **[तं चेतयस्व]** उसी को अनुभव गोचर कर **[तत्रैव नित्यं विहर]** और उस आत्मा में ही निरंतर विहार कर **[अन्यद्रव्येषु मा विहार्षीः]** अन्यद्रव्यों में विहार मत कर ।

टीका—आचार्य उपदेश करते हैं कि हे भव्य ! अनादिसंसार से लेकर यह आत्मा अपनी बुद्धिदोष से परद्रव्य में रागद्वेषादि करने में नित्य ही तिष्ठता हुआ प्रवर्त रहा है, और तू उसको अपनी बुद्धि के ही गुण से उन परद्रव्यों में राग-द्वेष से छुड़ाकर दर्शन ज्ञानचारित्र में निरन्तर तिष्ठता अति निश्चल स्थापनकर । समस्त अन्य चिंताओं का निरोध करके अत्यन्त एकाग्र चित्त होकर दर्शनज्ञान-

चाचलितमवलंबमानो ज्ञेयरूपेणोपाधितया सर्वत एव प्रधावत्स्वपि परद्रव्येषु सर्वेष्वपि मनागपि मा विहार्षीः ॥४१२॥

एको मोक्षपथो य एष नियतो दृग्ज्ञप्तिवृत्तात्मकस्-
तत्रैवस्थितिमेति यस्तमनिशं ध्यायेच्च तं चेतति ।
तस्मिन्नेव निरंतरं विहरति द्रव्यांतराण्यस्पृशन्
सोऽवश्यं समयस्य सारमचिरान्नित्योदयं विंदति ॥२४०॥
ये त्वेनं परिहृत्य संवृतिपथप्रस्थापितेनात्मना
लिंगे द्रव्यमये वहन्ति ममतां [१]तत्त्वावबोधच्युताः ।
नित्योद्योतमखंडमेकमतुलालोकं स्वभावप्रभा-
प्राग्भारं समयस्य सारममलं नाद्यापि पश्यंति ते ॥२४१॥

भावेन अनुभवस्व **झायहि तं चेव** तमेव ध्याय निर्विकल्पसमाधौ स्थित्वा भावय । **तत्थेव विहर णिच्चं** तत्रैव विहर वर्तनापरिणति कुरु । नित्यं सर्वकालं । **मा विहरसु अण्णदव्वेसु** दृष्टश्रुतानुभूतभोगाकांक्षारूपनिदानबंधादि-

चारित्र का ही ध्यान कर। समस्त कर्म और कर्मफलरूपचेतना का त्याग करके **शुद्धज्ञानचेतनामय** होकर दर्शन-ज्ञानचारित्र का ही अनुभवकर। द्रव्य के स्वभाव के वश क्षण-क्षण में जो परिणाम उत्पन्न होते हैं उन परिणामों में तन्मय होकर दर्शन ज्ञानचारित्र में ही विहार कर। तू एक ज्ञानरूप को ही निश्चलरूप से अवलंबन करता हुआ जो ज्ञेयरूप से ज्ञान में उपाधि स्वरूप है ऐसे सब ओर से फैले हुये परद्रव्य उनमें किंचितमात्र भी विहार मत कर।

भावार्थ—परमार्थ रूप आत्मा के परिणाम दर्शन, ज्ञान और चारित्र हैं, वे ही मोक्ष मार्ग हैं, उन में ही आत्मा को स्थापन करना, उनका ही ध्यान करना, उन्हीं का अनुभव करना, और उन्हीं में प्रवर्तना, अन्य द्रव्यों में नहीं प्रवर्तना, परमार्थ से यही उपदेश है, केवल व्यवहार में ही मूढ़ न रहना ॥ ४१२ ॥

अब इसी अर्थ का कलश रूप काव्य कहते हैं—**एको मोक्ष** इत्यादि। **अर्थ**—दर्शन ज्ञान चारित्र स्वरूप यही एक मोक्ष का मार्ग है। जो पुरुष उसी में तिष्ठता है, उसी को निरंतर ध्याता है, उसी का अनुभव करता है और अन्य द्रव्यों का स्पर्शन नहीं करता, उसी में निरंतर प्रवर्तन करता है, वह पुरुष थोड़े ही काल में अवश्य समयसार अर्थात् जिसका नित्य उदय रहे, ऐसे परमात्मा के रूप को अनुभव करता है।

भावार्थ—निश्चय मोक्ष मार्ग के सेवन से थोड़े काल में ही मोक्ष की प्राप्ति होती है यह नियम है ॥२४०॥

---

१ तत्त्वज्ञानबहिर्भूता इत्यर्थः।

पासंडीलिंगेसु व गिहिलिंगेसु व बहुप्पयारेसु ।
कुव्वंति जे ममत्तं तेहिं ण णायं समयसारं ॥४१३॥

पाखंडिलिंगेषु वा गृहिलिंगेषु वा बहुप्रकारेषु ।
कुर्वंति ये ममतां तैर्न ज्ञातः समयसारः ॥४१३॥

ये खलु श्रमणोऽहं श्रमणोपासकोऽहमिति द्रव्यलिंगममकारेण मिथ्याहंकारं कुर्वंति तेऽनादिरूढव्यवहारविमूढाः प्रौढविवेकं निश्चयमनारूढाः परमार्थसत्यं भगवंतं समयसारं न पश्यंति ॥४१३॥

परद्रव्यालंबनोत्पन्नशुभाशुभसंकल्पविकल्पेषु मा विहार्षीः, मा गच्छ, मा परिणतिं कुर्विति ॥ ४१२ ॥ अथ सहजशुद्धपरमात्मानुभूतिलक्षणभावलिंगरहिता ये द्रव्यलिंगे ममता कुर्वंति तेऽद्यापि समयसारं न जानंतीति प्रकाशयति;—पाखं-

आगे कहते हैं कि जो द्रव्यलिंग को ही मोक्ष मार्ग मान कर उसमें ममत्व रखते हैं वे मोक्ष को नहीं पाते उसकी सूचना का काव्य है—**ये त्वेन** इत्यादि । **अर्थ**—जो पुरुष इस पूर्वोक्त परमार्थ स्वरूप मोक्ष मार्ग को छोड़कर व्यवहारमार्ग में स्थापन किये आत्मा के बाह्य भेष में ही ममता करते हैं, अर्थात् यह जानते हैं कि यही हमको मोक्ष प्राप्त कराएगा वे पुरुष तत्त्व के यथार्थज्ञान से रहित हुए मुनिपद लेने से भी इस समयसार को नहीं पाते । कैसा है समयसार ? जिसका नित्य उदय है, कोई भी विरोधी होकर उसके उदय का नाश नहीं कर सकता, अखंड है, जिसमें अन्य ज्ञेय आदि के निमित्त से खंड नहीं होता, एक है अर्थात् पर्यायोंकर अनेक अवस्थायें होती हैं तौ भी एकरूपपने को नहीं छोड़ता, जिसके समान अन्य नहीं ऐसा जिसका प्रकाश है, सूर्यादिक के प्रकाश की ज्ञान के प्रकाश को उपमा नहीं लग सकती । अपने स्वभाव की प्रभा का प्राग्भार है, अर्थात् जिसका भार अन्य नहीं सहन कर सकता तथा अमल है अर्थात् रागादि विकार रूप मल से रहित है । ऐसे परमात्मा के स्वरूप को द्रव्यलिंगी नहीं पा सकता ॥ २४१ ॥

अब इसी अर्थ की गाथा कहते हैं;—[**ये**] जो पुरुष [**पाखंडिलिंगेषु**] पाखंडी लिंगों में [**वा**] अथवा [**बहुप्रकारेषु गृहिलिंगेषु वा**] बहुत भेद वाले गृहस्थ लिंग में [**ममत्वं**] ममता [**कुर्वंति**] करते हैं अर्थात् हमको ये ही मोक्ष के देनेवाले हैं ऐसे, [**तैः**] उन पुरुषों ने [**समयसारः**] समय सार को [**न ज्ञातः**] नहीं जाना ॥

टीका—जो पुरुष निश्चयतः ऐसा मानते हैं कि मैं श्रमण हूं, अथवा श्रमण का उपासक हूं, इस तरह द्रव्यलिंग में ममकार करके मिथ्या अहंकार करते हैं, वे अनादि के चले आये व्यवहार में विमूढ़ हुए भेदज्ञान वाले निश्चयनय को नहीं पाते हुए परमार्थ से सत्यार्थभगवान ज्ञानरूपसमयसार को नहीं देखते ।

भावार्थ—जो अनादि कालीन परद्रव्य के संयोग से व्यवहार में मोही हैं वे ऐसा जानते हैं कि यह बाह्य महाव्रतादि रूप भेद ही हमको मोक्ष प्राप्त करायेगा परन्तु जिससे भेदज्ञान का जानना होता है ऐसे निश्चयनय को नहीं जानते, उनके सत्यार्थपरमात्मरूपशुद्धज्ञानमयसमयसार की प्राप्ति नहीं होती।४१३।

व्यवहारविमूढदृष्टयः परमार्थं कलयंति नो जनाः ।
तुषबोधविमुग्धबुद्धयः कलयंतीह तुषं न तंडुलं ॥ २४२ ॥
द्रव्यलिंगममकारमीलितैः दृश्यते समयसार एव न ।
द्रव्यलिंगमिह यत्किलान्यतो ज्ञानमेकमिदमेव हि स्वतः ॥ २४३ ॥

ववहारिओ पुण णओ दोण्णिवि लिंगाणि भणइ मोक्खपहे ।
णिच्छयणओ ण इच्छइ मोक्खपहे सव्वलिंगाणि ॥ ४१४ ॥

व्यावहारिकः पुनर्नयो द्वे अपि लिंगे भणति मोक्षपथे ।
निश्चयनयो नेच्छति मोक्षपथे सर्वलिंगानि ॥ ४१४ ॥

डिलिंगेसु व गिहिलिंगेसु व बहुप्पयारेसु कुव्वंति जे ममत्तिं वीतरागस्वसंवेदनज्ञानलक्षणभावलिंगरहितेषु निर्ग्रंथरूपपाखंडिद्रव्यलिंगेषु कौपीनचिह्नादिगृहस्थद्रव्यलिंगेषु बहुप्रकारेषु ये ममतां कुर्वंति **तेहिं ण णादं समयसारं** जगत्त्रयकालत्रयवर्तिख्यातिपूजालाभमिथ्यात्वकामक्रोधादिसमस्तपरद्रव्यालंबनसमुत्पन्नशुभाशुभसंकल्पविकल्परहितः शून्यः चिदानंदैकस्वभावशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुचरणरूपाभेदरत्नत्रयात्मकनिर्विकल्पसमाधिसंजातवीतरागसहजापूर्वपरमाह्लादरूपसुखरसानुभवपरमसमरसीभावपरिणामेन सालंबनः पूर्णकलशवद्भरितावस्थः केवलज्ञानाद्यनंतचतुष्टयव्यक्तिरूपस्य

अब इसी अर्थ का कलशरूप काव्य कहते हैं—**व्यवहार** इत्यादि । **अर्थ**—जो लोक व्यवहार में ही मोहित बुद्धि वाले हैं वे परमार्थ को नहीं जानते । जैसे लोक में तुष (भूषा) के ही ज्ञान में विमुग्ध बुद्धि वाले तुष को ही चावल जानते हैं वे तंदुल को चावल नहीं जानते ।।

भावार्थ—जो परमार्थ आत्मा का स्वरूप नहीं जानते और व्यवहार में ही मूढ़ हो रहे हैं अर्थात् शरीरादि परद्रव्य को ही आत्मा जानते हैं वे परमार्थ आत्मा को नहीं जानते । जैसे तुष और तंदुल का भेद न जानने वाले को पराल (छिलके) को कूटने से तंदुल की प्राप्ति नहीं होती, तुष और तंदुल का भेदज्ञान होने पर ही तंदुल पा सकता है ।। २४२ ।।

आगे इसी अर्थ के दृढ़ करने को काव्य कहते हैं—**द्रव्यलिंग** इत्यादि । **अर्थ**—जो द्रव्यलिंग के मोह से अंधे हैं उनसे समयसार नहीं देखा जा सकता; क्योंकि इस लोक में द्रव्यलिंग तो अन्यद्रव्य से होता है और ज्ञान अपने आत्मद्रव्य से ही होता है ।

भावार्थ—जो द्रव्यलिंग को ही अपना मानते हैं वे अंधे हैं ।। २४३ ।।

आगे कहते हैं कि व्यवहारनय तो मुनिश्रावक के भेद से दो प्रकार के लिंगों को मोक्षमार्ग कहता है और निश्चयनय किसी लिंग को मोक्षमार्ग नहीं कहता;—**[व्यावहारिकः नयः पुनः]** व्यवहारनय तो **[द्वे लिंगे अपि]** मुनि श्रावक के भेद से दोनों ही प्रकार के लिंगों को **[मोक्षपथे भणति]** मोक्षमार्ग कहता है और **[निश्चयनयः]** निश्चयनय **[सर्वलिंगानि]** सभी लिंगों को **[मोक्षपथे न इच्छति]** मोक्षमार्ग में इष्ट नहीं करता ।

यः खलु श्रमणश्रमणोपासकभेदेन द्विविधं द्रव्यलिंगं मोक्षमार्ग इति प्ररूपणप्रकारः स केवलं व्यवहार एव, न परमार्थस्तस्य स्वयमशुद्धद्रव्यानुभवनात्मकत्वे सति परमार्थत्वाभावात्। यदेव श्रमणश्रमणोपासकविकल्पातिक्रांतं दृशिज्ञप्तिवृत्तप्रवृत्तिमात्रं शुद्धज्ञानमेवैकमिति निस्तुषसंचेतनं परमार्थः, तस्यैव स्वयं शुद्धद्रव्यानुभवनात्मकत्वे सति परमार्थत्वात्। ततो ये व्यवहारमेव परमार्थबुद्ध्या चेतयंते ते समयसारमेव न चेतयंते। य एव परमार्थं परमार्थबुद्ध्या चेतयंते ते एव समयसारं चेतयंते ॥ ४१४ ॥

अलमलमतिजल्पैर्दुर्विकल्पैरनल्पैरयमिह परमार्थश्चेत्यतां नित्यमेकः।
स्वरसविसरपूर्णज्ञानविस्फूर्तिमात्रान्न खलु समयसारादुत्तरं किंचिदस्ति ॥२४४॥

साक्षादुपादेयभूतस्य कार्यसमयसारस्योत्पादको योऽसौ निश्चयकारणसमयसारः स खलु तेनं ज्ञात इति ॥ ४१३ ॥ अथ निर्विकारशुद्धात्मसंवित्तिलक्षणभावलिंगसहितं निर्ग्रंथयतिलिंगं कोपीनकरणादिबहुभेदसहितं गृहिलिंगं चेति द्वयमपि मोक्षमार्गे व्यवहारनयो मन्यते। निश्चयनयस्तु सर्वद्रव्यलिंगानि न मन्यत इत्याख्याति;—**ववहारिओ पुण णओ दोण्णिवि लिंगाणि भणदि मोक्खपहे** व्यावहारिकनयो द्वे लिंगे मोक्षपथे मन्यते। केन कृत्वा? निर्विकारस्वसंवित्तिलक्षणभाव-

---

टीका—मुनि और उपासक—श्रावक के भेद से लिंग दो प्रकार का है। वे दोनों ही लिंग मोक्षमार्ग हैं ऐसा कहना केवल व्यवहार ही है परमार्थ नहीं है, क्योंकि इस व्यवहारनय के स्वयं अशुद्ध द्रव्य का अनुभव स्वरूपपना होने से परमार्थपने का अभाव है। तथा मुनि और श्रावक के भेद से भिन्न दर्शन ज्ञान चारित्र की प्रवृत्तिमात्र निर्मलज्ञान ही एक है, ऐसा निर्मल अनुभवन वही परमार्थ है, वही मोक्षमार्ग है। क्योंकि ऐसे ज्ञान के ही स्वयं शुद्धद्रव्यरूप होने का स्वरूपपना होने से परमार्थपना है। इसलिये जो पुरुष केवल व्यवहार का ही परमार्थ बुद्धि से अनुभव करते हैं वे समयसार को अनुभव नहीं करते, जो परमार्थ को ही परमार्थ की बुद्धि से अनुभव करते हैं वे ही इस समयसार को अनुभव करते हैं।

भावार्थ—व्यवहारनय का विषय भेद रूप अशुद्धद्रव्य परमार्थ नहीं है। और निश्चयनय का विषय अभेदरूप शुद्ध द्रव्य परमार्थ है। जो व्यवहार को ही निश्चय मान कर प्रवर्तन कर रहे हैं उनको समयसार की प्राप्ति नहीं है, और जो परमार्थ को परमार्थ जानते हैं उनको समयसार की प्राप्ति होती है वे ही मोक्ष पाते हैं ॥ ४१४ ॥

आगे कहते हैं कि बहुत कहने से क्या लाभ, एक परमार्थ का ही चिंतवन करना। उसका काव्य है—**अलमल** इत्यादि। **अर्थ**—आचार्य कहते हैं कि बहुत कहने से और बहुत से दुर्विकल्पों से तो कुछ लाभ नहीं। इस अध्यात्मग्रंथ में इस एक परमार्थ को ही निरंतर अनुभवन करना चाहिये। क्योंकि वास्तव में अपने रस के फैलाव से पूर्ण जो ज्ञान उसके स्फुरायमान होने मात्र जो समयसार—परमात्मा उसके सिवाय अन्य कुछ भी सार नहीं है।

भावार्थ—पूर्ण ज्ञानस्वरूप आत्मा का अनुभव निश्चय से करना ही सार है ॥२४४॥

इदमेकं जगच्चक्षुरक्षयं याति पूर्णतां ।
विज्ञानघनमानंदमयमध्यक्षतां नयत् ॥ २४५ ॥

लिंगस्य बहिरंगसहकारिकारणत्वेनेति । **णिच्छयणओ दु णेच्छदि मुक्खपहे सव्वलिंगाणि** निश्चयनयस्तु निर्विकल्पसमाधिरूपत्रिगुप्तिगुप्तबलेन अहं निर्ग्रंथलिंगी, कौपीनधारकोऽहमित्यादि मनसि सर्वद्रव्यलिंगविकल्पं रागादिविकल्पवन्नेच्छति । कस्मात् ? स्वयमेव निर्विकल्पसमाधिस्वभावत्वात् इति । किंच—अहो शिष्य ! **पाखण्डीलिंगाणि य** इत्यादि गाथासप्तकेन द्रव्यलिंगं निषिद्धमेवेति त्वं मा जानाहि किं तु निश्चयरत्नत्रयात्मकनिर्विकल्पसमाधिरूपं भावलिंगरहितानां यतीनां संबोधनं कृतं । कथं ? इति चेत्, अहो तपोधना ! द्रव्यलिंगमात्रेण संतोषं मा कुरुत किंतु द्रव्यलिंगाधारेण निश्चयरत्नत्रयात्मकनिर्विकल्पसमाधिरूपभावनां कुरुत । ननु भवदीयकल्पनेयं, द्रव्यलिंगनिषेधो न कृत इति अत्र ग्रंथे-पूर्वलिखितमास्ते **ण य होदि मोक्खमग्गो लिंग** इत्यादि ? नैव **ण य होदि मोक्खमग्गो लिंग**मित्यादिवचनेन भावलिंगरहितं द्रव्यलिंगं निषिद्धं न च भावलिंगसहितं । कथं ? इति चेत् द्रव्यलिंगाधारभूतो योऽसौ देहस्तस्य ममत्वं निषिद्धं । न च द्रव्यलिंगं निषिद्धं । केन रूपेण ? इति चेत्, पूर्वं दीक्षाकाले सर्वसंगपरित्याग एव कृतो न च देहत्यागः । कस्मात् ? देहाधारेण ध्यानज्ञानानुष्ठानं भवति इति हेतोः । नच देहस्य पृथक्त्वं कर्तुमायाति शेषपरिग्रहवदिति । वीतरागध्यानकाले पुनर्मदीयो देहोऽहं लिंगीत्यादिविकल्पो व्यवहारेणापि न कर्तव्यः । देहनिर्ममत्वं कृतं कथं ज्ञायते ? इति चेत् **जं देहम्मिणममा अरिहा दंसणणाणचरित्ताणि सेवंते** इत्यादि वचनेनेति । न हि शालितंदुलस्य बहिरंगतुषे विद्यमाने मत्यभ्यंतरतुषस्य त्यागः कर्तुमायाति । अभ्यंतरतुषत्यागे सति बहिरंगतुषत्यागो नियमेन भवत्येव । अनेन न्यायेन सर्वसंगपरित्यागरूपे बहिरंगद्रव्यलिंगे सति भावलिंगं भवति न भवति वा नियमो नास्ति, अभ्यंतरे तु भावलिंगे सति सर्वसंगपरित्यागरूपं द्रव्यलिंगं भवत्येवेति । हे भगवन् भावलिंगे सति बहिरंगं द्रव्यलिंगं भवतीति नियमो नास्ति **साहारणासाहारणे**त्यादि वचनादिति ? परिहारमाह-कोऽपि तपोधनो ध्यानारूढस्तिष्ठति तस्य केनापि दुष्टभावेन वस्त्रवेष्टनं कृतं । आभरणादिकं वा कृतं तथाप्यसौ निर्ग्रंथ एव । कस्मात् ? इति चेत्, बुद्धिपूर्वकममत्वाभावात् पांडवादिवत् । येऽपि घटिकाद्वयेन मोक्षं गता भरतचक्रवर्त्यादयस्तेऽपि निर्ग्रंथरूपेणैव । परं किन्तु तेषां परिग्रहत्यागं लोका न जानंति स्तोककालत्वादिति भावार्थः । एवं भावलिंगरहितानां द्रव्यलिंगमात्रं मोक्षकारणं न भवति । भावलिंगसहितानां पुनः सहकारिकारणं भवतीति व्याख्यानमुख्यत्वेन त्रयोदशस्थले गाथासप्तकं गतं । अत्राह शिष्यः—केवलज्ञानं शुद्धं छद्मस्थज्ञानं पुनरशुद्धं शुद्धस्य केवलज्ञानस्य कारणं न भवति । कस्मात् ? इति चेत्—**सुद्धं तु वियाणंतो सुद्धमेवप्पयं लहदि जीवो**

आगे इस समयसार ग्रंथ को पूर्ण करते हैं उसकी सूचना का श्लोक है—**इदमेकं** इत्यादि । **अर्थ**—यह समयप्राभृत ग्रंथ पूर्णता को प्राप्त होता है । कैसा है ? जिसका विनाश न हो सके ऐसा जगत के अद्वितीय नेत्र के समान है, क्योंकि वह शुद्ध परमात्मा समयसार आनंदमय है उसको प्रत्यक्ष प्राप्त करता है ।

भावार्थ—यह समयप्राभृतग्रंथ वचनरूप तथा ज्ञानरूप दोनों ही तरह से नेत्र के समान है, क्योंकि जैसे नेत्र घटपटादि को प्रत्यक्ष दिखलाता है वैसे यह भी शुद्ध आत्मा के स्वरूप को प्रत्यक्ष अनुभवगोचर दिखलाता है ॥२४५ ॥

जो समयपाहुडमिणं पडिहूणं अत्थतच्चदो णाउं।
अत्थे ठाही चेया सो होही उत्तमं सोक्खं ॥ ४१५ ॥

यः समयप्राभृतमिदं पठित्वा अर्थतत्त्वतो ज्ञात्वा।
अर्थे स्थास्यति चेतयिता स भविष्यत्युत्तमं सौख्यं ॥ ४१५ ॥

यः खलु समयसारभूतस्य भगवतः परमात्मनोऽस्य विश्वप्रकाशकत्वेन विश्वसमयस्य

इति वचनात् इति ? नैवं, छद्मस्थज्ञानस्य कथंचिच्छुद्धाशुद्धत्वं। तद्यथा—यद्यपि केवलज्ञानापेक्षया शुद्धं न भवति तथापि मिथ्यात्वरागादिरहितत्वेन वीतरागसम्यक्त्वचारित्रसहितत्वेन च शुद्धं। अभेदनयेन पुनः छद्मस्थानां संबंधि भेदज्ञानमात्मस्वरूपमेव ततः कारणात्तेनैकदेशव्यक्तिरूपेणापि सकलव्यक्तिरूपं केवलज्ञानं जायते नास्ति दोषः। अथ मतं सावरणत्वात्क्षायोपशमिकत्वाद्वा शुद्धं न भवति तर्हि मोक्षोऽपि नास्ति। कस्मात् ? छद्मस्थानां ज्ञानं यद्यप्येकदेशेन निरावरणं तथापि केवलज्ञानापेक्षया नियमेन सावरणमेव क्षायोपशमिकमेवेति। अथाभिप्रायः परिणामिकभावशुद्धः तेन मोक्षो भविष्यति तदपि न घटते। कस्मात् ? इति चेत् केवलज्ञानात्पूर्वं पारिणामिकभावस्य शक्तिमात्रेण शुद्धत्वं न व्यक्तिरूपेणेति। तथाहि—जीवत्वभव्यत्वाभव्यत्वरूपेण त्रिविधो हि पारिणामिकः। तत्र तावदभव्यत्वं मुक्तिकारणं न भवति यत्पुनर्जीवत्वभव्यत्वद्वयं तस्य द्वयस्य तु यदायं जीवो दर्शनचारित्रमोहनीयोपशमक्षयोपशमक्षयलाभेन वीतरागसम्यग्दर्शनज्ञानचारित्रत्रयेण परिणमति तदा शुद्धत्वं। तच्च शुद्धत्वं—औपशमिकक्षायोपशमिकक्षायिकभावत्रयस्य संबंधि मुख्यवृत्त्या, पारिणामिकस्य पुनर्गौणत्वेनेति। तत्र शुद्धपारिणामिकस्य बंधमोक्षस्य कारणरहितत्वं पंचास्तिकायेऽनेन श्लोकेन भणितमास्ते '

मोक्षं कुर्वंति मिश्रौपशमिकक्षायिकाभिधाः।
बंधमौदयिको भावो निष्क्रियः पारिणामिकः ॥ १ ॥

तत एव स्थितं निर्विकल्पशुद्धात्मपरिच्छित्तिलक्षणं वीतरागसम्यक्त्वचारित्राविनाभूतमभेदनयेन तदेव शुद्धात्मशब्दवाच्यं क्षायोपशमिकमपि भावश्रुतज्ञानं मोक्षकारणं भवतीति। शुद्धपारिणामिकभावः पुनरेकदेशव्यक्तिलक्षणायां कथंचिद्भेदाभेदरूपस्य द्रव्यपर्यायात्मकस्य जीवपदार्थस्य शुद्धभावनावस्थायां ध्येयभूतद्रव्यरूपेण तिष्ठति न च ध्यानपर्यायरूपेण, कस्मात् ? ध्यानस्य विनश्वरत्वात् इति ॥ ४१४ ॥ अथेदं शुद्धात्मतत्त्वं निर्विकारस्वसंवेदनप्रत्यक्षेण भावयन्नात्मा परमाक्षयसुखं प्राप्नोतीत्युपदिशति;—**श्रीकुंदकुंदाचार्यदेवा समयसार** ग्रंथसमाप्तिं कुर्वंतः फलं दर्शयंति—तद्यथा—**जो समयपाहुडमिणं पठिदूणय** यः कर्ता समयप्राभृताख्यमिदं शास्त्रं पूर्वं पठित्वा न केवलं पठित्वा **अत्थतच्चदो णादुं** ज्ञात्वा च। कस्मात् ? ग्रंथार्थतः न केवलं ग्रंथार्थतः ? तत्त्वतो भावपूर्वेण **अत्थे ठाहिदि** पश्चादुपादेयरूपे

अब भगवान कुन्दकुन्दाचार्य इस ग्रंथ को पूर्ण करते हैं सो इसकी महिमारूप पढ़ने के फल की गाथा कहते हैं—**[यः चेतयिता]** जो चेतयिता पुरुष—भव्यजीव **[इदं समयप्राभृतं पठित्वा]** इस समय प्राभृत को पढ़कर **[अर्थतत्त्वतः ज्ञात्वा]** अर्थ से और तत्त्व से जानकर **[अर्थे स्थास्यति]** इसके अर्थ में ठहरेगा **[सः]** वह **[उत्तमं सौख्यं भविष्यति]** उत्तम सुख स्वरूप होगा।

टीका—जो भव्य पुरुष निश्चयतः इस शास्त्र को पढ़ कर सर्व पदार्थों के प्रकाशन में समर्थ ऐसे परमार्थभूत चैतन्य प्रकाशरूप आत्मा का अर्थ से तथा तत्त्व से निश्चय करता हुआ इसी के अर्थ

प्रतिपादनात् स्वयं शब्दब्रह्मायमाणं शास्त्रमिदमधीत्य विश्वप्रकाशनसमर्थपरमार्थभूतचित्प्रकाशरूपं परमात्मानं निश्चिन्वन् अर्थतस्तत्त्वतश्च परिच्छिद्य अस्यैवार्थभूते भगवति एकस्मिन् पूर्णे विज्ञान-

शुद्धात्मलक्षणेऽर्थे निर्विकल्पसमाधौ स्थास्यति **चेदा सो पावदि उत्तमं सोक्खं** स चेतयितात्मा भाविकाले प्राप्नोति लभते। किं लभते ? वीतरागसहजापूर्वपरमाह्लादरूपं, आत्मनोपादानसिद्धं स्वयमतिशयवद्वीतबाधं विशालवृद्धिह्रासव्यपेतं विषयविरहितं निःप्रतिद्वंद्वभावं। अन्यद्रव्यानपेक्षं निरुपममभितं, शाश्वतं सर्वकालमुत्कृष्टानंतसारं परमसुखं भवतस्तस्य सिद्धस्य जातमिति।

अथाह शिष्यः—हे भगवन् ? अतींद्रियसुखं निरंतर व्याख्यातं भवद्भिस्तच्च जनैर्न ज्ञायते ? भगवानाह—कोऽपि देवदत्तः स्त्रीसेवनाप्रभृतिपंचेंद्रियविषयव्यापाररहितप्रस्तावे निर्व्याकुलचित्तः तिष्ठति, स केनापि पृष्टः भो देवदत्त ! सुखेन तिष्ठसि त्वमिति? तेनोक्तं सुखमस्तीति तत्सुखमतींद्रियं। कस्मात् ? इति चेत् संसारिकसुखं पंचेंद्रियप्रभवं। यत्पुनरतींद्रियसुखं तत्पंचेंद्रियविषयव्यापाराभावेऽपि दृष्टं यत इदं तावत्सामान्येनातींद्रियसुखमुपलभ्यते। यत्पुनः पंचेंद्रियमनोभवसमस्तविकल्पजालरहितानां समाधिस्थपरमयोगिनां स्वसंवेदनगम्यमतीन्द्रियसुखं तद्विशेषेणेति। यच्च मुक्तात्मनामतींद्रियसुखं तदनुमानगम्यमागमगम्यं च। तथाहि—मुक्तानामिंद्रियविषयव्यापाराभावेऽपि अतींद्रियसुखमस्तीति पक्षः। कस्मात् ? इति चेत् इदानीं तेन विषयव्यापारातीतनिर्विकल्पसमाधिरतपरममुनीद्वारा स्वसंवेद्यात्मसुखोपलब्धिरिति हेतुः। एवं पक्षहेतुरूपेण द्व्यंगमनुमानं ज्ञातव्यं। आगमे तु प्रसिद्धमेवात्मोपादानसिद्धमित्यादिवचनेन। अतः कारणात् अतींद्रियसुखे संदेहो न कर्तव्य इति।

उक्तं च—यद्देवमनुजाः सर्वे सौख्यमक्षार्थसंभवं।
निर्विशंति निराबाधं सर्वाक्षप्रीणनक्षम ॥ १ ॥
सर्वेणातीतकालेन यच्च भुक्तं महर्द्धिकं।
भाविनो ये च भोक्ष्यंति स्वादिष्टं स्वांतरंजकं ॥ २ ॥
अनंतगुणितं तस्मादत्यक्षं स्वस्वभावजं।
एकस्मिन् समये भुंक्ते तत्सुखं परमेश्वरः ॥ ३ ॥

भूत भगवान् एक पूर्ण विज्ञानघनस्वरूप परब्रह्म उसमें सब प्रकार से उद्यम करके ठहरेगा, वह पुरुष आप ही उत्तम अनाकुलता लक्षण वाले सुख रूप हो जायगा। यह शास्त्र समयसारभूत भगवान् परमात्मा सबके प्रकाशने वाला होने से जिसको विश्व समय कहते हैं उसके प्रकाशित करने से आप स्वयं शब्दब्रह्म सरीखा है। वह सुख तत्काल उदय रूप प्रगट होता एक चैतन्य रस से भरे अपने स्वभाव में अच्छी तरह ठहरा निराकुल आत्म स्वरूपपने से परमानन्द शब्द द्वारा कहने योग्य है ॥

भावार्थ—इस शास्त्र का नाम समय प्राभृत है। समय नाम पदार्थ का है उसको कहने वाला है अथवा समय नाम आत्मा का है उसको कहने वाला है। वह आत्मा सब पदार्थों का प्रकाशक है उसको यह कहता है। सब पदार्थों के कहने वाले को शब्दब्रह्म कहते हैं। इस प्रकार आत्मा को कहने से इस शास्त्र को भी शब्दब्रह्म सरीखा कहना चाहिये। शब्दब्रह्म तो द्वादशांग शास्त्र है इसको भी उसकी उपमा है। यह शब्दब्रह्म परमब्रह्म को (शुद्ध परमात्मा को) साक्षात् दिखलाता है। जो इस शास्त्र को पढ़ कर इसके यथार्थ अर्थ में ठहरेगा वह परमब्रह्म को पायेगा। इसी से परमानंद रूप

घने परमब्रह्मणि सर्वारंभेण स्थास्यति चेतयिता, स साक्षात्तत्क्षणविजृम्भमाणचिदेकरसनिर्भरस्वभावसुस्थितनिराकुलात्मरूपतया परमानंदशब्दवाच्यमुत्तममनाकुलत्वलक्षणं सौख्यं स्वयमेव भविष्यतीति ॥४१५॥

